হিমালয়ের শিখরদেশস্থিত তুষারসঙ্ঘাতে সূর্য্যকিরণ পতিত হইলেও তাহা যেমন অন্তরে ও বাহিরে সম্পূর্ণ শীতলই থাকে, শীতলতা পরিত্যাগ করেনা, সেইরূপ এই সিদ্ধ, বিপৎপাতেও অন্তরের ও বাহিরের শান্তি পরিত্যাগ করেন না, কারণ, তিনি (অন্তরে ও বাহিরে) অনাবৃতানন্দ-স্বভাবহেতু পূর্ণ।

স্ফটিকঃ স্ফটিকত্বজ্ঞঃ সলিলং সলিলত্ববিৎ।
গগনং গগনত্বজ্ঞং যদি স্যাৎ সা দশা চিতঃ॥ ১২

অন্বয়—যদি স্ফটিকঃ স্ফটিকত্বজ্ঞঃ স্যাৎ, সলিলং সলিলত্ববিৎ (স্যাৎ), গগনং গগনত্বজ্ঞং (স্যাৎ) তর্হি সা দশা (পঞ্চম্যারূঢ়স্য পুরুষস্য) চিতঃ জ্ঞেয়া।

স্ফটিক যদি আপনার স্ফটিকতা ("শিলাধেনুষট্ক" অগ্রে দ্রষ্টব্য)—রাগাদি দ্বারা অস্পৃষ্টতা—জানিতে পারিত, জল যদি আপনার জলত্ব—সমুদ্রে আরোপিত নীলতাদি দ্বারা অস্পৃষ্টত্ব, এবং তরঙ্গাদি বিকার সত্ত্বেও আপনার নির্ব্বিকারতা—বুঝিতে পারিত এবং আকাশ যদি আপনার আকাশতা ("জ্ঞানিগজ গর্জ্জনম্" চতুর্দ্দশ শ্লোক দ্রষ্টব্য।) আরোপিত নীলতা এবং কটাহাকারাদি দ্বারা অস্পৃষ্টত্ব—জানিতে পারিত, তাহা হইলে, তাহাদের অবস্থা পঞ্চমভূমিকারূঢ় সিদ্ধের চেতনার অনুরূপ হইত। (তাহার উপমা পাওয়া যায় না, এই মাত্রই ইহাদ্বারা সূচিত হইতেছে।)

বুধো যথা ন মুহ্যেত নানারঙ্গগৃহেষ্বপি।
তথা মুহ্যতি নাত্মায়ং নানারঙ্গগৃহেষ্বপি॥ ১৩

অন্বয়—যথা বুধঃ নানারঙ্গগৃহেষু অপি ন মুহ্যেত, তথা অয়ম্ আত্মা নানারঙ্গগৃহেষু অপি ন মুহ্যতি।

যে ভবনে নিঃসরণমার্গবিস্মারক দর্পণ প্রভৃতি নানাবিধ চিত্তবিমোহক দ্রব্য আছে, সেই ভবনে প্রবেশ করিয়া, যেমন চতুর ব্যক্তি মোহপ্রাপ্ত হন না, সেইরূপ এই পঞ্চম্যারূঢ় পুরুষ, যিনি পরিপূর্ণ আত্মস্বরূপ উপলব্ধি করিয়াছেন, তিনি, লোকদৃষ্টিতে ইন্দ্রিয়দ্বারা মোহকর বিষয়ব্যবহারে প্রবৃত্ত হইলেও, তাহাদিগকে সত্য মনে করিয়া, আত্মাকে বিস্মৃত হন না।

নানাবিধ সুখদুঃখের মধ্যে মোহাভাব পঞ্চম ভূমিকার লক্ষণ।

যোগী ক্রীড়তি নিদ্রাতি হসত্যপি বদত্যপি।
বহির্মুখৈরপি জনৈঃ পিশাচৈরিব শঙ্করঃ॥ ১৪

অন্বয়—শঙ্করঃ পিশাচৈঃ ইব, যোগী বহির্মুখৈঃ জনৈঃ অপি ক্রীড়তি, নিদ্রাতি, অপি হসতি অপি বদতি।

ইনি, বহির্মুখ বা মূঢ় লোকদিগের সঙ্গেও ক্রীড়া করেন, তাহাদের মত নিদ্রা যান, তাহাদের সহিত হাস্যালাপ করেন, ও সম্ভাষণাদি করেন। এরূপ ব্যবহারে তাঁহার যোগিত্বের হানি হয় না। শঙ্কর যেমন পিশাচ-গণের সহিত ক্রীড়াদি করিলেও, তাঁহার শিবত্বের হানি হয় না, সেইরূপ।

সেইহেতু তত্ত্ববিদ্‌গণের সহিত, অথবা গুহাদিতে বাস, এবং মূঢ়জনের সহিত বাস, তাঁহার পক্ষে তুল্যরূপ।

ন প্রাপ্তপরমার্থস্য তুল্যামর্হতি বাসবঃ।
বাসবস্তৎপদাকাঙ্ক্ষী ন স বাসবতাপ্রিয়ঃ। ১৫

অন্বয়—বাসবঃ প্রাপ্তপরমার্থস্য তুলাং ন অর্হতি। বাসবঃ তৎপদাকাঙ্ক্ষী (ভবতি)। সঃ (পঞ্চস্থারূঢ়ঃ) ন বাসবতাপ্রিয়ঃ (অস্তি)।

যিনি সেই পরমশ্রেয়োলাভ করিয়াছেন, সেই জাতসাক্ষাৎকার পুরুষের সহিত ইন্দ্রের ও (ব্রহ্মাদিরও) তুলনা হয় না। ইন্দ্রও (ব্রহ্মাদিও) সেই পদ পাইবার আকাঙ্ক্ষা করিয়া থাকেন*। ইন্দ্রাদিপদের সুখ সেই আত্মানন্দের কণামাত্র বলিয়া এবং মিথ্যা বলিয়া, পঞ্চম্যারূঢ় পুরুষের ইন্দ্রত্বও ভাল লাগে না।

এই কারণে ব্রহ্মেন্দ্রাদিপদপ্রাপক কর্ম্মে তাঁহার রুচি নাই।

বহ্নিপক্বং যথা মাংসং পূর্ব্ববৎস্থিতমস্থিষু।
সংসক্তমপ্যসংসক্তং স্বশরীরে তথা মুনিঃ ॥ ১৬

অন্বয়—যথা বহ্নিপকং মাংসম্ অস্থিষু পূর্ব্ববৎ সংসক্তম্ অপি অসংসক্তং স্থিতং, তথা, মুনিঃ স্বশরীরে (সংসক্তঃ অপি অসংসক্তঃ)।

যেমন মাংস অগ্নিতে সিদ্ধ হইলে, পূর্ব্বের ন্যায় হাড়ের সহিত জড়িত হইয়া রহিয়াছে বলিয়া দৃষ্ট হয়, কিন্তু বিশ্লিষ্ট হইয়া গিয়াছে, সেইরূপ এই মুনি দেহের সহিত সংশ্লিষ্ট বলিয়া দৃষ্ট হইলেও বিশ্লিষ্ট হইয়া রহিয়াছেন। দেহাভিমান না থাকিলে, কাহারও দেহের চলনাদি সম্ভবপর হয় না। সেইহেতু চলনভোজনাদির দ্বারা দেহাসক্ত বলিয়া প্রতীয়মান হইলেও, তিনি দেহে অনাসক্ত, কারণ, তাঁহার অহঙ্কারাদি, বিচার দ্বারা বাধিত—মিথ্যা বলিয়া নিশ্চিত—হইয়া গিয়াছে।

এইহেতু, তিনি দেহ থাকিতেও বিদেহ, এবং তাঁহার কর্ম্মফলেচ্ছা না থাকিলেও দেহযাত্রা নির্ব্বাহ হয়।

---

* ছান্দোগ্য উপনিষদে বর্ণিত আছে, ইন্দ্র আত্মজ্ঞানলাভ করিবার জন্য ব্রহ্মার নিকট যাইয়া ব্রহ্মচর্য্য অবলম্বন করিয়াছিলেন।

তত্র শ্লোকঃ।

শৃঙ্গারশ্লোক দ্বারা পঞ্চম ভূমিকার স্বরূপ নির্ণয় করিতেছেন :—

ইয়ং পরাঙ্মুখীভূয় পতিং প্রত্যগবেক্ষতে।
প্রেমপ্রসন্নয়া দৃষ্ট্যা হ্যস্যা যৌবনমাগতম্॥ ১৭

অন্বয়—ইয়ং পরাঙ্মুখীভূয় প্রেমপ্রসন্নয়া দৃষ্ট্যা পতিং প্রত্যক্ (পৃষ্ঠতঃ) অবেক্ষতে হি (যতঃ) অস্যাঃ যৌবনম্ আগতম্।

এই নায়িকা পতির দিকে পিছন করিয়া প্রেমপ্রসন্ন নেত্রে পশ্চাৎ-দিক দিয়া পতিকে দেখিতেছে। ইহাতে বুঝিতে হইবে, তাহার যৌবন আসিয়াছে।

সিদ্ধ, ব্যবহার কালে, অহঙ্কারাদি শরীরের প্রতি সম্মুখ হইয়া,—আত্মাকে পশ্চাতে রাখিয়া, সস্নেহ বৃত্তিতে আত্মদর্শন করেন। তদ্দ্বারা বুঝিতে হইবে ব্রহ্মাকারা প্রমাবৃত্তিদ্বারা স্বাত্মসুখানুভবসামর্থ্য জন্মিয়াছে।

ন খেলতি বয়স্যাভিঃ শিথিলা গৃহকর্ম্মণি।
রহঃ পশ্যতি চিহ্নানি প্রাপ্তা প্রাণপতেঃ সুখম্॥ ১৮

অন্বয়—প্রাণপতেঃ সুখং প্রাপ্তা (সতী), বয়স্যাভিঃ (সহ) ন খেলতি, গৃহকর্ম্মণি শিথিলা ভবতি, রহঃ চিহ্নানি পশ্যতি।

প্রাণপতির সুখ পাইয়া নায়িকা আর বয়স্যাদিগের সহিত খেলা করেন না ; গৃহকর্ম্মে শিথিলা হইয়া পড়িয়াছেন, এবং গোপনে যৌবনচিহ্ন ও ভোগচিহ্ন অবলোকন করেন।

সেইরূপ পঞ্চম্যারূঢ় সিদ্ধ, আত্মানন্দ লাভ করিয়া শমদমাদির সাধনে আর প্রযত্নশীল হন না, শরীররক্ষণসাধন ভোজনাদি কর্ম্মে শিথিল হইয়া পড়েন, এবং ব্রহ্মাকারাবৃত্তির স্থিরতা, অস্থিরতা, ন্যূনতা বা আধিক্য একান্তে অবস্থান করিয়া পরীক্ষা করেন।

ন বেষো বিহিতঃ কশ্চিন্ন বা বচনচাতুরী।
কিন্তু প্রেমাতিসাতত্যাদ্বালয়া লালিতো হরিঃ॥ ১৯

অন্বয়—বালয়া (রাধয়া) কশ্চিৎ বেষঃ ন বিহিতঃ, বচনচাতুরী ন (বিহিতা), কিন্তু প্রেমাতিসাতত্যাৎ হরিঃ লালিতঃ।

শ্রীকৃষ্ণকে বশে আনিবার জন্য, যুবতী শ্রীরাধা, কোন শৃঙ্গারবেষ বিন্যাস করেন নাই, বা বচনচাতুর্য্য প্রয়োগ করেন নাই, কিন্তু নিরবচ্ছিন্ন প্রেমপ্রবাহদ্বারাই তাঁহাকে আকর্ষণ করিতে পারিয়াছিলেন।

আত্মসাক্ষাকারের জন্য সন্ন্যাসাদিব্যঞ্জক বেষপারিপাট্য কিম্বা পাণ্ডিত্যের প্রয়োজন নাই; ব্রহ্মাকারাবৃত্তির প্রতিষ্ঠায় আদর ও নৈরন্তর্য্যেরই প্রয়োজন।

নালঙ্কৃতা নোকুলীনা ন বিদগ্ধা ন সুন্দরী
যস্যাং তু রমতে স্বামী সা সৌভাগ্যবতী বধূঃ॥

অন্বয়—অলঙ্কৃতা বধূঃ ন (সৌভাগ্যবতী), কুলীনা (বধূঃ) নো (সৌভাগ্যবতী), বিদগ্ধা বধূঃ ন (সৌভাগ্যবতী), সুন্দরী বধূঃ ন (সৌভাগ্যবতী) তু, যস্যাং স্বামী রমতে সা সৌভাগ্যবতী।

বধূ নানাভূষণভূষিতা হইলেই সৌভাগ্যবতী হয় না, বা সদ্বংশ জাতা হইলে অথবা চতুরা হইলে, সৌভাগ্যবতী হয় না; কিম্বা সুন্দরী হইলেও সৌভাগ্যবতী হয় না। যে বধূর প্রেমে বশীভূত হইয়া, স্বামী তাহার সহিত ক্রীড়া করে, সেই সৌভাগ্যবতী—পতিপুত্রাদি জনিত সুখসম্পন্না, হয়।

যাঁহার কেবল সন্ন্যাসাদির বেষসৌষ্ঠব আছে, অথবা যাঁহাতে কেবল বাহ্যতঃ শান্তি, দান্তি, প্রভৃতি সুপ্রকটিত, তিনি ব্রহ্মাত্মসুখলাভের অধিকারী নহেন। কোনও প্রসিদ্ধ আচার্য্যের প্রবর্ত্তিত সম্প্রদায়ভুক্ত

হইলেই, কেহ সেই সুখলাভে অধিকারী হয় না। কেবল লৌকিক পাণ্ডিত্য বা সৌজন্যদ্বারাও সেই সুখ পাওয়া যায় না। যাঁহার বৃত্তি অদ্বৈতাত্মাকারা হইয়াছে, তিনিই সেই সুখলাভ করিয়াছেন।

যস্মিন্‌দেশে সিতা নাস্তি তদ্দেশ্যো বেত্তি কিং সিতাম্।
স এব বেদ মাধুর্য্যং যেনৈবাস্বাদিতা সিতা ॥ ২১

অন্বয়—যস্মিন্ দেশে সিতা নাস্তি, তদ্দেশ্যঃ কিং সিতাং বেত্তি? যেন সিতা আস্বাদিতা এব সঃ এব মাধুর্য্যং বেদ।

যে দেশে মিশ্রী নাই, সে দেশের লোক কি মিশ্রী জানে? যে মিশ্রী আস্বাদন করিয়াছে, সেই কেবল মিশ্রীর মাধুর্য্য জানে।

যে আত্মসুখ অনুভব করিয়াছে, তদ্ভিন্ন অন্য কে আত্মসুখ বুঝিবে?

তৃষ্ণাং বিহায় তুচ্ছেভ্যো মুনির্নিঃশল্যতাং গতঃ।
স্বরসায়নতৃপ্তাত্মা দিনানুদিনমেধতে ॥ ২২

অন্বয়—মুনিঃ তুচ্ছেভ্যঃ তৃষ্ণাং বিহায় নিঃশল্যতাং গতঃ (সন্) স্বরসায়নতৃপ্তাত্মা (সন্) দিনানুদিনম্ এধতে।

পঞ্চম্যারূঢ় সিদ্ধ যাবতীয় রূপরসাদি বিষয়ের প্রতি তৃষ্ণা পরিত্যাগ করিয়া, দেহ হইতে শল্যোদ্ধার করিলে (দেহবিদ্ধ আগন্তুক বস্তু [foreign body] নিষ্কাসিত করিলে) রোগী যেরূপ সুস্থ হয়, সেইরূপ সুস্থ হইয়া, যে আত্মসুখ, মানুষানন্দ হইতে আরম্ভ করিয়া হিরণ্যগর্ভানন্দ পর্য্যন্ত সকল আনন্দের লয়াধার, সেই আত্মসুখে তৃপ্তান্তঃকরণ হইয়া, প্রতিদিন (প্রতিক্ষণ) বৃদ্ধি পাইতে থাকেন— স্বরূপসিদ্ধিতে অগ্রসর হইতে থাকেন।

শুদ্ধিপত্র।

পৃষ্ঠা	পংক্তি	অশুদ্ধ	শুদ্ধ
৫	১৪	ধুলির	ধূলির
৩২	১২	হ	হি
৩৬	৫	ক্ষেমা	ক্ষেম
৩৮	১২	বিত্থার্জ্জনেন	বিত্তার্জ্জনেন
৪৭	১৩	উপলক্ষ	উপলক্ষ্য
৫০	২৩	তু তে	তে
৫৪	১২	বেষবিচার	বেষবিচারঃ
৫৮	৬	গ্রাহ্য,	করণীয়
		ত্যাজ্য	অকরণীয়
৫৯	৯	স্বল্প	স্বল্পং
৭৭	১৯	স্তেকঃ	স্তৈকঃ
৯২	১৩	বালে	বলে
৯২	২০	শৈথিল্যাস্ত	শৈথিল্যানন্ত
৯৩	১৭	শরীরাভ্যান্তরে	শরীরাভ্যন্তরে
৯৬	৪	২।৪৫	২।৫৪
১১৪	৫	আরোগ্যতা	অরোগতা
১১৫	৮	অসক্ত	আসক্ত

পৃষ্ঠা	পংক্তি	অশুদ্ধ	শুদ্ধ
১১৮	৭	সুষুম্না	সুষুম্ণা
১২২	১১	ম্লেট্রে	ম্লেঢ্রে
১২২	১১	ভ্রব্রো	ভ্রুবো
১২৮		কোণে	২৯। হঠযোগঃ ৩০। শিবশক্তিপরাক্রমঃ।
১৪২	১০	বচণেনৈ	বচনেনৈ
		++ ন্নূবাচ	++ ন্নুবাচ
১৫১	৬	সধর্ম্মানুষ্ঠান	স্বধর্ম্মানুষ্ঠান
১৬৯	৪	ঐহিকামুষ্মিকে	ঐহিকামু-ষ্মিকে
১৯৫	১৭	সেইরূপ।	সেইরূপ
১৯৭	১৭	স্তহি	স্তুহি
২০১	৫	তেনাত্মনস্ত	তেনাত্মনন্ত
২০১	২১	নৈলম্	নৈল্যম্
২১৬	১৭	সংস্পর্শ	সংস্পর্শ
২১৭	১৭	জাগবে	জাগরে
২২৪	৮	বিষযে	বিষয়ে
২২৫	১৩	গগনত্বঞ্জং	গগনত্বঞ্জং

পৃষ্ঠা	পংক্তি	অশুদ্ধ	শুদ্ধ
২২৭	২	পঞ্চস্যারূঢ়	পঞ্চম্যারূঢ়
২৪১	১১	নিক্রিয়	নিষ্ক্রিয়
২৫৩	১	প্রতিভাসিক	প্রাতিভাসিক
২৯৭	১১	মকৃত্য	মকৃত্বা
২৯৭	১৯	শ্রদ্ধ	শ্রদ্ধা
৩৫৮	১২	জ্যোতির্ষ	জ্যোতিষ
৩৬৬	১৮	প্রেমনি	প্রেমণি
৩৮৪	১৫	বিবৃদ্ধসত্ব	বিবৃদ্ধসত্ত্ব
৪০৭	১৫	জ্ঞান	জ্ঞানী
৪২৩	১৬	ব্রহ্মচর্চাবিংশতিঃ ৪৫।	ব্রহ্মচর্চাবিংশতিঃ
৪২৮	১৬	সামান্যাধিকরণ্য	সামানাধিকরণ্য
৪৩১	১৬	সত্ত্বং	স্বত্বং
৪৩২	১৭	"ব্রহ্ম" পারে না	"ব্রহ্ম" হইতে পারে না
৪৮৭	৫	গহিত	গর্হিত
৫৩৮	৮	অবিদ্যাখ্যং	অবিদ্যাখ্যং ইদং
৫৫৭	১২	মদন্বতঃ	মুদন্বতঃ
৫৭৮	১২	প্রভিলভ্য	প্রতিলভ্য
৫৮১	২১	কেবল বৈরাগ্যেও	কেবলবৈরাগ্যেও
৬১২	১২	ইত্যাদি রূপপ্রত্যাশা	ইত্যাদিরূপ প্রত্যাশা
৬২৩	১৭	স্পৃ শঞ্জিঘ্রন্	স্পৃশঞ্জিঘ্রন্
৬৬৩	১১	বহিমুখতা	বহির্মুখতা
৬৮৯	৪	প্রকৃভিকে	প্রকৃতিকে
	১১	"ঈশান"	"ঈশানঃ"
"	২২	বুদ্ধিরেবচ চ	বুদ্ধিরেবচ
৬৯১	২১	জীবাত্মাভিমান	জীবত্মাভিমান
৬৯৪	১৭	জীযব্রহ্মৈক্য	জীবব্রহ্মৈক্য
৭০২	১৩	বাঙ্ময়ৈঃ	বাঙ্ময়ৈঃ।

সূচিপত্র।

* প্রমাদ বশতঃ গ্রন্থশীর্ষে যথাক্রমে ২০, ২১, ২২, ২৩ ও ২৪ সংখ্যাদ্বারা নির্দ্দিষ্ট।

६।२।७४

अथ इदन्तप्रकरणम्

मति

प्रायेण हरिवच्चात्र भवेद् मतिरिति स्थितिः ।
शसि तस्य विशेषः स्यात् इह स उच्यते तथा ॥ ८८
यदा "मति" यदा शस् च पदं "मतीः" तदा भवेत् ।
"तस्मात् शसोः" भवेत पुंस्त्वे तदिह च न युज्यते ॥ ८९
यदा मति यदा टा च तदा मत्या पदं भवेत् ।
अस्त्रियां स्यात् आङो नेति तस्मात् सूत्रं न युज्यते ॥ ९०

यदा "मति" यदा ङे च विशेषस्तु भवेत् तदा ।
तदा नदी भवेत् संज्ञा सूत्रं परं यथा पुनः ॥ ९१

२९५ । ङिति ह्रस्वश्च । १।४।६

ङकार इद् भवेद् यस्य स प्रत्ययः परे यदि ।
ई ऊ दीर्घौ नदी वा स्यात् इयङुवङ् यदापि च ॥ ९२
ङकार इद् भवेद् यस्य सः प्रत्ययः परे यदि ।
इ उ ह्रस्वो नदी वा स्याद् स्त्रियां शब्दः स्थितो यदा ॥ ९३

इयङुवङ्स्थानयोश्च संज्ञा पूर्व्वमपाकृता ।
ङिदिह चेत् परे तत्र विभाषा सा प्रवर्त्तते ॥ ९४
वाक्यद्वयं चकारेण संपद्यते इति स्थितिः ।
प्रथमं प्रथमे श्लोके द्वितीयस्तु द्वितीयके ॥ ९५
नित्यं नदी भवेत् स्त्री च न विभाषा भवेदिह ।
इयङ् तस्य भवेद् वापि नदीत्वं न विहन्यते ॥ ९६
यदा मति यदा ङे स्यात् "आन् नद्याश्च" प्रवर्त्तते ।
आड् भवेच्च भवेद् वृद्धि र्यणादेशस्ततो भवेत् ॥ ९७
मत्यै भवेत् पदं तत्र नदीत्वे च पदं भवेत् ।
अन्यथा मतये तत्र "घेर्ङिति" च गुणे पदम् ॥ ९८
"मति ङसि" "मति ङस्" चेत् मत्याः मतेः पदं भवेत् ।
यदा नदी भवेत् "मत्याः" नदी न चेद् भवेत् "मतेः" ॥ ९९

मति यदा यदा स्यादाम् ह्रस्व इति प्रवर्त्तते ।
नुड़ागमः पुनर्दीर्घः मतीनां स्यात् पदं तदा ॥ १००
यदा मति यदा ङि स्यात् सूत्रम् "औठ्" च प्रवर्त्तते ।
केवलम् औत् भवेदत्र सूत्रं परं ततो भवेत् ॥ १०१

२९७ । इदुद्भ्याम् । ७।१।११७

इकारश्चेद् उकारश्चेद् यदा नदी भवेदिह ।
ताभ्यां परे यदा स्यात् "ङि" तस्य स्याद् आम् इति स्थितिः ॥ १००
एवं मत्यां पदं तत्र नदीत्वे च प्रजायते ।
"अच्च घेः" स्यात नदी चेत् न पदं मत्यौ भवेत् तदा ॥ १०३
श्रुतिः स्मृतिर्भवेदेवं मतिवच्च भवेद् गतिः ।
विशेषो न स्थितः कश्चिद् आरभ्यते परं पुनः ॥ १०४

त्रि चतुरः

२९८ । त्रिचतुरोः स्त्रियां तिसृचतसृ । ७।२।९९

विभक्तिश्चेत् परे तत्र स्त्रियां शब्दो भवेद् यदि ।
तिसृ भवेत् त्रिशब्दस्य चतसृ चतुरो भवेत् ॥ १०५

२९९ । अचि र ऋतः । ७।२।१००

अचि परे ऋकारस्य रेफादेशो भवेदिह ।
चतस्रः स्यात् तदा तत्र तिस्रः स्याच्च तदा पुनः ॥ १०६
यदा तिसृ यदा स्याद् आम् तिसृणाम् स्यात् पदं तदा ।
वार्त्तिक"मचिरेने"ति नुड़ागमो भवेत्तथा ॥ १०७
तिसृणाम् स्याद् यदा तत्र दीर्घस्तदा न वर्त्तते ।
दीर्घस्य प्रतिषेधे तु सूत्रं परं भवेदिह ॥ १०८

३०० । न तिसृ-चतसृ । ६।४।४

यदा तिसृ भवेदत्र चतसृ च यदा पुनः ।
नामि परे न दीर्घः स्यात् इति स्थितिर्भवेदिह ॥ १०९
यदा "त्रि" च भवेच् शब्दः यदा सुप् च परे भवेत् ।
तिसृषु स्यात् पदं तदा विशेषो न स्थितः पुनः ॥ ११०
तिसृ भवेत् स्त्रियां तत्र चतसृ स्यात् स्त्रियां पुनः ।
स्त्रियां यदा न शब्दः स्याद् तिस्रादेशस्तदा च न ॥ १११

(१) त्रिशब्दः पुंसि क्लीवे—प्रियत्रि स्त्रियाम्

प्रियास्त्रयस्त्रीणि यस्याः सा "प्रियत्रि" यदा भवेत् ।
यदा "त्रि" न स्त्रियां तत्र तिस्रादेशो न युज्यते ॥ ११२
"प्रियत्रिः" स्यात् पदं तत्र मतिवच्च पदं भवेत् ।
आमि प्रियत्रयाणां स्यात् विशेषः स भवेदिह ॥ ११३

पुंसि यदा भवेदङ्गम् अङ्गं नपुंसके यदा ।
त्रि चतुर चेत् स्त्रियां तत्र समादेशस्तदापि च ॥ ११४

(२) त्रिशब्दः स्त्रियाम्—प्रियत्रि पुंसि

"प्रियाः तिस्रः यस्य स" चेत् पुंसि यदि पदं भवेत् ।
प्रियतिसा प्रियतिस्रौ प्रियतिस्रो भवेत्तदा ॥ ११५

(३) त्रिशब्दः स्त्रियाम्—प्रियत्रि क्लीवे

"प्रियाः तिस्रः यस्य तत्" चेत् पदं स्यात् चेत् नपुंसके ।
"प्रियत्रि" स्यात् पदं तत्र तिस्रादेशो न वर्त्तते ॥ ११६
स्वमोर्लुक् च भवेदत्र प्रत्ययता तदा च न ।
प्रत्ययता न यस्मात् स्यात् तिस्रादेशस्तथा च न ॥ ११७
"न लुमता" स्थितं यत् तत् यदानित्यं मतं भवेत् ।
तदा तिस्र समादेशो भवेदत्र सतां मते ॥ ११८
प्रियतिस्थ तदा शब्दः पदं भवेत् तथैव च ।

बादेशात् पूर्व्वविप्रतिषेधेन नुम् (वा)

बादेशात् प्राक् भवेन्नुम् च पूर्व्वस्य प्रतिषेधतः ॥ ११९
स्यात् प्रियतिसृणी तत्र स्यात् प्रियतिसृणीति च ।
तृतीयादौ पर्य्यायेन नुम् भवेच्च भवेच्च रः ॥ १२०
पदं भवेत् तदा पुंसि पदं भवेत् नपुंसके ।
प्रियतिस्रा भवेत्तत्र स्यात् प्रियतिसृणा तथा ॥ १२१

द्वि (स्त्रियाम्)

द्विशब्दः स्यात् स्त्रियां यत्र पदं भवेद् यथा परम् ।
"त्यदादीनाम्" भवेद् अत् च पश्चाद् आप् च प्रयुज्यते ॥ १२२
"द्वा" तदा तु प्रकृतिः स्यात् तस्मात् पदं प्रवर्त्तते ।
"द्वे" भवेच्च भवेद् द्वाभ्याम् द्वयोर्भ चेत् तदा पदम् ॥ १२३

इति इदन्ताः

अथ ईदन्तप्रकरणम्

मृणालिनी

मृणालिनी यदा शब्दो भवेत् पदं यथापरम् ।
मृणालिनी मृणालिन्यौ मृणालिन्यो यथाक्रमम् ॥ १२४
सम्बुद्धौ हे मृणालिनि "अम्बार्थे"ति प्रयुज्यते ।
पदं मृणालिनीम् च स्यात् अमि पूर्व्वं भवेदिह ॥ १२५
मृणालिन्या पदं च स्यात् यदा टा च प्रयुज्यते ।
भवेत् मृणालिनीभ्याश्च स्याद् मृणालिनिभिस्तथा ॥ १२६
मृणालिनी यदा ङे स्यात् मृणालिन्यै पदं तदा ।
"आन् नद्याश्च" भवेत् सूत्रम् "आटश्चे"ति प्रयुज्यते ॥ १२७
मृणालिन्याः मृणालिन्यां पदं भवेत् तथैव च ।
मृणालिन्योः भवेद् ओसि सन्धिर्भवेद् यथोचितम् ॥ १२८
पदं मृणालिनीनाम् स्यात् आमि परे नुड़ागमे ।
पदं मृणालिनीषु स्यात् सुप् इह चेत् परे भवेत् ॥ १२९

खुकी

एवं खुकी यदा शब्दः पदं भवेत् यथायथम् ।
खुकी खुक्यौ तथा खुक्यः पदानि स्युः यथायथम् ॥ १३०
हे खुकि स्यान् च सम्बुद्धौ "अम्बार्थे"ति प्रयुज्यते ।
खुकीम भवेत् यदा स्याद् अम् "अमि पूर्व्वं" प्रयुज्यते ॥ १३१
पदं खुक्या भवेदत्र टाप्रत्ययो यदा परे ।
खुकीभ्यां स्यात् खुकिभिः स्यात् भ्याम् भिस् यदा परे भवेत् ॥ १३२
खुक्यै खुक्याः ङे ङस् यत्र खुक्याम् भवेत् ङि चेत् परे ।
खुक्योः भवेद् यदा स्याद् ओस् खुकीनाम् स्यात् नुड़ागमे ॥ १३३
खुकीषु स्यात् यदा सुप् च विस्तरेण प्रदर्शितम् ।
एवं वाण्यादयश्च स्युरूहनीयं यथायथम् ॥ १३४

६।२।७४-४७ श्लोकाः
प्रातः ६ घटिका वृहस्पतिवारः

सखी (स्त्रियाम्)

यदा सखी स्त्रियां शब्दः पदं साध्यं भवेद् यदा ।
संशयस्तु भवेदत्र अनङ् इह भवेन्न वा ॥ १३५

प्रातिपदिकमाश्रित्य विधानं चेत् प्रवर्त्तते।
लिङ्गमपि भवेद् ग्राह्यं परिभाषा तथा स्थिता॥ १३६
यदा "सखि" भवेत् शब्दः "सखी" चापि च गृह्यते।
पुंसश्चेद् ग्रहणं तत्र स्त्रियाश्च ग्रहणं भवेत्॥ १३७
"अनङ् सौ" च स्थितं सूत्रं पुंसि तत्र प्रयुज्यते।
"अनङ् सौ" च पुनः सूत्रं यदा "सखी" तदापि च॥ १३८
"सखि"शब्दात् यतः पुंसः सूत्रमनङ् प्रवर्त्तते।
सखीशब्दात् स्त्रीलिङ्गाच्च तस्मादनङ् भवेदिह॥ १३९
अनङ् यदा भवेत्तत्र ङिद्वत् कार्य्यं तदा भवेत्।
सख्युरिति स्थितं सूत्रं तत् तदा न प्रवर्त्तते॥ १४०
एवं ङिद्वत् यदा प्राप्तं परिभाषा पुनस्तदा।
विभक्तिश्चेत् परे तत्र लिङ्गं तत्र न गृह्यते॥ १४१
"सखि" शब्दात् यथा स्याच्च "सखी" शब्दात् तथा च न।
सखी मृणालिनीवत् स्यात् तद्वत् रूपं भवेदिह॥ १४२
सखी सख्यौ भवेदत्र सख्यः भवेत् तथा पुनः।
अन्यद् यच्च भवेद्रूपमूहनीयं बुधैश्च तत्॥ १४३

लक्ष्मीः

यदा लक्ष्मीः भवेच् शब्दः सुलोपो न विधीयते।
ई स्त्रियां न भवेदत्र "हलङ्याब्भ्य"श्च न युज्यते॥ १४४
एवं लक्ष्मीः बिसर्गः स्यात् सुलोपो न भवेदिह।
अवी तन्त्री तरी तद्वत् सर्व्वत्रैव विसर्ज्जनम्॥ १४५
यदा ङीषि भवेल्लक्ष्मी सुलोपस्तु तदा भवेत्।
लक्ष्मी तदा पदं तत्र विसर्गो न प्रवर्त्तते॥ १४६

स्त्री

यदा स्त्री स्यात् यदा सु स्यात् पदं स्त्री तु तदा भवेत्।
सम्बुद्धिश्चेत् भवेत् हे स्त्रि विशेषो न स्थितः पुनः॥ १४७
यदा स्त्री स्याद् यदा स्याद् औ यदा स्त्री च यदा च जस्।
सूत्रं परं भवेद् योज्यं सूत्रं परं भवेद् यथा॥ १४८

३०१। स्त्रियाः। ६।४।७९

अजादि सुप् परे स्याच्चेत् स्त्रीशब्दस्य भवेदियम्।
स्त्रियौ स्त्रियः पदं तत्र भवेदियङिति स्थितिः॥ १४९

यदा स्याद् औट् यदा शस् स्यात् सूत्रं परं प्रवर्त्तते ।
इयमत्र विभाषा स्यात् सूत्रमिह परं यथा ॥ १५०

३०२ । वाऽम्शसोः । ६।४।८०

अमि शसि परे तत्र भवेदियङ् विभाषया ।
स्त्रियम् स्त्रीम् स्यात् स्त्रियः स्त्रीः स्याद् अमि परे परे शसि ॥ १५१
यदा स्त्री स्याद् यदा टाप् स्यात् पदं स्त्रिया तदा भवेत् ।
यदा स्त्री स्याद् यदा ङे स्यात् स्त्रियै पदं तदा पुनः ॥ १५२
यदा स्त्री स्याद् यदा ङसि यदा स्त्री स्याद् यदा च ङस् ।
स्त्रियाः पदं भवेदादौ स्त्रियाः पदं भवेत् परे ॥ १५३
यदा स्त्री स्याद् यदा स्याद् आम् नुड़ागमो भवेदिह ।
नुटि स्त्रियाम् पदं तत्र न तावत् स्यादियङ् पुनः ॥ १५४
स्त्रियां स्त्रियोः पुनः स्त्रीषु ङि ओस् सुप् चेत् परे भवेत् ।
स्त्रीशब्दस्य भवेद् यत् यत् तत् तत् मया प्रदर्शितम् ॥ १५५

अतिस्त्रि (पुंसि)

अतिक्रान्तः स्त्रियं यः स स्याद् अतिस्त्रि तदा हि सः ।
अतिस्त्रिः स्यात् पदं तत्र अतिस्त्रियौ पदं भवेत् ॥ १५६
"गुण-नाभाव-औत्व नुड्भिः परत्वात् पुंसि वाध्यते ।
क्लीवे नुमा च स्त्रीशब्दस्येयमित्यवधार्य्यताम् ॥"
भवेद् गुणो भवेत् ना च भवेद् औत्वं भवेच्च नुम् ।
परत्वाच्च भवन्त्येते पूर्व्वत्वान्न भवेदियम् ॥ १५७
"अतिस्त्रि" स्याद् यदा शब्दः प्रत्ययो जश् यदा पुनः ।
"जशि चे"ति गुणः स्याच्च अतिस्त्रयः पदं भवेत् ॥ १५८
"अतिस्त्रि" स्याद् यदा शब्दः टाप्रत्ययः पुनर्यदा ।
आङो ना स्यात् तदा तत्र अतिस्त्रिणा पदं भवेत् ॥ १५९
"अतिस्त्रि" स्याद् यदा शब्दः प्रत्ययो ङि यदा पुनः ।
"अच्च घेः" स्यात् भवेद् औत्वं अतिस्त्रौ स्यात् पदं तदा ॥ १६०
"अतिस्त्री" स्याद् यदा शब्दः प्रत्यय आम् पुनर्यदा ।
"ह्रस्वे"ति स्यात् पुनः नुट् च अतिस्त्रिणां पदं भवेत् ॥ १६१
भवेद् गुणो भवेद् ना च भवेद् औत्वं भवेच्च नुम् ।
परत्वाच्च भवन्त्येते पूर्व्वत्वान्न भवेदियम् ॥ १६२

"हे अतिस्त्रि" पदं तत्र अतिस्त्रिया पदं तथा।
अतिस्त्रयः पदं तद्वत् सम्बुद्धौ च भवेत् त्रयम् ॥ १६३
अतिस्त्रियम् अतिस्त्रिं स्यात् अतिस्त्रियौ अतिस्त्रियः।
अतिस्त्रीन् च भवेच् शब्दो द्वितीयायां प्रदर्शितम् ॥ १६४
अतिस्त्रि स्याद् यदा शब्द यदा ङे च भवेदिह।
अतिस्त्रये पदं तत्र गुणे पदं भवेदिह। १६५
अतिस्त्रि स्याद् यदा शब्दो ङसि यदा भवेत् परे।
अतिस्त्रेः स्यात् तदा रूपं ङस् परे चेत् तथैव च ॥ १६६
अतिस्त्रि स्याद् यदा शब्दः प्रत्यय ओस् परे यदा।
अतिस्त्रियोः पदं तत्र प्रायशश्च प्रदर्शितम् ॥ १६७
अतिस्त्रि स्याद् यदा शब्द भिस् भ्याम् यदा परे भवेत्।
अतिस्त्रिभिः अतिस्त्रिभ्याम् पदं तदा भवेदिह ॥ १६८
"औस्यौकारे च नित्यं स्यात् अम्शसोस्तु विभाषया।
इयादेशोऽचि नान्यत्र न स्त्रियाः पुंस्युपसर्ज्जने ॥"
स्त्रीशब्दः स्याद् यदा गौणः समासश्च भवेद् यदा।
इयमचि भवेन्नित्यम् अमि शसि विभाषया ॥ १६९

अतिस्त्रि (न पुंसके)

अतिस्त्रि स्यात् पदं तत्र अतिस्त्रियी पदं भवेत्।
अतिस्त्रीणि पदं च स्यात् भवेदिह नुड़ागमः ॥ १७०
अतिस्त्रिणा यदा टा स्यात् अतिस्त्रिणे यदा च ङे।
ङे प्रभृतौ पुनः पक्षे प्राग्वद् रूपं भवेदिह ॥ १७१
अतिस्त्रये यदा ङे स्यात् अतिस्त्रिणे तथैव च।
अतिस्त्रेः स्याद् ङसौ तत्र अतिस्त्रिणां पदं तथा ॥ १७२
अतिस्त्रियो भवेद् रूपमतिस्त्रियोः तथा भवेत्।
पुंसि यथा तथा रूपं पुनरिह प्रवर्त्तते ॥ १७३

अतिस्त्रि (स्त्रियाम्)

अतिस्त्रि स्यात् स्त्रियां यत्र पुंसीव च पदं भवेत्।
इह ये च विशेषाः स्युस्ते च परं प्रदर्शिता ॥ १७४
अतिस्त्रीः स्याद् यदा शस् स्यात् अतिस्त्रिया यदा च टा।
अतिस्त्रै स्याद् यदा ङे स्यात् ङिति ह्रस्वः प्रयुज्यते ॥ १७५

नदी संज्ञा विभाषा स्यात् अतिस्त्रियै अतिस्त्रिये ।
अतिस्त्रियाः अतिस्त्रेः स्यात् अतिस्त्रीणां तथा पुनः ॥ १७६
अतिस्त्रियाः अतिस्त्रौ च ङौ परे च पदं भवेत् ।
इह ये ये विशेषाः स्युस्ते च मया प्रदर्शिताः ॥ १७७

७।२।७४-४३ श्लोकाः
रात्रिः १० घटिकाः

श्री

श्री यदा च भवेच् शब्दः सु औ जश् च परे यदा ।
श्रीः भवेच्च भवेत् श्रियौ श्रियः भवेत् पदं तदा ॥ १७८
सम्बुद्धिश्चेत् परे तत्र न युज्यते इयङ् तदा ।
निषेधे च भवेत् सूत्रं यथा परे प्रदर्शितम् ॥ १७९

३०३ । नेयङुवङ्स्थानौ अस्त्री । १।४।४

गतिर्भवेदियङ् यस्य यस्य गतिर्भवेदुवङ् ।
नदी तस्य न संज्ञा स्यात् श्री नित्यन्तु भवेन्नदी ॥ १८०
"हे श्री सु" च यदा तत्र हे श्रीः पदं भवेत्तदा ।
इयङत्र न सिध्येच्च इयमत्र निषिध्यते ॥ १८१
यदा श्री स्यात् यदा ङे च पदं श्रियै तदा भवेत् ।
यदा श्री स्याद् यदा ङसि पदं श्रियाः पदं श्रियः ॥ १८२
"ङिति ह्रस्वः" भवेत् सूत्रं तदिह च प्रयुज्यते ।
ङिति परे नदी संज्ञा प्रवर्त्तते विभाषया ॥ १८३
यदा श्री स्याद् यदा स्यादाम् पदं साध्यं भवेद् यदा ।
प्रयोजनं भवेत् सूत्रं यथा परे प्रदर्शितम् ॥ १८४

३०४ । वामि । १।४।५

गतिर्भवेदियङ् यस्य गतिर्यस्य भवेदुवङ् ।
आमि नदी विभाषा सा श्री नित्यन्तु भवेन्नदी ॥ १८५
यदा श्री स्याद् यदा स्यादाम् श्रियाम् पदं तदा भवेत् ।
नदी भवेत् विभाषा श्री भवेद् आमि तथा पदम् ॥ १८६
यदा श्री स्याद् यदा स्याद् आम् श्रीणाम् पदं तदा भवेत् ।
नुडागमो भवेदत्र णत्वे पदं भवेत् यथा ॥ १८७
यदा श्री स्यात् यदा ङि स्यात् श्रियि श्रियां पदं तदा ।
प्रधीशब्दे विशेषो य स उच्यते परं मया ॥ १८८

प्रधी

लक्ष्मीवत् स्यात् प्रधी तत्र वृत्तिकारमतं हि तत् ।
नित्यं स्त्रियां स्थितः शब्दः शब्दान्तरं विनापि च ॥ १८९
लिङ्गान्तरे न शब्दः स्यात् पुंस्येव हि प्रवर्त्तते ।
पुंवद्रूपं भवेत्तस्य कैयटस्य मतं पुनः ॥ १९०
प्रकृष्टा धी यदा वाक्यं लक्ष्मीवत् च भवेत् यदा ।
अमि शसि विशेषः स्यात् प्रध्यम् प्रध्यस्तथा भवेत् ॥ १ १
सुष्ठुधी र्यस्य सुधी स इति वाक्यं भवेद् यदि ।
श्रीशब्दवद् भवेद् रूपं वृत्तिकारमतं हि तत् ॥ १९२
सुष्ठु ध्यायति या सेति पुनर्व्वाक्यं भवेद् यदि ।
तदापि च पदं श्रीवत् इत्यपि वृत्तिकृत् पुनः ॥ १९३
पुंवद् रूपं भवेत्तस्य परेषां च मतं स्थितम् ।
सुष्ठु धी श्चेत् भवेद् वाक्यं श्रीवत् स्यात् कर्मधारये ॥ १९४
ग्रामणी च स्त्रियां शब्दः पुंवदेव पदं भवेत् ।
खलपूश्चेत् कटप्रूश्चेत् पुंवदेव भवेत् पदम् ॥ १९५

इति ईदन्ताः

अथ उदन्तप्रकरणम्

धेनुः

मतिवच्च भवेद् "धेनु" विशेषश्च न दृश्यते ।

क्रोष्टु

क्रोष्टुशब्दे विशेषो यस्तस्मिन् सूत्रं परं भवेत् ॥ १९६

३०५ । स्त्रियां च । ७।१।९६

स्त्रीवाची च यदा शब्दः तृजन्तवद् भवेद् गतिः ।
क्रोष्ट्री तदा भवेद् रूपम् ङीविह स्यात् परेण च ॥ १९७

३०६ । ऋन्नेभ्यो ङीप् । ४।१।५

ऋकारान्तो यदा शब्दो नकारान्तो यदा पुनः ।
प्रत्ययः ङीप् तदा योज्यः स्त्रियामिष्टं पदं यदा ॥ १९८
एवं पदं भवेत् क्रोष्ट्री रूपं भवेत् यथा परम् ।
क्रोष्ट्री क्रोष्ट्र्यौ पुनः क्रोष्ट्र्यः सु औ जश् चेत् परे भवेत् ॥ १९९

अथ ऊदन्तप्रकरणम्

यथा मृणालिनी तत्र तथा वधू भवेत् पुनः ।
श्रीवत् भ्रूश्च भवेत् शब्दः विशेषो न स्थितः खलु ॥ २००
खलपू चेत् स्त्रियां तत्र पुंवदेव गतिर्भवेत् ।
पुनर्भूः स्याद् यदा शब्दः तदा रूपं यथा परे ॥ २०१

पुनर्भू

उकारस्य वकारः स्याद् दृन्भुः स्याद्धि च वार्त्तिकम् ।
उवङ् तस्मात् न सिध्येच्च नेयमिति न युज्यते ॥ २०२
नदी संज्ञा भवेत्तस्मात् हे पुनर्भू पदं भवेत् ।
पुनर्भूः स्यात् पुनर्भ्वौ च पुनर्भ्वः स्यात् पदं तदा ॥ २०३
पुनर्भूः स्याद् यदा शब्दः यदा स्याद् आम् परे पुनः ।
नकारस्य भवेत् णत्वं सूत्रं परं प्रवर्त्तते ॥ २०४

३०७ । एकाजुत्तरपदे णः । ८।४।१२

समासश्चेद् भवेदत्र पदमेकाच् परे यदा ।
पूर्व्वे यदि निमित्तं स्यात् परस्य "न" भवेच्च णः ॥ २०५
"न" परे चेत् पदान्ते स्यात् अथवा नुम् भवेत् परे ।
विभक्तौ चेत् परे न स्यात् तदेव हि भवेद् विधिः ॥ २०६
सूत्रमिह समारब्धं तेनैव नित्यता भवेत् ।
पुनर्णग्रहणं चात्र स्पष्टार्थं स्यादिति स्थितिः ॥ २०७
दृनिति वार्त्तिकं स्याच्च यणिह च तथा भवेत् ।
परं यण् बाधितं चात्र परत्वात् नुट् प्रवर्त्तते ॥ २०८
वर्षाभू स्याद् यदा शब्दः स्याद आमिह परे यदा ।
भवेद् नुम् च भवेद् णत्वं वर्षाभूणां पदं भवेत् । २०९

वर्षाभू

भेके यदा स्थितः शब्दः पुंसि भवेत् भवेत् स्त्रियाम् ।
सम्बुद्धिश्चेत् हे वर्षाभूः कैयटस्य मते भवेत् ॥ २१०
हे वर्षाभू पदं भवेत् परेषां च मते पुनः ।
भेके पुनर्नवायां स्त्री भेके तु केवलं पुमान् ॥ २११

इति ऊदन्ताः

अथ ऋदन्तप्रकरणम्

३०८। न षट् स्वस्रादिभ्यः। ४।१।१०

न च षट्संज्ञकेभ्यः स्यात् ङीप् टाविह सतां मते।
स्वस्रादिकं भवेत् सप्त गणे मया प्रदर्शितम् ॥ २१२
"अप्तृन्नि"ति भवेद् दीर्घः पदं परं यथा भवेत्।
स्वसा स्यात् स्वसारौ स्याच्च स्वसारः स्यात् तथैव च ॥ २१३

मातृ

मातृशब्दः स्थितो लोके पितृवच्च भवेत् पदम्।
शसि पदं भवेत् मातृः विशेषः स भवेदिह ॥ २१४

इति ऋदन्ताः

अथ ऐदन्तप्रकरणम्

रैशब्दश्चेत् स्त्रियां तत्र पुंसीव च पदं भवेत्।

इति ऐदन्ताः

अथ ओदन्तप्रकरणम्

द्योशब्दश्च स्थितस्तत्र गोशब्दवत् प्रवर्त्तते ॥ २१५

इति ओदन्ताः

अथ औदन्तप्रकरणम्

नौशब्दश्च स्त्रियां तत्र ग्लौशब्दवत् पदं भवेत्।
स्त्रियां ये ये स्थिताः शब्दाः ते ते मया प्रदर्शिताः ॥ २१६

इति औदन्ताः

८।२।७४-३६ श्लोकाः

शुक्रवारः द्विप्रहरः (२-३०) घटिकाः

इति अजन्तस्त्रीलिङ्गप्रकरणम्

श्रीभुवनमोहन-मृणालिनी-सुत
श्रीहरिपददत्तविरचितायां व्याकरणकारिकायाम्
अजन्तस्त्रीलिङ्गप्रकरणम्।

अथ अजन्तनपुंसकलिङ्गप्रकरणम्

अदन्तप्रकरणम्

ज्ञान

ज्ञानमिति यदा शब्दः सु परे च भवेद् यदा।
इह सूत्रं भवेद् योज्यं सूत्रं परं यथा भवेत्॥ १

३०९। अतोऽम्। ७।१।२४

अदन्तं चेत् भवेत् क्लीवं स्वमोरम् स्यादिति स्थितिः।
यदा ज्ञान यदा सु स्यात् ज्ञानं पदं तदा भवेत्॥ २
यदा ज्ञान यदा स्यादम् ज्ञानं भवेत् तदापि च।
"अमि पूर्व्वः" स्थितं सूत्रं तदिह च प्रयुज्यते॥ ३

३१०। नपुंसकाच्च। ७।१।१९

औ परे चेद् परे चेद् औट् क्लीवात् शी स्यादिति स्थितिः।
प्रकृतेश्च तदा तत्र भसंज्ञापि प्रयुज्यते॥ ४

३११। यस्येति। ६।४।१४८

इकारश्चेत् परे तत्र तद्धितश्चेत् परे भवेत्।
इकारस्य उकारस्य भवेत् तदा विलोपनम्॥ ५
यदा ज्ञान यदा शी स्यात् ज्ञान ई स्यात् तदा पुनः।
ज्ञानी भवेत् पदं तत्र अकारः लुप्यते तदा॥ ६
परं लोपः न तावत् स्यात् लोप इह न युज्यते।
वार्त्तिकं च स्थितं तत्र तेन लोपो निषिध्यते॥ ७

ओङः श्यां प्रतिषेधो वाच्यः (वा)

ओङः शी चेत् परे तत्र लोपो नेह विधीयते।
ज्ञान ई च यदा तत्र पदं ज्ञाने तदा भवेत्॥ ८
ज्ञान यदा पुनः शब्दः जश् शस् इह परे यदा।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते॥ ९

३१२। जश्शसोः शिः। ७।१।२०

जश्शसोः शि भवेदत्र क्लीवे शब्दो यदा भवेत्।
ज्ञान जश् शस् यदा तत्र ज्ञान शि स्यात् तदा पुनः॥ १०
ज्ञान शि स्यात् यदा तत्र सूत्रं परं प्रयुज्यते।
सर्व्वनामस्थानं भवेत् तदा संज्ञा परेण च॥ ११

३१३। शि सर्व्वनामस्थानम्। १।१।४२

इह शि यः समादेशः क्लीवात् परे विधीयते।
सर्व्वनामस्थानं तत् स्यान् तत् कार्य्यं च प्रवर्त्तते॥ १२

३१४। नपुंसकस्य झलचः। ७।१।७२

अजन्तं चेद् भवेदङ्गं झलन्तं चेत् भवेत् पुनः।
सर्व्वनामस्थाने तत्र भवेत् खलु नुमागमः॥ १३
यदा ज्ञान यदा शि स्यात् ज्ञान नुम् शि भवेत्तदा।
उपधाया भवेद् दीर्घः ज्ञानानि स्यात् पदं तदा॥ १४
अम् ओट् शस् चेत् परे तत्र तथैव च पदं भवेत्।
विशेषो न स्थितश्चात्र रामवत् स्यात् पदं परे॥ १५
धनं वनं फलं तत्र सममेव गतिर्भवेत्।
विस्तरो न मया दत्त ऊहनीयो बुधैरिह॥ १६

कतर

३१५। अद्‌ड्डतरादिभ्यः। ७।१।२५

पञ्चभ्यः डतरादिभ्यः स्वमोरदड् भवेदिह।
डतरो डतमश्चान्यत् अन्यतरस्तथेतरत्॥ १७

३१६। टेः। ६।४।१४३

भस्य च टेर्भवेल्लोपः ङिदिह चेत् परे भवेत्।
कतरत् कतरे तत्र कतमानि तथा पुनः॥ १८
सूत्रञ्च "वावसाने" स्यात् कतरत् च तथा भवेत्।
कतरत् कतरद् तत्र पदद्वयं भवेत्तथा॥ १९
सम्बुद्धेर्नलोपस्तत्र सवर्णदीर्घता न च।
प्रथमयोः एङिति न भस्य टेश्च विलोपनम्॥ २०
हे कतरत् भवेत्तस्मात् हे कतरे तथैव च।
भवेत् हे कतरानि च शेषे पुंवत् पदं भवेत्॥ २१
कतमत् स्यात् पदं तत्र स्यादन्यश्च पदं तथा।
अन्यतरत् भवेत्तद्वत् इतरत् स्यात् तथैव च॥ २२

एकतरात् प्रतिषेधो वाच्यः (वा)

एकत्तरो यदा शब्दः प्रतिषेधो भवेत्तदा।
एकतरम् भवेदत्र न स्यादेकतरत् पुनः॥ २३

अजर (नपुंसके)

अजर सु यदा च स्याद् अजर् औम् च तदा भवेत् ।
सन्निपातपरिभाषाबलाद् जरस् न युज्यते ॥ २४
अजर् यदा यदा स्यादम् अजरञ्च पदं भवेत् ।
अजरसी भवेद् द्वित्वे स्यादजरे तथैव च ॥ २५
अजर स्याद् यदा तत्र जश् इह च यदा पुनः ।
प्रत्ययः शि भवेदत्र भवेद् जरस् भवेच्च नुम् ॥ २६
जरसिह भवेदादौ पश्चात् नुम् च प्रवर्त्तते ।
एवं यदा स्थितं तत्र सूत्रं परं भवेदिह ॥ २७

३१७। सान्तमहतः संयोगस्य। ६।४।१०

सान्तो यः संयोगस्तत्र तस्य "म" चेद् भवेदिह ।
महतो यो नकारः स्यात् स चेदिह परे भवेत् ॥ २८
सर्व्वनामस्थाने परे उपधादीर्घता तदा ।
सम्बुद्धिश्चेत् तदा न स्यादुपधादीर्घता पुनः ॥ २९
अजरांसि पदं तस्मात् जसि परे भवेदिह ।
अजराणि पदं तद्वत् न चेद् भवेद् पुनर्जरस् ॥ ३०
अजर अम् यदा तत्र सूत्रत्रयं प्रवर्त्तते ।
"स्वमोः" च स्याद् "अतोऽम्" स्यात् "जरायाः" स्यात् तथैव च ॥ ३१
आद्यं द्वयं तु बाधित्वा परत्वाद् स्याद् जरस् तदा ।
सन्निपातपरिभाषा भवेदिह न लुक् ततः ॥ ३२
अजर-स्-अम् तदा तत्र अजरसम् पदं तदा ।
यदा तत्र जरस् न स्यात् अजरम् स्यात् पदं तदा ॥ ३३
इह नास्ति विशेषस्तु फलवच्च पदं भवेत् ।
अजरसी अजरे स्यात् यदा स्यादौट् परे पुनः ॥ ३४
अजरांसि पदं च स्यात् अजराणि परे शसि ।
परं पदं भवेद् यद् यत् तत्तद्बुह्यं पुनर्बुधैः ॥ ३५

हृदय (पद्दन्....६ १ ६३)

हृदयस्य भवेद् हृद् च उदकस्य भवेदुदन् ।
आसनस्य भवेदासन् समादेशा भवन्ति ते ॥ ३६
शसि परे भवेद् हृन्ति परे टा चेद् भवेद् हृदा ।
हृद्भ्यां भवेत् परे चेद् भ्याम् पदं तद्वत् प्रवर्त्तते ॥ ३७

परे सम् चेद् उदानि स्यात् उद्रा भवेत् परे च टा ।
उद्भ्यां भवेत् परे चेद् भ्याम् पदमेवं प्रवर्त्तते ॥ ३८

आसानि स्यात् यदा स्यात् शस् आस्ना भवेत् यदा च टा ।
आसभ्यां स्यात् यदा च भ्याम् पूर्व्ववच्च पदं भवेत् ॥ ३९

एवं शसि भवेन्मांसि भवेत् मासा यदा च टा ।
माभ्यां भवेत् परे भ्याम् चेत् पूर्व्ववत् स्यादिहापि च ॥ ४०

"पद्दन्" इति स्थितं सूत्रं "प्रभृतिषु" च तत्र च ।
यत् स्थितं तत् भवेद् ग्राह्यं ग्राह्यं च तत् स्थितं न यत् ॥ ४१

उक्तस्य ग्रहणं न्यायम् अनुक्तस्य तथैव च ।
"मांस्पचन्यां" पदं भाष्ये अनुक्तं च धृतं भवेत् ॥ ४२

पदन्निति स्थितं यत् तत् वैदिके हि न केवलम् ।
लौकिकेऽपि पुनर्योज्यं पदं दृष्टं हि लौकिके ॥ ४३

छन्दसीति चानुवृत्ति वृंत्तौ यद्यपि दर्शितम् ।
छन्दस्येव भवेत् पद्दन् यद्यपि तत्र सूचितम् ॥ ४४

तथापि लौकिके तेषां प्रयोगः स्यात् सुसम्मतः ।
वार्त्तिकसम्मतिश्चात्र प्रमाणं तु भवेदिह ॥ ४५

"अपोभींश्च" स्थितं सूत्रं वैदिके वत प्रवर्त्तते ।
"मामश्छन्दसि" तत्रैव वार्त्तिकं च पुनर्धृतम् ॥ ४६

वैदिकं तु समाश्रित्य यत्र सूत्रं प्रवर्त्तते ।
पुनस्तत्र छन्दसीति वार्त्तिकं न निरर्थकम् ॥ ४७

लौकिकेऽपि भवेच् शब्द इति तेन प्रतीयते ।
कैयटेन पुन र्व्याख्या तथैवेह प्रदर्शिताः ॥ ४८

कैयटदर्शितदिशा शब्दा ग्राह्या ततश्च ते ।
यथा यथा प्रयोगः स्यात् गृह्यते च तथा तथा ॥ ४९

इति अदन्ताः

अथ आदन्तप्रकरणम्

श्रीपा

३१८ । ह्रस्वो नपुंसके प्रातिपदिकस्य । १।२।४७

अजन्तस्य पुनः क्लीवे भवेद् ह्रस्व इति स्थितिः ।
श्रीपं पदं भवेद् ह्रस्वे ज्ञानवच्च पदं भवेत् ॥ ५०

यदा श्रीपा यदा ङे च श्रीपाय स्यात् पदं तदा ।
आलोपो न भवेदत्र "सन्निपाते"ति नात्र च ॥ ५१

इति आदन्ताः

अथ इदन्तप्रकरणम्

वारि

यदा वारि यदा सु स्यात् सूत्रं परं प्रयोजनम् ।
प्रत्ययः सु भवेल्लुप्तः लोपे सूत्रं परं यथा ॥ ५२

३१९ । स्वमोर्नपुंसकात् ।

अङ्गात् क्लीबात् स्वमोर्लुक् स्यात् तथा वारि भवेदिह ।
यदा वारि यदा स्याद् औ सूत्रं परं प्रयुज्यते ॥ ५३

३२० । इकोऽचि विभक्तौ । ७।१।७३

अजादि सुप् परे यत्र पुनरिह प्रवर्त्तते ।
इगन्तस्य तु क्लीबस्य नुमागमो भवेत्तदा ॥ ५४
वारि नुम् औ तदा स्याच्च नुमः शी स्यात् तदा पुनः ।
वारिनी स्यात् तदा तत्र वारीणि स्यात् पुनर्जशि ॥ ५५
हे वारि सु यदा तत्र हे वारि स्यात् तदा पुनः ।
हे वारे स्यात् तथैवात्र गुणा इह प्रवर्त्तते ॥ ५६
"न लुमताः"- निषेधो यो न स नित्यो भवेदिह ।
सम्बुद्धौ तु गुणस्तस्मात् प्राप्नोतीति स्थितिर्भवेत् ॥ ५७
यदा वारि यदा टा स्यात् वारिणा स्यात् पदं तदा ।
यदा वारि यदा ङे स्यात् वारिणे स्यात् तदा पुनः ॥ ५८
"घेर्ङिति" च स्थितं सूत्रं गुणस्तेन च लभ्यते ।
परं गुणो न तावत् स्यात् वार्त्तिकेन स बाध्यते ॥ ५९

वृद्ध्यौत्व-तृज्वद्भावगुणेभ्यो नुम् पूर्व्वविप्रतिषेधन (वा)

न वृद्धिः स्यात् न स्याद् औ च न तृज्भावो गुणश्च न ।
तान् च सर्व्वान् बाधित्वेव नुमागमो भवेदिह ॥ ६०
यदा वारि यदा ङसि यदा ङस् च भवेत् परे ।
वारिणः स्यात् पदं तत्र वारिणोः स्यात् तथैव च ॥ ६१
यदा वारि यदा स्यादाम् नुमिह च भवेत्तदा ।
"नुमचि"—वार्त्तिकं योज्यं वारीणां स्यात् च दीर्घता ॥ ६२

यदा वारि यदा स्यादाम् नुमचि च प्रयुज्यते ।
नुमागमस्ततो दीर्घः वारीनां स्यात् पदं तदा ॥ ६३
यदा वारि यदा ङि स्यात् वारिणोः स्यात् तदा पुनः ।
यदा वारि यदा स्याद् ओस् वारिणोः स्यात् तदा पुनः ॥ ६४
यदा वारि यदा स्यात् सुप् वारिषु स्यात् पदं तदा ।
हरिवच्च भवेद् रूपं सर्व्वं मया प्रदर्शितम् ॥ ६५

अनादि

"अनादि" च स्थितः शब्दः भवेत्तस्य द्विलिङ्गता ।
नपुंसके भवेच्च शब्दः पुंसि भवेत् तथैव च ॥ ६६
अनादि स्यात् यदा शब्द प्रत्ययो "ङे" पुनर्यदा ।
पुंवद्रूपं विभाषा स्यात् विशेषयां परं यथा ॥ ६७

३२१ । विभाषादां भाषितपुंस्कं पुंवद् गालवस्य । ७।१।७४

इगन्तं चेद् भवेत् क्लीवं पुंस्यपि चेत् पदं स्थितम् ।
अचि पुंवद् पदं वा स्यात् गालवस्य मते पुनः ॥ ६८
अनादि स्याद् यदा शब्दः यदा च ङे परे भवेत् ।
"अनादये" पदं च स्यात् अनादिने पदं तथा ॥ ६९
वारिवच्च भवेत् रूपं विस्तरो न प्रयोजनम् ।
"पीलु" शब्दे विशेषो यो दर्शयामि परं च तम् ॥ ७०
पीलु यदा स्थितो वृक्षे पुंसि पदं तदा भवेत् ।
पीलु यदा फले स्याच्च पदं भवेत् नपुंसके ॥ ७१
यदा पीलु फले तत्र यदा ङे च परे भवेत् ।
पीलुने स्यात् तदा तत्र पुंवेद् रूपं न युज्यते ॥ ७२
पीलु यदा भवेच्च शब्द फलमेव मतं भवेत् ।
पुनस्तेन न शब्देन वृक्षोऽपि च भवेत् मतः ॥ ७३
न शब्दो भाषितपुंस्कः विभाषा न ततो भवेत् ।
भिन्नमिह निमित्तं स्यात् न तत् वृक्षः पुनः फलम् ॥ ७४

दधि

३२२ । अस्थि-दधि-सक्थ्यक्ष्णाम् अनङ्नुदात्तः । ७।१।७५

अचि टादौ भवेदेषामनङिति स्थितिर्भवेत् ।
उदात्तः स पुनश्चात्र ङ् तत्र तत्र प्रवर्त्तते ॥ ७५

दधि यदा भवेच् शब्दः टा यदा च परे भवेत्।
अकारस्य भवेल्लोपः पदं दध्ना भवेद् तदा ॥ ७६
दध्ने भवेत् भवेत् दध्नः दध्नो दध्नि तथा भवेत्।
दधनि च पदं तत्र वारिवच्च पदं परम् ॥ ७७
अस्थि भवेत् तथैवेह सक्थि भवेत् तथैव च।
अक्षि भवेत् पुनस्तद्वत् विशेषस्तु न वर्त्तते ॥ ७८
स स शब्दो यदाग्रे स्यात् तथा तथा भवेत् पुनः।
अतिदध्ना पदं च स्यात् तथा तथा भवेत् पुनः ॥ ७९

इति इदन्ताः

अथ ईदन्त प्रकरणम्

सुधी – सुधि

सुधि स्यात् सुधिनी स्याच्च सुधीनि स्यात् तथैव च।
हे सुधि स्यात् हे सुधे स्यात् पदमिह समं पुनः ॥ ८०
सुधिना स्यात् पदं तत्र सुधिनः स्यात् पदं तथा।
प्रधिशब्दे विशेषः स्यात् प्रध्या स्यात् प्रधिना पुनः ॥ ८१

इति ईदन्ताः

अथ उदन्तप्रकरणम्

मधु

यदा मधु भवेच् शब्दः पदं साध्यं भवेद् यदा।
मधु स्यात् मधुनी स्याच्च मधूनि स्यात् तथैव च ॥ ८२
हे मधो स्यात् हे मधु स्यात् सम्बुद्धिश्चेत् स्थिता परे।
मधुने स्यात् पदं तत्र मधवे तु कदापि न ॥ ८३

सममेव भवेदम्बु समं रूपं प्रवर्त्तते।
सानु यदा भवेत् स्नु च स्नूनि सानूनि चापि च ॥ ८४

प्रियक्रोष्टु

प्रियक्रोष्टु भवेदत्र स्यात् प्रियक्रोष्टुनी तथा।
भवेत् प्रियक्रोष्टूनि च न तृज्वत् स्यात् भवेच्च नुम् ॥ ८५
स्यात् प्रियक्रोष्टुने तत्र यदा च ङे प्रवर्त्तते।
टादौ पुंसि प्रियक्रोष्टा स्यात् प्रियक्रोष्टुना तथा ॥ ८६

प्रियकोष्ट्रे तथैव स्यात् स्यात् प्रियक्रोष्ट्रो तथा ।
अन्यत्र केवलं नुम स्यात् स्यात् प्रियकोष्ट्रुना नुमि ॥ ८७
स्यात् प्रियकोष्टुनां तत्र यदा स्यादाम् परे पुनः ।
नुड़ागमो भवेदत्र नुमेति वार्त्तिकं स्थितम् ॥ ८८

इति उदन्ताः

अथ ऊदन्तप्रकरणम्

मुलू

मुलू भवेत् मुलुनी च मुलूनि स्यात् पदं तथा ।
मुलुना च तथा मुल्वा पुनर्भवेदिति स्थितिः ॥ ८९

इति ऊदन्ताः

अथ ऋदन्तप्रकरणम्

धातृ

धातृ स्याद् धातृनी स्याच्च धातृनी स्यात् तथैव च ।
हे धातः स्यात् हे धातृः स्यात् सम्बुद्धौ च पदं पुनः ॥ ९०
धात्रा स्यात् धातृनी स्याच्च यदा टा च परे भवेत् ।
ज्ञातृ कर्त्तृ भवेदेवम् विशेषश्च न दृश्यते ॥ ९१

इति ऋदन्ताः

अथ ओदन्तप्रकरणम्

प्रद्यो यदा स्थितः शब्दः पदं साध्यं भवेद् यदा ।
ओकारस्य भवेद् "उ" च नपुंसके पदं यदा ॥ ९२

३२३ । एच इक् ह्रस्वादेशे । १।१।४८

ह्रस्वो यदा भवेद् योज्य एच इक् स्यात् न चापरः ।
प्रद्यु स्यात् प्रद्युनि स्याच्च प्रद्यूनि स्यात् ततः परम् ॥ ९३
प्रद्युने स्यात् पदं ङेचेन् पुंवन्नेह प्रवर्त्तते ।
नेह भाषितपुंस्कत्वं प्रद्यु यदा भवेदिह ॥ ९४
अग्रे चापि भवेदेवम् सर्व्वत्रैव विधिर्भवेत् ।

इति ओदन्ताः

अथ एदन्तप्रकरनम्

प्ररि

प्ररि स्यात् प्ररिणी स्याच्च प्ररीणि स्यात् तथैव च ॥ ९५

प्ररिणा स्यात् तथैवात्र यदा च टा परे भवेत् ।
प्रराभ्याम् च पदं भ्यामि रैवद् गतिर्भवेदिह ॥ ९६
एकदेशविकृतस्य भिन्नधा न गतिर्भवेत् ।
"रायो हलि" भवेद् योऽयं रैशब्दाञ्च भवेत् "प्ररि" ॥ ९७
प्रराभिश्च पदं तत्र "रायो हलि" प्रयुज्यते ।
"नुमचिर"—भवेदात्वं प्रराणामिति माधवः ॥ ९८
नुटि चात्वं भवेन्नैव "सन्निपातो" न युज्यते ।
परिभाषा न नित्या स्यात् प्ररीणां तु भवेदिह ॥ ९९

इति औदन्ताः

अथ औदन्तप्रकरणम्

सुनौ = सुनु

सुनु भवेत् सुनुनि स्यात् सुनूनि स्यात् तथैव च ।
सुनुना स्यात् सुनुने स्यात् पदं परं यथायथम् ॥ १००

इति औदन्ताः

१०।२।७४-१०० श्लोकाः
मध्याह्नः (१२ घटिका)
रविवारः

इति अजन्तनपुंसकलिङ्गप्रकरणम्

अजन्तपुंलिङ्गप्रकरणे—	६५३ श्लोकाः
अजन्तस्त्रीलिङ्गप्रकरणे—	२१६ श्लोकाः
अजन्तनपुंसकलिङ्गप्रकरणे—	१०० श्लोकाः
	९६९ श्लोकाः

भुवनो जनको यस्य माता यस्य मृणालिनी ।
खुकी च भगिनी यस्य भगिनी च मनोरमा ॥
वाङ्लादेशे ढाकामध्ये हरिणायामभूच्च यः ।
रामपुरहाटे येन वसतिश्च कृता परे ॥
सोऽहं हरिपदो दत्तः करोमि कारिकामिह ।
शकादष्टादशशतात् षण्णवत्यधिके खलु ॥

अथ हलन्तपुंलिङ्गप्रकरणम्

हकारान्तप्रकरणम्

लिह्

लिह् यदा च भवेद् धातुः प्रत्ययः क्विप् परे यदा ।
लिह् तदा च भवेच् शब्दः स इह प्रकृतिर्भवेत् ॥ १

लिह् यदा च भवेच् शब्दः प्रत्यय सु परे यदा ।
"हल्ङ्याब्भ्योश्च" भवेद् योग्यं प्रत्ययः सु विलुप्यति ॥ २
लिह् तदा च स्थितस्तत्र हकारः स्यात् पदान्ततः ।
एवं यदा स्थितं तत्र सूत्रं परं प्रयुज्यते ॥ ३

३२४ । हो ढः । ८।२।३१

हकारस्य ढकारः स्यात् पदान्ते च तथा झलि ।
हकारस्य ढकारश्चेत् लिट् तदा च भवेदिह ॥
एवं यदा स्थितं तत्र "झलांजश्" च प्रयुज्यते ।
ढकारस्य डकारः स्यात् पदं लिड् च तदा भवेत् ॥ ४
"वावसाने" स्थितं सूत्रं तदपि च प्रयुज्यते ।
डकारस्य टकारः स्यात् पदं लिट् च भवेत्तदा ॥ ५

लिह् यदा च भवेच् शब्दः प्रत्ययः सु परे यदा ।
लिड् भवेच्च पदं तत्र लिट् भवेच्च पदं तदा ॥ ६
लिह् यदा च भवेच् शब्दः प्रत्यय औ परे यदा ।
लिहौ भवेत् पदं तत्र विशेषश्च न विद्यते ॥ ७
लिह् यदा च भवेच् शब्दः प्रत्ययोजश् परे यदा ।
पदं लिहः भवेत्तत्र न विशेषः पुनः स्थितः ॥ ८
लिहम् लिहौ लिहः तत्र परे तत्र पदानि च ।
लिहा भवेद् भवेद् लिड्भ्याम् लिड्भिः भवेत् परे पुनः ॥ ९
लिह् यदा च भवेच् शब्दः प्रत्ययः सुप् परे यदा ।
लिट्सु भवेत् पदं तत्र विशेषो न स्थितः पुनः ॥ १०
लिह् यदा च भवेच् शब्दः प्रत्ययः सुप् परे यदा ।
"ङः सि धुट्" च भवेद् वापि लिट्त्सु स्याच्च पदं तदा ॥ ११

दुह्

दुह् यदा च भवेद् धातुः प्रत्ययः क्विप् परे यदा ।
दुह् भवेच्च तदा शब्दः स इह प्रकृतिर्भवेत् ॥ १२
दुह् यदा च भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हलङ्याब्भ्योश्च" भवेद् योज्यं प्रत्ययः सु विलुप्यते ॥ १३
दुह् तदा च स्थितस्तत्र हकारः स्यात् पदान्ततः ।
हकारस्य ढकारः स्यात् "हो ढ" इति स्थितं खलु ॥ १४
हकारस्य ढकारस्तु पुनरिह न वर्त्तते ।
अपवादे स्थितं सूत्रं यथा परे प्रदर्शितम् ॥ १५

३२५ । दादेर्धातोर्घः । ८।२।३२

उपदेशे दकारादि र्यदि धातुर्भवेदिह ।
हकारस्य घकारः स्यात् पदान्ते च तथा झलि ॥ १६

दुह् तत्र च स्थितः शब्दः हकारश्च पदान्ततः ।
हकारस्य घकारः स्यात् रूपं दुघ् च तदा भवेत् ॥ १७

पूर्व्वपक्षः

दामलिहमात्मनं चेदिहच्छतीति भवेदिह ।
यदि दामलिह्यतीति धातुर्भवेत् पुनः क्वचित् ॥ १८
तथाभूतात् पुनर्धातोः प्रत्ययः क्विप् भवेद् यदि ।
दामलिह् स्यात् तदा शब्दः स इह प्रकृतिर्भवेत् ॥ १९
प्रकृतिः स्याद् यदा तत्र प्रत्ययोऽपि तदा भवेत् ।
स्वादिकं प्रत्ययस्तत्र प्रयुज्यते यथायथम् ॥ २०
दामलिह् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्योश्च" भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ २१
सुलोपः स्याद् यदा तत्र दामलिह् स्यात् तदा पुनः ।
हकारश्च तदा तत्र पदान्ते स्यादिति स्थितिः ॥ २२
दामलिह् च स्थितो धातुः दामलिह् स्यात् ततः पदम् ।
दामलिह् च यदा तत्र दकारादिः स्थितस्तदा ॥ २३
दकारादि र्यदा धातुः सूत्रमिदं प्रयुज्यते ।
हकारस्य घकारः स्याद् दामलिघ् स्यात् पदं तदा ॥ २४

दामलिघ् स्यात् पदं तत्र न तदिष्टं पदं पुनः।
अनिष्टं ते महत् तत्र पूर्वतः समुपस्थितम् ॥ २५

उत्तरपक्षः

दामलिह् स्याद् यदा धातुः दकारादिर्भवेत्तदा।
विषये तु पुनस्तस्मिन् संशयो वर्त्तते न हि ॥ २६
तथापि च पुनः सूत्रं "दादे"रिह न युज्यते।
हकारस्य घकारोपि नेह पुनः प्रसज्यते ॥ २७
उपदेशे यदा धातोर्दकार आदितो भवेत्।
तस्मिन् काले यदादौ च दकारः श्रूयते पुनः ॥ २८
धातुपाठे तथाभूतो धातुर्यदा च दृश्यते।
तदैव च विधिर्योज्यः नान्यदा च विधिर्भवेत् ॥ २९
दामलिह् च पुनर्धातुरुपदेशे न विद्यते।
धातुपाठे पुनर्धातु न हि तत्र च दृश्यते ॥ ३०

उपदेशे यदा धातु र्न विद्यते न दृश्यते।
कथं पुनर्दकारो वा स्यादादितस्तदा पुनः ॥ ३१
दामलिह् स्याद् यदा धातुस्तदा सूत्रं न युज्यते।
दामलिघ् च पदं तस्मात् नेह पुनश्च लभ्यते । ३२
"हो ढ" इति स्थितं यत् तत् पुनरिह प्रसज्यते।
दामलिड् स्यात् पदं तत्र दामलिट् च पदं भवेत् ॥ ३३
रूपं दुघ् च स्थितं तत्र यथा मया प्रदर्शितम्।
ततः परं पुनः सूत्रं भवेत् प्रयोजनम् यथा ॥ ३४

३२६। एकाचो बशो भष् झषन्तस्य स्ध्वोः। ८।१।३७

अवयवो यदा धातोरेकाजिह च दृश्यते।
अवयवः पुनश्च स झषन्तोपि भवेद् यदि ॥ ३५
अवयवस्य तस्य च बशः स्थाने भवेच्च भष्।
सकारे च ध्वशब्दे च पदान्ते च विधिर्भवेत् ॥ ३६

पूर्व्वपक्षः

एकाज् धातुरिति व्याख्या कथमिह न युज्यते।
धातुरिति विशेष्यं स्यात् एकाजिति विशेषणम् ॥ ३७

सामानाधिकरण्येन व्याख्या यदा भवेदिह ।
न वैयधिकरण्येन व्याख्या न्याय्या भवेत्तदा ॥ ३८

उत्तरपक्षः

सामानाधिकरण्येन व्याख्या न युज्यते खलु ।
सामानाधिकरण्ये च पदमिष्टं न सिध्यति ॥ ३९
यदा गर्दभ् यदा सु स्यात् पदं गध्रप् तदा भवेत् ।
सामानाधिकरण्यं चेत् पदं हि तत् न सिध्यति ॥ ४०
गर्दभ् यदा भवेच्च शब्दः अनेकाच् स भवेत् तदा ।
एकाच् न स्यात् पुनः शब्दः भष्भावो न भवेत्ततः ॥ ४१
भष्भावो न यदा तत्र धकारोऽपि तदा च न ।
गर्धमिति धमध्यश्च पदं तदा न लभ्यते ॥ ४२
धातोरवयवः यः स्यात् स चेदेकाच् भवेदिह ।
इति वैयधिकरण्ये व्याख्या यदि प्रयुज्यते ॥ ४३
इष्टसिद्धिस्तदा च स्यात् गर्धप् इति पदं भवेत् ।
गर्धप् इति धमध्यश्च पदमिष्टं भवेदिह ॥ ४४
गर्दभ् यदा भवेच्च शब्दः अवयवो भवेच्च "दभ्" ।
एकाजपि भवेच्च "प" झषन्तोपि पुनर्भवेत् ॥ ४५
एवं यदा स्थितं तत्र व्याख्या दत्ता प्रयुज्यते ।
बशोभष् स्यात् तदा तत्र दकारस्य धकारता ॥ ४६
सामानाधिकरण्यं चेत् गर्धप् इति न लभ्यते ।
व्याख्या वैयधिकरण्ये तत इह समाश्रिता ॥ ४७

पूर्वपक्षः

"झलो झलि" स्थितं पूर्वं "झली"ति चानुवर्त्तते ।
व्याख्यायाञ्च पुनस्तत्र अनुवृत्तिर्न दर्शिता ॥ ४८

उत्तरपक्षः

"सध्वो"रिति पदं सूत्रे मुनिनेह निवेशितम् ।
"झली"ति च निवृत्तं स्यात् अनुवृत्तिर्न वर्त्तते ॥ ४९
"सध्वो"रिति ग्रहणात् तत्र झलीति च निवर्त्तते ।
व्याख्यायाञ्च पुनस्तस्मात् झलीति न धृतं भवेत् ॥ ५०

ঝলীতি চেদনুবৃত্তম্ অনিষ্টং তু মহদ্ ভবেৎ ।
দুগ্ধং দোগ্ধা ইত্যাদৌ চ ধকারঃ স্যাৎ তদা পুনঃ ॥ ৫১
ঝলীতি চ নিবৃত্তং স্যাদ্ অনিষ্টং ন তথা ভবেৎ ।
দুগ্ধং দোগ্ধা ইত্যাদৌ চ ধকারো ন প্রবর্ত্ততে ॥ ৫২

পূর্ব্বপক্ষঃ

"অবয়ব" ইতিবচ্চ ব্যাখ্যা যদা বিধীয়তে ।
অনিষ্টং চ তদাপি স্যাৎ ন নিস্তারস্তদাপি চ ॥ ৫৩
রূপং দুঘ্ ভবতা পূর্ব্বম্ ইহ খলু প্রদর্শিতম্ ।
দুঘ্ তত্র চ ভবেদ্ ধাতুঃ ধাতোরবয়বো ন সঃ ॥ ৫৪
অবয়বো যদা ন স্যাৎ ভষ্ভাবোঽপি তদা চ ন ।
ভষ্ভাবো ন যদা তত্র ধকারো ন তদা পুনঃ ॥ ৫৫
ধকারো ন যদা তত্র 'পদমিষ্টং ন সিধ্যতি ।
ইষ্টং তত্র ন সিধ্যেৎ চেৎ অবয়ব ইতীহ কিম্ ॥ ৫৬

উত্তরপক্ষঃ

ধাতোরবয়বো দুঘ্ স্যাৎ স্যাদ্ ব্যপাদেশিবদ্ গতিঃ ।
ভষ্ভাবশ্চ ভবেদিত্র দকারস্য ধকারতা ॥ ৫৭
দকারস্য ধকারশ্চ যদা তত্র প্রপদ্যতে ।
ধুঘ্ ভবেচ্চ তদা রূপং ঘকারশ্চ স্থিতঃ পুনঃ ॥ ৫৮
"ঝলাং জশ্" চ স্থিতং সূত্রং তদিহ চ প্রযুজ্যতে ।
ধুগ্ ভবেচ্চ তদা রূপং পদমিষ্টং তদেব চ ॥ ৫৯
"বাবসানে স্থিতং সূত্রং তদাপি চ প্রযুজ্যতে ।
গকারস্য ককারঃ স্যাৎ পদং ধুক্ চ ভবেৎ পুনঃ ॥ ৬০
দুহৌ ভবেৎ পদং তত্র পদং দুহঃ ভবেত্তথা ।
ধুক্ষু ভবেৎ পদং তত্র জশ্ত্বং চর্ত্বং ভবেত্তদা ॥ ৬১

দ্রুহ্

দ্রুহ্ যদা চ ভবেৎ শব্দঃ প্রত্যয়ঃ সু পরে যদা ।
পদং যদা ভবেৎ সাধ্যং সূত্রং পরং প্রযুজ্যতে ॥ ৬২

৩২৭ । বা দ্রুহ-মুহ-ষ্ণুহ-ষ্ণিহাম্ । ৮।২।৩৩

ঝল্ যদি স্যাৎ পরে তত্র পদান্তো বা ভবেদ্ যদি ।
এষাং হস্য ঘকারঃ স্যাৎ পক্ষে "ঢ" শ্চ ভবেদপি ॥ ৬৩

द्रुह् यदा स्यात् यदा सु स्यात् ध्रुघ् तदा च तथा भवेत् ।
जश्त्वे चर्त्वे भवेद् ध्रुग् ध्रुक् पदद्वयं भवेत्तथा ॥ ६४
पक्षे यदा ढकारः स्यात् रूपं ध्रुढ् च तदा भवेत् ।
जश्त्वे चर्त्वे भवेद् ध्रुड् ध्रुड् पदद्वयं भवेत्तथा ॥ ६५
द्रुहौ भवेत् पदं तत्र द्रुहः भवेत् पदं पुनः ।
ध्रुग्भ्याम् ध्रुड्भ्याम् भवेत्तत्र विशेषश्च न विद्यते ॥ ६६
द्रुह् यदा च भवेच् शब्दः प्रत्ययः सुप् परे यदा ।
ध्रुट्सु ध्रुट्त्सु तथा ध्रुक्षु पदत्रयं तदा भवेत् ॥ ६७

मुह् यदा च यदा ष्णुह् च यदा ष्णिह् च भवेदिह ।
रूपं भवेत् यथापूर्व्वमूहनीयं यथायथम् ॥ ६८

विश्ववाह्

विश्ववाह् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
विश्ववाड् स्याद् तदा रूपं विश्ववाट् च भवेदपि ॥ ६९
विश्ववाहौ भवेत्तत्र विश्ववाहः पदं भवेत् ।
विश्ववाहं भवेत्तत्र विश्ववाहौ भवेत् पदम् ॥ ७०

विश्ववाह् स्याद् यदा शब्दः प्रत्ययः शस् परे यदा ।
पदं यदा भवेत् साध्यं प्रसारणं विधीयते ॥ ७१

प्रसारणं न विज्ञातं संज्ञा तस्य प्रयोजनम् ।
संज्ञायाश्च भवेत् सूत्रं यथापरे प्रदर्शितम् ॥ ७२

३२८ । इग्यणः संप्रसारणम् । १।१।८

प्रयुज्यते यणः स्थाने य इग् इह च सर्व्वदा ।
संप्रसारणसंज्ञः स भवेदिह सतां मते ॥ ७३

एवं यदा प्रसारणं भवेदिह व्यवस्थितम् ।
प्रकृते च विधायकं सूत्रं तदा भवेत् परे ॥ ७४

३२९ । वाह ऊठ् । ६।४।१३२

शसादिके भसंज्ञा च यदा तत्र प्रवर्त्तते ।
वाह्यस्तदा वकारस्य भवेद् ऊठ् च प्रसारणम् ॥ ७५

विश्ववाह् स्याद् यदा तत्र प्रत्ययः शस् परे यदा ।
विश्व ऊ आह् तदा स्याच्च शस्प्रत्ययः परे पुनः ॥ ७६

एवं यदा स्थितं तत्र सूत्रमन्यत् प्रयुज्यते ।
सूत्रमन्यद् भवेदत्र यथा परे प्रदर्शितम् ॥ ७७

३३० । **संप्रसारणाच्च** । ६।१।१०८

अच इह यदा तत्र स्यात् संप्रसारणात् परे ।
पूर्व्वरूपम् एकादेशस्तदा खलु प्रयुज्यते ॥ ७८

विश्व ऊ आह् यदा तत्र विश्व ऊह् स्यात् तदा पुनः ।
प्रत्ययः शस् परे तत्र यथा पूर्व्वं स्थितो हि सः ॥ ७९

"विश्व ऊह् शस्" यदा तत्र तथा खलु प्रजायते ।
"एत्ये"ति च स्थितं सूत्रं तत् तदा च प्रयुज्यते ॥ ८०
सूत्रं यदा प्रयुक्तं स्यात् वृद्धिस्तदा भवेदिह ।
विश्वौहः स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ८१

विश्ववाह् टा यदा तत्र विश्वौहा च पदं भवेत् ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ८२

अनडुह्

अनडुह् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ८३

३३१ । **चतुरनडुहोरामुदात्तः** । ७।१।९८

सर्व्वनामस्थानं यदि परे तत्र प्रवर्त्तते ।
अनयोराम् भवेत्तत्र स उदात्तो भवेत् पुनः ॥ ८४

अनडुह् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
आम् अनेन तदा तत्र अनड्वाह् स् स्यात् तदा पुनः ॥ ८५

एवं यदा स्थितं तत्र सूत्रमन्यत् प्रयुज्यते ।
सूत्रमन्यद् भवेदत्र यथा परे प्रदर्शितम् ॥ ८६

३३२। सौ अनडुहः। ७।१।८२

अनडुह् स्याद् यदा शब्दः प्रत्ययः "सु" परे यदा।
अनडुहस्तदा तत्र भवेत् खलु नुमागमः॥ ८७

"अनड्वाह् स्" यदा तत्र नुमागमो भवेद् यदा।
तदा तत्र भवेद् रूपम् "अनड्वान् ह् स्" च नुमा सह॥ ८८

पूर्व्वपक्षः

सामान्येन विहितं स्याद् आम् यदा च विधीयते।
विशेषेण विहितं स्यात् विधीयते यदा च नुम्॥ ८९
विशेषेण सामान्यं च बाधितं स्यादिति स्थितिः।
नुमा तस्माद् विशेषेण सामान्यम् आम् च बाध्यते॥ ९०
नुम् तदा च भवेत्तत्र न तावत् आम् तदा भवेद्।
अनड्वन् स्यात् तथा तत्र अनड्वान् न भवेत् पुनः॥ ९१

सम्बुद्धौ च यदा तत्र "अनडु ह् स्" च भवेत् स्थितम्।
"अम् सम्बुद्धौ" प्रयुक्तम् स्यात् अमागमस्तथा भवेत्॥ ९२
सूत्रं "सावनडुह"श्च पुनस्तत्र प्रयुज्यते।
सूत्रं यदा प्रयुक्तं स्याद् नुमागमो भवेत्तदा॥ ९३
सामान्येन विहितं स्याद् नुम् यदा च विधीयते।
विशेषेन विहितं स्यात् आमिह च भवेद् यदा ९४
विशेषेण सामान्यं च बाधितं स्यादिति स्थितिः।
आमा तस्माद् विशेषेण सामान्यं नुम् च बाध्यते॥ ९५
हे अनड्वन् पदं तस्मात् सम्बुद्धौ न भवेदिह।
हकारस्य ढकारः स्यात् हे अनड्वट् वरं भवेत्॥ ९७

उत्तरपक्षः

अच्चीन्द्यानुंमिति च सूत्रं पूर्व्वं प्रवर्त्तते।
आदिति च पञ्चम्यन्तं तस्मादिहानुवर्त्तते॥ ९८
अवर्णश्चेद् भवेत्तत्र नुमपि च तदा भवेत्।
अवर्णश्चेत् न तत्र स्यात् नुमपि च भवेन्न हि॥ ९९
आम् इह यः प्रयुक्तः स्यात् उपजीव्यो भवेच्च सः।
नुमिह यः प्रयुक्तः स्यात् स मत उपजीवकः॥ १००

उपजीव्यो स्थितो लोके स्थितो ह चोपजीवकः ।
न च तयोः पुनर्लोके विरोध इह दृश्यते ॥ १०१
न विरोधी यदा तत्र न च बाध्यबाधकता ।
सङ्गतौ च द्वयोस्तत्र कार्य्यम् अस्ति यथोचितम् ॥ १०२
आमिह च नुमा तस्माद् न बाध्यते कथञ्चन ।
आमं वरं समाश्रित्य नुमिह लभते पदम् ॥ १०३
अम्भावश्चेद् भवेदामः प्रवृत्तिर्न भवेन्नुमः ।
एतद् वरं भवेत् सत्यं मिथ्या भवेत् परं खलु ॥ १०४

अम् सम्बुद्धौ भवेच्च यः उपजीव्यः पुनश्च सः ।
नुम् तत्र स्यात् पुनश्च यः स भवेदुपजीवकः ॥ १०५
तयोरपि विरोधो न पुनरिह च दृश्यते ।
तयोरपि न तावत् स्यादिह बाध्यबाधकता ॥ १०६
न तावद् नुम् आमा चात्र पुनरिह च बाध्यते ।
आममेव सखाश्रित्य करोति नुम् यथायथम् ॥ १०७
अमश्चेदभावस्तत्र नुमेव न प्रवर्त्तते ।
एतद् वरं भवेत् सत्यं मिथ्या वरं भवेत् परम् ॥ १०८

पूर्व्वपक्षः

आवर्त्ततां स आम् नाम न तत्र विमतिर्मम ।
आमुपजीवकत्वं च नुमो न स्यात् तदापि च ॥ १०९
अनडुह् स्याद् यदा शब्दः नकारश्च स्थितस्तदा ।
नकाराद् स्यादकारो यः नुम् भवेच्च ततः परम् ॥ ११०
एवं यदि कृतं तत्र दोषः कश्चिन्न विद्यते ।
आवृत्तेरपि तत्र च न हानिः स्यात् कथञ्चन ॥ १११
आमः पश्चात् भवेन्नुम् च पक्षश्चैष न सिध्यति ।
आमुपजीवकत्वं च नुम इह न दृश्यते ॥ ११२

उत्तरपक्षः

सखे मैवम् सखे मैवम् एष पक्षो न सम्मतः ।
व्याख्या या भवता दत्ता न सा व्याख्या भवेदिह ॥ ११०

नुम् यदा स्यात् समादेशः मकार इत् तदा भवेत् ।
मकार इद् यदा च स्यात् अन्त्यादचो भवेत्तदा ॥ ११४
आदिति यदनुवृत्तं समन्वेति च तत्र तत् ।
अवर्णो यो भवेदन्तः तस्मात् परं भवेन्नुम् ॥ ११५
अकारो यो नकारस्य न हि चान्त्यो भवेन्न सः ।
तस्मात् परं नुमस्तत्र प्रसक्तिश्च न युज्यते ॥ ११६
आमिह स्यात् यदा तत्र तदैव नुम् प्रसज्यते ।
आमुपजीवकत्वं च नुमस्तस्मात् न हन्यते ॥ ११७
"अनड् वान् ह् स्" च स्थितं तत्र पूर्व्वं मया प्रदर्शितम् ।
हल्ङ्याब्भ्यश्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ ११८

पूर्व्वपक्षः

"स" यदा च भवेल्लुप्तः संयोगान्तो भवेन्न "ह्" ।
हकारस्य भवेल्लोपः पदान्ते स्याद्द तदा च "न" ॥ ११९
"वसुस्रंसु"—स्थितं सूत्रं तत् तत्र च प्रयुज्यते ।
नकारस्य वकारश्च तदा तत्र प्रसज्यते ॥ १२०
नकारस्य दकारश्च यथा खलु भवेदिह ।
साविति च तथा सूत्रे मुनिना नुम् विधीयते ॥ १२१

उत्तरपक्षः

दकारार्थं नुमस्तत्र नास्ति किञ्चित् प्रयोजनम् ।
दकारश्च भवेत्तत्र न यदा नुम् तदापि च ॥ १२२
"अनड् वांह" च स्थितः शब्दः पदान्ते "ह" भवेदिह ।
"वसुस्रंसु" स्थितं सूत्रं हकारस्य दकारता ॥ १२३
दकारश्चेद् भवेदिष्टः नुमा नास्ति प्रयोजनम् ।
नुमं विना दकारः स्यात् यथा मया प्रदर्शितम् ॥ १२४
नुमं विना यथा तत्र दकारः स्यात्तथान्यथा ।
नुम्विधिश्च कृतस्तत्र स भवेन्न निरर्थकः ॥ १२५
निरर्थके प्रयासस्तु मुनेरिह न दृश्यते ।
नुम्विधिश्च कृतस्तत्र स्थितं खलु प्रयोजनम् ॥ १२६
नुमिह विहितो यश्च न तस्य विकृतिर्भवेत् ।
नकारस्य विकारेण दकारो न भवेदिह ॥ १२७

"अनड्वान् ह् स्" च स्थितं तत्र यथा पूर्व्वं प्रदर्शितम् ।
सुलोपः स्यात् पुनस्तत्र हकारोपि विलुप्यते ॥ १२८
सुलोपः स्याद् यदा तत्र हलोपः स्याद यदा पुनः ।
"अनड्वान्" च तदा तत्र भवेद् रूपमिति स्थितिः ॥ १२९
"नलोप"श्च हितं सूत्रं प्रयुज्यते तदा च तत् ।
नलोपः स्यात् तदा तत्र सूत्रं प्रयुज्यते यदा ॥ १३०

उत्तरपक्षः

नुम्विधिश्च स्थितस्तत्र मुनिना नुम् विधीयते ।
विधानस्य हि सामर्थ्यात् नकारो न विलुप्यति ॥ १३१

पूर्व्वपक्षः

सम्बुद्धौ च पदं तत्र हे अनवड्वन् प्रजायते ।
नुम्विधिः स्यात् चरितार्थस्तत्रैव हि यथायथम् ॥ १३२
"न ङि" चेति स्थितं सूत्रं नलोपश्च निषिध्यते ।
निषेधे च पुनस्तत्र नुम्विधिः स्यात् प्रयोजितः ॥ १३३

उत्तरपक्षः

लोपे तत्र हकारस्य "संयोगे"ति प्रयुज्यते ।
"संयोगे"ति पुनः शास्त्रं परे तत्र प्रवर्त्तते ॥ १३४
लोपे तत्र नकारस्य "नलोप"—श्च प्रयुज्यते ।
"नलोप"श्च पुनः शास्त्रं पूर्व्वं तत्र प्रवर्त्तते ॥ १३५
पूर्व्वं प्रति परं शास्त्रमसिद्धं स्यादिति स्थितिः ।
हलोपः स्यादसिद्धश्च नलोपस्तु भवेद् यदा ॥ १३६
लोपस्तत्र हकारस्य स्यादसिद्धो यदा पुनः ।
हकारः स्यात् तदा तत्र स्थित इव भवेच्च सः ॥ १३७
"ह" यदा स्यात् नकारस्य न प्रातिपदिकान्तता ।
"ह" यदा स्यात् नकारस्य नापि पदान्तता पुनः ॥ १३८
नकारस्य ततो लोपो न हि तत्र प्रसज्यते ।
नकारस्तु स्थितस्तत्र अनड्वान् च पदं भवेत् ॥ १३९

अनडुह् स्याद् यदा शब्दः प्रत्ययः "सु" परे यदा ।
पदं यदा भवेत् साध्यं प्रक्रिया स्यात् यथा परे ॥ १४०

आम् भवेच्च भवेद यथा च भवेत् नुम् च ततः परम् ।
सुलोपः स्यात् ततः पश्चात् संयोगान्तो विलुप्यति ॥ १४१
तथा तथा यदा तत्र भवति च परं परम् ।
अनड्वान् स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ १४२
अनडुह् स्याद् यदा शब्दः सम्बुद्धौ सु भवेद् यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ १४३

३३३ । अम् सम्बुद्धौ । ७।१।९९

चतुर् यदा भवेच् शब्दः अनडुह् स्याद् यदा पुनः ।
सम्बुद्धिश्च यदा तत्र तयोरम् स्यात् न तावदाम् ॥ १४४

अम भवेच्च तथा तत्र पश्चाद् सश् च प्रयुज्यते ।
नुम तथा स्यात् सुलोपः स्यात् संयोगान्तश्च लुप्यति ॥ १४५
एवमेवं यदा तत्र हे अनड्वन् पदं भवेत् ।
सम्बुद्धौ तु परे तत्र पदमिष्टं तदेव हि ॥ १४६

अनड्वाहौ भवेत्तत्र अनड्वाहः भवेत्तथा ।
अनडुहः भवेत्तत्र अनडुहा तथा भवेत् ॥ १४७

अनडुह् स्याद् यदा तत्र प्रत्ययो भ्याम परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ १८८

३३४ । वसु-स्रंसु-ध्वंसु-अनडुहां दः । ८।२।७२

वस्वन्तो यः सकारान्तं स्रंस्वादिकं पुनश्च यः ।
तस्य तस्य दकारः स्यात् पदान्तता भवेद् यदि ॥ १४९

दकारः स्यात् तथा तत्र अनडुद्भ्याम पदं भवेत् ।
परं पदं भवेत्तद्वत् ऊह्यं वुधैर्यथायथम ॥ १५०
समासान्तो यदा तत्र तदैव स्याद् दकारता ।
सकारान्तो यदा न स्यात् नापि दकारता तदा ॥ १५१
विद्वस् यदा भवेच् शब्द प्रत्ययः सु परे यदा ।
प्रक्रियायां तदा तत्र रूपं विद्वान् भवेदिति ॥ १५२
इह भवेत् नकारान्तः सकारान्तो भवेन्न च ।
सकारान्तो यतो न स्यात् ततो नास्ति दकारता ॥ १५३

पदान्तता यदा तत्र तदैव स्याद् दकारता ।
पदान्तता यदा न स्यात् नापि दकारता तदा ॥ १५४
स्रस्तं यदा पदं तत्र सकारो मध्यतस्तदा ।
पदान्ते न सकारः स्यात् नास्ति तस्मात् दकारता ॥ १५५

तुरासाह्

"तुर" यदा भवेत् पूर्व्वे "सह" यदा परे भवेत् ।
"छन्दसी"ति भवेद् योज्यं प्रत्ययो ण्विभर्वेत् तथा ॥ १५६
उपधाया भवेद् वृद्धि ण्विर्यदा च प्रयुज्यते ।
हो ढ इति ढकार स्यात् झलां जश् च डकारता ॥ १५७
"अन्येषाम् इति तत्र च पुनरपि प्रयुज्यते ।
पूर्व्वस्य च भवेद् वृद्धिः "तुरासाड्" च भवेत्तदा ॥ १५८

एवं यदा सहेस्तत्र रूपं "साड्" च भवेदिह ।
षत्वं तदा भवेत्तत्र षत्वे सूत्रं परं यथा ॥ १५९

३३५ । सहेः साडः सः । ८।३।५६

साड्रूपस्य सहेस्तत्र सकारस्य षकारता ।
तुरासाड् स्याद् यदा तत्र तुराषाड् च तदा भवेत् ॥ १६०

तुरासाड् च भवेस्तत्र तुराषाढ् च तथा भवेत् ।
तुरासाहौ भवेस्तत्र तुरासाहः भवेत्तथा ॥ १६१
तुरासाड्भ्याम् पदं तत्र भवेत् पुनर्यथार्थथम् ।
परं पदं बुधेरूह्यं न च मया प्रदीयते ॥ १६२

लौकिके तु साहयतेः प्रत्ययो क्विप् भवेदिह ।
तथैव च पदं सिध्येत् वैदिके तु प्रदर्शितम् ॥ १६३

इति हकारान्ताः ।

हकारान्ते—१६४ श्लोकाः

———

शब्दाधिकारे अजन्त पुंलिङ्ग प्रकरणम्

आरम्भः
२३।१।१९७४

१७८। अर्थवदधातुरप्रत्ययः प्रातिपदिकम्। १।२।४५

न धातुः प्रत्ययो नैव प्रत्ययान्तं तथैव न।
अर्थवच्छब्दरूपं यत् तत् प्रातिपदिकं मतम्॥ १
"भुवन" इति शब्दः स्यात् तत् प्रातिपदिकं भवेत्।
प्रत्ययः प्रत्ययान्तो न धातुर्न पुनरर्थवत्॥ २

१७९। कृत्तद्धितसमासाश्च। १।२।४६

कृदन्तं तद्धितान्तं च समासश्च तथा भवेत्।
कारकं मासिकं स्याच्च स्याद् राजपुरुषस्तथा॥ ३
"समास"स्तु पदं सूत्रे नियमार्थं भवेच्च तत्।
समासस्य भवेत् संज्ञा वाक्यस्य न तथा भवेत्॥ ४

१८०। प्रत्ययः। ३।१।१

अध्यायः पञ्चमो यावन्न समासो भवेदिह।
प्रत्ययस्तु भवेत्तावदधिकारो विधीयते॥ ५

१८१। परश्च। ३।१।२

अधिकारे भवेत् सूत्रं योगे योगे प्रवर्त्तते।
प्रत्ययस्तु परे योज्यः परे युक्तो भवेत् सदा॥ ६

१८२। ङ्याप्प्रातिपदिकात्। ४।१।१

ङ्यन्तं यत् स्यात् यदाबन्तं यत् प्रातिपदिकं पुनः।
तस्मात् तस्मात् परे कार्य्यमितः परं भविष्यति॥ ७
अध्यायः पञ्चमो यावत् न समासो भवेदिह।
यद् योज्यं तत् परे योज्यमधिकारो भवेदिति॥ ८

धृतं प्रातिपदिकं चेत् लिङ्गमपि धृतं भवेत्।
तत् कथं ङ्याप् पुनः प्रोक्तं पुर्लिङ्गं च बोधितम्॥ ९
ङ्याबन्तात् तद्धितोत्पत्ति र्यथा नेह विहन्यते।
तद्धितो न यथा प्राक् स्यात् तथा ङ्याप् पठितं पुनः॥ १०

१८३ । सु-औ-जश्/ अस-औट्-सस्/ टा-भ्याम्-भिस/ ङे-भ्यास्-भ्यस्/ ङसि-भ्याम्-भ्यस/ङस्-ओस्-आस्/ ङि-ओस्-सुप् । ४।१।२

सुऔ जश्/ स्यात् /अम्औट्शस्/ स्यात् /टाभ्याम्भिस्/ स्यात् तथा पुनः ।
ङेभ्याम्भ्यस्/ स्यात् /ङसिभ्याम् भ्यस्/ /ङस्ओस्आम्/ च तथा भवेत् ॥
ङिओस्सुप् स्यात् तथा तत्र सर्व्वा मया प्रदर्शिताः ।
ताः प्रातिपादिकाद् योज्या ङ्यावन्ताच्च भवन्ति ताः ॥ १२
उकार इद् भवेदत्र एकार इत् तथा भवेत् ।
ये जशटङपास्तेऽपि पुनरितो मता इह ॥ १३

१८४ । विभक्तिश्च । १।४।१०४

सुप् विभक्तिर्भवेदत्र तिङ्विभक्तिर्भवेदिह ।
एषा संज्ञा स्थिता प्राचामिहापि सा प्रयोजिता ॥ १४
त्रिकं त्रिकं त्रिकं तत्र एवं सप्त गणाः स्थिताः ।
प्रथमा च द्वितीया च क्रमादेवमिहोच्यते ॥ १५

१८५ । सुपः । १।४।१०३

त्रिकं त्रिकं सुपस्तत् तत् एकमेकं धृतं यदा ।
एकवचनादिसंज्ञा तदा खलु भवेदिह ॥ १६
"सु" एकवचनं तत्र "औ" च द्विवचनं भवेत् ।
"जश्" वहुवचनं तत्र ज्ञेयाः सर्व्वे तथा पुनः ॥ १७

१०६ । द्व्येकयोर्द्विवचनैकवचने । १।४।२२

द्विवचनं भवेद् यत्र तत्र द्वित्वं प्रतीयते ।
स्यादेकवचनं यत्र तत्रैकत्वं मतं भवेत् ॥ १८

१८७ । वहुषु वहुवचनम् । १।४।२१

स्याद् वहुवचनं यत्र तत्र वहु मतं भवेत् ।
त्रयं तदधिकं तत्र भवेद् ग्राह्यमिति स्थितिः ॥ १९
"भुवन" इति शब्दः स्यात् रूपं तस्य स्थितं परे ।
सुपि यानि पदानि स्युस्तानि वच्मि यथाक्रमम् ॥ २०

"भुवन" स्याद् यदा शब्दः प्रत्ययः "सु" भवेद् यदा ।
"ससजुषो" रिति सूत्रं सर्व्वादौ च प्रयुज्यते ॥ २१

एतेन रुभवेदत्र "भुवन र्" च तदा भवेत् ।
"खर्"-इति च भवेद् योज्यं विसर्गश्च भवेत्तदा ॥ २२
रकारस्य विसर्गः स्यात् "भुवनः" स्यात् पदं तथा ।
पदमिष्टं तदेव स्यात् सुप्रत्यये पदं हि तत् ॥ २३

१८८ । सरूपाणामेकशेष एकविभक्तौ । १।२।६४

एका परे विभक्तिश्चेत् रूपान्तरं न चेत् भवेत् ।
एक एव सरूपानां शिष्यते च तदा पुनः ॥ २४
"भुवन भुवन" इति सरूपौ चेत् स्थितौ पुनः ।
"भुवन" एकशेषः स्यात् स इह गृह्यते तदा ॥ २५

"भुवन" स्याद् यदा शब्दः प्रत्यय "औ" स्थितो यदा ।
सूत्रत्रयं भवेद् योज्यं "भूवनौ" च पदं भवेत् ॥ २६
"प्रथमयोः" स्थितं सूत्रं तस्य प्राप्ति भवेदिह ।
पूर्वस्य सवर्ण एव दीर्घस्तेन हि लभ्यते ॥ २७
बाधित्वा तत् पुनः सूत्रं "नादिचि" च प्रवर्त्तते ।
पूर्वस्य सवर्णो दीर्घो यः प्राप्तः स निषिध्यते ॥ २८
"वृद्धिरेचि" भवेत् सूत्रं तदेव च प्रयुज्यते ।
एचि परे भवेद् वृद्धिः "भूवनौ" च पदं भवेत् ॥ २९

"भूवन" स्याद् यदा शब्दः प्रत्ययो "जश्" परे यदा ।
पदस्य साधने तत्र प्रक्रिया स्याद् यथा परे ॥ ३०

१८९ । चुटू । १।३।७

प्रत्ययादौ यदा चुः स्यात् प्रत्ययादौ यदा च टुः ।
तदा तयो भवेल्लोपो लुप्यते जस्तथा पुनः । ३१

अकारस्य यदा लोपस्तदा प्रश्नो भवेत् पुनः ।
लोपो वा स्यात् सकारस्य "हलन्त्यं" च स्थितं खलु ॥ ३२
न प्राप्नोति पुनर्लोपः सकारो न विलुप्यते ।
लोप इह यथा न स्यात् तथा सूत्रं प्रवर्त्तते ॥ ३३

१९०। न विभक्तौ तुस्माः। १।३।४

वर्त्तमानो विभक्तौ चेत् तवर्गो न विलुप्यते।
सकारश्च मकारश्च तत्र स्थितो न लुप्यते ॥ ३४
एतेन तु सकारस्य लोप इह निषिध्यते।
"अस्" इति स्यात् तदा तत्र "भुवन अस्" तदा स्थितः ॥ ३५

एवं यदा स्थितं तत्र पुनः सूत्रं प्रयोजनम्।
कतरद् वा भवेद् योज्यं तदिह च परीक्ष्यते ॥ ३६

१९१। अतो गुणे। ६।१।९७

अकारो न पदान्ते चेत् गुणे इह परे यदि।
पररूपमेकादेशस्तदा भवेदिति स्थितिः ॥ ३७

पररूपमेकादेश एवं प्राप्तो भवेदिह।
स आदेशो न तावत् स्यात् कारणं स्याद् यथा परे ॥ ३८

एतत् सूत्रं स्थितं पूर्व्वे "प्रथमयोः" स्थितं परे।
परमेव भवेद् योज्यं पूर्व्वमिह न युज्यते ॥ ३९
"प्रथमयोः" भवेद् योज्यं तेन दीर्घो भवेदिह।
"भुवन जस्" स्थितं तत्र दीर्घः स्याद् "भुवनाः" पदम् ॥ ३२
अक इति परे सूत्रं तेनापि दीर्घता भवेत्।
तदिह न भवेद् योज्यं वाधितं तद् भवेद् यतः ॥ ४१
"अनन्तरा" हि वाध्यते न वाध्यन्ते इहोत्तराः।
"अक" इति चानन्तरं "प्रथमयो" रिहोत्तरम् ॥ ४२
"अक" इति वाधितं स्यात् "प्रथमयो" र्न वाध्यते।
"प्रथमयोः" प्रयुक्तं स्यात् ततो दीर्घो भवेदिह ॥ ४३

"अक" इति स्थितं सूत्रम् "अत" इति स्थितं पुनः।
"प्रथमयोः" स्थितं सूत्रम् अन्त्यमेव प्रवर्त्तते ॥ ४४
परिभाषावलादत्र कार्य्यं भवेद् यथोचितम्।
पुरस्तादपवादेति परिभाषा प्रदर्शिता ॥ ४५

१९२। एकवचनं सम्बुद्धिः। २।३।४९

इहैकवचनं यत् च प्रथमायां स्थितं भवेत्।
सम्बोधने तत् सम्बुद्धिः पुनरिह च कथ्यते ॥ ४६

१९३। एङ्ह्रस्वात् सम्बुद्धेः। ६।१।६९

एङन्तं यद् भवेदङ्गं ह्रस्वान्तं यद् भवेत् पुनः।
लुप्यते हल् पुनस्तस्मात् सम्बुद्धे हलं भवेद् यदि ॥ ४७
"भुवन सु" यदा तत्र लुप्यते "स" तदा पुनः।
"हे भुवन!" तदा रूपं सम्बोधने भवेदिह ॥ ४८
"भुवनौ" "भुवनाः" स्याच्च विशेषश्च न वर्त्तते।
प्रथमायां यथा यथा सम्बोधने तथा तथा ॥ ४९

एङन्तं चेद् भवेदङ्गं ह्रस्वान्तं चेद् भवेत् पुनः।
सम्बुद्धेः सोस्तदा लोपो नान्यत्र च तथा भवेत् ॥ ५०
"हे कतरत्कुले"त्यत्र न लोपश्च विधीयते।
रेफान्तं हि स्थितमङ्गं ह्रस्वान्तं न स्थितं पुनः ॥ ५१

केवलं चेत् पदं "ह्रस्वात्" सूत्रे भवेत् प्रयोजितम्।
ह्रस्वादेव भवेल्लोपो नान्यस्मात् स्यात् तथा पुनः ॥ ५२
गुणे कृते "हरे" स्याच्च गुणे "विष्णो" भवेदिह।
नेह ह्रस्वात् परत्वं स्यात् लोपस्तस्मात् भवेन्न च ॥ ५३
एकारान्ताद् यथा च स्यात् ओकारान्ताद् यथा भवेत्।
एङिति च पदं सूत्रे तथा खलु निवेशितम् ॥ ५४
यदा "हरे" यदा "विष्णो" स्यादेङन्तं पदं तदा।
एङन्ताच्च भवेल्लोपः पदमिष्टं तथा भवेत् ॥ ५५

(पूर्व्वपक्षः)

आदौ गुणं विधायेह पश्चाद् लोपो विधीयते।
एङिति च निवेशस्य तेन भवेत् प्रयोजनम् ॥ ५६
आदौ लोपं गृहाणेह पश्चाद् गुणं प्रयोजय।
"हे हरि सु" स्थितो ह्रस्वः ह्रस्वादेव विधिर्भवेत् ॥ ५७
"ह्रस्वादि"ति पदं सूत्रे तेन सिध्येत् प्रयोजनम्।
"एङि"ति ते पदं व्यर्थं तदनुसरणं वृथा ॥ ५८

(उत्तरपक्षः)

आदौ लोपो गुणः पश्चादिति युक्तं भवेन्न च ।
गुणे विधि र्भवेन्नित्यो गुणे विधिः परो भवेत् ॥ ५९

आदौ गुणो भवेत् कार्य्यः पश्चाल्लोपो हि युज्यते ।
गुणे "हरे" गुणे "विष्णो" ततो लोपः प्रसज्यते ॥ ६०

यदा "हरे" यदा "विष्णो" स्यादेङन्तं पदं तदा ।
तस्माद् लोपो भवेन् कार्य्यो विधिस्तत्र प्रयोजनम् ॥ ६१

एङिति च पदं तस्मात् मुनिनेह प्रयोजितम् ।
एङिति न पदं व्यर्थं न चानुमरणं वृथा ॥ ६२

२३।१।७४-६२ श्लोकाः

१९४ । अमि पूर्व्वः । ६।१।१०१

अमश्चेदच् परे तत्र पूर्व्वे चेदक् भवेदिह ।
आदेशः पूर्व्वरूपं स्यात् "भुवनम्" "भुवनौ" तथा ॥ ६३

भुवन शस् यदा तत्र प्रक्रिया स्याद् यथा परे ।
इह सूत्रं पुन र्योज्यं तद् भवेच्च यथा पुनः ॥ ६४

१९५ । लशक्वतद्धिते । १।३।८

प्रत्ययादौ लकार इद् शकार इद् भवेदिह ।
कवर्ग इद् भवेत्तद्वत् तद्धिते न तथा भवेत् ॥ ६५

"भुवन शस्" यदा तत्र "भुवन अश" तदा भवेत् ।
ततः परं पुनः सूत्रं भवेत् प्रयोजनं यथा ॥ ६६

१९६ । तस्माच्छसोनः पुंसि । १।३।१०३

पूर्व्वसवर्णदीर्घाच्च शसो मध्य सकारता ।
"भुवनान्" स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ६७

"राम शस्" स्यात् यदा तत्र "रामान्" पदं तदा भवेत् ।
इह णत्वं भवेद् वा न इति तु संशये स्थिते ॥-६८

१९७ । अट्कुप्वाङ्नुम्व्यवायेऽपि । ८।४।२

रकारो वा षकारो वा यदा पूर्व्वं भवेदिह ।
नकारश्च यदा पश्चाद् पुनरिह प्रवर्त्तते ॥ ६९

नकारस्य भवेद् णत्वमेकपदे तदा पुनः ।
अट्कुप्वाङ्नुम्व्यवायेऽपि विधिरेषः प्रवर्त्तते ॥ ७०

करणं हरणं तद्वत् किरिणा गिरिणा तथा ।
कुरुणा गुरुणा तद्वत् अड्व्यवाये निदर्शनम् ॥ ७१
व्यवधाने कवर्गस्य स्यादर्केण निदर्शनम् ।
मूर्खेण गर्गेण तद्वत् दीर्घेण च तथा भवेत् ॥ ७२
व्यवधाने पवर्गस्य पुनर्भवेत् निदर्शनम् ।
दर्पेण गर्भेण तद्वत् चर्मणा वर्मणा तथा ॥ ७३
पर्य्यानद्धं निरानद्धम् आङ्ग भवेन्निदर्शम् ।
बृंहणं बृंहणीयं स्यादनुस्वारे स्थिते पुनः ॥ ७४
तृंहणं तृंहनीयं स्याद् व्यवधानं यदा नुमा ।
अट्कुप्वाङ्नुम् व्यवायेऽपि भवेद् णत्वमिति स्थितिः ॥ ७५
व्यस्तैर्वा मिलितैर्वापि व्यवधानं भवेदिह ।
यथा यथा भवेद् योज्यं योजनीयं तथा तथा ॥ ७६

लक्षितः स्यादनुस्वारो नुमिति च यदोच्यते ।
अटेव तद् भवेदुक्तं त्यक्तुं शक्यं ततश्च नुम् ॥ ७७

यथा तथा भवेद्वापि नालं च बहुना पुनः ।
रामान् यदा तदा णत्वं भवेन्नवा तदीक्ष्यते ॥ ७८
विषये तु पुनश्चास्मिन् सूत्रमन्यदपेक्षितम् ।
अपेक्षितं भवेत् यत् तत् परमिह प्रदर्शितम् ॥ ७९

१९८ । पदान्तस्य । ८।४।३७

पदान्तस्य न नस्येह भवेद् णत्वमिति स्थितिः ।
"रामान्" यतः पदान्ते स्यात् णत्वं तस्मात् भवेन्न च ॥ ८०

२४।१ ७४-१८ श्लोकाः

इति—

द्वितीया विभक्तिः

अथ तृतीया विभक्तिः

१९६। यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। १।४।१३

धातोः प्रातिपदिकाद् वा प्रत्ययश्चेद् विधीयते।
प्रत्यये परतस्तत्र तदादेरङ्गता भवेत्॥ ८१
"कर्त्ता" स्याद् "मानवः" स्याच्च पुनरिह निदर्शनम्।
प्रत्यये तु परे तत्र पूर्व्वमङ्गं भवेदिह॥ ८२
"ण्वुल्तृचौ" च स्थितं सूत्रं प्रत्ययस्तृज् विधीयते।
प्रत्यये तु परे तस्मिन्नङ्गं "कृ" स्यादिति स्थितिः॥ ८३
"तस्यापत्यम्" स्थितं सूत्रम् अण्प्रत्ययो विधीयते।
प्रत्यये तु परे तस्मिन्नङ्गं "मानु" भवेदिह॥ ८४

"तदादि" च पदं सूत्रे मुनिनेह निवेशितम्।
विकरणादिकं यत् स्यात् तदपि च धृतं भवेत्॥ ८५
विकरणविशिष्टस्य संज्ञा भवेदिति स्थितिः।
"भविष्यामि" "करिष्यामि" "स्य"प्रत्ययो धृतो भवेत्॥ ८६
"भविष्य"स्यात् "करिष्य" स्यादङ्गमिह समग्रतः।
विकरणं धृतं चात्र धृता च प्रकृतिः पुनः॥ ८७
विधिर्यदि भवेदङ्गं न चेद् विधि स्तथा च न।
"स्त्री इयती" विधिर्न स्यात् न स्यादङ्गं तथा पुनः॥ ८८
"इयती" प्रत्ययः सत्यं किन्तु स न विधिर्भवेत्।
तस्मात् स्त्री न भवेदङ्गम् अङ्गकार्य्यं न सिध्यति॥ ८९

द्वितीयः "प्रत्यय"शब्दो मुनिनेह निवेशितः।
कियद्दूरं भवेदङ्गं सीमा तस्य प्रदर्शिता॥ ९०
प्रत्यये तु परे तत्र तत्पूर्व्वं यद् भवेदिह।
तदेव च भवेदङ्गं तदधिकं न गृह्यते॥ ९१

अङ्गं चेत् प्रत्ययान्तं स्याद् "वव्रश्चे"ति न सिध्यति।
"उव्रश्चे"ति पदं सिध्येद् अनिष्टं तु महद् भवेत्॥ ९२

प्रत्ययेन विशिष्टं चेद् अङ्गं भवेत् समादृतम्।
णल्सहितस्तदा "व्रश्च" भवेदङ्गमिति स्थितिः॥ ९३

तथाभूतं यदा चाङ्गं निमित्तं न परे स्थितम् ।
निमित्तं चेत् परे नास्ति "उरत्" "अचः-" न युज्यते ॥ ९४
"उरत्" "अचः-" न युक्तं चेत् स्थानिवत्त्वं न सिध्यति ।
स्थानिवत्त्वं न सिद्धं चेत् सिध्येन्न च प्रसारणम् ॥ ९५
प्रसारणं न सिद्धं चेत् "ने"ति सूत्रं न युज्यते ।
"ने"ति सूत्रं न युक्तं चेत् प्रसारणं गतिर्भवेत् ॥ ९६
प्रसारणं यदा सिध्येद् "उवश्च" स्यात् पदं तदा ।
"वव्रश्चे"ति पदं तावदिष्टमपि न लभ्यते ॥ ९७

अधिकं चेद् भवेदङ्गम् अनिष्टं स्यात् तथापि च ।
प्रागपि देवदत्तात् स्यादडागमस्तदा पुनः ॥ ९८
देवदत्त इहौदनमपाक्षीत् चेद् भवेदिह ।
देवदत्तात् परं तत्र सुप् प्रत्ययः प्रवर्तते ॥ ९९
लुक्पर्यन्तं भवेदङ्गम् आदाय तं सुपं पुनः ।
लुक्परं देवदत्तात् प्रागङ्गाद् भवेदडागमः ॥ १००

द्वितीयः "प्रत्यय" शब्दो मुनिनेह निवेशितः ।
कियद्दूरं भवेदङ्गं सीमा तस्य प्रदर्शिता ॥ १०१
प्रत्यये तु परे तत्र तत्पूर्वं यद् भवेदिह ।
तदेव च भवेदङ्गं तदधिकं न गृह्यते ॥ १०२

२६।१।७४-८२ श्लोकाः

२०० । अङ्गस्य । ६।४।१

अधिकारे भवेत् सूत्रमङ्गात् कार्यं भवेदिह ।
अध्यायः सप्तमो यावत् न समाप्तः स्थितो हि सः ॥ १०३

२०१ । टा-ङसि-ङसाम् इन-आत्-स्याः । ७।१।१२

अङ्गं स्याच्चेद् एकारान्तं टा ङसि ङस् परे यदि ।
"इन" भवेत् भवेद् "आत्" च भवेत् "स्य" च यथाक्रमम् ॥ १०४
"भुवन" स्यात् यदा शब्दः "टा" प्रत्ययः परे यदा ।
"इन" भवेत् समादेशो "भुवनेन" पदं भवेत् ॥ १०५

२०२। सुपि च। ७।३।१०२

अदन्तस्य भवेद् दीर्घो यञादौ च परे सुपि।
"भुवन भ्याम्" भवेद् दीर्घो "भुवनाभ्याम्" तदा भवेत्॥ १०६

२०३। अतो भिस ऐस्। ७।१।९

भिस ऐस् स्यादकारान्तात् सर्व्वादेशश्च वहुला।
"भुवन भिस्" यदा तत्र "भुवनैः" स्यात् पदं तदा॥ १०७

२०४। ङेर्यः। ७।१।१३

आदेशो "य" यदा "ङे" स्यात् अतोऽङ्गात् परे पुनः।
"भुवन ङे" यदा तत्र "भुवनाय" पदं भवेत्॥ १०८
एकारस्य यकारः स्यात् "य" स्थानिवद् भवेदिह।
सुपीति च भवेद् योज्यं दीर्घे पदं तथा भवेत्॥ १०९
सन्निपातपरिभाषा नेह पुनः प्रवर्त्तते।
अनित्या परिभाषा सा "कष्टाय" ज्ञापकं भवेत्॥ ११०
"भुवन भ्याम्" यदा तत्र "सुपी"ति च प्रवर्त्तते।
इह तेन भवेद् दीर्घ "भुवनाभ्याम्" पदं भवेत्॥ १११

२०५। वहुवचने झल्येत्। ७।३।१०३

एकारः स्यादतोऽङ्गस्य झलादि चेत् परे वहु।
"भुवन भ्यस्" यदा तत्र "भुवनेभ्यः" तदा भवेत्॥ ११२

एकारः स्याद् वहुत्वं चेत् अन्यत्र न तथा भवेत्।
"भुवन सु" न चैकारः स्यादेकवचनं हि तत्॥ ११३
परे झल् चेत् तदैव स्यात् अन्यत्र न तथा भवेत्।
"भुवन आम्" न तावत् स्यात् झलिह न परे पुनः॥ ११४
एकारः स्याद् यदा सुप् स्यात् यदा तिङ् स्यात् तदा पुनः।
पचध्वं स्यात् न चैकारः इह सुप् न परे च तिङ्॥ ११५

"भुवन" स्यात् "ङसि" स्याच्चेत् "भुवन आत्" तदा भवेत्।
"झलां जशः" तकारस्य दकारः स्यात् तदा पुनः॥ ११६

२०६। वाऽवसाने। ८।४।५६

अवसानं यदा तत्र झलां चरो विभाषया।
"भुवनात्" स्यात् "भुवनाद्" स्यात् पदद्वयं तथा भवेत्॥ ११७

चत्वारि च पदानि स्युर्यदा द्वित्वं भवेदिह ।
"भुवनात्" "भुवनात्त्" स्याच्च "भुवनाद्" "भुवनाद्द्" पुनः ॥ ११८

"भुवनाभ्याम्" "भुवनेभ्यः" न विशेष इह स्थितः ।
"भुवनस्य" पदं स्याच्च ङसः "सत्" स्याद् पुनर्यदा ॥ ११९
सकारस्य यदा द्वित्वं भुवनस्स्य तदा भवेत् ।
"खरि" चेति सकारस्य तकारो न भवेदिह ॥ १२०
यत्ने भेदः स्थितस्तत्र अल्पप्राणो भवेच्च तः ।
सकारो यो भवेदत्र महाप्राणो मतो हि सः ॥ १२१
"खरिचे"ति सकारस्य तकारश्चेत् भवेदिह ।
"सः सि" चेति पुनः सूत्रं नं भवेच्च प्रयोजनम् ॥ १२२

२०७ । ओसि च । ७।३।२०४

अदन्तं चेद् भवेदङ्गं ओसिह चेत् परे स्थितः ।
ऐकारः स्यात् तदाङ्गस्य "भुवने ओस्" तदा भवेत् ॥ १२३
इह यदा भवेत् सन्धिः "भवनयोः" पदं तदा ।
"भुवन आम्" यदा तत्र सूत्रं परं प्रयोजनम् ॥ १२४

२०८ । ह्रस्वनद्यापो नुट् । ७।१।५४

ह्रस्वान्तं चेद् भवेदङ्गं नद्यन्तं चेद् भवेत् पुनः ।
आवन्तं चेद् भवेदङ्गं नुड़ागमो भवेत्तदा ॥ १२५
"भुवन" "न" पुनर् "आम्" स्यादिति यथाक्रमं स्थितम् ।
इतः परं पुनः सूत्रं भवेत् प्रयोजनं यथा ॥ १२६

२०९ । नामि । ६।४।३

अदन्तं चेद् भवेदङ्गं नामि दीर्घो भवेत्तदा ।
"भुवनानाम्" पदं दीर्घे तथा भवेदिति स्थितिः ॥ १२७

"सुपी"ति च विधिर्दीर्घे परोऽपि न प्रवर्त्तते ।
सन्निपातपरिभाषाविरोधः स्यात् तदा पुनः ॥ १२८
यस्माद् यस्य भवेद् जन्म न तं हन्ति कदापि सः ।
उपजीव्यं निहन्ति न कदापि चोपजीवकम् ॥ १२९
"ह्रस्व" इति स्थितं सूत्रं तदाश्रित्य भवेच्च नुट् ।
ह्रस्वान्नुटो भवेज् जन्म ह्रस्वाच्च नुट् प्रजायते ॥ १३०

"सुपि" ह्रस्वविधाते स्यात् दीर्घस्तेन विधीयते ।
न तं प्रति निमित्तं स्याद्द यत्रादीति पुनश्च नुट् ॥ १३१
ह्रस्वान्नुटो भवेज् जन्म दीर्घाय स न कल्पते ।
नुटं च तं समाश्रित्य "सुपि" नेह प्रवर्त्तते ॥ १३२
रामाभ्यामितिवद्द यत्र परे भ्यामि पदं भवेत् ।
तत्रैव हि भवेद्द योज्यं सूत्रं "सुपि" मुने मते ॥ १३३

स एव हि प्रदेशः स्यात् तत्र "सुपि" प्रयुज्यते ।
तत्रैव लभते सूत्रमवकाशं यथायथम् ॥ १३४
आमो नामि परे यत्र सूत्रं "सुपि" न युज्यते ।
अवकाशं पुनः सूत्रं न तत्र लभते क्वचित् ॥ १३५
आमो नामि परे यत्र सूत्रमन्यत् प्रयोजनम् ।
नामीति च पुनः सूत्रं तत आरभते मुनिः ॥ १३६
रामानां स्याद्द मुनीनां स्याद् नदीनां स्याद् यथा पुनः ।
तथा भवेत् समारम्भो "नामी"ति कुरुते मुनिः ॥ १३७
एवं यदा समारम्भः परिभाषा निवर्त्तते ।
बाधित्वा परिभाषां तां "नामि" च लभते पदम् ॥ १३८
अन्यत्र निरवकाशमत्रैव तत् प्रयुज्यते ।
परिभाषां स्वयं याति समारम्भो भवेद् बली ॥ १३९
"भुवन ङि" यदा तत्र "भुवन इ" तदा भवेत् ।
"भुवने" स्याद्द यदा सन्धिरिष्टं पदं तदेव च ॥ १४०
भुवन ओस् यदा तत्र भुवनयोः पदं भवेत् ।
प्रक्रिया या भवेदत्र सा च पूर्व्वं प्रदर्शिता ॥ १४१
"भुवन सुप्" यदा तत्र भुवने सु तदा भवेत् ।
स्याद्द "बहुवचने" सूत्रम् एकारः स्यात् तथा पुनः ॥ १४२
"भुवने सु" यदा तत्र सूत्रं परं प्रयोजनम् ।
सकारस्य भवेत् षत्वं तदेवं च विधीयते ॥ १४३

२१० । अपदान्तस्य मूर्धन्यः । ८।३।५५

अपदान्ते स्थितः स्याच्चेत् मूर्धन्यः स्यात् तदा पुनः ।
अधिकारे स्थितं सूत्रं यावत् पादं स्थितो हि सः ॥ १४४

२११। इनकोः। ८।३।५७

इतः परं भवेद् यत् तत् इनकोः परं भवेद् हि तत्।
अधिकारे स्थितं सूत्रं यावत् पादं स्थितो हि सः॥ १४५

२१२। आदेश प्रत्यययोः। ८।३।५९

आदेशो यः सकारः स्यात् सकारः प्रत्ययश्च यः।
इणकोः परं भवेत्तस्य मूर्धन्यः ष इति स्थितिः॥ १४६
भुवने सु यदा तत्र "भवनेषु" तदा भवेत्।
सकारस्य षकारः स्यात् इनः पर इति स्थितिः॥ १४७

इनकोः परं यदा "स" स्यात् तदा "ष" स्यादिति स्थितिः।
रामस्येति न स्यादिन्कोः तस्मात् षो न भवेदिह॥ १४८
आदेशप्रत्यययोश्चेत् सकारः स्यात् तदैव षः।
"सुपीः" न स्यात् समादेशः प्रत्ययो न तथा न षः॥ १४९
अपदान्ते यदा षः स्यात् तदा षः स्यादिति स्थितिः।
"हरिःषु" पदान्ते सः तस्मात् षो न भवेदिह॥ १५०

२१३। सर्व्वादीनि सर्व्वनामानि। १।१।२७

भवन्ति सर्व्वनामानि सर्व्वादीनि च संज्ञया।
तदन्तानि पुनर्यानि तानि स्युश्च तथैव च॥ १५१
"द्वन्द्वे" चेति स्थितं सूत्रं तदिह ज्ञापकं भवेत्।
तदन्तस्य तथा संज्ञा सूत्रेण स्यात् समर्थिता॥ १५२
पदं परमसर्व्वत्र यदिह च श्रुतं भवेत्।
आदाय सर्व्वनामतां पदं च तत् प्रसिध्यति॥ १५३
"परम" स्यात् पदं तत्र पदं "सर्व्वं" तथा भवेत्।
तेन परमसर्व्वः स्यात् सर्व्वशब्दः परे स्थितः॥ १५४
"सर्व्वं" स्यात् सर्व्वनामेह अन्ते च तत् स्थितं भवेत्।
तदन्तस्य तथा संज्ञा संज्ञा स्यात् सर्व्वनाम च॥ १५५
यदा परमसर्व्वं स्यात् सर्व्वनाम हि संज्ञया।
तदैव च भवेत् सूत्रं सप्तम्याल्लल् प्रयोजितम्॥ १५६
तेन परमसर्व्वत्र पदमिह प्रजायते।
आदौ सर्व्वनामता स्यात् पश्चात् अल् च प्रवर्त्तते॥ १५७

स्यात् परमभवत्कान् च पदं तत् स्यात् तथैव च ।
आदौ सर्व्वनामतास्यात् पश्चादकच् प्रवर्त्तते ॥ १५८
२७।१।७४- ५६ श्लोकाः
रात्रिः १० घटिकाः

२१४ । जशः शी । ७।१।१७
अदन्तं सर्व्वनाम चेत् जशः शी स्यादिति स्थितिः ।
अनेकाल् स भवेत् "शी" च सर्व्वादेशस्तथा भवेत् ॥ १५९
पूर्व्वपक्षः
अनेकाल् शी न तावत् स्यात् अनेकाल्त्वं न सिध्यति ।
अनेकाल्त्वे पुनर्वाधा परिभाषा भवेदिह ॥ १६०
"सानुबन्धकता"मिति परिभाषा प्रवर्त्तते ।
अनुबन्धं समादाय न चानेकाल् प्रसिध्यति ॥ १६१
"अवंशास्तृ" भवेत् सूत्रं ऋकार इत् भवेत् तदा ।
ऋकारमितमादाय न चानेकाल् प्रवर्त्तते ॥ १६२
प्रत्ययः "शी" भवेदत्र सूत्रं "लश"—प्रयुज्यते ।
शकारमितमादाय न चानेकाल् भवेदिह ॥ १६३

शकार इद् भवेदत्र प्रत्ययः शिद् भवेदतः ।
शित्वमिह निमित्तं स्यात् सर्व्वादेशं च नं प्रति ॥ १६४
उत्तरपक्षः
"अवंशास्तृ" स्थितं सत्यं तत्र "तृ" प्रत्ययो मतः ।
इह सूत्रं "जशः शी" स्यात् नात्र "शी" प्रत्ययो भवेत् ॥ १६५
पूर्व्वं "तृ" प्रत्ययस्तत्र परे "शी" प्रत्ययो न च ।
एवं तत्र द्वयोर्भेदः खलु स्थितः सुदुस्तरः ॥ १६६

"तृ" यदा स्यात् ऋकारस्तु सर्व्वादौ हि विलुप्यति ।
"त" युज्यते परे तत्र एकोहि "त" प्रयुज्यते ॥ १६७
प्रयोगः स्यात् यदा तत्र ऋकारो न स्थितस्तदा ।
अनेकाल्त्वं पुनस्तस्मात् न तदा स्यादिति स्थितिः ॥ १६८

"शी" यदा स्यात् शकारस्तु सर्व्वादौ न विलुप्यति ।
परे तस्य भवेल्लोपः सर्व्वादेशे कृते सति ॥ १६
"शी" यदा स्यात् सर्व्वादेशात् प्राक् "श" इह स्थितो भवेत् ।
अनेकाल्त्वं ततश्च स्यादप्रतिहतमेव हि ॥ १७०
२८।१।७४-१२ श्लोकाः

"सर्व्व शी" स्याद् यदा तत्र "सर्व्व ई" च तदा भवेत् ।
यदा पुनर्भवेत् सन्धिः पदं "सर्व्वे" भवेत् तदा ॥ १७१

२१५। सर्व्वनाम्नः स्मै। ७।१।१४

अदन्तं सर्व्वनाम चेत् "ङे" "स्मै" भवेदिति स्थितिः ।
यदा "सर्व्व" यदा "ङे" च "सर्व्वस्मै" स्यात् पदं तदा ॥ १७२

२१६। ङसिङ्योः स्मात्स्मिनौ। ७।१।१५

अदन्तं सर्व्वनाम चेत् पुनरिह प्रवर्त्तते ।
"ङसि" यदा तदा "स्मात्" स्यात् "स्मिन्" पुनः स्यात् यदा च "ङि" ॥ १७३
यदा "सर्व्व" भवेत् पूर्व्वं यदा "स्मिन्" च परे भवेत् ।
"सर्व्वस्मात्" स्यात् पदं तत्र पञ्चम्यां तत् प्रवर्त्तते ॥ १७४

२१७। आमि सर्व्वनाम्नः सुट्। ७।१।५२

अदन्तं सर्व्वनाम चेत् आमः सुट् स्यात् तदा पुनः ।
एत्वषत्वे "सर्व्वेषाम्" स्यात् "सर्व्वस्मिन्" च पदं भवेत् ॥ १७५

सर्व्वनामसंज्ञाप्रकरणम्

पञ्चत्रिंशत् धृताः शब्दाः सर्व्वादीनां गणे खलु ।
मया गणकारिकायां ते च सर्व्वे प्रदर्शिताः ॥ १७६
इह ये ये विशेषाः स्युः तान् तान् वच्मि परे पुनः ।
उक्तं दीक्षितपादैर्यत् तदुच्यते सविस्तरम् ॥ १७७

(१) उभ

उभशब्दे विशेषश्च पुनरिह प्रवर्त्तते ।
दर्शयामि च तान् सर्व्वान् यथाशास्त्रं यथा परम् ॥ १७८

विषयश्चेद् भवेद् द्वित्वम् उभशब्दः प्रयुज्यते ।
स च द्वित्वविशिष्टस्य वाचकः स्यादिति स्थितिः ॥ १७९
यदा शब्दो भवेद् योज्यो द्विवचनं भवेत् तदा ।
नित्यं द्विवचनं तत्र नित्यं द्वित्वं प्रवर्त्तते ॥ १८०

सर्व्वादीनां गणे शब्दः पुनरिह च पठ्यते ।
भवेच्च सर्व्वनाम स सर्व्वनाम स उच्यते ॥ १८१
सर्व्वनाम यदा शब्दः "अव्यये"ति प्रयुज्यते ।
प्रत्ययः स्याद् अकच् तत्र "उभकौ" स्यात् पदं तथा ॥ १८२
सर्व्वनाम यदा न स्यात् "अकच्" तदा भवेन्न च ।
"उभकौ" च तदा न स्यात् "उभकौ" च न लभ्यते ॥ १८३
अकच् भवेद् यथा तत्र यथा स्यादुभकौ पुनः ।
तथा तस्य गणे पाठः सन्निवेशस्तथा गणे ॥ १८४

पूर्व्वपक्षः

मास्तु गणे धृतः शब्दो मास्तु वा सर्व्वनामता ।
मास्तु पुनरकच् तत्र उभकौ मास्तु वा तथा ॥ १८५
"प्रागिवात् कः" स्थितं सूत्रं स्वार्थेऽपि को भवेदिह ।
प्रत्ययः को यदा तत्र उभकौ स्यात् पदं तदा ॥ १८६
नापि यदा भवेदकच् उभकौ स्यात् तदापि च ।
कः प्रत्ययो भवेत् स्वार्थे तेन सिध्येत् प्रयोजनम् ॥ १८७

उत्तरपक्षः

उभशब्दो यदा तत्र प्रत्ययः स्यादकच् यदा ।
वरीवर्त्ति तदा द्वित्वं द्वित्वं तदा न हन्यते ॥ १८८
अकजिह भवेन् मध्ये प्राक् टेः भवेदिति स्थितिः ।
"उभकौ" च पदं तद्वत् तथा कृते प्रसिध्यति ॥ १८९
मध्यपतितन्यायश्च पुनरिह प्रवर्त्तते ।
गृह्यते उभशब्दश्चेत् उभकौ चापि गृह्यते ॥ १९०
यथास्थितं स्थितं द्वित्वं द्वित्वमिह न हन्यते ।
उभशब्दो यथा द्वित्वे स्यादुभकौ तथैव च ॥ १९१

"कः" प्रत्ययो यदा तत्र द्वित्वं तदा विहन्यते ।
कः प्रातिपदिकाद् बाह्यो हन्ति द्वित्वं तथा च कः ॥ १९२
द्वित्वं यदा परित्यक्तमर्थश्चान्यो भवेत्तदा ।
अवयवी भवेदर्थस्तदर्थोऽपि च दृश्यते ॥ १९३

अव्ययो यदा चार्थः प्रत्ययः स्यादयच् तदा ।
"उभादि"ति स्थितं सूत्रं तयपः स्यादयच् तथा ॥ १६४
परे तसि यथा चायच् परे त्रे स्यादयच् यथा ।
"उभयतो" यथा सिध्ये "दुभयत्र" यथा पुनः ॥ १६५
इहापि स्यादयच् तद्वै कप्रत्यये परे सति ।
"उभयकौ" पदं सिध्येदयच् यदि तथा भवेत् ॥ १६६
अयजिह परे स्याच्चेत् उभयकौ पदं भवेत् ।
"उभकौ" न तदा च स्यात् "उभकौ" च न लभ्यते ॥ १६७

"उभयोऽन्यत्र" वेतीह बाधकं च स्थितं पुनः ।
अन्यत्र च पुनर्द्वित्वाद् भवेदयच् यथोभयम् ॥ १६८

(२) उभय

उभयं स्याद् यदा शब्दः जश् इह च परे तदा ।
"अयच्" स्यात् "तयपः" स्थाने स्थानिवच्च भवेदयच् ॥ १६६
"अयच्" स्यात् स्थानिवद् यदा "तयप्"वच्च भवेत्तदा ।
"तयपि" स्याद् यथा कार्य्यम्"अयचि" स्यात् तथैव च ॥ २००
"प्रथमे"ति स्थितं सूत्रं "तयप्" तत्र च तिष्ठति ।
जशि परे विभाषा च सर्व्वनाम भवेत्तदा ॥ २०१
"अयच्" यदा भवेदत्र अनारब्धो विधि र्भवेत् ।
नित्यं तस्मात् भवेत् संज्ञा "उभये" स्यात् पदं तथा ॥ २०२

(३) इतर-इतम

यः खलु सर्व्वनाम स्यात् स इह पठितो गणे ।
ये सन्ति सर्व्वनामानि तेषां गणो भवेदयम् ॥ २०३
"इतरः" प्रत्ययस्तत्र स इह च गणे धृतः ।
"इतमः" प्रत्ययस्तत्र स चापि च धृतो गणे ॥ २०४
"इतरेण" इतमान्तः पुनरिह धृतो भवेत् ।
"इतमेन" इतमान्तो धृतो भवेत्तथैव च ॥ २०५
इतरान्तो भवेद् यश्च इतमान्तो भवेच्च यः ।
स इह सर्व्वनाम स्यात् स इह सर्व्वनाम च ॥ २०६

सर्व्वनामगणे पाठात् तयोः स्यात् सर्व्वनामता ।
तदन्तश्च तदन्तश्च सर्व्वनाम भवेदिह ॥ २०७

डतरेण डतरान्त इह खलु च गृह्यते ।
डतमेन डतमान्तो गृह्यते च तथैव च ॥ २०८
प्रत्ययग्रहणे तत्र तदन्तग्रहणं भवेत् ।
परिभाषा स्थिता शास्त्रे युज्यते सा च सर्व्वथा ॥ २०९

पूर्व्वपक्षः

डतरेण डतमान्तो यदि खलु धृतो भवेत् ।
डतरान्तः पुनः स्याच्चेत् सर्व्वनाम हि संज्ञया ॥ २१०
डतमेन डतमान्तो यदि धृतो भवेत् पुनः ।
डतमान्तः पुनश्चेत् स्यात् सर्व्वनाम च संज्ञया ॥ २११
"तरपा" च तरबन्त स्तदा धृतो भवेदिह ।
तरबन्तस्तदा शब्दो "घ" इह स्यात् च संज्ञया ॥ २१२
"तमपा" च तमबन्तः तद्वद् धृतो भवेदिह ।
तमबन्तः पुनः शब्दः "घ"स्तथा स्याच्च संज्ञया ॥ २१३
शुक्लतरस्तदा "घः" स्यात् कृष्णतरस्तदा च "घः" ।
दृढ़तरस्तदा "घः" स्यात् दीर्घतरस्तदा च "घः" ॥ २१४

(उत्तरपक्षः)

न च तथा भवेदत्र न स न्यायः प्रयुज्यते ।
परिभाषा स्थिता शास्त्रे सा हि मान्या भवेन्हि ॥ २१५

संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति (प)

संज्ञाविधौ च कर्त्तव्ये तदन्तग्रहणं न हि ।
प्रत्ययेन प्रत्ययान्तो न तत्र गृह्यते खलु ॥ २१६
न हि सुपा सुबन्तं स्यात् न तिङन्तं तिङा पुनः ।
सुबन्तं स्यात् तिङन्तं स्याद् "अन्त" शब्दो हि युज्यते ॥ २१७
"सुप्तिङन्तं पदं" सूत्रं तदिह ज्ञापकं मतम् ।
न "तदन्तो" भवेत् "तेन" "अन्त"शब्दो हि योजितः ॥ २१८

(पूर्व्वपक्षः)

इहापि च भवेत् संज्ञा संज्ञाविधिरिहापि च ।
तदन्तग्रहणं तस्मादिहापि च न शोभनम् ॥ २१९

(उत्तरपक्षः)

युक्ता हि भवतां युक्ति र्वाग् भवतां गरीयसी ।
संज्ञाविधि भ'वेदेष न तत्र संशयः स्थितः ॥ २२०
तथापि केवलं संज्ञा नेह शास्त्रे प्रयुज्यते ।
न संज्ञिनं विना संज्ञा न दिवा तपनं विना ॥ २२१
एक इह तरप् शास्त्रे न श्रूयते न दृश्यते ।
एक इह तमप् शास्त्रे न दृश्यते न युज्यते ॥ २२२
तदन्तग्रहणं तस्मादगत्या च भवेद् गतिः ।
तदन्तग्रहणं विना न गतिरन्यथा सखे ॥ २२३

(४) अन्यतर-अन्यतम

"अन्यतर" स्थितः शब्दः "अन्यतम" स्थितः पुनः ।
तौ द्वौ प्रकृतिभूतौ च न व्युत्पन्नौ मतौ हि तौ ॥ २२४
विषयः स्याद् यदा द्वित्वं बहुत्वं विषयो यदा ।
निर्धारणे तदा तौ द्वौ स्वभावाच्च तथा गतिः ॥ २२५

(५) त्व त्व

अदन्तौ समरूपौ तौ अन्यार्थे तौ समार्थकौ ।
उदात्तश्च भवेदकः अनुदात्तः परो भवेत् ॥ २२६
त्वत् इति च भवेच् शब्दः तान्तः शब्दो भवेच्च सः ।
स इह च पृथक् शब्दः इति प्राहुः परे पुनः ॥ २२७

(६) सम

"सम" तत्र स्थितः शब्दः "सर्व्व"वाची भवेच्च सः ।
यदा "सर्व्व" भवेदर्थो भवेच्च सर्व्वनामता ॥ २२८
"तुल्या"र्थश्चेत् तथा न स्यात् "भुवन"वत् भवेत्तदा ।
"यथासंख्यं" स्थितं सूत्रं "समानाम्" च पदं मुनेः ॥ २२९

१।४।७५-२७ श्लोकाः
(२०३-२२९ श्लोकाः)

२१८ । पूर्व्व-पर-अवर-दक्षिण-उत्तर-अपर-अधराणि व्यवस्थायाम् असंज्ञायाम् । १।१।३४

यदा देशो यदा कालः पुनरिह प्रतीयते ।
एतानि सर्व्वनामानि तदा खलु भवन्ति च ॥ २३०

जशिह चेत् परे तत्र सा संज्ञा स्यात् विभाषया ।
"पूर्व्वाः" भवेद् यथाप्राप्तं "पूर्व्वे" भवेद् विकल्पतः ॥ २३१
देशः कालो न चेदर्थः न सा संज्ञा परे जशि ।
"दक्षिणा गाथका"स्तत्र न तदर्थस्तथा च न ॥ २३२
संज्ञा यदि भवेदर्थः तदा सा न परे जशि ।
"उत्तराः कुरव"स्तत्र संज्ञा हि स्यात् ततश्च न ॥ २३३

२१९। स्वमज्ञातिधनाख्यायाम्। १।१।३५

न ज्ञातिश्चेत् भवेदर्थो न चेदर्थो भवेद् धनम् ।
"स्व" इत्यस्य विभाषा स्यात् तथा संज्ञा परे जशि ॥ २३४
नित्या प्राप्ता भवेत् संज्ञा जशि परे विभाषया ।
"स्वे पुत्रा"श्च भवेदत्र "स्वाःपुत्रा"श्च तथा भवेत् ॥ २३५
"स्वे गाव"श्च भवेत्तद्वत् "स्वा गावश्च भवेत्तथा ।
"आत्मीया"श्च भवेदर्थ स्तस्मिन्नर्थे प्रयुज्यते ॥ २३६
ज्ञातिर्यदि तदा "स्वाः" स्यात् संज्ञा तदा न वर्त्तते ।
धनं यदि तदा "स्वाः" स्यात् न संज्ञा स्यात् तदापि च ॥ २३७
"धूमायन्ते इवाश्लिष्टा प्रज्ज्वलन्तीव संहताः ।
उल्मूकानीव मेऽमी स्वा ज्ञातयो भरतर्षभ ॥"
"प्रभूताः स्वा न दीयन्ते" धने भवेन्निदर्शनम् ।
"प्रभूताः स्वा न भुज्यन्ते" तथैव च भवेद्ध धने ॥ २३८

२२०। अन्तरं बहिर्योगोपसंव्यानयोः। १।१।३६

अर्थो यदा बहिर्योगः परिधानं यदा पुनः ।
"अन्तरं" सर्व्वनाम स्यात् विभाषा तु परे जशि ॥ २३९
नित्या प्राप्ता भवेत् संज्ञा जशि परे विभाषया ।
स्याद् "'अन्तरा' गृहा"स्तत्र स्याद् "'अन्तरे' गृहाः" पुनः ॥ २४०
"अन्तरे शाटका"श्च स्याद्द "अन्तरे शाटका"स्तथा ।

अपूरीति च वक्तव्यम् (वा)

"अन्तरायां पुरी"ति स्याद् इह संज्ञा न युज्यते ॥ २४१

२२१ । पूर्व्वादिभ्यो नवभ्यो वा । ७।१।१६

यदा "ङसि" भवेत् "स्मात्" च यदा "ङे" "स्मिन्" भवेत्तदा ।
पूर्व्वादिभ्यो नवभ्यो वा पदं भवेत् तथा पुनः ॥ २४२
"पूर्व्वस्मात्" स्यात् पदं तत्र "पूर्व्वात्" पदं भवेदपि ।
"पूर्व्वस्मिन्" च पदं तत्र पदं "पूर्व्वे" तथा भवेत् ॥ २४३
बहुव्रीहिर्यदा कार्य्यो न सर्व्वनामता तदा ।
यदा "त्वकं पिता यस्य" स्यात् "त्वत्कपितृक"स्तदा ॥ २४४
समासात् प्रागेव वाक्ये निषिद्धा सर्व्वनामता ।
अन्यथा प्रत्ययश्चाकच् वाक्येऽपि च भवेदिह ॥ २४५
श्रूयेत स समासेऽपि पुनरकच् तदा खलु ।
"अतिभवका"नित्यत्र समासे श्रूयते यथा ॥ २४६
रूपं "त्वकत्पितृक"श्च बहुधा श्रूयते भुवि ।
रूपं "मकत्पितृकश्च" पुनर्लोके प्रयुज्यते ॥ २४७
एतद्रूपं भवेदिष्टमिति भाष्ये पतञ्जलिः ।
भाष्यकार इदं सूत्रं प्रत्याचख्यौ ततः पुनः ॥ २४८
यथोत्तरं मुनीनाञ्च प्रामाण्यं स्वीकृतं नये ।
गृह्यते च पदं तस्मात् तथाविधमिति स्थितिः ॥ २४९

संज्ञोपसर्जनीभूतास्तु न सर्व्वादयः (प)

यदा संज्ञा भवेदर्थस्तदा न सर्व्वनामता ।
"सर्व्व" इति यदा नाम न सर्व्वनामता तदा ॥ २५०
स्यादुपसर्जनं यत्र तत्र न सर्व्वनामता ।
"अतिसर्व्व" स्तथा हि स्यात् तस्मान्न सर्व्वनाम सः ॥ २५१
यदा संज्ञा भवेदर्थः यदा स्यादुपसर्जनम् ।
अर्थभेदस्तदा तत्र अर्थभेदो न गृह्यते ॥ २५२
भिन्नार्थे चेत् स्थितः शब्दः स इह च न गण्यते ।
भिन्नार्थे च स्थितस्येह न भवेत् सर्व्वनामता ॥ २५३

सर्व्वनाम महासंज्ञा मुनिनेह प्रयोजिता ।
अणुगुणाः पुनः शब्दा गणे चापि निवेशिताः ॥ २५४

यदर्थे सर्व्वनाम यः तदर्थे स गणे धृतः ।
उपयोगो यथा यस्य तथा तस्य धृतिर्गणे ॥ २५५
अर्द्धमिति यदा चार्थः "नेम" स्यात् सर्व्वनाम च ।
तदर्थे च पुन"र्नेम" गणे तत्र प्रदर्शितः ॥ २५६

भिन्नार्थे चेत् स्थितः शब्दो न गृह्यते पुनश्च सः ।
न सर्व्वनामता तस्य कार्य्यकाले भवेदिह ॥ २५७
"स्मिन्नि"त्यादि तदा न स्यात् "अड्डादि"न युज्यते ।
संज्ञाकार्य्यं गणकार्य्यं तदा न स्यादिति स्थितिः ॥ २५८

२२३ । तृतीया समासे । १।१।३०

स्यात् तृतीयासमासश्चेत् तदा संज्ञा भवेन्न च ।
भवेन्न मासपूर्व्वाय न संज्ञा च प्रवर्त्तते ॥ २५९

२२४ । द्वन्द्वे च । १।१।३१

समासश्चेद् भवेद् द्वन्द्वः संज्ञा पुनर्न युज्यते ।
भवेत् पूर्व्वापराणाश्च न च संज्ञा भवेदिह ॥ २६०

२२५ । विभाषा जसि । १।१।३२

नित्ये द्वन्द्वे निषेधः स्यात् परे जसि विभाषया ।
कतरकतमे तत्र कतरेकतमास्तथा ॥ २६१

२२६ । प्रथम-चरम-तय-अल्प-अर्द्ध-कतिपय-नेमाश्च । १।१।३३

जशि परे विभाषा स्यात् संज्ञा चैषामिति स्थितिः ।
"प्रथमाः" स्याद् यथा प्राप्तं "प्रथमे" स्याद् विभाषया ॥ २६२

विभाषाप्रकरणे तीयस्य वा ङित्सु सर्व्वनामसंज्ञा (वा)

तीयस्य च भवेत् संज्ञा ङित् परे चेत् विभाषया ।
"द्वितीयाय" पदं तत्र "द्वितीयस्मै" तथा भवेत् ॥ २६३

इति—

सर्व्वनाम संज्ञाप्रकरणम् ।

२२७ । जराया जरसन्यतरस्याम् । ७।२।१०१

अजादिका विभक्तिश्चेत् परे तत्र प्रवर्त्तते ।
"जरायाः" स्याद् "जरस्" तत्र स आदेशो विभाषया ॥ २६४

निर्जर = निर्जरस्

उत्तरपक्षः

"जरा" यदा भवेत्तत्र तदा "जरस्" भवेद् यदि ।
"निर्जर" स्याद् यदा शब्दो "निर्जरस्" स्यात् तदापि च ॥ २६५
यथा यथा भवेत् "तस्य" "तदन्तस्य" तथा तथा ।
परिभाषा स्थिता शास्त्रे सा प्रमाणं भवेदिह ॥ २६६

पदाङ्गाधिकारे तस्य तदन्तस्य च (प)

पदं चेद् विषयस्तत्र अङ्गं चेद् विषयो भवेत् ।
"तस्मिन्" भवेद् यथा तत्र "तदन्ते"ऽपि भवेत्तथा । २६७

पूर्व्वपक्षः

"जरस्" यः स्यात् समादेश स चानेकाल् भवेदिह ।
"अनेकाल् शित्" स्थितं सूत्रं "सर्व्वादेशो" भवेत्तथा ॥ २६८
"सर्व्वश"श्चेत् पुनः शब्द इह खलु धृतो भवेत् ।
"निर्जर" स्यात् तदा शब्दस्तस्यैवेह भवेद् "जरस्" ॥ २६९
"अंशस्य" न समादेशः "सर्व्वस्य" च भवेदिह ।
"जराया" न "जरस्" तत्र "निर्जर"स्य भवेद् "जरस्" ॥ २७०

उत्तरपक्षः

"निर्जर"स्य न "जरस्" स्यान् "जराया" हि "जरस्" भवेत् ।
"समग्र"स्य न तावत् स्याद् "अंश"स्यैव भवेत् खलु ॥ २७१
यावानंशो निर्द्देशेन समाकृष्टो भवेदिह ।
तावानंशो भवेद् ग्राह्यो न चाल्पं नाधिकं ततः ॥ २७२
परिभाषा स्थिता शास्त्रे सा प्रमाणं भवेदिह ।
परिभाषा भवेदत्र यथा परे प्रदर्शिता ॥ २७३

निर्द्दिश्यमानस्यादेशा भवन्ति (प)

निर्द्दिष्टस्य समादेश इह शास्त्रे विधिर्भवेत् ।
स च विधिर्भवेद् योज्य इहापि प्रकृते पुनः ॥ २७४
इह "जर" भवेदंशः "अंशो" निर्द्दिश्यते खलु ।
"अंश"स्य स्यात् समादेशः "सर्व्व"स्य न भवेत् पुनः ॥ २७५
"जराया" हि "जरस्" तस्मात् "निर्जर"स्य "जरस्" तु न ।
"अंश"स्य हि समादेशः "समग्र"स्य भवेन्न च ॥ २७६

पूर्व्वपक्षः

सूत्रं च "जराया जरस्" आकारान्ता स्थिता "जरा"।
आकारान्ता स्थिता या सा तस्या एव तथा भवेत् ॥ २७७
"निर्जर" हि स्थितः शब्द आकारान्ता "जरा" च न।
कथं तर्हि समादेशो भवेद् "जरस्" मते एव ॥ २७८

उत्तरपक्षः

एकांशेन विकृतिश्चेत् शब्दस्येह भवेत् क्वचित्।
विकृतेन तदंशेन शब्दस्य स्याद् न चान्यता ॥ २७९
यः शब्दश्च स्थितः पूर्व्वं स शब्दश्च स्थितः परे।
एकांशेन विकृतः स्यात् न विकृतः समग्रतः ॥ २८०
परिभाषा स्थिता शास्त्रे सा प्रमाणं भवेदिह।
परिभाषा भवेद् ग्राह्या सा गृह्यते मया पुनः ॥ २८१

एकदेशविकृतस्यानन्यत्वात् (५)

एकदेशविकृतस्य न चान्यत्वं भवेदिह।
अविकृते गृहीतो यो विकृतेऽपि स गृह्यते ॥ २८२
"जरा" यदि विकारेण "जर" भवेद् इह क्वचित्।
"जरा" एव भवेद् "जर" "निर्जर" गृह्यते ततः ॥ २८३
सुतो यदि विकारेण खञ्जतां भजते क्वचित्।
स सुतः स सुतो हि स्यात् सुत एव स गृह्यते ॥ २८४

निर्जर स्याद् यदा शब्दः प्रत्यय औ परे यदा।
निर्जरस् स्यात् समादेशो निर्जरसौ पदं भवेत् ॥ २८५
निर्जर स्यात् यदा शब्दो प्रत्ययो जश् परे यदा।
निर्जरस् स्यात् समादेशो निर्जरसः पदं भवेत् ॥ २८६

निर्जर स्याद् यदा शब्दः प्रत्ययः टा परे यदा।
निर्जरस् स्यात् समादेशो निर्जरसा पदं भवेत् ॥ २८७
"इन" "आत्" च विधिः पूर्व्वो "जरस्" विधिः परो भवेत्
इनादिकं च बाधित्वा जरस् इह प्रवर्त्तते ॥ २८८
निर्जरसे पदं तद्वत् निर्जरसः पदं तथा।
हलादौ च परे तत्र "भुवन"वत् भवेत् पदम् ॥ २८९

पूर्व्वविप्रतिषेधेन "इन" 'आत्" च प्रवर्त्तते ।
सन्निपातपरिभाषा न च नित्या भवेत् पुनः ॥ २९०
इत्यपि च मतं तत्र केषाञ्चिच्च स्थितं पुनः ।
वृत्तिकृता स्ववृत्तौ तत् मतं पुनः समर्थितम् ॥ २९१
पदं स्याद् निजंरसिन "इन" यदा परे भवेत् ।
निजरसात् पदं च स्याद् "आत्" परे चेत् प्रवर्त्तते ॥ २९२
निजंरसा पदं न स्यात् निजंरसः पदं च न ।
तेषां मते पदं तत् तत् न हि खलु प्रसिध्यति ॥ २०३
भिस् यदा स्यात् परे तत्र निजंरसैः पदं भवेत् ।
रूपान्तरं तथाभूतं तैरिह च प्रदर्शितम् ॥ २९४
अन्यदपि पदं दत्तं तदनुसारिभिः पुनः ।
निजंरस्य पदं षष्ठ्यां भवेत्तदनुसारिणाम् ॥ २९५
न रुचिरं भवेत् सर्व्वं सर्व्वं न सम्मतं भवेत् ।
तत् तद् भाष्यविरुद्धं स्यात् न सम्मतं ततो हि नः ॥ २९६

४।४।७५-३२ श्लोकाः
(२९५-२९६ श्लोकाः)
२६।१।७४-६८ श्लोकाः

२२८। पद्-दत्-नस्-मास्-हृत्-निश्-असन्-यूषण्-दोषण्-यकन्-शकन्-उदन्-आसन्-शस्-प्रभृतिषु । ६।१।६३

पादस्य पद् भवेदत्र दन्तस्य "दत्" तथा भवेत् ।
मासस्य मास् भवेत्तद्वत् हृदयस्य भवेच्च हृत् ॥ २९७
निशायाः निश् भवेत्तद्वत् असृजः स्यादसन् तथा ।
यूषस्य च भवेद् यूषण् दोस् दोषणस्तथा भवेत् ॥ २९८
यकृतः स्यात् यकन् तद्वत् शकृतः स्यात् शकन् पुनः ।
उदन् स्यादुदकस्येह आस्यस्यासन् भवेत्तथा ॥ २९९
शसादिश्चेत् परे तत्र तथादेशो विभाषया ।
पदः पादान् भवेदत्र पादेन च पदा तथा ॥ ३००
पादाभ्यां स्यात् तथा पद्भ्यां पादैः पद्भिस्तथा भवेत् ।
अन्यत्रापि भवेदेवमूहनीयं यथायथम् ॥ ३०१

२२९। सुट् अनपुंसकस्य। १।१।४३

प्रत्याहारो भवेत् सुट् च पञ्चकं च धृतं भवेत्।
सर्व्वनामस्थानं तत् स्यात् क्लीवे तथा भवेन्न च ॥ ३०२
सु औ जश् च त्रयं तत्र अम् औट् तत्र द्वयं पुनः।
पञ्चकं स्यात् तथा तत्र तत्पञ्चकं च गृह्यते ॥ ३०३

२३०। स्वादिष्वसर्व्वनामस्थाने। १।४।१७

सर्व्वनामस्थानं स्याच्चेत् स्वादिकं चेत् परे स्थितम्।
यदिह च स्थितं पूर्व्वं तदुच्यते पदं खलु ॥ ३०४
राजन् इति यदा पूर्व्वे भ्यमिह च यदा परे।
राजन् शब्दो भवेदत्र पदमिति च संज्ञया ॥ ३०५

२३१। यचि भम्। १।४।१८

स्वादिषु यत् यकारादि स्वादिषु मदजादिकम्।
तदिह चेत् परे तत्र पूर्व्वं भः स्यादिति स्थितिः ॥ ३०६

२३२। आकडारादेका संज्ञा। १।४।१

कडाडाः कर्मधारेय इतः परं भविष्यति।
एकस्य स्यादेका संज्ञा ततः प्राक् स्यात् तथा पुनः ॥ ३०७
"ह्रस्वं खलु" स्थितं सूत्रं ह्रस्वं लघु भवेदिह।
"संयोगे गुरु" सूत्रं स्यात् ह्रस्वस्य गुरता भवेत् ॥ ३०८
एक एव स्वरस्तत्र लघु भवेद्व भवेद्व गुरुः।
न युज्यते द्वयं तत्र संज्ञा चैका प्रवर्त्तते ॥ ३०९
शमादिकं यदा स्यादच् द्वयं तत्र प्रयुज्यते।
भसंज्ञा पदसंज्ञा च द्वयं प्राप्ता भवेदिह ॥ ३१०
एका संज्ञा भवेदत्र भसंज्ञा च प्रयुज्यते।
जश्त्वं तेन न तावत् स्यात् दतः दता तथा भवेत् ॥ ३११
हलादि चेत् परे तत्र पदसंज्ञा प्रयुज्यते।
तदा पुनर्भवेत् जश्त्वं दद्भ्यां पदं तदा भवेत् ॥ ३१२

२३३। भस्य। ६।४।१२९

इतः परं भवेद्-यद् यत् भस्य भवेदिति स्थितिः।
यावदन्तं तु षष्टस्य अधिकारः स्थितो भवेत् ॥ ३१३

२३४। अल्लोपोऽनः। ६।४।१३४

अन्नित्यन्तो यदा भः स्यादकारश्च विलुप्यति।
पदं भवेद्‌ यथा तत्र तथा परे प्रदर्शितम्॥ ३१४

२३५। रषाभ्यां नो णः समानपदे। ८।४।१

रकारश्चेत् भवेत् पूर्व्वे षकारश्चेत् भवेत् पुनः।
एकपदे नकारस्य तदा णः स्यादिति स्थितिः॥ ३१५
षकारश्च स्थितः पूर्व्वे णत्वे पूष्णा भवेदिह।
षकारश्च स्थितः पूर्व्वे णत्वे पूष्णास्तथा भवेत्॥ ३१६

पूर्व्वपक्षः

"अच"श्चेति स्थितं सूत्रं तत्र "पूर्व्वविधौ" पदम्।
"पूर्व्वस्माद्‌ विधि"रित्येवं व्याख्या तस्य स्थिता पुनः॥ ३१७
इह शब्दः स्थितो "पूषण्" अकारो विद्यते खलु।
"अल्लोपः—"युज्यते तत्र अकारो लुप्यते तथा॥ ३१८
स लोपः स्थानिवत् तावद्‌ अकारो विद्यते ततः।
अकारः स्यात् यदा तत्र "रषाभ्याम्" च न युज्यते॥ ३१९
"रषाभ्यां" चेद्‌ न युक्तं स्यात् णत्वमपि न लभ्यते।
पूषण्शब्दे णकारता तस्मात् तत्र न सिध्यति॥ ३२०

उत्तरपक्षः

भवतु वा तथा व्याख्या न तत्र विमतिर्मम।
न तथा चेद्‌ भवेद्‌ णत्वं भवतु नैव वा तथा॥ ३२१
एषः पक्षो न चेद्‌ ग्राह्यः परः पक्षः स्थितः पुनः।
तस्मिन् पक्षे भवेत्तत्र णत्वं खलु यथायथम्॥ ३२२
परं तत्र स्थितं सूत्रं तत् तत्र च प्रयुज्यते।
सूत्रेण च पुनस्तेन णत्वं तत्र प्रवर्त्तते॥ ३२३
"अट्‌कुप्वाङ्नुम्व्यवायेऽ"पि सूत्रं योज्यं भवेदिह।
अकारस्य व्यवायेऽपि णत्वं तेन प्रवर्त्तते॥ ३२४
"रषाभ्यां" चेद्‌ न योज्यं स्याद्‌ "अट्‌कुप्वा" तु प्रयुज्यते।
पूर्व्वेण चेत् न णत्वं स्यात् नूनं स्यात् तत् परेण च॥ ३२५

वस्तुतः स्थानिवद्भावो न हि तत्र प्रवर्त्तते ।
न च पूर्व्वत्रासिद्धीये स्थानिवत्त्वं प्रयुज्यते ॥ ३२६
वार्त्तिकं च स्थितं तत्र तत् प्रमाणं भवेन्मम ।
वार्त्तिकं यत् भवेदत्र दर्शयामि परे च तत् ॥ ३२७

पूर्व्वत्रासिद्धीये न स्थानिवत् (वा)

पूर्व्वत्रासिद्धमित्येतत् शास्त्रं यत्र प्रवर्त्तते ।
न तत्र स्थानिवद्भाव आश्रियते विचक्षणैः ॥ ३२८

पूर्व्वपक्षः

न च पूर्व्वत्रासिद्धीये स्थानिवत्त्वं प्रयुज्यते ।
इति यद् भवता प्रोक्तं तन्न न्याय्यं भवेदिह ॥ ३२६
संयोगादेर्विलोपश्चेत् लत्वं णत्वं भवेद् यदि ।
स्थानिवत्त्वं भवेत् सिद्धं न च बाधा प्रवर्त्तते ॥ ३३०
वार्त्तिकं भवतां स्याच्चेत् वार्त्तिकं स्याद्ध ममापि च ।
ममापि च प्रमाणं स्यात् वार्त्तिकं च यथा परम् ॥ ३३१

तस्य दोषः संयोगादि-लोप-लत्व-णत्वेषु (वा)

संयोगादेर्विलोपे च लत्वे णत्वे तथैव च ।
स्थानिवत्त्वनिषेधस्य पुनर्भवेत् निषेधनम् ॥ ३३२
निषेधस्य निषेधश्चेत् पुनस्तत्र प्रवर्त्तते ।
स्थानिवत्त्वं भवेत् सिद्धं स्थानिवत्त्वं प्रसिध्यति ॥ ३३३
निषेधेन निषेधश्चेत् भवेदिह समीकृतः ।
निषेधो न तदा तिष्ठेत् स्थानिवत्त्वं च तिष्ठति ॥ ३३४
अपि पूर्व्वत्रासिद्धीये स्थानिवत्त्वं भवेत् सताम् ।
लत्वे णत्वे तथा तत्र संयोगादे विलोपने ॥ ३३५
प्रकृते विषयो णत्वं स्थानिवत्त्वं भवेत्ततः ।
अकारः स्थानिवत् तत्र "रषाभ्यां" च न युज्यते ॥ ३३६
"रषाभ्यां" चेद् न युक्तं स्यात् णत्वमपि न सिध्यति ।
भूषण शब्दे पदं यत् स्यात् न तत्र स्यात् णकारता ॥ ३३७

उत्तरपक्षः

भवतु स्थानिवत्त्वं वा गृह्यते भवतां मतम् ।
"अट्कुप्वां" च स्थितं सूत्रं तेन गतिर्भवेदिह ॥ ३३८

अकारस्य व्यवायेऽपि शास्त्रं तत्र प्रवर्त्तते।
पूर्व्वमेव मया प्रोक्तं पुनर्ब्रूमि तदेव हि॥ ३३६
६।१ ७५-२३ श्लोकाः
(३१७-३३६ श्लोकाः)

२३६। नलोपः प्रातिपदिकान्तस्य। ८।२।७

स्यात् प्रातिपदिकं यत्र नकारान्तं भवेच्च यत्।
इह तस्य नकारस्य भवेल्लोप इति स्थितिः॥ ३३८
असिद्धत्वात् नकारस्य न दीर्घता भवेदिह।
एत्वमपि न तावत् स्यात् ऐत्वमपि भवेन्न च॥ ३३६
यूषभ्यां स्यात् पदं तत्र यूषभिः च पदं भवेत्।
यूषभ्यः स्यात् पदं तत्र पदयूह्यं परं बुधैः॥ ३४०

२३७। विभाषा ङिश्योः। ६।४।१३६

ङौ परे चेद् भवेदत्र शी परे चेद् भवेत् पुनः।
अकारस्य तदा लोपो विभाषया भवेदिह॥ ३४१
यूष्णि स्यात् च पदं तत्र यूषणि स्यात् तथा पदम्।
"भुवन"वत् भवेच् शेषम् ऊह्यं बुधैर्यथायथम्॥ ३४२

२३८। संख्या-वि-साय-पूर्व्वस्य अह्नस्य अहन् अन्यतरस्यां ङौ। ६।३।११०

संख्या यदि भवेत् पूर्व्वे "वि" पूर्व्वे चेद् भवेदिह।
"साय" यदि भवेत् पूर्व्वे "अह्नः" यदि परे स्थितः॥ ३४३
अहन् तदा समादेशः ङौ परे स्याद् विभाषया।
द्व्यहनि स्यात् पुनद्व्यह्नि विभाषा च पदद्वयम्॥ ३४४
द्व्यह्ने चापि पदं तत्र पदत्रयं तथा भवेत्।
द्व्यह्नि स्याद् द्व्यहनि स्याच्च पदं द्व्यह्ने भवेत्तथा॥ ३४५
सायाह्नि स्यात् पदं तत्र सायाहनि तथा भवेत्।
सायाह्ने च पदं तत्र सर्व्वत्रैव पदत्रयम्॥ ३४६

इति—
अवन्ताः

अथ आदन्तप्रकरणम्

विश्वपा

"विश्वपाः" स्याद् यदा शब्दः प्रत्ययः "सु" यदा पुनः ।
विश्वपाः स्यात् पदं तत्र न विशेष इह स्थितः ॥ ३४७
विश्वपा औ यदा तत्र वृद्धिरेचि प्रवर्त्तते ।
इह खलु भवेद् वृद्धिः विश्वपौ स्यात् पदं तथा ॥ ३४८
विश्वपा जश् यदा तत्र "अकः" सूत्रं प्रयुज्यते ।
अकः सवर्णे दीर्घः स्यात् विश्वपाः स्यात् पदं तदा ॥ ३४९

२३९ । दीर्घाज्जसि च । ६।४।१०५

जश् इह चेत् परे दीर्घात् इजिह चेत् परे भवेत् ।
पूर्व्वसवर्णदीर्घो न प्रथमयो र्भवेत्तदा ॥ ३५०
यदा दीर्घः निषिद्धः स्यात् वृद्धिरेचि प्रवर्त्तते ।
विश्वपौ स्यात् पदं तत्र यथापूर्व्वं प्रदर्शितम् ॥ ३५१
गौर्य्यौ गौर्य्यः पदं तत्र तत्र सूत्रं प्रवर्त्तते ।
इह पुनरुपन्यस्तं निषेधो हि प्रयोजनम् ॥ ३५२

विश्वपा अम् यदा तत्र सूत्रम् "अमि" प्रयुज्यते ।
विश्वपाम् स्यात् पदं तेन तदेकवचनं भवेत् ॥ ३५३
विश्वपा औट् यदा तत्र विश्वपौ स्यात् पदं तदा ।
साधनं तु पुनस्तस्य पूर्व्ववत् स्यादिहापि च ॥ ३५४

२४० । आतो धातोः । ६।४।१४०

भस्याङ्गस्य भवेल्लोपो धातोः "आ" चेत् पदान्ततः ।
"अलोऽन्त्यस्य" स्थितं सूत्रं धकारश्च विलुप्यति ॥ ३५५
विश्वपाः शस् यदा तत्र विश्वपः स्यात् पदं तदा ।
आकारस्य भवेल्लोपः अस् शशश्च प्रयुज्यते ॥ ३५६
विश्वपा स्यात् यदा टा स्यात् तथैव च पदं भवेत् ।
अन्यत्रापि भवेदेवमूहनीयं यथायथम् ॥ ३५७

"हाहा शस्" स्यात् यदा तत्र "तस्माच्छसः" प्रयुज्यते ।
तथा तत्र भवेद् णत्वं हाहान् पदं तथा भवेत् ॥ ३५८
हाहा टा स्याद् यदा तत्र भवेत् सवर्णदीर्घता ।
हाहा पदं भवेत्तत्र "हाहै" वृद्धिर्यदा च ङे ॥ ३५९

ङसिङसोर्भवेद् दीर्घः पदं "हाहाः" तदा भवेत् ।
औसि वृद्धि भवेद् "हाहौ" ङौ "हाहे" स्याद् यदा गुणः ॥ ३६०
अधातोरपि क्वचिन्न आकारोपि विलुप्यते ।
"आतोः" योगविभागः स्यात् "क्तः" भवेन्न भवेत् "हनः" ॥ ३६१

इत्यादन्ताः

३०।१।७४-६५ श्लोकाः
रात्रिः ६ घटिकाः

अथ इदन्तप्रकरणम्

यदा "हरि" यदा "सु" स्यात् "हरिः" स्यान्न पदं तदा ।
प्रक्रियायाः विशेषो न क्वचिदिह प्रवर्त्तते ॥ ३६२
यदा "हरि" यदा "औ" स्यात् "प्रथमयोः" प्रयुज्यते ।
पूर्व्वसवर्णदीर्घः स्यात् "हरी" स्यान्न पदं तदा ॥ ३६३
यदा "हरि" यदा "जश्" स्यात् सूत्रं परं प्रवर्त्तते ।
तेनैव च पदं सिध्येत् सूत्रं भवेत् यथा परम् ॥ ३६४

२४१ । जसि च । ७।३।१०९

ह्रस्वान्तः स्याद् यदा शब्दः जश् इह चेत् परे भवेत् ।
गुणो भवेत्तदाङ्गस्य "हरयः" स्यात् पदं तदा ॥ ३६५

२४२ । ह्रस्वस्य गुणः । ७।३।१०८

परं यदा सम्बुद्धिः स्यात् ह्रस्वस्य स्यात् तदा गुणः ।
"हे हरि सु" यदा तत्र गुणे "हरे" पदं भवेत् ॥ ३६६
एङ् ह्रस्वादिति सम्बुद्धौ सुलोपः स्यात् पुनर्विधिः ।
तेनैवेह सुलोपः स्यात् तदा "हरे" विना च "सुम" ॥ ३६७
यदा हरि यदा स्यादम् पूर्व्वरूपं भवेदिह ।
"हरिम्" पदं तदा तत्र तदेव च पदं मतम् ॥ ३६८
यदा हरि यदा औट् स्यात् "प्रथमयोः" प्रयुज्यते ।
पूर्व्वसवर्णदीर्घः स्यात् "हरी" स्यान्न पदं तदा ॥ ३६९
यदा हरि यदा शस् स्यात् पूर्व्वसवर्णदीर्घता ।
"तस्माच्छसो—" भवेद् सत्वं "हरीन्" तदा पदं भवेत् ॥ ३७०

२४३। लोपे व्यसधि। १।४।७

इकारान्तो यदा ह्रस्वः यदा स्त्री न भवेदिह।
उकारान्तो यदा ह्रस्वः यदा स्त्री न भवेत् पुनः॥ ३७१
भवेन्न स्त्री नदी न स्यात् एवं शब्दो यदा स्थितः।
तदा तत्र घिसंज्ञा स्यात् सखिशब्दे तथा च न॥ ३७२

२४४। आङोनाऽस्त्रियाम्। ७।३।१११

आङो ना स्यात् घेः परस्य स्त्रियां तथा भवेन्न च।
आङिह च प्राचां संज्ञा टा तथा च मता भवेत्॥ ३७३
हरि टा स्याद्य यदा तत्र "हरि ना" स्यात् तदा पुनः।
"अट्कुप्वाङ्" च भवेद् णत्वं हरिणा स्यात् पदं तदा॥ ३७४
आदेशो न भवेद्व योऽयः स्त्रियां शब्दो यदा स्थितः।
मति टा चेत् न "ना" तत्र मत्या भवेत् पदं तदा॥ ३७५

२४५। घेर्ङिति। ७।३।१२०

ङिति परे गुणो घेः स्यात् इति विधिर्भवेदिह।
हरि ङे चेत् गुणे तत्र हरये स्यात् पुनः पदम्॥ ३७६
घिः यदा स्यात् तदेव स्यात् अन्यत्र न तथा भवेत्।
यदा "सखि" न घिः प्राप्तः सख्ये भवेत् गुणो न च॥ ३७७
ङकार इद्द भवेद् यत्र तत्र विधिः प्रयुज्यते।
हरि भ्याम् चेत् तदा ङित् न हरिभ्याम् स्यात् गुणो न च।
एवं यदा स्थितस्तत्र गुणस्तत्र स्थितो भवेत्।
हरि यदा भवेत् शब्दः गुणे हरे भवेत् तदा॥ ३७८

२४६। ङसिङसोश्च। ६।१।११०

एङिह चेत् स्थितः पूर्व्वे परे चेदस् ङसेङसः।
आदेशः पूर्व्वरूपं स्यात् इति स्थितिर्भवेदिह॥ ३७९
हरि ङसि हरेः स्याच्च हरि ङस् चेत् भवेत् हरेः।
हरि ओस चेत् यणादेशः हर्य्योः पदं तदा भवेत्॥ ३८०
हरि यदा यदा स्याद् आम् "ह्रस्व"-इति प्रयुज्यते।
"नामि" पुनर्भवेत् योज्यम "अट्कुप्वाङ्" च प्रवर्त्तते॥ ३८१
नुडागमो भवेत् तेन पश्चाद् दीर्घो भवेदिह।
ततः परं भवेद् णत्वं हरीणां स्यात् पदं तदा॥ ३८२

२४७। अच्च घेः। १।३।११९

घिसंज्ञकात् परे ङिश्चेत् ङेरौद् भवेदिति स्थितिः।
यदिह टिसंज्ञं स्यात् तस्य स्यात् तदा पुनः॥ ३८३
यदा "हरि" यदा ङिःस्यात् हर औ स्यात् तदा पुनः।
वृद्धिश्चेति भवेद् दीर्घः "हरौ" भवेत् पदं तदा॥ ३८४
हरि ओस् चेत् यणादेशो ह्र्योः पदं तथा भवेत्।
हरि सु चेत् हरिषु स्यात् "आदेश-" स्यात् ततश्च षः॥ ३८५

सखि

२४८। अनङ् सौ। ७।१।९३

सौ परे स्याद् अनङ् सख्युः सम्बुद्धौ न तथा भवेत्।
सखिन् सु स्याद् यदा तत्र सखन् सु स्यात् तदा पुनः॥ ३८६
ङकार इद् भवेदत्र अन्तादेशो भवेत्ततः।
"अलोऽन्त्यस्य" स्थितं सूत्रं तदिह च प्रयुज्यते॥ ३८७

२४९। अलोऽन्त्यात् पूर्व्वं उपधा। १।१।६५

अलोऽन्त्याच्च यः पूर्व्वं स्यात् स उपधा भवेदिह।
सखन् इति यदा शब्दः अकार उपधा तदा॥ ३८८

२५०। सर्व्वनामस्थानेऽसम्बुद्धौ। ६।४।८

यदा सर्व्वनामस्थानं नान्ते शब्दो यदा पुनः।
उपधा स्यात्तदा दीर्घः सम्बुद्धौ न तथा भवेत्॥ ३८९
"सखन् सु" च यदा तत्र तदा दीर्घो भवेदिह।
सखान् सु च भवेद् दीर्घे सूत्रं परं ततः पुनः॥ ३९०

२५१। अपृक्त एकाल्प्रत्ययः। १।२।४१

प्रत्ययश्चेद् भवेदेकाल् अपृक्तः स इहोच्यते।
सखान् सु स्यात् यदा तत्र अपृक्तः "सु" तदा भवेत्॥ ३९१

२५२। हल्ङ्याब्भ्यो दीर्घात् सुतिसि अपृक्तं हल्। ६।१।६८

"सु""ति"-"सि"-चेदपृक्तं हल् हलन्तात् चेत् परे स्थितम्।
तदा तस्य भवेल्लोपः प्रत्येकन्तु विधिर्भवेत्॥ ३९२
"सु""ति""सि" चेत् अपृक्तं हल् ङ्याब्भ्यो दीर्घात् परे यदि।
तदा तस्य भवेल्लोपः एकत्र "सौ" विधिर्भवेत्॥ ३९३

आवन्तात् चेत् हलन्तात् चेत् ङ्यन्ताद् चेद् वा परे यदि ।
तदैव च विधिर्योज्यः न चान्यथा तथा पुनः ॥ ३९४
"ग्रामणीः" स्यात् पुनः शब्दः एषां परे न भवेत् "सु" ।
न सुलोपो भवेत्तस्मात् इह च "सु" स्थितो भवेत् ॥ ३९५

दीर्घादेव विधिर्योज्यः न दीर्घाच्चेत् तथा तु न ।
"निष्कौशाम्बिः" न दीर्घः स्यात् सुलोपो न भवेत्ततः ॥ ३९६

सुतिसि चेत् परे तत्र तदैव स्यात् न चान्यथा ।
"अभैत्सीत्" स्यात् परे ते न लोपो नापि विधीयते ॥ ३९७
तिरिह न भवेदेकः सिशब्दोऽपि भवेदिह ।
सिरिह न भवेद् ग्राह्य इति स्थितिर्भवेत् पुनः ॥ ३९८

सुतिसि चेदपृक्तं स्यात् तदैव स्यात् न चान्यथा ।
"भिनत्ति" स्यात् पदं तत्र न चापृक्तं तथा च न ॥ ३९९
"ति" यद्यपि स्थितस्तत्र न चापृक्तं भवेन्न सः ।
इकारः स्याद् यदा लुप्तः तकारः स्याद् विवक्षितः ॥ ४००

हल एव भवेल्लोपो नान्यस्य स्यात् तथा पुनः ।
विभेद स्यात् पदं तत्र हल् न स्याद् "अ" न लुप्यते ॥ ४०१
"हल्ङ्याब्भ्य"श्च पदं सूत्रे हल् इह च निवेशितम् ।
इह हल् वा कथं प्रोक्तं किं वा तस्य प्रयोजनम् ॥ ४०२
हलन्ताच्चेत् भवेल्लोपः लोप इह न चान्यथा ।
संयोगान्तस्य लोपस्तु स्यादसिद्ध इति स्थितिः ॥ ४०३
"सखान् सु" स्याद् यदा तत्र "सखान् स" स्यात् तदा पुनः ।
अपृक्तस्य सकारस्य भवेल्लोपः "सखा" तथा ॥ ४०४

२५३ । सख्युरसम्बुद्धौ । ७।१।९२

णिद्वत् सर्व्वनामस्थानं सख्युरङ्गात् परं यदि ।
सम्बुद्धिश्चेत् तदा न स्तात् णिद्वत् कार्य्यं तदा तु न ॥ ४०५

२५४ । अचो ञ्णिति । ७।२।११५

अजन्तं चेद् भवेदङ्गं तस्य वृद्धिर्भवेदिह ।
ञिति णिति विधिर्योज्यः पदं स्याच्च यथा परम् ॥ ४०६

सखायौ स्यात् सखायः स्यात् औ जस् यदि भवेदिह ।
सखायम् स्यात् सखायौ स्यात् अम् औट् यदा परे पुनः ॥ ४०७
सख्या सख्ये पदं तत्र टा ङे भवेद् यदा परे ।
घिसंज्ञा न भवेदत्र न तत् कार्य्यं ततो भवेत् ॥ ४०८

"सखि ङसि" "सखि ङस्" चेत् न घिर्न च गुणो भवेत् ।
यणादेशो भवेत् सख्यम् सूत्रं परं प्रयुज्यते ॥ ४०९
२५५ । ख्यत्यात् परस्य । ६।१।११२
"खि" "खी" यदा भवेदत्र "ति" "ती" यदा भवेदिह ।
प्रक्रियायां भवेत् "ख्य" "त्य" यणादेशः कृतो यदा ॥ ४१०
ङसि यदि परे तत्र ङस् यदि वा परे भवेत् ।
तदा ख्यत्यात् अत उत स्यात् पदं सख्युर्भवेत् तथा ॥ ४११
२५६ । औत् । ७।३।११८
इदुद्भ्यां च भवेद् ङेरौत् पदं सख्यौ भवेत् यथा ।
उकारस्यानुवृत्तिः परार्था स्यादिति स्थितिः ॥ ४१२
शेषं च हरिवद् ज्ञेयं विशेषश्च न विद्यते ।
पदं यद् यद् भवेदत्र तत्तद्धृद्यं पुनर्बुधैः ॥ ४१३

शोभनः सखा यस्य स सुसखा स इति स्थितिः ।
अनङ् भवेत् भवेन् णित् च अङ्गकार्य्यं भवेदिह ॥ ४१४
सुसखा स्यात् पदं तस्मात् सुसखायौ तथा भवेत् ।
सुसखायो भवेत्तद्वत् समासे न व्यतिक्रमः ॥ ४१५
"सुसखि" च तथा सखि द्वयं समं भवेन्न च ।
सर्व्वतो न समं कार्य्यं तस्माद् भवेदिति स्थितिः ॥ ४१६
शेष इति ततः सूत्रं पुनरिह प्रयुज्यते ।
सुसखि स्याद् घिसंज्ञश्च घिकार्य्यं च प्रवर्त्तते ॥ ४१७
सुसखिना भवेत्तस्मात् सुसखये तथा भवेत् ।
घिकार्य्यं यत् भवेत् प्राप्तं तदिह च प्रयुज्यते ॥ ४१८
ङसिङसो गुणो यत्र यणादेशो न वर्त्तते ।
ख्यत्यादिति न युक्तं स्यात् उत्वं तस्माद् भवेन्न च ॥ ४१९

सुसखेः स्यात् पदं तत्र ङसिङसोः पदं भवेत् ।
सुसखौ स्यात् पदं तत्र यदा ङि च परे पुनः ॥ ४२०
अतिसखा यदा शब्दः सुसखावत् तदा भवेत् ।
न विशेषः स्थितः कश्चित् तस्मान्न विस्तरः कृतः ॥ ४२१

परमः सखा यस्येति विग्रहस्तु यदा भवेत् ।
स्यात् परमसखि तत्र सुसखिवत् इहापि च ॥ ४२२
यद्यपि च भवेद् गौणमनङ् नित्यं प्रवर्त्तते ।
परमसखायौ तत्र स्यात् परमसखा तथा ॥ ४२३
अतिक्रान्तः सखा यत्र अतिसखा पदं तदा ।
"लिङ्गे"ति स्यादनित्या च तस्मात् टच् न प्रवर्त्तते ॥ ४२४
हरिवच्च भवेद् रूपम् "अनङनिर" न युज्यते ।
लाक्षणिके भवेच् शब्दः "गोस्त्रियो"रिति च स्थितम् ॥ ४२५
प्रतिपदोक्तो यदा स्यात् लाक्षणिकः पुनर्यदा ।
प्रतिपदोक्तो गृह्यते न च लाक्षणिकः पुनः ॥ ४२६

२५७ । पतिः समास एव । १।४।८

पतिशब्दो घिसंज्ञः स्यात् समासश्चेत् प्रवर्त्तते ।
भूपतिना भवेदत्र भूपतये तथा भवेत् ॥ ४२७
पत्या पत्ये तथा पत्युः तथा पत्यै भवेदिह ।
शेषं च हरिवद् ज्ञेयं विशेषश्च न विद्यते ॥ ४२८
कतिशब्दो बहुत्वे स्यात् कति स्यात् कतिभिस्तथा ।
कतिभ्यः कतीनां तत्र कतिषु स्यात् तथैव च ॥ ४२९

२५८ । बहु-गण-वतु-डति-संख्या । १।१।२८

बहुशब्दो भवेत् संख्या गणशब्दस्तथा भवेत् ।
वत्वन्तश्च भवेत् संख्या डत्यन्तश्च तथा पुनः ॥ ४३०

२५९ । डति च । १।१।२५

डत्यन्ता या भवेत् संख्या षट्संज्ञा सा भवेदिह ।
षट्संज्ञा च भवेद् यत्र विभक्तीनां भवेच्च लुक् ॥ ४३१

२६० । प्रत्ययस्य लुक्-श्लु-लुपः । १।१।६१

लुक् श्लु लुप् च भवेत् संज्ञा प्रत्ययादर्शनं यदा ।
पृथक् पृथक् कृता संज्ञा सङ्करो न यथा भवेत् ॥ ४३२

२६१ । षड्भ्यो लुक् । ७।१।२२

जश्शसोर्लुक् भवेत् षड्भ्यः कति भवेन्निदर्शनम् ।
जश्शसोस्तु लुकेऽपि स्यात् तत् कार्य्यन्तु यथायथम् ॥ ४३३

२६२ । प्रत्ययलोपे प्रत्ययलक्षणम् । १।१।६२

लुप्तेऽपि प्रत्यये तत्र कार्य्यं भवेद् तदाश्रितम् ।
कति शब्दो यदा तत्र "जशि चे"ति गुणो भवेत् ॥ ४३४
न भवेच्च गुणस्तावत् गुणो नेह विधीयते ।
गुणो न स्याद् यथा तत्र तथा सूत्रं परं भवेत् ॥ ४३५

२६३ । न लुमताङ्गस्य । १।१।६३

लुक् श्लु लुप् च भवेत् संज्ञा सर्व्वत्र ल विराजते ।
प्रत्येकं स्यात् "लुमत्" संज्ञा प्रत्येकन्तु लुमत् भवेत् ॥ ४३६
शब्देन लुमता यत्र लोप इह विधीयते ।
अङ्गकार्य्यं तदा न स्यादिति स्थितिर्भवेदिह ॥ ४३७
कति स्यात् कतिभिः स्याच्च कतिभ्यः स्यात् तथा पुनः ।
कतीनां स्यात् पदं तत्र कतिषु स्यात् तथैव च ॥ ४३८
युष्मदस्मद् तथा च षट् स्वरूपाश्चै मतास्त्रिषु ।
नपुंसके स्त्रियां पुंसि प्रत्येकमेकरूपता ॥ ४३९
त्रिशब्दः स्याद् बहुत्वे च रूपं तस्य यथा परम् ।
त्रयः त्रीन् स्यात् त्रिभिः त्रिभ्यः परं भवेत् परे यथा ॥ ४४०

२६४ । त्रेस्त्रयः । ७।१।५३

आमि परे त्रिशब्दस्य एकादेशो भवेदिह ।
त्रयाणां स्यात् पदं तत्र यदा स्यादाम् परे पुनः ॥ ४४१
समासेऽपि त्रयादेशः पुनरपि प्रयुज्यते ।
स्यात् परमत्रयाणाञ्च तथा पदमिति स्थितिः ॥ ४४२
गौणत्वे न समादेश इत्यपि च मतं स्थितम् ।
तन्मते स्यात् प्रियत्रीणां पदं पुनः समासतः ॥ ४४३

इहापि प्रियत्रयाणां पदं भवेदिति स्थितिः।
त्रिषु भवेत् परे सुप् चेत् त्रिशब्दश्च प्रदर्शितः॥ ४४४

२६५। त्यदादीनामः।

अकारश्च भवेदेषां विभक्तिश्चेत् परे स्थिता।
अन्तादेशो भवेदत्र द्विपर्य्यन्तं तथा भवेत्॥ ४४५
द्वौ द्वाभ्याञ्च तथा तत्र द्वयोरपि भवेत्तथा।
सर्व्वासु च विभक्तिषु द्विशब्दो दर्शितो मया॥ ४४६
त्यदादीनां गणे चात्र द्विपर्य्यन्ताः स्थिताश्च ये।
तेषां भवेत् तथादेशः न चान्येषां तथा भवेत्॥ ४४७
भवत् शब्दो भवेद् वाह्यस्तस्मात् तस्य भवेन्न च।
भवान् भवेत् पदं तत्र नेह भवेदकारता॥ ४४८

संज्ञा यदि भवेत् शब्दो भवेच्चेदुपसर्ज्जनम्।
अकारो न तदा स्याच्च त्यदादीनामिति स्थितिः॥ ४४९
संज्ञा यदा तदा "द्वि" स्यात् हरिवच्च पदं भवेत्।
"अतिद्विः" स्यात् पदं तद्वत् भवेच्चेदुपसर्ज्जनम्॥ ४५०
समासे चेत् पदं मुख्यम् अकारः स्यात् तदा खलु।
परमद्वौ पदं तत्र मुख्यं पदं भवेदिदम्॥ ४५१
औडुलोमिः पदं तत्र औडुलोमी तथा भवेत्।
एकत्वे च पुनर्द्वित्वे हरिवच्च भवेत् पदम्॥ ४५२
औडुलोमा वहुत्वे स्यात् इह च वार्त्तिकं स्थितम्।
लोम्नोऽपत्येषु वहुषु अकारो वक्तव्यः (वा)
अपत्यं चेदकारः स्यात् वहुत्वे तु परे जशि॥ ४५३

"वाह्वादिभ्यश्च" सूत्रं स्यात् अपवादो भवेदिह।
इञ् प्रत्ययो यथाप्राप्तं पुनरिह निषिध्यते॥ ४५४
औडुलोमिम् परे चेद् अम् औडुलोमी यदौट् भवेत्।
उडुलोमान् परे शस् चेत् वहुषु स्यादकारता॥ ४५५

इति—

इदन्ताः

ईदन्तप्रकरणम्

वातप्रमी

वातं यः प्रमिमीते स वातप्रमी भवेदिह ।
औणादिको भवेद् ई च स किद् भवेदिति स्थितिः ॥ ४५६
वातप्रमी यदा तत्र यदा च सु प्रवर्त्तते ।
भवेद् रुत्वं विसर्गश्च "वातप्रमीः" पदं भवेत् ॥ ४५७
वातप्रमी यदा शब्दः यदा स्याद् औ परे पुनः ।
"दीर्घाज्जसि:" प्रवृत्तं स्यात् वातप्रमीम् भवेत्तथा ॥ ४५८
वातप्रम्यौ भवेत्तद्वत् विशेषश्च न विद्यते ।
सम्बुद्धौ हे वातप्रमी रूपं भवेदिति स्थितिः ॥ ४५९
वातप्रमी यदा तत्र यदा स्याद् अम् परे पुनः ।
"अमि पूर्व्वम्" वातप्रमीम् इति पदं भवेदिह ॥ ४६०
वातप्रम्यौ वातप्रमीन् वातप्रम्या भवेत् परे ।
भवेत् वातप्रमीभ्याम् च वातप्रम्ये भवेत्तथा ॥ ४६१
वातप्रम्यः वातप्रम्योः ततः परं भवेदिह ।
वातप्रम्याम् बहुत्वे स्यात् दीर्घत्वान्नुट् न युज्यते ॥ ४६२
ङौ तु सवर्णदीर्घः स्यात् वातप्रमी तथा भवेत् ।
सुपि वातप्रमीषु स्यात् सर्व्वं मया प्रदर्शितम् ॥ ४६३
यात्यनेन भवेद् ययी पाति लोकं पपी भवेत् ।
"यापो कित् च" स्थितं सूत्रं प्रत्यय ई भवेत्तथा ॥ ४६४
एषां रूपे विशेषो न कश्चिदिह च दृश्यते ।
वातप्रमी यथा स्याच्च तथैव स्युः पुनश्च ते ॥ ४६५

वातप्रमी पुनः शब्दः क्विबन्तोऽपि च दृश्यते ।
अमि शशि विशेषश्च विशेषो वर्त्तते ङयि ॥ ४६६
वातप्रम्यम् यदा स्याद् अम् वातप्रम्यः यदा च शस् ।
वातप्रम्ये यदा ङे स्यात् विशेषाश्च स्थितास्त्रिषु ॥ ४६७
वातप्रमी यदा तत्र यदा स्याद् अम् परे पुनः ।
"एरनेकाच्" तदा स्याद् यण् प्रयोवश्च पदं भवेत् ॥ ४६८

बहुश्रेयसी

बहुः श्रेयस्यो यस्य च स बहुश्रेयसी मतः ।
समासः स्याद् बहुव्रीहिः पुंसि पदं प्रवर्त्तते ॥ ४६९
यदा बहुश्रेयसी स्यात् यदा सु स्यात् परे पुनः ।
हलङ्याब्भ्योऽत्र भवेद् योज्यं सुलोपः स्यात् तथा खलु ॥ ४७०
भवेद् बहुश्रेयसी च तदा पदं परे च सौ ।
औ चेद् बहुश्रेयस्यौ स्यात् सन्धिर्भवेद् यथायथम् ॥ ४७१
जश् चेत् बहुश्रेयस्यः स्यात् यदा सन्धिर्भवेदिह ।
सम्बुद्धौ तु विशेषः स्यात् सूत्रमन्यत् प्रयोजनम् ॥ ४७२

२६६ । यू स्त्र्याख्यौ नदी । १।४।३

ईकारान्तं यदा स्त्री च नदीसंज्ञा प्रवर्त्तते ।
ऊकारान्तं यदा स्त्री च संज्ञा भवेत् तथा पुनः ॥ ४७३
ईकारान्ते कुमारी स्यात् गौरी स्याच्च निदर्शनम् ।
ऊकारान्ते यवागूः स्यात् निदर्शनं तथैव च ॥ ४७४

प्रथमलिङ्गग्रहणं च (वा)

प्रथमे यत् स्थितं लिङ्गं तदेवेह च गृह्यते ।
गौणे लिङ्गं द्वितीयं चेत् न तत् ग्राह्यं भवेदिह ॥ ४७५
आदौ नदी परे सा न आदौ वा सा भवेदिह ।
आदौ स्त्री श्रेयसी नदी परे नदी तथैव च ॥ ४७६
तेन बहुश्रेयसीति नदीसंज्ञा प्रयुज्यते ।
सम्बुद्धौ तु पदं साध्यं सूत्रं परं प्रयोजनम् ॥ ४७७

२६७ । अम्बार्थनद्योर्ह्रस्वः । ७।३।१०७

अम्बार्था ये स्थिताः शब्दा नद्यन्ता ये स्थिताः पुनः ।
सम्बुद्धिश्चेत् परे तेषां भवेद् ह्रस्व इति स्थितिः ॥ ४७८
"हे बहुश्रेयसि" तत्र सम्बुद्धौ च पदं भवेत् ।
नदी चात्र भवेत् शब्दः भवेद् ह्रस्वो यथायथम् ॥ ४७९
"अमि" बहुश्रेयसीम् स्यात् विशेषस्तु न विद्यते ।
औटि बहुश्रेयस्यौ स्यात् इहापि न विशेषता ॥ ४८०
शसि बहुश्रेयसीन् स्यात् विशेषश्च न दृश्यते ।
टा भ्याम् भिस् न विशेषश्च ङे यदा स्यात् परं तदा ॥ ४८१

२६८। आण् नद्याः। ७।३।११२

नद्यन्तश्चेत् भवेत् शब्दः ङित्प्रत्ययः परे यदि।
आडागमो ङितां तत्र वृद्धिरपि यथा परे॥ ४८२

२६९। आटश्च। ६।१।९०

आडिह चेत् स्थितः पूर्व्वे अजिह चेत् परे स्थितः।
एकादेशो भवेद् वृद्धिरिति भवेद् विधिः पुनः॥ ४८३
पदं बहुश्रेयस्यै स्यात् यदा ङे स्यात् परे खलु।
पदं बहुश्रेयस्याश्च ङसिह चेत् परे स्थितः॥ ४८४
नद्यन्तश्च भवेच् शब्दः तस्माच्च नुट् प्रयुज्यते।
पदं बहुश्रेयसीषां तस्माद् भवेदिति स्थितिः॥ ४८५
यदा बहुश्रेयसी स्यात् यदा ङि स्यात् परे पुनः।
तदा सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम्॥ ४८६

२७०। ङेराम् नद्याम्नीभ्यः। ७।३।११६

नद्यन्तश्चेद् भवेत् शब्द आमन्तश्चेत् भवेत् पुनः।
नीशब्दश्चेद् भवेदत्र ङेराम् भवेदिति स्थितिः॥ ४८७
ङेरामिह भवेद् यत् च तस्माद् नुट् न प्रयुज्यते।
आटा नुट् च परेणाह बाधितः स्यादिति स्थितिः॥ ४८८
पदं बहुश्रेयस्याम् स्यात् ङेरामिह यदा भवेत्।
शेषं वातप्रमीवत् स्यात् विशेषश्च न विद्यते॥ ४८९

अतिलक्ष्मी

अतिलक्ष्मी यदा शब्दः सुलोपो न विधीयते।
अङ्यन्तात्तु सुलोपो न प्रत्ययः स्यादुबादिके॥ ४९०
अतिलक्ष्मीः यदा सु स्यात् विसर्गश्च भवेदिह।
अन्यत्र च समं रूपं विशेषश्च न दृश्यते॥ ४९१

कुमारी

कुमारी स्यात् पदं तत्र क्वचित् क्विपि पदं भवेत्।
सुलोपश्च भवेदत्र "हलङ्याब्भ्यश्च" प्रयुज्यते॥ ४९२
कुमारी स्यात् यदा शब्दः सुप्रत्ययो यदा पुनः।
कुमारी स्यात् पदं तत्र सुलोपे स्यात् पदं तथा॥ ४९३
कुमारी स्यात् यदा शब्दः प्रत्यय औ भवेद् यदा।
तदा सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम्॥ ४९४

२७१ । अचि श्नुधातुभ्रुवां य्वोरियङुवङौ । ६।४।७७

विकरणं यदा श्नु स्यात् अजिह च परे यदा ।
उवङ् भवेदकारस्य समादेशस्तदा खलु ॥ ४९५
इवर्णान्त उवर्णान्तो यदा धातुश्च पूर्व्वतः ।
परे तत्र यदा स्यादच् इयङुवङ् तदा भवेत् ॥ ४९६
भ्रू इति च यदा शब्दः पुनः पूर्व्वं प्रवर्त्तते ।
परे भवेत् पुनश्चेदच् आदेशः स्यादुवङ् तदा ॥ ४९७
भवेत्तयो ङकार इत् अन्तादेशस्ततो भवेत् ।
इयङ् भवेदिकारस्य उकारस्य भवेदुवङ् ॥ ४९८
आन्तरतम्यता तावत् पुनरिह प्रयुज्यते ।
यत्र यथा भवेद् योग्यं युज्यते तत्र तत् तथा ॥ ४९९

कुमारी स्याद् यदा तत्र भवेद् औ च यदा पुनः ।
कुमार् ईय् तदा च स्यात् औ परे च पुनर्भवेत् ॥ ५००
एवं यदा स्थितं तत्र यथाप्राप्तं भवेन्न च ।
इह तावत् परे सूत्रं प्रवर्त्तते निषेधने ॥ ५०१

२७२ । एरनेकाचोऽसंयोगपूर्व्वस्य । ६।४।८२

संयोगो न स्थितः पूर्व्वं धातुरेकाज् भवेन्न न ।
इवर्णास्त तदाङ्गस्य परे चेदच् भवेन्न यण् ॥ ५०२
इयङ् न स्यात् ततश्चात्र यणादेशः प्रवर्त्तते ।
कुमारी औ यदा तत्र कुमार्य्यौ स्यात् पदं तदा ॥ ५०३
कुमार्य्यः स्यात् पदं तद्वत् हे कुमारि तथा भवेत् ।
अमि शसि कुमार्य्यं स्यात् कुमार्य्यः स्यात् यथाक्रमम् ॥ ५०४
कुमार्य्यै स्यात् यदा ङे स्यात् कुमार्य्याः स्यात् ङसौ ङसि ।
कुमारीणां यदा स्यादाम् कुमार्य्यां स्याद् परे च ङौ ॥ ५०५

प्रधी

प्रधीः प्रध्यौ भवेत्तत्र प्रध्यः प्रध्यं भवेत्तथा ।
प्रध्यौ प्रध्यः पदं तत्र ऊहनीयं परं बुधैः ॥ ५०६

उन्नी

उत् पूर्व्वं स्यात् परे च नी शब्द उन्नी तथा भवेत् ।
न संयोगो भवेत् पूर्व्वं धातुः पूर्व्वं न च स्थितः । ५०७

उन्नी भवेद् भवेद् उन्न्यौ भवेदुन्न्यस्तथैव च।
हे उन्नीः स्यात् पदं तत्र उन्न्यम् उन्न्याम् तथा भवेत्॥ ५०८

ग्रामणी स्याद् यदा शब्दः उन्नीवच्च पदं भवेत्।
विशेषो न स्थितः कश्चित् ऊहनीयं यथायथम्॥ ५०९

एकाज् यदा तदा यण् न भवेदियङुवङ् तदा।
नीः नियौ स्याद् नियस्तत्र नियं नियौ नियस्तथा॥ ५१०
संयोगश्चेत् भवेत् पूर्व्वे तदा न यण् भवेदिह।
इयङुवङ् तदा तत्र सुश्रियौ स्यात् पदं यथा॥ ५११
गतिकारकेतरपूर्व्वपदस्य यण् नेष्यते (वा)
यदा परे गतिर्नास्ति कारकं न परे यदा।
तदा यण् न भवेत्तत्र भवेदियङुवङ् तदा॥ ५१२
शुद्धधियौ पदं तत्र भवेत् खलु निदर्शनम्।
स्यात् परमधियौ चापि निदर्शनं तथैव च॥ ५१३

यदा परे गतिस्तत्र यदा परे च कारकम्।
तदा यण् स्यादत्रश्चाश्च इत्येवं फलितं भवेत्॥ ५१४
एवं यदा स्थितिस्तत्र पृच्छा भवेदियं तदा।
"दुर्धियः" वा कथं तत्र "वृश्चिकभीः" कथं पुनः॥ ५१५
दुःस्थिता धीः पुनर्येषामिति वाक्यं भवेदिह।
दुरिह न गतिस्तावत् गतिर्नात्र पुनः स्थिता॥ ५१६
प्रादयश्चेत् क्रियायुक्ता तदा संज्ञा भवेद् गतिः।
इह क्रिया न तावत् स्यात् गतिसंज्ञा न युज्यते॥ ५१७

"वृश्चिकभीः" यदा तत्र कारकं न तदा भवेत्।
अपायो बुद्धिकृतश्च नेह पुनः प्रसिध्यति॥ ५१८
वृश्चिकसम्बन्धिनी भीरित्यपि च भवेदिह।
शाकपार्थिवादिवच्च समासः स्यादिति स्थितिः॥ ५१९

२७३। न भूसुधियोः। ६।४।८५

भूशब्दः स्याद् यदा तत्र सुधीशब्दो यदा पुनः।
अचि परे न यण् तत्र सुधियौ स्यात् पदं तदा॥ ५२०

सखी (क्यच्+क्विप्)

सखायमिच्छतीति चेत् सखीयति पदं भवेत् ।
"सखीय" च भवेद् धातुः पश्चात् क्विप् च प्रयुज्यते ॥ ५२१
अकारस्य भवेल्लोप "अतः" इति विधिर्भवेत् ।
यकारस्य भवेल्लोपः "लोप" इति विधिः पुनः ॥ ५२२
पदं सखी तथा सिध्येत् पुंसि पदं प्रवर्त्तते ।
पदमिह भवेत् साध्यं प्रक्रिया स्याद् यथा परे ॥ ५२३

अल्लोपः स्थानिवत् स्याच्च एरनेकाच् प्रवर्त्तने ।
तस्माद् यण् च भवेत् प्राप्तः प्राप्ते पुनश्च वार्त्तिकम् ॥ ५२४

क्वौ लुप्तं न स्थानिवत् (वा)

क्वौ परे यद् भवेल्लुप्तं न स्थानिवत् भवेच्च तत् ।
अकारश्च भवेल्लुप्तः तस्माद् अः स्थानिवत् न च ॥ ५२५

सखी

सखिशब्दो मया पूर्व्वं विस्तरेण प्रदर्शितः ।
सखीशब्दः सखिवत् स्यात् विशेषश्च न विद्यते ॥ ५२६
एकदेशविकृतस्य न चान्यता भवेन्मता ।
यथा "सखि" भवेदत्र तथा "सखी" भवेत् पुनः ॥ ५२७
सखा स्याच्च पदं तत्र सखायौ स्यात् पदं तथा ।
सखायः स्यात् पदं तद्वत् हे सखीः स्यात् पुनः पदम् ॥ ५२८

यदा सखी यदा स्याद् अम् सखायम् च पदं भवेत् ।
"अमि" न "एरनेकाच्" न "स्वयु"रिति प्रवर्त्तते ॥ ५२९
सखायौ स्यात् यथापूर्व्वं विशेषश्च न विद्यते ।
शसि परे भवेद् यण् च "सख्यः" पदं तथा भवेत् ॥ ५३०

सखी-सखी-सुती

सह खेन वर्त्तते यः स सखः स्यादिति स्थितिः ।
तमिच्छति यदा तत्र तदा "सखी" भवेत् पुनः ॥ ५३१
यदा सुखमिच्छतीति तदा सुखी पदं भवेत् ।
यदा सुतमिच्छतीति तदा सुती पदं मतम् ॥ ५३२

सख्यौ सुख्यौ सुत्यौ स्याच्च भवेद् औ चेत् परे पुनः ।
सख्युः सुख्युः तथा सुत्युः "ख्यत्यात्"दिति पदं मतम् ॥ ५३३

लूनी-क्षामी-प्रस्तीमी

लूनमिच्छतीति लूनी यथापूर्व्वं पदं भवेत् ।
क्षाममिच्छतीति क्षामी पदं भवेत् तथैव च ॥ ५३४
प्रस्तीममिच्छतीति च प्रस्तीमी स्यात् पदं पुनः ।
लून्युः क्षाम्युः प्रस्ताम्युः स्यात् ङसौ ङसि पदं तथा ॥ ५३५
ङसि-ङसोर्भवेद् यण् च -"ख्यत्यात्" उत्वं तथा भवेत् ।
णत्वं मत्वमसिद्धं स्यात् "ख्यत्यात्"दिति प्रवर्त्तते ॥ ५३६

शुष्की

शुष्कीयते यदा क्विप् स्यात् "शुष्की" पदं तदा भवेत् ।
शुष्कीः स्यात् शुष्कियौ स्याच्च शुष्कियं स्यादियं पुनः ॥ ५३७
शुष्कियः स्यात् पदं तत्र ङसौ ङसि तथा खलु ।
एवं पदं भवेदत्र भवेद्रूपं यथायथम् ॥ ५३८

६।१।७८-
३।२।७४-१७७ श्लोकाः

इति —
ईदन्ताः

४-२ ७४

उदन्तप्रकरणम्

"शम्भुः" स्यात् हरिवत् तत्र भवेत् शम्भुः परे च सौ ।
भवेद् विष्णुर्भवेत् वसुर्भवेत् भानुस्तथैव च ॥ ५३९
क्रोष्टुशब्दः स्थितोलोके विशेषस्तस्य वर्त्तते ।
क्रोष्टुशब्दे विशेषा ये ते च परे प्रदर्शिताः ॥ ५४०

२७४ । तृज्वत् क्रोष्टुः । ७।१।९५

सर्व्वनामस्थानं चेत् स्यात् पदं साध्यं भवेद् यदि ।
तृजन्तवत् भवेत् क्रोष्टु सम्बुद्धौ न तथा भवेत् ॥ ५४१
क्रोष्टुशब्दो यदा तत्र क्रोष्टूशब्दः प्रयुज्यते ।
क्रोष्टुशब्दे विशेषा ये ते च परे प्रदर्शिताः ॥ ५४२

२७५। ऋतो ङि-सर्व्वनामस्थानायाः। ७।३।११०

ऋदन्तं चेद् भवेदङ्गं गुणस्तस्य विधीयते।
सर्व्वनामस्थानं स्याच्चेत् ङि परे चेद् भवेदिह ॥ ५४३
एवं तत्र गुणे प्राप्ते सूत्रं परं प्रवर्त्तते।
अनङ् भवेद् यथा तत्र तथा सूत्रं परे पुनः ॥ ५४४

२७६। ऋद्-उशनस्-पुरुदंशस्-अनेहसां च। ७।१।९४

ऋदन्तश्चेत् स्थितः शब्द उशनस् चेत् स्थितः पुनः।
पुरुदंशस् स्थितः शब्दः अनेहस् चेत् पुनः स्थितः ॥ ५४५
परे सु चेदनङ् तत्र सम्बुद्धौ न तथा भवेत्।
एवमनङ् यदा प्राप्तं सूत्रं परं प्रवर्त्तते ॥ ५४६

२७७। अप्-तृण्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षतृ होतृ-पोतृ-प्रसास्तृृणाम्। ६।४।११

अजन्तश्चेद् भवेच् शब्दस्तृन्नन्तश्चेद् भवेदिह।
तृजन्तश्चेद् भवेच् शब्दः स्वसृ नप्तृ यदा भवेत् ॥ ५४७
नेष्टृ त्वष्टृ पुनः क्षतृ होतृ पोतृ भवेद् यदा।
प्रशास्तृ स्याद् यदा शब्द उपधादीर्घता तदा ॥ ५४८
सर्व्वनामस्थानं चेत् स्यात् विधिर्भवेत् प्रयोजितः।
सम्बुद्धिश्चेत् तदा तत्र न युज्यते विधिः पुनः ॥ ५४९
तृण् तृजिह स्थितं सूत्रे सिध्येत् होत्रादिकं तथा।
नियमार्थं तथापीह पुनः शब्दाः प्रदर्शिताः ॥ ५५०
स स यदा स्थितः शब्दस्तदा विधिः प्रयुज्यते।
अन्य-शब्दो यदा तत्र तदा विधिर्न युज्यते ॥ ५५१
उद्गातृ च पुनः शब्दः नेह खलु प्रदर्शितः।
भाष्ये शब्दः स्थितो दीर्घं अत एव स गृह्यते ॥ ५५२

क्रोष्टु यदा यदा सु स्यात् क्रोष्टा भवेत् पदं तदा।
क्रोष्टु यदा यदा स्याद् औ क्रोष्टारौ च पदं भवेत् ॥ ५५३
यदा क्रोष्टु यदा जश् स्यात् क्रोष्टारश्च पदं तदा।
यदा क्रोष्टु यदा स्याद् अम् क्रोष्टारम् च पदं भवेत् ॥ ५५४
यदा क्रोष्टु यदा स्याद् औट् क्रोष्टारौ स्यात् पदं तदा।
यदा क्रोष्टु यदा शस् स्यात् पदं क्रोष्टॄन् तदा भवेत् ॥ ५५५

तृतीया च यदा तत्र परा चापि यदा पुनः ।
क्रोष्टु क्रोष्टृ द्वयं तत्र द्वये सूत्रं परं यथा ॥ ५५६

२७८ । **विभाषा तृतीयादिषु अचि ।** ७।१।९७

अजादिश्चेद् विभक्तिः स्यात् तृतीयादिः परे यदा ।
क्रोष्टु क्रोष्टृ द्वयं तत्र सममेव प्रयुज्यते ॥ ५५७
ऋदन्तश्चेन् भवेत् क्रोष्ट्रा उदन्ते क्रोष्टुना भवेत् ।
अन्यत्रापि भवेदेवं क्रोष्ट्रे क्रोष्ट्रे यथा पुनः ॥ ५५८
ङसि यदा परे तत्र ङस् परे वा स्थितो यदि ।
तदा सूत्रं परं योज्यम् उकारश्च यथा भवेत् ॥ ५५९

२७९ । **ऋत उत् ।** ६।१।१२१

ऋदन्तश्चेत भवेत् शब्दः ङसिङ्स चेत् परे भवेत् ।
एकादेश उकारः स्यात् रकारश्च प्रवर्त्तते ॥ ५६०

२८० । **रात् सस्य ।** ८।२।२४

संयोगान्तो यदा शब्द रेफात् परो यदा च सः ।
सकारस्य भवेल्लोपः नान्यस्य च तथा भवेत् ॥ ५६१
यदा क्रोष्टु स्थितः शब्दः प्रत्ययो ङस् परे यदा ।
क्रोष्टु र् स् स्याच्च तदा तत्र लोपे क्रोष्टुः पदं भवेत् ॥ ५६२

यदा क्रोष्टु यदा स्याद् आम् "विभाषा" च प्रयुज्यते ।
ऋदन्तः स्याद् भवेद् क्रोष्टृ तृज्वद्भावः प्रपद्यते ॥ ५६३
तृजवद्भावो यदा प्राप्तो वार्त्तिकं च परं तदा ।
नुमचिरतृजवद्भावेभ्यो नुट् पूर्व्वप्रतिषेधेन (वा)
पूर्व्वेषां प्रतिषेधेन नुम नुड़िह प्रवर्त्तते ॥ ५६४

यदा क्रोष्टु यदा स्यादम् नुड़िह च प्रसज्यते ।
क्रोष्टूनां स्यात् पदं तस्मात् न क्रोष्टॄणां भवेदिह ॥ ५६५
यदा क्रोष्टु यदा ङि स्यात् क्रोष्टरि च पदं भवेत् ।
यदा क्रोष्टु यदा स्याद् ओस् क्रोष्ट्रोः पदं भवेत्तदा ॥ ५६६
पदमन्यत् च शम्भुवत् जशादौ च भवेदिह ।
यथायथं भवेद् योज्यम् ऊहनीयं यथा यथम् ॥ ५६७

इति—
उदन्ताः

अथ ऊदन्त प्रकरणम्

हूहू

ऊदन्ते च स्थितो हूहू पुंसि पदं प्रवर्त्तते ।
हूहूः हूह्वौ भवेत् तत्र हूह्वः भवेत् तथैव च ॥ ५६८
हूहूम हूह्वौ भवेत् तद्वत् हूहून् भवेत् तथा पुनः ।
पदमन्यद् भवेत् यत् यत् ऊह्नीयं च तत् च तन् ॥ ५६९

अतिचमू

अतिचमू यदा शब्दो नदीकार्य्यं प्रवर्त्तते ।
सम्बुद्धौ अतिचमु स्यात् ह्रस्वः उश्च भवेदिह ॥ ५७०
अतिचम्वै यदा ङे स्यात् अतिचम्वाः ङसौ ङसि ।
भवेदतिचमूनाञ्च अतिचम्वां यदा च ङिः ॥ ५७१

खलपू

खलपू स्यात् यदा शब्दः प्रत्ययः "सु" यदा पुनः ।
पदं स्यात् खलपूस्तत्र विशेषस्तु न विद्यते ॥ ५७२
खलपू स्याद् यदा शब्दो यदा स्याद् औ परे पुनः ।
विशेषस्तु स्थितस्तत्र सूत्रं परं प्रवर्त्तते ॥ ५७३

२८१ । ओः सुपि । ६।४।८३

उवर्णान्तो यदा धातुः संयोगश्च न पूर्व्वतः ।
तथाविधो यदा धातुः शब्दस्यान्ते प्रवर्त्तते ॥ ५७४
स शब्दश्चेदनेकाच् स्यात् अजादि सुप् परे यदि ।
उवर्णस्य तदा तस्य यणादेशो भवेदिह ॥ ५७५

खलपू स्याद् यदा शब्दः प्रत्यय उ परे यदा ।
खलप्वौ स्यात् पदं तत्र खलप्वः स्यात् तथा जसि ॥ ५७६
एवं सुलू यदा शब्दः प्रत्ययः सुः परे यदा ।
सुलूः पदं तदा तत्र पदमन्यत् तथा भवेत् ॥ ५७७
अनेकाच् चेद् भवेदङ्गं तदेव स्यान्न चान्यदा ।
"लूः" "लुवौ" स्यात् न चानेकाच् न यण् भवेत्ततः पुनः ॥ ५७८
संयोगश्चेत् भवेद् धातौ तदेव स्यात् न चान्यदा ।
उल्लूर्यदा न धातौ स्यात् उपसर्गो ततो न यण् ॥ ५७९

संयोगश्चेत तदा न स्यात् न तदा यणिति स्थितिः ।
कटप्रुवौ संयोगश्च तस्माद्द यण् न भवेदिह ॥ ५९०
सुबिह चेत् तदैव स्यात् अन्यत्र न तथा भवेत् ।
"लुलुवतुः" न सुप् तावत् तस्माद्द यण् न भवेदिह ॥ ५९१

स्वभू

स्वभू यदा भवेत् तत्र तदा सूत्रं न युज्यते ।
तदा "न भू"—भवेद्द योज्यं स्वभुवौ स्यात् पदं तदा ॥ ५९२

वर्षाभू

वर्षाभु "सु" यदा तत्र वर्षाभूः स्यात् पदं तदा ।
वर्षाभू औ यदा तत्र सूत्रमन्यत् तदा भवेत् ॥ ५९३

२८२ । **वर्षाभ्वश्च** । ६।४।८४

वर्षाभू स्यात् यदा शब्दः सुप् अजादि परे यदा ।
उवर्णस्य तदा यण् स्यात् वर्षाभ्वौ स्यात् पदं तदा ॥ ५९४

अन्दू-दृम्भू-जम्बू-कफेलु-कर्कन्धू-दिधिषूः (उ ९३)

अन्दूः भवेत् पदं तत्र पदं दृम्भूः तथा भवेत् ।
जम्भूः भवेत् कफेलुः च कर्कन्धुः स्यात् पदं तथा ॥ ५९५
दिधिषूः स्यात् पदं तत्र सर्व्वत्र "कू" भवेदिह ।
उणादिके पदं सिद्धं यत् यदिह प्रदर्शितम् ॥ ५९६

[दृम्भू (ममध्नः) — दृभी + कू]

दृम्भू भवेत् यदा शब्दः रूपं भवेत् यथा परम् ।
दृम्भूः दृम्भ्वौ पुनः दृम्भ्वः दृम्भ्वम् दृम्भ्वौ तथा पुनः ॥ ५९७
दृम्भून् भवेत् तथैवात्र हूहूवत् स्यात् पदं परम् ।
विस्तरो न पुनर्दत्त ऊहनीयं यथायथम् ॥ ५९८

दृन्भू (नमध्यः) = दृन् + भू + क्विप्

पृथक् "दृन्भू" स्थितः शब्दः "दृन्"-अव्ययात् भुवः क्विपि ।
यदा दृन्भु यदा सु स्यात् पदं दृन्भुस्तदा भवेत् ॥ ५९९
यदा दृन्भु यदा स्याद्द औ वार्त्तिकं च परं यथा ।
दृन्-कर-पुनर्भूपूर्व्वस्य भुवो यण् वक्तव्यः (वा)
यणादेशो भवेदत्र दृन्भ्वौ दृन्भ्वस्तथा पदम् ॥ ६००

दृन्भू भवेत् "खलपू"वत् विशेषस्तु न विद्यते ।
वार्त्तिके तु "कर:" शब्दः "कार"श्चापि च पठ्यते ॥ ६०१
करभ्वौ स्यात् कारभ्वौ स्यात् द्वयमपि भवेदिह ।
करभ्वः स्यात् कारभ्वश्च "कार" इति यदा भवेत् ॥ ६०२

पुनर्भू (पुंसि)

पुनर्भूः यौगिकः पुंसि तस्येह ग्रहणं मतम् ।
पुनर्भ्वौ स्यात् पदं तत्र पदमूह्यं परं बुधैः ॥ ६०३

दृन्भू-काराभू

दृन्भू यदा भवेत्तत्र स्वयंभूवत् पदं भवेत् ।
काराभूश्च यदा शब्द स्वयंभूवत् तदापि च ॥ ६०४

इति ऊदन्ताः

अथ ऋदन्तप्रकरणम्

धातृ

धातृशब्दः ऋदन्तः स्यात् तस्य रूपं परं यथा ।
धाता स्यात् धातारौ स्याच्च धातारः स्यात् तथा पुनः ॥ ६०५

ऋवर्णात् नस्य णत्वं वाच्यम् (वा)

ऋवर्णाश्चेत् भवेत् पूर्व्वो नकारस्य णकारता ।
धातॄणां स्यात् पदं तत्र णत्वमिह प्रयुज्यते ॥ ६०६
नप्त्रादिकं च धातृवत् उद्गातृ च तथा भवेत् ।
विशेषो न स्थितः कश्चित् न विस्तरस्तथोच्यते ॥ ६०७

पितृ

इह पितृ भवेत् शब्द उणादौ प्रत्यये परे ।
अपतृन्निति न दीर्घः स्यात् न हि शब्दो धृतो भवेत् ॥ ६०८
पिता भवेत् पितारौ च पितरः स्यात् पदं तथा ।
धातृवच्च भवेच् शेषे विशेषन्तु न वर्त्तते ॥ ६०९

जामातृ च स्थितः शब्द भ्रातृशब्दः स्थितः पुनः ।
एवं ये ये स्थिताः शब्दा रूपं तेषां तथैव च ॥ ६१०

नृ

नृशब्दश्च स्थितस्तत्र ना नरौ च पदं भवेत् ।
नरः भवेत् पदं तत्र "हे नः" स्याच्च तथैव हि ॥ ६११

ओम् इह चेत् परे तत्र विशेषस्तु प्रवर्त्तते ।
विशेषे च पुनः सूत्रं परमिह प्रदर्शितम् ॥ ६१२

२८३ । नृ च । ६।४।६

नामि परे भवेद् दीर्घः दीर्घविधिर्विभाषया ।
नृनां नृणां भवेदत्र विभाषया पदद्वयम् ॥ ६१३

इति ऋदन्ताः

अथ ॠदन्तप्रकरणम्

इह कॄ तॄ भवेद् धातुः स्यादनुकरणे यदा ।
स्यात् प्रातिपदिकमपि रूपं भवेद यथा परम् ॥ ६१४
धातुवच्च भवेत् कार्य्यं "प्रकृतिवत्" इति स्थितम् ।
किर् भवेच्च भवेत् तिर् च ततः परं यथा पुनः ॥ ६१५
कीः किरौ च किरस्तत्र तीः तिरौ च तिरस्तथा ।
गीर्व्वदत्र भवेद् रूपं इत्वं रत्वं प्रयुज्यते ॥ ६१६
इत्वं रत्वं यदा न स्यात् क्रीः क्रौ क्रः स्यादिति स्थितिः ।
क्राम् क्रौ क्रन् स्यात् तथा तत्र क्रा क्रे भवेत्तथैव च ॥ ६१७
सूत्रम् "ऋतः" सूत्रं "ङि" च पुनरिह न युज्यते ।
ह्रस्वे तौ च विधी तत्र दीर्घे तौ न मतौ खलु ॥ ६१८

इति ॠदन्ताः

अथ ऌदन्तप्रकरणम्

गमॢ शकॢ भवेद् धातुरिहानुकरणं यदा ।
स्यात् प्रातिपदिकं चापि रूपं भवेद् यथा परम् ॥ ६१९
यदा गमॢ यदा सु स्यात् "ऋदुशन"-प्रवर्त्तते ।
अनङ् भवेत् तदादेशः गमा शका तदा भवेत् ॥ ६२०
यदा गमॢ यदा स्याद औ "ऋत" इति प्रयुज्यते ।
गुणे स्यात् गमलौ तत्र शकलौ च लकारतः ॥ ६२१
यदा गमॢ यदा टा स्यात् गम्ला तदा पदं भवेत् ।
यदा गमॢ यदा ङे स्यात् गम्ले भवेत् तदा पुनः ॥ ६२२
यदा गमॢ यदा ङस् च "ऋत उत्" प्रवर्त्तते ।
उत्वे च लपरत्वे च गमुल् पदं भवेत्तदा ॥ ६२३

इति ऌदन्ताः

अथ एदन्तप्रकरम्

से

"अ" तत्र च स्थितः शब्दः विष्णुरिति प्रतीयते ।
तस्यापत्यं यदार्थः स्यात् "अतः इञ्" च प्रयुज्यते ॥ ६२४
"यस्येति च" स्थितं सूत्रं पश्चात् तत्र प्रयुज्यते ।
अकारस्य भवेल्लोपः शब्द "इ" च तदा भवेत् ॥ ६२५
"इ"ना सह वर्त्तते यः इति स्याद् विग्रहो यदा ।
"तेन सह" भवेद् योज्यं बहुव्रीहिस्तदा भवेत् ॥ ६२६
सूत्रं "वोपसर्ज्जनस्य" पश्चात् तत्र प्रयुज्यते ।
"स"भावः स्यात् तदा तत्र "स इ" रूपं तदा भवेत् ॥ ६२७
"आद् गुण"श्च स्थितं सूत्रं प्रयुज्यते पुनश्च तत् ।
"से" तदा च भवेच्च शब्दः स इह प्रकृतिर्भवेत् ॥ ६२८
"से" यदा च स्थितः शब्दः "सु"प्रत्ययः पुनर्यदा ।
सेः सयौ स्यात् सयः स्याच्च भवेद रूपं यथायथम् ॥ ६२९

स्मृते

"इ" तत्र च स्थितः शब्द काम इति प्रतीयते ।
"इः स्मृतो येन" तत्र च विग्रहे वचनं भवेत् ॥ ६३०
"अनेकमन्यपदार्थे" सूत्रमिह प्रयुज्यते ।
समासस्तु बहुव्रीहिः पुनरिह तथा भवेत् ॥ ६३१
"निष्ठे"ति च स्थितं सूत्रं तत् पश्चाच्च प्रयुज्यते ।
"स्मृते"ति च भवेत् पूर्व्वे "स्मृत इ" स्यात् तदा पुनः ॥ ६३२
"आद्गुण"श्च स्थितं सूत्रं पश्चात् तत्र प्रयुज्यते ।
"स्मृते" भवेत् तदा शब्दः स इह प्रकृतिर्भवेत् ॥ ६३३
यदा "स्मृते" पुनः शब्दः प्रत्ययः "सु" पुनर्यदा ।
स्मृतेः स्यात् स्मृतयौ स्याच्च स्मृतयः स्यात् पदं पुनः ॥ ६३४

इति एदन्ताः

अथ ओदन्तप्रकरणम्

"गो" शब्दश्च यदा तत्र प्रत्ययः "सु" पुनर्यदा ।
सूत्रमिह भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ६३५

२८४। गोतो णित्। ७।१।९०
सर्व्वनामस्थानं यत्र गोतो णिद्वद् भवेदिह।
णिद्वत्कार्य्यं भवेद् वृद्धिः पदानि स्युर्यथापरम्॥ ६३६
गौः पदं स्यात् पदं गावौ पदं गावो भवेदिह।
सर्व्वत्रैव भवेद् वृद्धि वृद्धौ पदं तथा मतम्॥ ६३७
२८५। ओतोऽम्शसोः। ६।१।९३
ओकारान्तो यदा शब्दः पूर्व्वं इह प्रवर्त्तते।
अमिह चेत् परे तत्र शमिह चेत् परे भवेत्॥ ६३८
आकारः स्यादेकादेशः पदं परं यथा पुनः।
गो अम् यदा भवेद् गाम् च गो शम् यदा भवेच्च गाः॥ ६३९
अम् इह स्यात् सुपो यत्र तत्रैव च विधिर्भवेत्।
अम् इह चेद् भवेद् धातोः विधिरत्र न युज्यते॥ ६४०
"अचिनवम्" पदं तस्मात् निर्व्वाधं स्यादिति स्थितिः।
"असुनवम्" पदं तद्वत् निर्व्वाधं स्यात् तथैव च॥ ६४१
गवा गवे पदं तद्वत् पदं गोश्च भवेदिह।
अन्यत्रापि भवेदेवमूहनीयं यथायथम्॥ ६४२
ओतो ङिदिति वाच्यम् (वा)
विहितविशेषणां च (वा)
"ओतो णित्" च भवेत् सूत्रं "गोतो णित्" न भवेदिह।
"विहितविशेषणां" च भवेद् ग्राह्यमिति स्थितिः॥ ६४३
तेन "सुद्यौ" भवेदत्र सुद्यावौ च तथा भवेत्।
सुद्यावश्च भवेत्तद्वत् विशेषणमिह स्थितम्॥ ६४४
सर्व्वनामस्थानं चेत् स्यात् तदेव हि तथा भवेत्।
इत्यपि च पुनर्व्याख्या केश्चिदिह प्रदर्शिता॥ ६४५
तेन सम्बोधने न स्यात् तथाभाव इति स्थितिः।
"हे भानु" चेत् तथा न स्यात् "हे भानव" स्तथा च न॥ ६४६
स्मृतो
"उ" तत्र च स्थितः शब्दः शम्भुरिति प्रतीयते।
"उ स्मृतः येन" तत्र स्यात् भवेत् स्मृती च पूर्व्ववत्॥ ६४७
स्मृतोः स्मृतावौ स्मृताव इत्यादिकं पदं भवेत्।
स्मृताव् भवेत् स्मृतावौ च स्मृताः भवेत् तथैव च॥ ६४८
इति ओदन्ताः

अथ ऐदन्तप्रकरणम्

२८६। रायो हलि। ७।२।८५

रै

अकारः स्यात् यदा च रै हलिह चेत् परे भवेत्।
अचि परे पुनस्तत्र रायादेशः प्रयुज्यते॥ ६४९
"राः" भवेच्च भवेद् "रायौ" "रायो" भवेदिति स्थितिः।
रायं रायौ तथा रायः राया राभ्यां तथा भवेत्॥ ६५०

इति उदन्ताः

अथ औदन्तप्रकरणम्

ग्लौ

पदं ग्लौः स्यात् पदं ग्लावौ पदं ग्लावस्तथा भवेत्।
ग्लावं ग्लावौ पुनः ग्लावः पदं पुनर्भवेदिह॥ ६५१
"औतः" इति स्थितं सूत्रं तदिह न प्रयुज्यते।
ओकारान्तो यदा शब्दः केवलं तत् तदैव हि॥ ६५२
"ओ" "औ" तावत् सवर्णौ न ऐऔजिति च सूत्रितम्।
सावर्ण्यं न यदा तत्र विधिः "औतः" न युज्यते॥ ६५३

४।१।७४-११५ श्लोकाः

इति औदन्ताः

इति अजन्तपुंलिङ्गप्रकरणम्

भूवनो जनको यस्य जननी च मृणालिनी।
खुकी च भगिनी यस्य भगिनी च मनोरमा॥
वाङ्लादेशे ढाकामध्ये हरिणायामभूच्च यः।
रामपुरहाटे येन वसतिश्च कृता परे॥
सोऽहं हरिपददत्तः करोमि कारिकामिह।
शकादष्टादशशते षन्नवत्यधिके खलु॥

इति—

श्रीभूवनमोहन-मृणालिनी-सुत
श्रीहरिपददत्त विरचितायां व्याकरणकारिकायाम्
अजन्तपुंलिङ्गशब्दप्रकरणम्।

अजन्त-स्त्रीलिङ्ग-प्रकरणम्

आबन्तप्रकरणम्

मनोरमा

मनोरमा यदा तत्र यदा च सु परे पुनः ।
मनोरमा पदं तत्र "हल्ङ्याभ्यः" सु विलुप्यते ॥ १
मनोरमा यदा तत्र यदा स्याद् औ परे पुनः ।
सूत्रं परं तदा योज्यं सूत्रं परं भवेद् यथा ॥ २

२८७ । औङ आपः । ७।१।१८

आकारान्तो यदा शब्द औ औट् यदा परे भवेत् ।
ईकारः स्यादाकारस्य मनोरमे तथा भवेत् ॥ ३
मनोरमा यदा तत्र यदा च जस् परे पुनः ।
मनोरमाः तदा तत्र विशेषस्तु न विद्यते ॥ ४
संबुद्धिश्चेत् परे तत्र सूत्रं परं प्रवर्त्तते ।
एकारः स्यादकारस्य यथा सूत्रं भवेत् परे ॥ ५

२८८ । संबुद्धौ । ७।३।१०६

एकारः स्यादिहापस्तु संबुद्धिश्चेत् परे भवेत् ।
एङ्ह्रस्वादिति लोपश्च संबुद्धेः स्यात् तदा पुनः ॥ ६
पदं स्याद् हे मनोरमे द्वित्वेऽपि हे मनोरमे ।
बहुत्वे हे मनोरमाः अयमेव प्रदर्शितम् ॥ ७
मनोरमाम् यदा स्यादम् यदा स्याद् औट् मनोरमे ।
मनोरमा यदा शस् स्यात् अम् औट् शस् चेत् भवेत् अयम् ॥ ८

यदा मनोरमा तत्र यदा च टाप् परे पुनः ।
सूत्रं परं भवेद् योज्यं सूत्रं परं भवेद् यथा ॥ ९

२८९ । आङि चापः । ७।३।१०५

आङ् परे चेद् परे चेद् ओस् आकार ऐ भवेत्तदा ।
भवेत् मनोरमया च टाप् इह च परे यदा ॥ १०
भवेच्च मनोरमाभ्यां भ्यामिह चेत् परे भवेत् ।
भवेत् मनोरमाभिश्च भिसिह चेत् परे स्थितः ॥ ११

यदा मनोरमा तत्र यदा च ङे परे भवेत्।
सूत्रं परं भवेद् योज्यं सूत्रं परं यथा पुनः ॥ १२

२९० । याडापः । ७।३।११३

प्रत्ययो ङित् परे यत्र याडागमो विधीयते।
आबन्तस्य भवेद् विधिः पदं परे प्रदर्शितम् ॥ १३
भवेद् मनोरमायै च वृद्धिरेचि परे यदा।
भवेत् "मनोरमायाः" च सवर्णदीर्घता तदा ॥ १४
भवेत् "मनोरमयोः" च स्यादोम् यदि परे पुनः।
भवेत मनोरमाणाम् च यदा स्यादाम् पुनः परे ॥ १५
मनोरमा यदा तत्र यदा च ङि परे भवेत्।
भवेत् मनोरमायाञ्च "ङेराम्" भवेत् तदा पुनः ॥ १६
मनोरमा यदा तत्र सुप्प्रत्ययो यदा परे।
भवेत् मनोरमासु च विस्तरेण प्रदर्शितम् ॥ १७
एवं दुर्गादयस्तत्र पदं साध्यं यथायथम्।
मनोरमा यथा च स्यात् भवन्ति ते तथैव च ॥ १८

४।२।७४-१८ श्लोकाः
रात्रिः १० घटिकाः
५।२।७४

सर्व्वनाम
सर्व्वा

प्रथमायां द्वितीयायां तृतीयायां तथैव च।
पदं मनोरमावत् स्यात् विशेषस्तु न वर्त्तते ॥ १९
परासु च विभक्तिषु विशेषो वर्त्तते खलु।
विशेषे च स्थितं सूत्रं यथा परे प्रदर्शितम् ॥ २०

२९१ । सर्व्वनाम्नः स्याड् ह्रस्वश्च । ७।३।११४

आबन्तं सर्व्वनाम चेत् आदेशः स्याड् भवेदिह।
आपश्चापि भवेद् ह्रस्वः "याडि"ह च निषिध्यते ॥ २१
सर्व्वस्यै स्यात् पदं तत्र सर्व्वस्याः स्यात् तथा पुनः।
सुट् "आमि सर्व्वनाम्न"श्च सर्व्वासां स्यात् तथैव च ॥ २२
सर्व्वस्याम् स्यात् सर्व्वयोः स्यात् सर्व्वासु स्यात् तथा पुनः।
विश्वादयस्तथैव स्युराबन्ताश्च पुनर्यदा ॥ २३

२९२। विभाषा दिक्समासे बहुव्रीहौ। १।१।२८

दिक्समासे बहुव्रीहौ सा संज्ञा स्याद् विभाषया।
प्रतिषेधे स्थिते नित्ये विभाषार्थमिदं भवेत्॥ २४
भवेद् उत्तरपूर्व्वायै न चेत् संज्ञा भवेदिह।
भवेद् उत्तरपूर्व्वस्यै यदा संज्ञा विभाषया॥ २५

"दिङ्नामानि" स्थितं सूत्रं तत्र हि यः स्थितो भवेत्।
स एव स्यादिह ग्राह्यः नान्यो ग्राह्यो भवेदिह॥ २६
शब्द "उत्तरपूर्व्वा" चेत् उन्मत्ता चेत् प्रतीयते।
सर्व्वनाम तदा न स्यात् तत्कार्य्यं न भवेदिह॥ २७
भवेत् उत्तरपूर्व्वायै पदमिह यथायथम्।
आवन्तवद् भवेद् रूपं विशेषस्तु न विद्यते॥ २८
पदं सूत्रे "बहुव्रीहौ" स्पष्टार्थं च भवेदिदम्।
अन्यथापि बहुव्रीहिः स्पष्टमेव प्रतीयते॥ २९
यदा "बाह्यः" भवेदर्थः अन्तरस्मै तदा भवेत्।
नगरी चेद् भवेदर्थः अन्तरायै तदा पुनः॥ ३०

२९३। विभाषा द्वितीयातृतीयाभ्याम्। ७।३।११५

द्वितीया चेद् भवेच्च् शब्दः तृतीया चेद् भवेदिह।
ङिति परे विभाषा "स्याड्" आङो ह्रस्वो भवेदपि॥ ३१
द्वितीयस्यै तृतीयस्यै तस्माद् भवेदिति स्थितिः।
द्वितीयायै तृतीयायै तद्वत् भवेत् पदं पुनः॥ ३२
"द्वितीयस्याः" "तृतीयस्याः" तद्वद् भवेद् यदा च ङस्।
"द्वितीयायाः" "तृतीयायाः" पदं भवेत् तथैव च॥ ३३
द्वितीयस्यां तृतीयस्यां पदं भवेत् परे च ङौ।
द्वितीयायां तृतीयायां तद्वत् पदं भवेदिह॥ ३४

शेषं मनोरमावत् स्यात् विशेषश्च न विद्यते।
यथायोग्यं भवेद् योज्यम् ऊहनीयं यथायथम्॥ ३५

अम्बार्थनद्योर्ह्रस्वः

अम्बार्थानां भवेद् ह्रस्वो नद्यन्तानां तथा भवेत्।
सम्बुद्धिश्चेत् परे तत्र निदर्शनं यथा परम्॥ ३६

हे अम्ब स्यात् पदं तत्र हे अक्क स्यात् पदं तथा ।
हे अल्ल स्यात् पदं तद्वत् पुनरिह निदर्शनम् ॥ ३७
असंयुक्ता डलकाश्चेन् तदा ह्रस्वो भवेन्न च ।
हे अम्बाडे भवेदत्र हे अम्बाले भवेत्तथा ॥ ३८

जरा

यदा जरा यदा सु स्यात् भवेद् जरा यथायथम् ।
यदा जरा यदा स्यात् औ जरसौ स्यात् पदं तदा ॥ ३९
शीभावस्तु भवेदादौ "औङ् आपः" प्रयुज्यते ।
"जरा चे"ति स्थितं सूत्रं तच्च पश्चाद् भवेदिह ॥ ४०
यदा जरा यदा स्याद् आम् सर्व्वादौ स्यात् तदा च नुट् ।
पश्चाद् जरस् समादेशः "जरसाम्" स्याद् पदं तदा ॥ ४१
हलादौ मनोरमावत् पक्षे रूपं भवेदिह ।
विशेषो न स्थितः कश्चित् तस्मात् मया न चोच्यते ॥ ४२

यदा जरा यदा स्याद् औ जरसी च तदा भवेत् ।
इत्यपि च मतं तावत् केषाञ्चिदिह दृश्यते ॥ ४३
जरस् यदा समादेश औ लुप्ते भवेच्च शी ।
सन्निपातपरिभाषा न नित्येति वदन्ति ते ॥ ४४

पूर्व्वपक्षः

जरायाः स्यात् जरस् यत्र जरावच्च भवेत्तदा ।
आदेशः स्थानिवज् ज्ञेयः इति विधिर्विराजते ॥ ४५
पञ्चसूत्री प्रवृत्ता या प्रवर्त्तते इहापि सा ।
जरस् यदा तदापि स्यात् जराकार्य्यं यथायथम् ॥ ४६
नासिकायाः यदा नस् स्यात् निशायाः स्याद् यदा च निश् ।
पृतनाया यदा पृत् स्यात् पञ्चसूत्री तदापि च ॥ ४७

उत्तरपक्षः

अनल्विधौ पुनः सूत्रे निषेधश्च प्रवर्त्तते ।
अल्विधिश्च भवेदत्र तस्मात् तथा न युज्यते ॥ ४८
आबन्ताश्च यदा शब्दा पञ्चसूत्री तदा भवेत् ।
आदेशे न तथा कार्य्यं न चात्र सा प्रयुज्यते ॥ ४९

आप् इति तु यदा प्रोक्तं "आ आप्" तदा भवेत् खलु।
यदा ङी स्यात् तदा ङी ई इत्येव च प्रतीयते॥ ५०
आकाररूपस्यैव हि ग्रहणं स्यात् तदा पुनः।
इकाररूपस्यैव हि ग्रहणं स्यात् तथैव च॥ ५१
"अतिखट्ट" पदं यत्र निष्कौशाम्बि पदं यदा।
न तानि च प्रयोज्याणि प्रश्लिष्टस्य विधिर्यतः॥ ५२
जरा यदा भवेच्च शब्दः प्रत्यय औ यदा पुनः।
जरसी तु तदा सिध्येदित्यपि च मतं स्थितम्॥ ५३
जरस् अपि यदा तत्र शीभावः स्यात् तदापि च।
सन्निपातपरिभाषा न नित्येति मतं सताम्॥ ५४
एषः पक्षः न युक्तः स्यात् जरसी तु न दृश्यते।
न प्रयोगः स्थितो लोके तस्मात् पदं न गृह्यते॥ ५५

पूर्व्वपक्षेः

जरायाः स्यात् जरस् तत्र जरावच्च भवेत्तदा।
आदेशः स्थानिवज्ज्ञेय इति विधिः स्थितः खलु॥ ५६
जरायाः स्याद् यदा जरस् पञ्चसूत्री प्रवर्त्तते।
शीभावश्च तथा तत्र भवेदेव यथायथम्॥ ५७
नासिकाया यदा नस् स्यात् निशायाः स्यात् यदा च नस्।
पृतनाया यदा पृत् स्यात् तानि पञ्च तदापि च॥ ५८

उत्तरपक्षः

आदेशः स्थानिवद् ग्राह्य इति विधिः स्थितः खलु।
अल्विधिश्चेत् तदा न स्यात् इत्यपि च स्थितं पुनः॥ ५९
अल्विधिश्च भवेदत्र जरावन्न ततो जरस्।
जरायाश्च यथा कार्य्यं जरसि न तथा भवेत्॥ ६०
पञ्चसूत्री स्थिता या सा सदारम्भे प्रवर्त्तते।
आदेशश्चेत् स्थितस्तत्र तदा तु सा न युज्यते॥ ६१
आप् इति च यदा प्रोक्तम् आ आप् इति च छिद्यते।
आकारः प्रत्ययात् प्राक् चेत् स गृह्यते इति स्थितिः॥ ६२
"ङी" यदा च स्थितस्तत्र "ङि ई" तदा च छिद्यते।
इकारः प्रत्ययात् प्राक् चेत् स गृह्यते इति स्थितिः॥ ६३

आकाररूपस्यैव हि सर्व्वत्र ग्रहणं भवेत् ।
ईकाररूपस्यैव हि सर्व्वत्र ग्रहणं मतम् ॥ ६४
"अतिखट्ट" यदा तत्र "निष्कौशाम्बि" यदा पुनः ।
"अः" ह्रस्वः स्यात् इः ह्रस्वः स्यात् तस्मात् तानि भवन्ति न ॥ ६५
"अतिखट्ट" यदा तत्र यदा च टा परे परे भवेत् ।
याडापः न लगेत् सूत्रम् आङिह न प्रवर्त्तते ॥ ६६

मासिका

नासिकाया यदा नस् स्यात् यदा च शस् परे भवेत् ।
"नसः" तदा पदं तत्र टा यदा च तदा नसा ॥ ६७
यदा "नस्" स्याद् यदा भ्याम् स्यात् नोभ्याम् पदं तदा भवेत् ।
पक्षे मनोरमावच्च पदं भवेत् परे सुटि ॥ ६८

निशा

निशायाश्च निसादेशः पुनरिह प्रयुज्यते ।
यदा शस् च यदा टा च निशः निशा तदा भवेत् ॥ ६९
यदा निशा यदा भ्याम् च विशेषो विद्यते खलु ।
विशेषे च स्थितं सूत्रं यथा परे प्रदर्शितम् ॥ ७०

२९४। **व्रश्च-भ्रस्ज-सृज-मृज-यज-राज-भ्राज-छशां षः । ८।२।३६**

व्रश्च भ्रस्ज यदा तत्र सृज मृज यदा पुनः ।
यज राज यदा तत्र भ्राज दश पुनर्यदा ॥ ७१
अन्तादेशस्तदा तत्र भवेत् सदा षकारता ।
झलि परे पदान्ते च पुनर्विधिः प्रयुज्यते ॥ ७२
यदा निश् च यदा भ्याम् च तदा निभ्भ्याम् भवेदिह ।
षकारस्य डकारः स्यात् पदं निड्भ्यां तदा भवेत् ॥ ७३
यदा निश् स्यात् यदा भिस् च निड्भिः पदं तदा भवेत् ।
इह चापि विशेषो न यथापूर्व्वं भवेत् पदम् ॥ ७४
यदा निश् च यदा सुप् च निट्त्सु पदं भवेत् तदा ।
प्रक्रिया च विस्तरेण परं मया प्रदर्शिता ॥ ७५
"व्रश्च" इति षकारः स्यात् ततो भवेत् डकारता ।
"डसि धुट्" च धुडागमः चर्त्वं पुनः प्रसज्यते ॥ ७६

असिद्धत्वात् टतयोर्न टथौ पुन मताविह ।
"न पदान्तात्" न ष्टुत्वं स्यात् निट्त्सु पदं तथा भवेत् ॥ ७७
यदा षुट् न यदा "निश् सु" "व्रश्च" इति षकारता ।
षकारश्चेत् ककारः स्यात् तत्र सूत्रं परं भवेत् ॥ ७८

२९५ । षढोः कः सि । ८।२।४१

सकारश्चेत परे तत्र षस्य तस्य ककारता ।
यदा निश् सुप् तदा निक् सुप् इति पुनः प्रसज्यते ॥ ७९
ककारस्तु न तावत् स्यात् जश् असिद्धं मतं भवेत् ।
"झलां जश्" च स्थितं पूर्व्वे "षढो कः सि" परे स्थितम् ॥ ८०

"दादेधातोः" स्थितं सूत्रं तस्मात् "धातोः" प्रवर्त्तते ।
तेन जश्त्वं जकारः स्यात् इत्यपि च मतं स्थितम् ॥ ८१
तेन निज्भ्याम् भवेदत्र जकारस्तु यदा भवेत् ।
निजभिर्भवेत् तथैवेह जकारस्तु भवेद् यदा ॥ ८२
"चोः को"रिति न कुत्वं स्यात् जशसिद्धं भवेदिह ।
जश्त्वं श्चुत्वं ततः चर्त्वं निच्शु निच्छु पदं भवेत् ॥ ८३

मांस-पृतना-सानूनां मांस्-पृत्-स्नवो वाच्यः
शसादौ वा (वा)

"मांस" "सानु" न स्त्रियां स्यात् पृतना च स्त्रियां भवेत् ।
एका स्त्री पृतना चात्र सा चोदाह्रियते पुनः ॥ ८४
यदा पृत् च यदा शस् च पृतः पदं तदा भवेत् ।
यदा पृत् च यदा टाप् च तदा पृता पदं पुनः ॥ ८५
यदा पृत् च यदा भ्याम् च पदं पृद्भ्याम् तदा भवेत् ।
पक्षे मनोरमावच्च रूपं भवेदिति स्थितिः ॥ ८६
विश्वपावत् भवेद् गोपाः न सुलोपो भवेदिह ।
आवन्तो न भवेत् शब्दः सुलोपश्च न लभ्यते ॥ ८७

५।२ ७४-६६ श्लोकाः

इति आदन्ताः

अथ वकारान्तप्रकरणम्

सुदिव्

सुदिव् यदा भवेच्च् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ १६४

३३६ । दिव औत् । ७।१।८४

औणादिके डिवि तत्र दिव् प्रातिपदिकं भवेत् ।
दिवस्तस्य भवेद् औत् च प्रत्ययः "सु" यदा परे ॥ १६५
औत् यदा च भवेत्तत्र "सु दि औ स्" च तदा भवेत् ।
सुद्यौस् इति सकारान्तः पदं सन्धौ प्रजायते ॥ १६६

पूर्वपक्षः

वकारस्य भवेद् औत् च औ स्थानिवत् ततो भवेत् ।
हल् भवेत् स वकारस्तु औ भवेत् हल् ततः खलु ॥ १६७
"हल्ङ्याब्भ्यश्च स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
सुप्रत्ययः स्थितस्तत्र तस्य भवेत् विलोपनम् ॥ १६८
प्रत्ययस्य यदा लोपः स्यात् पुनस्तत्र विलोपनम् ।
"सुद्यौ स्" इति सकारान्तं पदं तदा न सिध्यति ॥ १६९

उत्तरपक्षः

अल्विधिश्च भवेदयं स्थानिवत्वं न सिध्यति ।
हल्ङ्याब्भ्यो न भवेद् योऽयं सुलोपो न तथा भवेत् ॥ १७०
सुलोपो न यदा तत्र "सु" तत्र च स्थितो भवेत् ।
सुद्यौस् इति सकारान्तं पदं तदा च सिध्यति ॥ १७१
सुदिवौ स्यात् पदं तत्र सुदिवः स्यात् पदं तथा ।
सुदिवम् स्यात् पदं तत्र सुदिवौ स्यात् तद् नव च ॥ १७२
सुदिव् यदा भवेच्च् शब्दः भ्याम् भिस् यदा परे भवेत् ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ १७३

३३७ । दिव उत् । ६।१।१३१

अन्तादेश उकारः स्यात् दिवस्तत्र पदान्तरे ।
सुद्युभ्याम् च पदं तत्र सुद्युभिः च पदं तथा ॥ १७४

इति वान्ताः

अथ वकारान्तप्रकरणम्

चतुर्

चतुर यदा यदा जश् स्यात् "चतुरि"ति प्रयुज्यते ।
आम्भावश्च भवेत्तत्र चत्वारः च पदं भवेत् ॥ १७५

चतुरः स्यात् पदं तत्र चतुर्भिश्च पदं भवेत् ।
चतुर्भ्यः स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ १७६

चतुर् यदा भवेच् शब्दः प्रत्यय आम् परे यदा ।
पदं यदा भवेत् साध्यम् सूत्रं परं प्रयोजनम् ॥ १७७

३३८ । षट्चतुर्भ्यश्च । ७।१।५५

षट्संज्ञको यदा शब्दः चतुर् शब्दो यदा पुनः ।
आम् यदा स्यात् परे तत्र तदा भवेद् नुड़ागमः ॥ १७८
नुड़ागयो यदा तत्र चतुर्णाम् च पदं भवेत् ।
भवेत् णत्वं भवेद् द्वित्वं णत्वे द्वित्वे पदं तथा ॥ १७९

चतुर् यदा यदा सुप् च शङ्का तदा प्रजायते ।
रेफस्य वा विसर्गः स्यात् यतः सूत्रमिदं स्थितम् ॥ १८०

३३९ । रोः सुपि । ८।३।१६

चतुर् यदा भवेच् शब्दः सप्तम्यां सुप् भवेद् यदा ।
रोरेव हि विसर्गः स्यात् नान्यस्य च तथा भवेत् ॥ १८१

रोरेव हि विसर्गः स्यात् नान्यस्य च भवेत्तथा ।
चतुर् यदा यदा सुप् च रोर्विसर्गो भवेन्न च ॥ १८२
रोविसर्गो यतो न स्यात् तस्मात् सूत्रं न युज्यते ।
रेफो यश्च चतुर्शब्दे रेफ एव स तिष्ठति ॥ १८३

एवं यदा स्थितं तत्र "चतुर् सु" च यदा स्थितम् ।
"आदेशे"ति भवेद् योज्यं षत्वं तदा प्रजायते ॥ १८४

षत्वं यदा भवेत्तत्र "चतुर् षु" च यदा स्थितम् ।
तदा तत्र भवेच् शङ्का षस्य द्वित्वं भवेन्न वा ॥ १८५

"अच"श्चे ति स्थितं सूत्रं तदिह चेत् प्रयुज्यते ।
षकारस्य भवेद् द्वित्वं द्वित्वं प्राप्तं भवेत्तदा ॥ १८६
"अत्र"श्चे ति न योज्यं स्यात् द्वित्वमपि भवेन्न च ।
द्वित्वमिह निषिद्धं स्यात् निषेधे च परं भवेत् ॥ १८७

३४० । शरोऽचि च । ८।४।४९

शर् यदा च भवेत् पूर्व्वे अच् परे च भवेद् यदा ।
तदा तत्र शरो द्वित्वं न हि खलु विधीयते ॥ १८८

"चतुर" यदा भवेदत्र "षु" यदा च भवेत् पुनः ।
शर् इह च भवेत् पूर्व्वे अच् परे च भवेदिह ॥ १८९
शर् पूर्व्वे स्यात् परे स्यादच् द्वित्वं तस्माद् भवेन्न च ।
एकषं स्यात् पदं तत्र चतुर्षु स्यात् पदं तदा ॥ १९०

प्रियचतुर्

प्रियचतुर् यदा शब्दः प्रत्ययः "सु" परे यदा ।
"चतुरि"ति भवेद् योज्यम् आम् तथा च भवेदिह ॥ १९१
प्रियचत्वार् तदा तत्र प्रत्यय "सु" परे पुनः ।
पदं स्यात् प्रियचत्वारः पदमिष्टं तदेव हि ॥ १९२

प्रियचतुर् यदा तत्र सम्बुद्धौ "सु" भवेद् यदा ।
"अम् सम्बुद्धौ" भवेत्तत्र प्रियचत्वः पदं भवेत् ॥ १९३
पदं स्यात् प्रियचत्वारौ औ यदा च परे भवेत् ।
पदं स्यात् प्रियचत्वारः जश् यदा च भवेत् परे ॥ १९४
प्रियचतुर यदा शब्दः प्रत्यय आम परे यदा ।
स्यात् प्रियचतुराम् तत्र नुम् गौणत्वे न युज्यते ॥ १९५
प्राधान्यं चेद् भवेदर्थः वाढ़म नुम् युज्यते तदा ।
पदं प्रियचतुरणाम् स्यात् नुमिह च प्रयुज्यते ॥ १९६

इति रेफान्ताः

अथ लकारान्तप्रकरणम्

कमल्

कमलमाचक्षाणेति यदा वाक्यं प्रयुज्यते ।
"तत्करोति तदाचष्टे" तदा योज्यं भवेदिह ॥ १९७

प्रत्ययो णिच् भवेत्तत्र "सनाद्यन्ताः" च धातुता ।
सुपो लुक् स्यात् ततस्तत्र "णाविष्ठवत्" भवेत् पुनः ॥ १९८

इष्ठवत्त्वात् टिभागस्य पुनर्लोपो भवेदिह ।
टिलोपे स्यात् कमल् शब्दः स इह प्रकृतिर्भवेत् ॥ १९९

कमल् स्यात् कमलौ स्याच्च कमलः स्यात् तथा पदम् ।
कमल्षु स्यात् पदं तत्र सुपि षत्वं प्रजायते ॥ २००

इति लकारान्ताः

अथ मकारान्तप्रकरणम्

प्रशाम्

प्रपूर्वाच्च शमस्तत्र प्रत्यय क्विप् प्रयुज्यते ।
"अनुनासिकस्येति" च दीर्घे प्रशाम् भवेदिह ॥ २०१

प्रशाम् यदा भवेच्च शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ २०२

३४१ । मो नो धातुः । ८।२।३४

मकारान्तो यदा धातुः क पदान्तश्च भवेद् यदा ।
तदा तत्र मकारस्य नकारः स्यात् इति स्थितिः ॥ २०३

एवं यदा मकारस्य नकारश्च भवेदिह ।
प्रशान् तदा भवेत् तत्र पदमिष्टं तदेव हि ॥ २०४

पूर्व्वपक्षः

"हल्ङ्याब्भ्यो"श्च भवेद् युक्तं प्रत्ययः सु विलुप्यति ।
प्रत्ययस्य यदा लोपः प्रशान् तदा च तिष्ठति ॥ २०५

नकारस्य तथा तत्र स्यात् प्रातिपदिकान्तता ।
पदान्तता नकारस्य भवेत्तत्र तथैव च ॥ २०६

"नलोप"श्च स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
"नकारस्य भवेल्लोपः प्रशान् नान्तो न सिध्यति ॥ २०७

उत्तरपक्षः

नत्वं भवेदसिद्धं च नलोपो न भवेत्ततः ।
प्रशान् इति नकारान्तं पदं सिध्येत् यथायथम् ॥ २०८

प्रशामौ स्यात् पदं तत्र प्रशामः स्यात् पदं तथा ।
प्रशान्भ्याम् स्यात् पदं तत्र विशेषश्च न विद्यते ॥ २०९

किम (पुंसि)

किम् यदा च भवेच्छब्दः प्रत्ययः "सु" परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ २१०

३४२ । किमः कः । ७।२।१०३

किमः कः स्यात् समादेशो विभक्तिश्चेत् परे भवेत् ।
कः कौ के स्यात् काम् कौ कान् स्यात् सर्व्वत्र भवेत् पदम् ॥ २११

पूर्व्वपक्षः

"किमः क"श्च स्थितं सूत्रं न हि सूत्रं तथा भवेत् ।
"इम" इति भवेत् सूत्रं तेन सिध्येत् प्रयोजनम् ॥ २१२
"त्यादादीनाम्" स्थितं सूत्रम् अकारश्चानुवर्त्तते ।
"इमो भवेदकारश्च" इति चार्थो भवेदिह ॥ २१३
किम् शब्दः स्याद् यदा तत्र इमो भवेदकारता ।
क इत्येवमदन्तं च रूपं तदा प्रसिध्यति ॥ २१४

उत्तरपक्षः

"इमो" यदि भवेत् सूत्रं दर्शितं भवता यथा ।
"अलोन्तस्य" मकारस्य स्यादकारस्तदा पुनः ॥ २१५
"इ" तत्र च स्थितः पूर्व्वः "अ" तत्र च स्थितः परे ।
"य" तत्र स्यात् तथा तत्र रूपं "क्य" च तदा भवेत् ॥ २१६

पूर्व्वपक्षः

"नानर्थके" स्थितं तत्र निषेधश्च प्रवर्त्तते ।
"अलोऽन्त्य-परिभाषाया न प्रवृत्तिर्भवेदिह ॥ २१७
"इम्" इह च कृत्स्नस्य स्याद् अकारस्तदा पुनः ।
क इत्येवमदन्तं च रूपं तदा प्रसिध्यति ॥ २१८

उत्तरपक्षः

"इमो" यदि भवेत् सूत्रं व्याख्यातं भवता यथा ।
तथापि न भवेदिष्टं सिद्धमिह च सर्व्वथा ॥ २१९
"अव्यये"ति स्थितं सूत्रम् अकच् यदि प्रयुज्यते ।
ककिम् भवेत्तदा तत्र पदं साध्यं भवेत् पुनः ॥ २२०

इमो भवेदकारश्चेत् रूपं "कक" तदा भवेत् ।
अनिष्टं तु भवेत्तत्र रूपमिष्टं न सिध्यति ॥ २२१
"किमः क"श्चेत् भवेत् सूत्रं मुनिना दर्शितं यथा ।
इष्टं रूपं तदा सिध्येत् दर्शयामि परे यथा ॥ २२२
"किमः कः" स्याद् यदा तत्र "ककिम्" अपि च गृह्यते ।
मध्यपतितन्यायश्च पुनरिह प्रवर्त्तते ॥ २२३
किमश्चेद् ग्रहणं तत्र ककिम् अपि च गृह्यते ।
किमो गतिर्यथा तत्र ककिमोऽपि तथा गतिः ॥ २२४
किमः कः स्यात् समादेशः ककिमोऽपि भवेच्च "क" ।
क इत्येवम् अदन्तं च रूपं तदा प्रसिध्यति ॥ २२५
अकच् यदा भवेत्तत्र तदापि च यथा भवेत् ।
मुनिना च तथा तत्र आदेशः "क" प्रदर्शितः ॥ २२६

इदम्

इदम् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयोजनम् ॥ २२७

३४३ । इदमो मः । ७।२।१०८

इदम् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
इदं शब्दे मकारस्य मकारो हि भवेदिह ॥ २२८

पूर्व्वपक्षः

स्थित एव मकारश्च मकारः क्रियते पुनः ।
स्थिते विधिः कथं तत्र विधिरिह निरर्थकः ॥ २२९

उत्तरपक्षः

न च विधिर्निरर्थकः अस्ति तस्य प्रयोजनम् ।
"त्यदादीनाम्" अकारः स्यात् अपवादः प्रयुज्यते ॥ २३०

मकारश्च मकारश्च यदा तथा प्रवर्त्तते ।
तदा तत्र प्रयोज्यं स्यात् पुनः सूत्रं यथा परे ॥ २३१

३४४ । इदोऽय् पुंसि । ७।२।१११

इदम् यदा भवेत् पुंसि प्रत्ययः सु परे यदा ।
इदम् शब्दे इदभागस्य तदा स्याद् अम् इति स्थितिः ॥ २३२

इदम्भागस्य यदा स्याद् "अय" पदम् अयम् तदा भवेत् ।
विशेषो न स्थितः कश्चित् सुलोपः स्याद् यथायथम् ॥ २३३

इदम् यदा भवेच् शब्दः प्रत्ययः औ परे यदा ।
"त्यदादीनां" भवेद् योग्यं अकारः स्यात् तथा पुनः ॥ २३४
मकारस्य यदा तत्र अकारश्च प्रवर्त्तते ।
इद अ औ तदा तत्र रूपं भवेदिति स्थितिः ॥ २३५
"अतो गुणे" ततः सूत्रं भवेदिह प्रयोजितम् ।
पररूपं भवेत्तत्र इद औ स्यात् तदा पुनः ॥ २३६
एवं यदा स्थितं तत्र सूत्रं परं प्रयुज्यते ।
दकारस्य मकारः स्यात् तत्र सूत्रं भवेद् यथा ॥ २३७

३४५ । दश्च । ७।२।१०९

इदम् यदा भवेच् शब्दः विभक्तिश्च परे यदा ।
दकारस्य मकारश्च तदा तत्र प्रसज्यते ॥ २३८

दकारस्य यदा तत्र मकारश्च प्रवर्त्तते ।
इम औ स्यात् तदा तत्र पदम् इमौ तदा भवेत् ॥ २३९
इमे भवेत् पदं तत्र प्रत्ययो जश् परे यदा ।
इमम् इमौ इमान् तत्र अम् औट् शस् चेत् परे भवेत् ॥ २४०

त्यादादीनां सम्बुद्धिश्च न युक्ता स्यादिति स्थितिः ।
उत्सर्गस्तु भवेदेषः पदं तस्मात् न दर्शितम् ॥ २४१
इदम् यदा भवेच् शब्दः प्रत्ययः टा परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ २४२

३४६ । अनाप्यकः । ७।२।११२

इदम् यदा भवेच् शब्दः आप् विभक्तिः परे यदा ।
इदमश्च इदः स्यादन् अकच् यदि न वर्त्तते ॥ २४३

तृतीयायां टा विभक्तिः "आ" तत्र च स्थिता खलु ।
सप्तम्यां सुप् विभक्तिः स्यात् "प" तत्र च पुनः स्थितः ॥ २४४
गृह्यते "आ" टायास्तत्र गृह्यते "प" सुपः पुनः ।
आप् भवेच्च तथा तत्र तस्येह प्रहणम् मतम् ॥ २४५

अन् यदा स्यात् तथा तत्र "अन आ" च तदा भवेत्।
"इन" भवेत् समादेशः स्याद् अनेन पदं तथा ॥ २४६

इदम् यदा भवेच् शब्दः प्रत्ययो भ्याम् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ २४७

३४७ । हलि लोपः । ७।२।११३

इदम् यत्र भवेच् शब्द आप् हलादि परे यदा ।
इदमः स्यादिदो लोपः अकच् यदि न वर्त्तते ॥ २४८

पूर्व्वपक्षः

इदोलोपश्च कृत्स्नस्य पुनरिह प्रदर्शितः ।
अन्त्यस्यालो भवेल्लोपः लुप्येत "द" हि केवलम् ॥ २४९

उत्तरपक्षः

न केवलमलोन्त्यस्य दकारस्य विलोपनम् ।
वार्त्तिकं च स्थितः शास्त्रे तत् प्रमाणं भवेदिह ॥ २५०

नानर्थके अलोन्त्यविधितः
अनभ्यासविकारे (वा)

अलोन्त्येति परिभाषा प्रयुज्यते निरर्थके ।
अभ्यासस्य विकारश्चेत् तदा विधिश्च युज्यते ॥ २५१

इद्भागो यो भवेदत्र स भवेच्च निरर्थकः ।
निरर्थके न तावच्च परिभाषा प्रयुज्यते ॥ २५२
इदस्तस्मात् च कृत्स्नस्य लोप इह प्रसज्यते ।
केवलन्तु दकारस्य लोप इह न युज्यते ॥ २५३

इदम् यदा भवेच् शब्दः प्रत्ययो भ्याम् परे यदा ।
त्यदादीनाम् भवेद् योयम् अकारश्च प्रवर्त्तते ॥ २५४
अकारः स्यात् यदा तत्र "इद अ भ्याम" तदा भवेत् ।
इदो यदा भवेल्लोपः "अ भ्यामि"ति च शिष्यते ॥ २५५

पूर्व्वपक्षः

"अ भ्याम्" यदा स्थितं तत्र अङ्गम् "अ" स्यात् तदा पुनः ।
अदन्तं न भवेत् तत्र "सुपि चे"ति न युज्यते ॥ २५६

"सुपि" यदा न युक्तं स्यात् न दीर्घः स्यात् तदा पुनः ।
दीर्घों यदा न तत्र स्यात् पदमिष्टं न सिध्यति ॥ २५७

उत्तरपक्षः

दीर्घं इह न तावत् स्यात् इति पक्षो भवेन्न च ।
दीर्घस्तावद् भवेदत्र सूत्रं परं स्थितं यतः ॥ २५८

३४८ । आद्यन्तवद् एकस्मिन् । १।१।२१

एकस्मिंश्चेत् क्रियमाणं कार्य्यमिह भवेत् क्वचित् ।
आदाविव भवेत् तच्च अन्ते इव भवेच्च तद् ॥ २५९

"अ" एको हि स्थितस्तत्र स्यादन्तवत् ततः पुनः ।
अन्तवच्च भवेत कार्य्यम् सुपि चेति प्रयुज्यते ॥ २६०
"सुपि" यदा प्रयुक्तं स्यात् दीर्घस्तदा भवेदिह ।
"अ भ्याम्" यदा तदा दीर्घः आभ्याम् पदं तदा भवेत् ॥ २६१

इदम् यदा भवेच्च शब्दः प्रत्ययो भिस् भवेद् यदा ।
पदं यदा भवेत् साध्यं प्रक्रिया च तदा भवेत् ॥ २६२
इदम् यदा यदा भिस् स्यात् "त्यदादीना"म् प्रयुज्यते ।
अकारः स्यात् मकारस्य इद अ भिस् तदा भवेत् ॥ २६३
पररूपं भवेत्तत्र इद भिस् स्यात् तदा पुनः ।
"हलि लोपः" इदो लोपे अ भिस् रूपं प्रवर्त्तते ॥ २६४
अ भिस् यदा स्थितं तत्र "अत"श्चेति भवेत्तदा ।
भिस ऐस् च भवेत् प्राप्तः स ऐस् ए स्यात् यतः पुनः ॥ २६५

३४९ । नेदमदसोरकोः । ७।१।११

इदम् अदम् यदा शब्दः अकच् यदा भवेन्न च ।
भिस ऐस् न भवेत्तत्र न तावद ऐस् प्रयुज्यते ॥ २६६

अ भिस् यदा स्थितं तत्र न भिस एस् भवेदिह ।
"बहु" चेति भवेदेत्वं पदम् एभिस्तथा भवेत् ॥ २६७

इदम् यदा भवेच्च शब्दः प्रत्ययो ङे परे यदा ।
"त्यदादीनाम्" अकारः स्यात् इद अ ए तदा भवेत् । २६८

परस्रूपं भवेत्तत्र "इद ए" स्यात् तदा पुनः ।
"सर्व्वनाम्नः"—भवेद् योज्यं स्मै तदा च तथा भवेत् ॥ २६९

पूर्व्वपक्षः

स्मैभावश्च भवेत् पूर्व्वं अन्भाश्च परे भवेत् ।
अन्भावेन स "स्मै"भावः बाधितश्च भवेदिह ॥ २७०
"स्मै" भावश्चेत् बाधितः स्यात् स बाधितश्च तिष्ठति ।
"स्मै"भावस्य पुनः पश्चात् उन्मेषः स्यात् सुदुर्ल्लभः ॥ २७१

उत्तरपक्षः

स्मैभावो यो भवेदत्र स च नित्यो भवेदिह ।
अनादेशात् प्रागेव हि स आदेशः प्रयुज्यते ॥ २७२
अनादेशे स्थितश्च यः स बाधितो भवेत् पुनः ।
"हलि लोपः" भवेद् योज्यं स बाधितस्तथा भवेत् ॥ २७३

"इद स्मै" च स्थितं तत्र इदो लोपो भवेत् पुनः ।
अस्मै तदा भवेत्तत्र पदमिष्टं तदेव हि ॥ २७४

इदम् भ्याम् स्यात् यदा तत्र पदमाभ्यां तदा भवेत् ।
इदम् भिस् स्यात् यदा तत्र पदम् एभ्यः भवेत्तदा ॥ २७५
अस्मात् भवेत् पदं तत्र आभ्याम् भवेत् पदं तथा ।
एभ्यः भवेत् पदं तत्र विशेषश्च न वर्त्तते ॥ २७६
अस्य स्यात् अनयोः स्याच्च स्याद् एषां च पदं पुनः ।
अस्मिन् भवेत् अनयोः स्यात् पदम् एषु भवेत्तथा ॥ २७७

"सर्व्वनाम्नः" स्थितं सूत्रम् अकच् यदा प्रवर्त्तते ।
अयकम् स्यात् इमकौ स्यात् इमके स्यात् पदं तदा ॥ २७८
इमकं स्याद् इमकौ स्यात् इमकान् च पदं भवेत् ।
इमकेन पदं च स्यात् इमकाभ्याम् तथैव च ॥ २७९
परं पदं भवेद् यत् यत् तत्तद्रूप्यं पुनर्व्बुधैः ।
न विशेषः स्थितस्तत्र तस्मात् किञ्चिन्न वाच्यते ॥ २८०

३५० । इदमोऽन्वादेशे अशनुदात्तस्तृतीयादौ । २।४।३२

इदम् यदा भवेच् शब्दः अन्वदेशो भवेद् यदा ।
अनुदात्तो भवेद् अशच् तृत्तीयाद्यौ तदा पुनः ॥ २८१

अकच् यदा भवेत्तत्र अश् तत्र स्याद् तदापि च ।
अशुवचनं साकच्कार्यं भवेदिह सतां मते ॥ २८२

३५१ । द्वितीया-टा-ओसि एनः । २।४।३४

इदम् यदा भवेच् शब्दः एतद् शब्दो भवेद् यदा ।
एन भवेत् द्वितीयायां टायामोसि तथैव च ॥ २८३

एकमेवाभिधेयं च पूर्व्वं शब्देन बोधितम् ।
तस्यैव बोधनं पश्चाद् अन्वादेशो इहोच्यते ॥ २८४

अयश्च क्षुधया क्लिष्टो भोजयैनं च सत्वरम् ।
"अयम्" आदौ भवेत्तत्र पश्चात् एनम् प्रयुज्यते ॥ २८५
एनम् भवेत् पदं तत्र पदम् एनौ भवेत्तथा ।
एनान् भवेत् पदं तत्र एनेन एनयोः पुनः ॥ २८६

इति मकारान्ताः

अथ णकारान्तप्रकरणम्

सुगण्

गणयतेः सुपूर्व्वाच्च यदा विच् प्रत्ययो भवेत् ।
सुगण् तदा भवेच् शब्दः स इह प्रकृतिर्भवेत् ॥ २८७
सुगण भवेत् पदं तत्र सुगणौ सुगणास्तथा ।
सुगण्ट्षु स्यात् सुगण्ठ्सु स्यात् सुगण्सु स्यात् पदं पुनः । २८८

सुगाण

गणयते सुपूर्व्वाच्च यदा क्विप् प्रत्ययो भवेत् ।
सुगाण् स्याच्च तदा दीर्घे स इह प्रकृतिर्भवेत् ॥ २८९
सुगाण् भवेद् पदं तत्र सुगाणौ सुगाणास्तथा ।
सुगाण्ट्षु स्यात् सुगाण्ठ्षु स्यात् सुगाण्षु स्यात् तथा पदम् ॥ २९०

इति णकारान्ताः

१०।५।७४

अथ नकारान्तप्रकरणम्

राजन्

राजन् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं "सर्व्वे"ति स्यात् प्रयोजनम् ॥ २९१

सूत्रं "सर्व्व" यदा युक्तं दीर्घस्तदा प्रजायते ।
दीर्घो यदा भवेत्तत्र राजन् सु स्यात् तदा पुनः ॥ २९२
राजान् सु स्यात् यदा तत्र पुनः सूत्रं प्रयोजनम् ।
हलङ्याब्भ्योश्च स्थितं सूत्रं तत्तदा च प्रयुज्यते ॥ २९३
हलङ्याब्भ्योश्चे यदा युक्तं प्रत्ययः "सु" विलुप्यति ।
प्रत्ययः सु यदा लुप्तो रूपं राजन् भवेत्तदा ॥ २९४
रूपं राजान् यदा तत्र पुनः सूत्रं प्रयोजनम् ।
"नलोपश्च" स्थितं सूत्रं तत्तदा च प्रयुज्यते ॥ २९५
"नलोपश्च" यदा युक्तं नकारश्च विलुप्यते ।
नकारस्य यदा लोपः रूपं राजा तदा भवेत् ॥ २९६

राजन् यदा भवेच्छब्दः सम्बुद्धिश्च परे यदा ।
हे राजन् सु यदा यत्र सूत्रं परं भवेत्तदा ॥ २९७

३५२ । न ङिसम्बुद्ध्योः । ८।२।८

राजन् यदा भवेच्छब्दः ङि सम्बुद्धिः परे यदा ।
नकारस्य न लोपस्तु पुनरिह विधीयते ॥ २९८
हे राजन् सु यदा तत्र प्रत्ययः "सु" विलुप्ति ।
हे राजन् स्यात् तदा तत्र नलोपश्च प्रसज्यते ॥ २९९
एतत् सूत्रं भवेद् योज्यं नकारो न विलुप्यति ।
हे राजन् स्यात् तदा तत्र रूपमिष्टं तदेव हि ॥ ३००

राजन् यदा भवेच्छब्दः प्रत्ययो ङि परे यदा ।
राजन् भवेत् पदं तत्र नकारो न विलुप्यति ॥ ३०१

लोके तावत् पदं राजन् नेह पुनश्च दृश्यते ।
छन्दसि केवलं तस्य सुलभं हि निदर्शनम् ॥ ३०२
"परमे व्योमन्" इत्येषा भवेच्च ऋक् निदर्शनम् ।
"सुपां सुलुक्" भवेद् योज्यं तेन ङि च विलुप्यते ॥ ३०३

पूर्व्वपक्षः

लुक्शब्देन यतो लोपः पुनरिह विधीयते ।
प्रत्ययलक्षणं कार्य्यं तस्मादिह भवेन्न च ॥ ३०४

प्रत्ययलक्षणं कार्य्यं यदा न च भवेत् पुनः ।
व्योमन् इति तदा शब्दः पदसंज्ञां भजेन्न च ॥ ३०५
सुप् यदा स्यात् परे तत्र तदा पदं भवेदिह ।
ङिरूपी सुप् परे नास्ति पदं तस्माद् भवेन्न च ॥ ३०६
व्योमन् इति यदा शब्दः पदमिह भवेन्न च ।
"नलोप"श्च स्थितं सूत्रं तदिह च न युज्यते ॥ ३०७
"नलोप"श्चेत् न युक्तं स्यात् नकारो न विलुप्यति ।
नकारश्च स्थितस्तत्र न तस्य च विलोपनम् ॥ ३०८
नकारश्चेत् स्थितस्तत्र नकारश्चेत् न युज्यते ।
"न ङि" चेति कृतं सूत्रं निरर्थकं भवेत्तदा ॥ ३०९

उत्तरपक्षः

इह यद् भवता प्रोक्तं युक्तं हि तत् प्रतीयते ।
निरर्थकं भवेत् सूत्रं सत्यं तथा भवेदिह ॥ ३१०
तथापि च पुनः सूत्रं मुनिनेह प्रयोजितम् ।
कारणं च स्थितं तत्र येन सूत्रं विधीयते ॥ ३११
"न लुमता"--विधिः यः स्यात् स न नित्यो भवेदिह ।
प्रत्ययलक्षणं कार्य्यं तस्मादिह प्रसज्यते ॥ ३१२
प्रत्ययलक्षणं कार्य्यं यदा तत्र प्रसज्यते ।
पदसंज्ञा भवेत्तत्र "व्योमन्" पदं तदा भवेत् ॥ ३१३
"व्योमन्" यदा पदं तत्र "नलोप"श्च प्रयुज्यते ।
"नलोप"श्चेद् भवेद् युक्तं नलोपश्च भवेत्तदा ॥ ३१४
नलोपस्य यदा प्राप्तिः पुनरेव भवेदिह ।
"न ङि" चेति तदा सूत्रं मुनिनेह प्रयोजियम् ॥ ३१५
नलोपश्च भवेत् प्राप्तः निषेधो हि प्रयोजितः ।
निषेधे च पुनः सूत्रं "न ङि" चात्र प्रयुज्यते ॥ ३१६
निरर्थकं न सूत्रं तत् भवेदिह कथञ्चन ।
प्रयोजनं भवेत् सूत्रं "न ङि" तस्मात् प्रयुज्यते ॥ ३१७
सूत्रं यदा प्रयुक्तं स्यात् पदं व्योमन् तदा भवेत् ।
"परमे व्योमन्" इत्येतन् दत्तं पूर्व्वं निदर्शनम् ॥ ३१८

ङौ उत्तरपदे प्रतिषेधः (वा)

समासः स्याद् यदा तत्र परं पदं यदा भवेत् ।
ङौविषये पदे पूर्वं निषेधस्य निषेधनम् ॥ ३१९
नलोपस्य निषेधस्य यदा भवेत् निषेधनम् ।
नलोपो हि वरीवर्त्ति नकारश्च विलुप्यति ॥ ३२०
चर्मणि तिला अस्येति विग्रहस्तु भवेद् यदा ।
चर्मतिलः पदं तत्र नकारश्च विलुप्यति ॥ ३२१
ब्रह्मणि निष्टा अस्येति विग्रहस्तु भवेद् यदा ।
ब्रह्मनिष्टं पदं तत्र नकारश्च विलुप्यति ॥ ३२२
राजन् यदा भवेच्च शब्दः प्रत्ययः औ परे यदा ।
राजानौ स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ ३२३
राजन् यदा भवेच्च शब्दः प्रत्ययो जस् परे यदा ।
राजानः स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ ३२४
राजन् यदा भवेच्च शब्दः अम् प्रत्ययो परे यदा ।
राजानम् स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ ३२५
राजन् यदा भवेच्च शब्दः प्रत्ययः औ परे यदा ।
राजानौ स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ ३२६
राजन् यदा भवेच्च शब्दः प्रत्ययः शस् परे यदा ।
विशेषश्च स्थितस्तत्र विशेषश्च यथा परे ॥ ३२७
राजन् यदा भवेच्च शब्दः प्रत्ययः शस् परे यदा ।
"यचि भम्" च भवेद् योज्यं भसंज्ञा च तथा भवेत् ॥ ३२८
यदा राजन् भसंज्ञं स्यात् "अल्लोप"श्च प्रवर्त्तते ।
अकारस्य भवेल्लोपः रूपं राज्नम् तदा भवेत् ॥ ३२९
राज्नम् यदा भवेत् तत्र सान्धिर्भवेत् प्रयोजनम् ।
"स्तोः श्चुना श्चुः" भवेद् योज्यं पदं राज्ञः तथा भवेत् ॥ ३३०

पूर्व्वपक्षः

अल्लोपः स्याद् यदा तत्र अकारश्च विलुप्यति ।
अलोपः स्थानिवत् तत्र "अः" स्थितवच्च च मन्यते ॥ ३३१
अः स्थानिवद् यदा तत्र जनयोश्च न संहिता ।
पदं राज्ञस्तथा तत्र न कथञ्चित् प्रजायते ॥ ३३२

उत्तरपक्षः

अल्लोपः स्थानिवत् न स्यात् स स्थानिवत् भवेन्न च ।
न च पूर्व्वत्रासिद्धीये स्थानिवत्त्वं प्रसज्यते ॥ ३३३

पूर्व्वपक्षः

शम् विद्यते बहिस्तत्र लोप इह तदाश्रितः ।
बहिरङ्गं भवेत कार्य्यं लोपकार्य्यं भवेद् यदा ॥ ३३४
राजन् शब्दे नकारो य अन्तःशब्दं स्थितो हि सः ।
अन्तरङ्गं भवेत् कार्य्यं कार्य्यं तदाश्रितं यदा ॥ ३३५
बहिरङ्गम् असिद्धं स्यात् अन्तरङ्गं भवेद् यदा ।
श्चुत्वं प्रति ततो लोपः स्यादसिद्धः इति स्थितिः ॥ ३३६
असिद्धः स्याद् यदा लोपः सन्धिकार्य्यं भवेन्न च ।
जनयोर्न भवेत् सन्धिः पदं राज्ञः न सिध्यति ॥ ३३७

उत्तरपक्षः

अन्तरङ्गबहिरङ्गभाव एव न चात्र च ।
"असिद्धम्" इति चात्र ते परिभाषा न युज्यते ॥ ३३८
"अल्लोपोऽनः" स्थितं सूत्रं षष्ठे तच्च प्रवर्त्तते ।
अकारस्य भवेल्लोपः सूत्रं यदि प्रयुज्यते ॥ ३३९
"स्तोः श्चुना श्चुः" स्थितं सूत्रम् अष्टमे तत् प्रवर्त्तते ।
श्चुत्वमिह भवेत् सन्धौ सूत्रं यदि प्रयुज्यते ॥ ३४०
अल्लोपो यो भवेत्तत्र बहिरङ्गो भवेच्च सः ।
श्चुत्वमिह भवेद् यद् तद् अन्तरङ्गं भवेत् पुनः ॥ ३४१
अल्लोपश्च स्थितः षष्ठे श्चुत्वं तदष्टमे स्थितम् ।
श्चुत्वं तावदसिद्धं स्याद् अल्लोपं प्रति तत्र च ॥ ३४२
अन्तरङ्गं भवेद् श्चुत्वं तदसिद्धं भवेद् यदा ।
अन्तरङ्गभाव एव तदा तत्र न वर्त्तते ॥ ३४३
अन्तरङ्गभाव एव यदि तत्र न विद्यते ।
अन्तरङ्गपरिभाषा कथं वा विद्यते पुनः ॥ ३४४
अन्तरङ्ग परिभाषा तस्मान्नेह प्रवर्त्तते ।
असिद्धा परिभाषा सा प्रकृते च विशेषतः ॥ ३४५

असिद्धं चेद् भवेत् श्चुत्वमसिद्धमस्तु वा तथा ।
अल्लोपो यः स्थितश्चात्र न चासिद्धो भवेच्च सः ॥ ३४६
षष्ठस्थं प्रति तावच्चेदष्टमस्थं न सिध्यति ।
अष्टमस्थं प्रति तावत् षष्ठस्थं न न सिध्यति ॥ ३४७
सिध्यत्येव च षष्ठस्थम् अष्टमस्थं प्रतीह च ।
अल्लोपः म सिध्यत्येव श्चुत्वं तथाविधं प्रति ॥ ३४८
अल्लोपश्च यदा सिध्येत् सिध्येत् श्चुत्वं तदा पुनः ।
अल्लोपे च भवेद् "राज्नः" श्चुत्वे "राज्ञः" पुनर्भवेत् ॥ ३४९
जनयोश्च भवेत् सन्धिः पदं राज्ञः भवेत् तथा ।
यदा राजन् यदा टा स्यात् पदं राज्ञा तदा भवेत् ॥ ३५०
यदा राजन् भवेच्च् शब्दः प्रत्ययो भ्याम् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ३५१
यदा राजन् भवेच्च् शब्दः प्रत्योयो ङे परे यदा ।
पदं राज्ञे भवेत्तत्र विशेषश्च न वर्त्तते ॥ ३५२

यदा राजन् भवेच्च् शब्दः प्रत्ययो भ्याम् परे यदा ।
नकारस्य भवेल्लोपः राजभ्याम् च पदं भवेत् ॥ ३५३
यदा राजन् भवेच्च् शब्दः प्रत्ययो भिस् परे यदा ।
नकारस्य भवेल्लोपः राजभिः च पदं भवेत् ॥ ३५४
यदा राजन् भवेच्च् शब्दः प्रत्ययो भ्याम् भवेद् यदा ।
नकारस्य भवेल्लोपः राजभ्यश्च पदं भवेत् ॥ ३५५

पूर्व्वपक्षः

यदा राजन् यदा भ्याम स्यात् नलोपश्चेत् भवेत्तदा ।
"सुपि" चेति भवेद् दीर्घो राजभ्याम न पदं भवेत् ॥ ३५६
यदा राजन् यदा भिस् स्यात् नलोपश्चेत् भवेत्तदा ।
"अत" श्चेति भवेद् ऐस् च राजभिः न पदं भवेत् ॥ ३५७
यदा राजन् यदा भ्याम् स्यात् नलोपश्चेत् भवेत्तदा ।
"वहु" चेति भवेद् एत्वं राजभ्यः न पदं भवेत् ॥ ३५८
आदौ तत्र भवेद् दीर्घः पश्चात् ऐम् च प्रवर्त्तते ।
ततः परं भवेद् एत्वं दर्शितं च यथा मया ॥ ३५९

उत्तरपक्षः

लोप इह नकारस्य स्यादसिद्ध इति स्थितिः ।
न तथाच भवेद् दीर्घं ऐस् ए चापि भवेन्न च ॥ ३६०

पूर्व्वपक्षः

"राजाश्व" स्यात् यदा तत्र "दण्डयत्र" स्याद् यदा पुनः ।
पूर्व्वत्रासिद्धमित्येतत् तदापि च प्रयुज्यते ॥ ३६१
नलोपश्चेत् असिद्धः स्यात् तत्र तत्र मते तव ।
सवर्णदीर्घता न स्यात् नापि स्याच्च यणादिकम् ॥ ३६२
राजाश्व स्याद् यदा तत्र भवेदेव हि दीर्घता ।
दण्डयत्र स्याद् यदा तत्र भवेदेव तदा च यण् ॥ ३६३
असिद्धेऽपि नलोपे चेत् तत्र कार्य्यं तथा भवेत् ।
सिद्धेऽपि च नलोपे स्यादिह कार्य्यं तथैव च ॥ ३६४
तत्र यदि भवेत् कार्य्यमत्र कार्य्यं कथं हि न ।
असिद्धता नकारस्य तत्र चात्र समा खलु ॥ ३६५

उत्तरपक्षः

राजाश्व स्याद् यदा तत्र दीर्घः कार्य्यो यदा पुनः ।
असिद्धं न तदा ए स्यात् नकारस्य विलोपनम् ॥ ३६६
दण्डयत्र स्याद् यदा तत्र यण्--आदेशो भवेद् यदा ।
असिद्धं न तदा च स्यात् नकारस्य विलोपनम् ॥ ३६७
अन्यत्र स्यादसिद्धं च नकारस्य विलोपनम् ।
असिद्धं स्यात् कदा कुत्र तदुच्यते परं पुनः ॥ ३६८

३५३ । **नलोपः सुप्-स्वर-संज्ञा तुग्विधिषु कृति । ८।२।२**

सुप्विधिश्चेत् भवेत्तत्र स्वरविधिर्भवेद् यदि ।
संज्ञाविधिर्भवेद् वा चेत् तुग्विधिश्चेत् भवेत् कृति ॥ ३६९
असिद्धं स्यात् तदा तत्र नकारस्य विलोपनम् ।
एषु तावन्नलोपश्च स्यादसिद्ध इति स्थितिः ॥ ३७०
यदा भ्याम् स्यात् यदा भिस् स्यात् यदा भ्यस् च भवेत् पुनः ।
सुप्विधिः स्यात् तदा तत्र न तत्र संशयः स्थितः ॥ ३७१
एषु लोपो नकारस्य स्यादसिद्धस्ततः पुनः ।
स्थित इव नकारः स्यात् स्थित इव स मन्यते ॥ ३७२

नकारः स्याद् यदा तत्र "सुपि" चेति न युज्यते ।
न च तस्माद् भवेद् दीर्घो राजभ्यां च पदं भवेत् ॥ ३७३
नकारः स्याद् यदा तत्र "अत"श्चेति न युज्यते ।
न तस्माद् ऐस् भवेत्तत्र राजभ्यश्च पदं भवेत् ॥ ३७४
नकारः स्याद् यदा तत्र "बहु"—चेति न युज्यते ।
न तस्माद् च भवेत्तत्र राजभ्यश्च पदं भवेत् ॥ ३७५
न दीर्घः स्यात् न तावद् ऐस् न तावद् एस् भवेदिह ।
राजभ्यां स्यात् राजभिः स्यात् राजभ्यं स्यात् पदं पुनः ॥ ३७६

राज्ञः भवेत् पदं तत्र राज्ञोः भवेत् तथा पदम् ।
राज्ञां भवेत् पदं तत्र विशेषश्च न वर्त्तते ॥ ३७७

यदा राजन् यदा ङि स्यात् राज्ञि पदं तदा भवेत् ।
"विभाषे"ति यदा तत्र पदं भवेत् च राजनि ॥ ३७८

प्रतिदिवन्

प्रतिदिव् स्यात् यदा धातुः प्रत्ययः स्यात् कनिन् यदा ।
प्रतिदिवन् तदा च स्यात् स इह प्रकृतिर्भवेत् ॥ ३७९
प्रतिदिवन् यदा शब्दः प्रत्ययः सु परे यदा ।
प्रतिदिवा तदा तत्र विशेषस्तु न वर्त्तते ॥ ३८०
प्रतिदिवन् यदा शब्दः प्रत्ययः औ परे यदा ।
भवेत् प्रतिदिवानौ च विशेषस्तु न वर्त्तते ॥ ३८१
प्रतिदिवन् यदा शब्दः प्रत्ययो जश् परे यदा ।
भवेत् प्रतिदिवानश्च विशेषस्तु न वर्त्तते ३८२
भवेत् प्रतिदिवानम् च यदा स्याद् अम् परे पुनः ।
भवेत् प्रतिदिवानौ च यदा स्याद औ पुनः परे ॥ ३८३
प्रतिदिवन् यदा शब्दः प्रत्ययः शस् परे यदा ।
"अल्लोपोऽनः" भवेद् योज्यं अल्लोपश्च तथा भवेत् ॥ ३८४
अकारस्य यदा तत्र तथा लोपो विधीयते ।
तदा स्यात् "प्रतिदिवन् अ" ततः सूत्रं परं पुनः ॥ ३८५

३५४। हलि च। ८।२।७७

रेफान्तश्चेद् भवेद् धातुर्वान्तो धातुर्भवेद् यदि।
उपधाया इको दीर्घस्तदा स्याच्च परे हलि॥ ३८६

इह स्यात् "प्रतिदिव्‌न् अ" यथापूर्व्वं प्रदर्शितम्।
इको यदा भवेद् दीर्घः प्रतिदीव्नः पदं भवेत्॥ ३८७

पूर्व्वपक्षः

"अचः"श्चेति स्थितं सूत्रं तदिह च प्रवर्त्तते।
अल्लोपः स्थानिवत्तत्र अकारश्च स्थितो भवेत्॥ ३८८
अकारश्चेत् स्थितस्तत्र व्यवधानं प्रजायते।
व्यवधानं यदा तत्र हल्‌परत्वं भवेन्न च॥ ३८९

उत्तरपक्षः

दीर्घविधिर्यदा तत्र स्थानिवत्त्वं तदा च न।
दीर्घविधिर्भवेच्चायस्थानिवत्त्वं न सिध्यति॥ ३९०

पूर्व्वपक्षः

बहिरङ्गं भवेत् कार्य्यं मल्लोपः क्रियते यदा।
अन्तरङ्गं भवेत् कार्य्यं दीर्घो यदा विधीयते॥ ३९१
बहिरङ्गमसिद्धं स्याद अन्तरङ्गं प्रतीह च।
तस्मादिह पुनर्दीर्घः कथमपि न सिध्यति॥ ३९२

उत्तरपक्षः

बहिरङ्गपरिभाषा नेह पुनः प्रवर्त्तते।
कारणन्तु पुनस्तत्र पूर्व्वं मया प्रदर्शितम॥ ३९३

प्रतिदीव्नो भवेत्तत्र विशेषस्तु न वर्त्तते।
राज्ञ इ भवेद् रूपं भ्यामादौ च परे हशि॥ ३९४

यज्वन्

यज्वन् यदा यदा सु स्यात् तदा यज्वा पदं भवेत्।
यज्वन् यदा यदा स्याद् औ यज्वानौ च भवेत् पदम॥ ३९५
यज्वन् यदा यदा शस् स्यात् यज्वानश्च पदं भवेत्।
यज्वन् यदा यदा स्यादम् यज्वानम् च पदं तदा॥ ३९६

यज्वन् यदा यदा स्याद् औट् यज्वानौ च पदं भवेत् ।
यदा यज्वन् यदा स्याद् शस् सूत्रं परं भवेत्तदा ॥ ३९७

३५५ । न संयोगाद् वमन्तात् । ६।४।१३७

वन्नन्तः स्याद् यदा शब्दः मन्नन्तः स्याद् यदा पुनः ।
वकारश्च मकारश्च संयोगे चेत् पुनर्भवेत् ॥ ३९८
अनि भवेदकारो यो न तस्य स्याद् विलोपनम् ।
शसादौ च भसंज्ञायां सूत्रमिदं प्रयुज्यते ॥ ३९९

अकारस्य न लोपः स्यात् यज्वनः स्यात् पदं शसि ।
यज्वना स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ ४००
यज्वभ्याम् स्यात् पदं तत्र विशेषो न स्थितः पुनः ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ४०१

ब्रह्मन्

ब्रह्मन् यदा भवेच् शब्दः प्रत्ययः शस् परे यदा ।
ब्रह्मनः स्यात् पदं तत्र गतिस्तत्र समा भवेत् ॥ ४०२
ब्राह्मना स्यात् पदं तत्र ब्रह्मभ्याम् च भवेत् पदम् ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ४०३

वृत्रहन्

वृत्रहन् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं भवेत्तदा ॥ ४०४

३५६ । इन्-हन्-पूषार्य्यम्णां शौ । ६।४।१२

इन यदा च भवेदन्ते हन्नन्ते च भवेद् यदा ।
पूषन् यदा भवेत्तत्र स्यादर्य्यमन् यदा पुनः ॥ ४०५
उपधायाभवेद् दीर्घः केवलं शौ परे खलु ।
अन्यत्र शेः न तेषां च भवेद् दीर्घ इति स्थितिः ॥ ४०६

शेरन्यत्र निषेधः स्यात् सौ निषेधो भवेत्ततः ।
एवं तत्र निषेधे च सूत्रं परं प्रसज्यते ॥ ४०७

३५७ । सौ च । ६।४।१३

सु यदि स्यात् परे तत्र सम्बुद्धिर्नभवेद् यदि ।
इन्नादीनामुपधाया भवेद् दीर्घ इति स्थितिः ॥ ४०८

वृत्रहन् स्याद् यदा शब्दो हनस्तश्च भवेत्तदा ।
प्रत्ययः सु परे तत्र दीर्घस्ततो भवेदिह ॥ ४१०
दीर्घो यदा भवेत्तत्र वृत्रहान् स्यात् पदं तदा ।
नकारस्य भवेल्लोपः वृत्रहा च पदं भवेत् ॥ ४११

वृत्रहन् सु यदा तत्र सम्बुद्धिश्च पुनर्यदा ।
न च तदा भवेद् दीर्घः हे वृत्रहन् तदा भवेत् ॥ ४१२
वृत्रहन् स्याद् यदा शब्दः प्रत्यय औ परे यदा ।
वृत्रहणो पदं तत्र "एकाजि"ति णकारता ॥ ४१३
वृत्रहन् शस् यदा तत्र वृत्रहणः तदा भवेत् ।
वृत्रहणम वृत्रहणौ अम् औट् यदा भवेत् परे ॥ ४१४

वृत्रहन् स्याद् यदा शब्दः प्रत्ययः शस् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ४१५

३५८ । हो हन्ते र्ञ्णिन्नेषु । ७।३।५४

ञित् यदि स्यात् परे तत्र णित् यदि च परे भवेत् ।
नकारश्च पुनस्तत्र यदि परे प्रवर्त्तते ॥ ४१६
हन्तेर्यश्च हकारः स्यात् कुत्वं तस्य प्रजायते ।
शसादौ च भसंज्ञायां सूत्रमिदं प्रयुज्यते ॥ ४१७

वृत्रहन् स्याद् यदा शब्दः नकारश्च परे भवेत् ।
हकारस्य घकारः स्यात् वृत्रघ्नः स्यात् पदं तदा ॥ ४१८

पूर्व्वपक्षः

इह णत्वं कथं न स्याद् इति तावद् न बुध्यते ।
सर्व्वथा च पुनर्णत्वमिह प्राप्तं भवेत् खलु ॥ ४१९
एकाजिति स्थितं सूत्रं तदिह च प्रयुज्यते ।
तेन णत्वं भवेदत्र न तत्र संशयः स्थितः ॥ ४२०
अलोपश्चेत् भवेत्तत्र स स्थानिवत् पुनर्भवेत् ।
स्थानिवत्त्वादकारस्य पदमेकाज् भवेत् पुनः ॥ ४२१
नापि चेत् स्थानिवत् स स्यात् स्यात् "प्रातिपदिके"ति च ।
"कुमति" च स्थितं सूत्रं तदपि वा प्रसज्यते ॥ ४२२

सर्व्वथा च नकारस्य तस्य प्राप्तिर्भवेदिह ।
एतेन वा भवेण्णत्वं तेन णत्वं भवेन्न वा ॥ ४२३

उत्तरपक्षः

णत्वमिह न तावत् स्यात् णत्वमिह न लभ्यते ।
अत् पूर्व्वस्य भवेद् हन्ते र्णत्वमिह च केवलम् ॥ ४२४
वृत्रघ्नः स्याद् यदा तत्र अत्पूर्व्वं न भवेत्तदा ।
न हि तस्माद् भवेद् णत्वं विना णत्वं पदं भवेत् ॥ ४२५

कदा कुत्र कथं णत्वं हन्तेरिह प्रजायते ।
तद्विषये स्थितं सूत्रं दीयते तत् परे मया ॥ ४२६

३५९ । (क) हन्तेः—८।४।२२

उपसर्गं निमित्तं चेत् हन्तेर्नस्य नकारता ।
प्रहण्यात् च पदं तत्र तथा णत्वे निदर्शनम् ॥ ४२७

३५९ । (ख) अत्पूर्व्वस्य—८।४।२२

केवलमत्पूर्व्वस्यैव हन्तेर्नस्य णकारता ।
नान्यथा च भवेत् णत्वं प्रघ्नन्तीति न तावत् णः ॥ ४२८

पूर्व्वपक्षः

"इह योगविभागेन सूत्रद्वयं प्रदर्शितम् ।
"हन्तो"रिति भवेदेवम् "अत्पूर्व्वस्य" परं भवेत् ॥ ४२९
परिभाषा स्थिता शास्त्रे सा प्रयोज्या भवेदिह ।
परिभाषा भवेदत्र यथा परे प्रदर्शिता ॥ ४३०

प्रतिषेधो वा (प)

विधिर्व्वापि भवेच्चायं प्रतिषेधोऽथवा भवेत् ।
भवेदनन्तरस्यैव न भवेदन्तरस्य च ॥ ४३१
अव्यवहितपूर्व्वं यत् तदेव विषयो भवेत् ।
अव्यवहितपरं यत् विषयः स्यात् तदेव च ॥ ४३२
पूर्व्वे वा स्यात् परे वा स्यात् व्यवधाने स्थितं हि यत् ।
न तद् भवेत् समाकृष्टं न विषयो भवेद्धि तत् ॥ ४३३
योगस्येह विभागश्च यदा भवेत् प्रदर्शितः ।
"हन्ते"रिति भवेत् पूर्व्वे "अत् पूर्व्वस्य" परे भवेत् ॥ ४३४

"अत् पूर्व्वस्य" परे स्याच्च तेन प्राप्तं भवेच्च यत्।
"हन्ते"रिति भवेत् पूर्व्वं तत्रैव तत् प्रसज्यते॥ ४३५
"अत् पूर्व्वस्य" परे च स्यात् तत्र यो नियमः कृतः।
"हन्ते"रित्यव्यवहिते च पूर्व्वे स नियमो भवेत्॥ ४३६
हन्तेरिति क्विबन्ते हि केवलं नियमो भवेत्।
अन्यत्र च क्विबन्तादौ स नियमो न युज्यते॥ ४३७
प्रघ्नन्तीति पदं यत् स्यात् तत्र णत्वं नियम्यते।
न च वृत्रहणादौ स्यात् क्विबन्ते नियमः पुनः॥ ४३८
योगस्य चेद् विभागः स्याद् एतद्धि लभ्यते फलम्।
केवलं च क्विबन्तस्य हन्ते णत्वं निवर्त्तते॥ ४३९

उत्तरपक्षः

हन्ते हि केवलं णत्वम् इह भवेन् निराकृतम्।
इहे योगविभास्य तदेव केवलं फलम्॥ ४४०
इति यद् भवता प्रोक्तं न हि तत् सङ्गतं भवेत्।
नापि योगविभागश्चेत् फलं हि स्यात् तदेव च॥ ४४१
एकमेव यदा सूत्रं तदापि तत् फलं भवेत्।
विनापि च विभागेन लभ्यते तत् फलं खलु॥ ४४२
इह "हन्तेरत्पूर्व्वस्य" सूत्रमेकं भवेद् यदि।
तदापि च क्विबन्तस्य हन्तेर्णत्वं निरस्यते॥ ४४३

इह योगविभागस्य स्थितमन्यत् प्रयोजनम्।
अन्यत्रापि क्विबन्तादौ णत्वं तेन निरस्यते॥ ४४४
"एकाजि"ति स्थितं सूत्रं तेन णत्वं भवेच्च यत्।
निराकृतं तदपि स्यात् योगो यदि विभज्यते॥ ४४५
वृत्रघ्नः स्यात् पदं तत्र सूत्र"मेकाच्" प्रयुज्यते।
तेन तत्र भवेत् णत्वम् "अत्"--इति च निरस्यते॥ ४४६
"कुमति च" स्थितं सूत्रं तेन णत्वं भवेच्च यत्।
निराकृतं तदपि स्यात् योगो यदि विभज्यते॥ ४४७
वृत्रघ्नः स्यात् पदं तत्र "कुमति च" प्रयुज्यते।
तेन तत्र भवेद् णत्वम् "अत्" -इति च निरस्यते॥ ४४८

"अत् पूर्व्वस्य" तिङन्तस्य "हन्ते"र्णत्वं निवर्त्तताम् ।
इति योगविभागस्य न हि तावत् प्रयोजनम् ॥ ४४९
अन्यत्रापि क्विबन्तादौ हन्तेर्णत्वं निवर्त्तताम् ।
इति योगविभागस्य भवेत् खलु प्रयोजनम् ॥ ४५०
इह योगविभागेन णत्वमात्रं नियम्यते ।
नियमा णत्वमात्रे स्याद् इति योगो विभज्यते ॥ ४५१
"एकाजि"ति स्थितं सूत्रं व्यवधाने स्थितं च तत् ।
तेन यच्च भवेत् णत्वं तदपि च निरस्यते ॥ ४५२
"कुमति च" स्थितं सूत्रं व्यवधाने स्थितं हि तत् ।
तेन यच्च भवेत् णत्वं तदपि च नियम्यते ॥ ४५३
या स्याद् "अनन्तरस्ये"ति न सा तावत् प्रयुज्यते ।
सा च पुनः परिभाषा वारिता हि भवेदिह ॥ ४५४
इह योगविभागेन यत् "यत्—" इति च लभ्यते ।
"एकाजि"ति भवेच्च यत् तत् तेन च नियम्यते ॥ ४५५
वाधित्वा परिभाषां ताम् "अद्रि"ति च प्रवर्त्तते ।
एकाजित्यनेन प्राप्तं णत्वं तेन निवर्त्तते ॥ ४५६

पूर्व्वपक्षः

वृत्रहन् स्याद् यदा शब्दः प्रत्ययः शस् परे यदा ।
वृत्रघ्नः स्यात् तदा शब्दः दर्शितं भवता तथा ॥ ४५७
"हो हन्ते"श्च स्थितं सूत्रं तद् भवता प्रयोजितम् ।
हकारस्य घकारश्च तथा खलु विधीयते ॥ ४५८
अत्र तावत् भवेत् प्रश्नः कथं वा स्यात् घकारता ।
नकारश्चेत् परे तत्र घकारः स्यात् तदैव च ॥ ४५९
प्रकृति तु नकारो न परे तत्र स्थितः खलु ।
अकारः स्थानिवत् तत्र अकारो हि परे स्थितः ॥ ४६०
अकारः स्थानिवत् तत्र अकारो न परे भवेत् ।
"हो हन्ते" नं भवेद् योज्यं न च भवेद् घकारता ॥ ४६१
घकारे च पदं तत्र वृत्रघ्न इति दर्शितम् ।
परं तत्र घकारवत् वृत्रघ्नः हि न सिध्यति ॥ ४६२

उत्तरपक्षः

अकारस्य लोपो यः स्यात् स स्थानिवत् कदापि न ।
स्थानिवत् चेत् हकारस्य न-परता न सिध्यति ॥ ४६३

नकारश्च परे तत्र सर्व्वदैव हि तिष्ठति ।
एतच्च मनसि कृत्वा मुनिना "कु" विधीयते ॥ ४६४

विधानं च तथाभूतं मुनिनेह प्रयोजितम् ।
विधानस्य हि सामर्थ्यात् अल्लोपः स्थानिवत् न हि ॥ ४६५

अकारो न परे तस्मात् नकारो हि परे भवेत् ।
"हो हन्ते"श्च भवेत् योज्यं "वृत्रघ्न"श्च भवेत् पदम् ॥ ८६६

पूर्व्वपक्षः

वृत्रघ्नः स्यात् यदा तत्र णत्वं भवेद् विभाषया ।
माधवेन विकल्पेन णत्वमिह प्रदर्शितम् ॥ ४६७

उत्तरपक्षः

सूत्रं "प्रातिपादिकान्त—" माधवेन प्रयोजितम् ।
तेन णत्वं विभाषा स्याद् इति तेन प्रदर्शितम् ॥ ४६८

परन्तु न भवेत् णत्वं णत्वमिह न सिध्यति ।
णत्वं यदि भवेत्तत्र विरोधो हि भवेत्तदा ॥ ४६९

भाष्येण च विरोधः स्यात् णत्वमिह भवेद् यदि ।
वार्त्तिकेन विरोधः स्यात् णत्वं यदि विधीयते ॥ ४७०

"अट्कुप्वाङ्नुम् व्यवायेऽपि" सूत्रं तत्र प्रवर्त्तते ।
तस्मिन् सूत्रे स्थितं तत्र वार्त्तिकं च यथायथम् ॥ ४७१

वा व्यवाये ह्रादेशेषु प्रतिषेधः (वा)

प्रयोजनं वृत्रघ्नः स्रुघ्नः प्रावानीति (वा)

वार्त्तिकस्य मतं चेतत् भाष्येऽपि च समर्थितम् ।
इह यत् वार्त्तिके प्रोक्तं भाष्ये प्रोक्तं तदेव च ॥ ४७२

भाष्येण च विरोधः स्यात् णत्वं यदि विधीयते ।
वार्तिकेन विरोधः स्यात् णत्वं विधीयते यदि ॥ ४७३

भाष्येणेह विरोधाच्च विरोधाद् वार्तिकेन च ।
माधवस्य मतं यत् तत् न गृह्यते विचक्षणैः ॥ ४७४

इह णत्वं ततो नास्ति णत्वमिह न सिध्यति ।

विना शात्वं पदं तत्र वृत्रघ्नश्च भवेत् शसि ॥ ४७५
यदा शार्ङ्गिन् भवेच् शब्दः यशस्विन् च भवेद् यदा ।
अर्य्यमन् स्याद् यदा शब्दः पूषण् शब्दो यदा भवेत् ॥ ४७६
वृत्रहन्वत् तदा रूपं भवेत्तेषामिति स्थितिः ।
रूपे तेषां विशेषश्च न कुत्रचित् प्रवर्त्तते ॥ ४७७

पूर्व्वपक्षः

वृत्रहन् स्याद् यथा तत्र यशस्विन् स्यात् तथैव च ।
इति यद् भवता प्रोक्तं न सङ्गतं भवेच्च तत् ॥ ४७८
यशस्विन् स्याद् यदा शब्दः प्रत्ययस्तु भवेद् विनिः ।
इन् तत्र तु स्थितश्चापि निरर्थको न गृह्यते ॥ ४७९
इन् यदा न भवेद् ग्राह्य "इन् हन्" इक न युज्यते ।
वृत्रहन् वा ततो रूपं नेह तावत् प्रवर्त्तते ॥ ४८०

उत्तरपक्षः

वृत्रहन्वद् भवेद् रूपम् "इन्हन्नि"ति प्रयुज्यते ।
परिभाषा स्थिता तत्र तथा सिद्धिर्भवेदिह ॥ ४८१

अन्-इन्-अन्-मस् ग्रहणानि अर्नवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति (वा)

अन् इन् यदि भवेत्तत्र अस् मस् यदि भवेत् पुनः ।
स्यात् तदन्तविधिस्तत्र सार्थको वा निरर्थकः ॥ ४८२
अर्य्वमन् स्यात् यदा शब्दः प्रत्ययो ङि भवेद् यदा ।
अर्य्यम्नि स्यात् अर्य्यमनि "विभाषे"ति पदद्वयम् ॥ ४८३
पूषण् यदा भवेच् शब्दः प्रत्ययो ङि परे यदा ।
पूष्णि स्यात् पूषणि स्याच्च "विभाषे"ति पदद्वयम् ॥ ४८४

मघवन्

मघवन् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ४८५
मघवन् स्याद् यदा शब्दः अन्तादेशो भवेच्च तृ ।
विभाषा च विधिर्योज्यः ऋकार इद् भवेदिह ॥ ४८६

तकारः स्याद् यदा तत्र मघव/त्/स् च तदा भवेत् ।
पुनः सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ४८७

सर्व्वनामस्थानं तत्र परे यदि प्रवर्त्तते ।
उगिताम् नुम् अञ्चतेर्नुम् धातुर्यदि तथा तु न ॥ ४८८

नुडागमो भवेत्तत्र मघवान्तास् च तदा स्थितम् ।
"हल्ङ्याब्भ्यश्च" तदा तत्र सुलोपश्च भवेत्तथा ॥ ४८९
सुलोपः स्याद् यदा तत्र मघवन्त् च तदा भवेत् ।
"संयोगान्त—" ततः योज्यं तकारश्च विलुप्यति ॥ ४९०
तकारः स्याद् यदा लुप्तः मघवन् स्यात् तदा पुन ।
"सर्व्वे"ति च ततो योज्यं दीर्घं स्यात् मघवान् पदम् ॥ ४९१

पूर्व्वपक्षः

"संयोगान्त"—स्थितं सूत्रं तदिह च प्रयुज्यते ।
तकारस्य तथा लोपः पुनरिह विधीयते ॥ ४९२
"सर्व्वेति" च स्थितं सूत्रं पश्चात् तच्च प्रयुज्यते ।
प्रयोगेन पुनस्तस्य दीर्घं इह विधीयते ॥ ४९३
"संयोगान्त" स्थितं यत् तत् त्रिपाद्यां च स्थितं खलु ।
"सर्व्वे"ति यत् स्थितं तत्र षष्ठाध्याये स्थितं हि तत् ॥ ४९४
"पूर्व्वत्रासिद्धमित्येतत् शास्त्रमिह प्रवर्त्तते ।
अष्टमस्थमसिद्धं स्यात् षष्ठस्थं प्रति चात्र च ॥ ४९५
तकारश्चेत् असिद्धः स्यात् स्थित एव स मन्यते ।
तकारः स्याद् यदा तत्र शब्दो नान्तो भवेन्न च ॥ ४९६
शब्दो नान्तो यदा न स्यात् "सर्व्वे"ति च न युज्यते ।
न हि तत्र भवेद् दीर्घः मघवान् न पदं भवेत् ॥ ४९७

उत्तरपक्षः

"बहुलं" च पदं सूत्रे मुनिनेह प्रयोजितम् ।
सर्व्वत्र न भवेद् भाति स्यादन्यथा क्वचित् क्वचित् ॥ ४९८
संयुक्तस्य तकारस्य नासिद्धं हि विलोपनम् ।
विलोपनं भवेत् सिद्धं दीर्घस्तस्माद् भवेदिह ॥ ४९९
दीर्घो यदा भवेत्तत्र मघवान् हि भवेत् पदम् ।
बहुलग्रहणात् तत्र सर्व्वं सिद्धं च मन्यते ॥ ५००

पूर्व्वपक्षः

तलोपश्च भवेत् सिद्धो बहुलग्रहणादिह ।
इति पक्षे प्रमाणन्तु न किञ्चिदिह दृश्यते ॥ ५०१
मघवन् इति ह्रस्वेन पदमिह वरं कुरु ।
अस्तु वा छान्दसो दीर्घो मघवान् इति छन्दसि ॥ ५०२

उत्तरपक्षः

सिद्ध एव तलोपः स्याद् बहुलग्रहणादिह ।
इति न कल्पनामात्रं प्रमाणमिह च स्थितम् ॥ ५०३
"केशा"दिति स्थितं सूत्रं भाष्यं तस्य स्थितं खलु ।
तद्व्याख्यायां प्रदीपे तु मतं चैतत् समर्थितम् ॥ ५०४
"मघवानमीमहे" च तत्र हि वचनं स्थितम् ।
तद्व्याख्यायां प्रदीपस्य मतमिह भवेद् यथा ॥ ५०५

प्रदीपमतम्

"मघवा बहुलं" चेति मुनिनेह च सूत्रितम् ।
शब्दद्वयं पुनस्तेन भवेत् सिद्धमिति स्थितिः ॥ ५०६
समादेशो यदा "तृ" स्यात् "मघवत्" च तदा भवेत् ।
अन्यथा मघवन् शब्दः स्थित एव हि पूर्व्वतः ॥ ५०७
मघवत् स्याद् यथा तत्र मघवन् स्याद् यथा पुनः ।
शब्दद्वयं यथा सिध्येत् तथा सूत्रं च सूत्रितम् ॥ ५०८
सूत्रस्य च पुनस्तस्य नास्ति किञ्चित् प्रयोजनम् ।
विनापि तत् पुनः सूत्रं शब्दद्वयं प्रसिध्यति ॥ ५०९
"श्वनुक्षन्"—च स्थितं सूत्रं मघवन् स्यान्निपातनात् ।
"मघ"-शब्दात् मतुप् च स्यात् मघवत् स्यात् तथा पुनः ॥ ५१०
मघवत् स्यात् तथा तत्र मघवन् च पुनर्भवेत् ।
विनापि तत् पुनः सूत्रं शब्दद्वयं भवेदिह ॥ ५११

"मघवा बहुलं"चेति यदा ग्राह्यं भवेदिह ।
आदेशो मघवत्-शब्दस्तदा ग्राह्यो भवेत् पुनः ॥ ५१२
प्रक्रियायां तलोपश्च पुनस्तत्र प्रसज्यते ।
सिद्धता च तलोपस्य पुनर्भवेत् प्रयोजनम् ॥ ५१३

तलोपः स्याद् यदा सिद्धो दीर्घस्तदा विधीयते।
मघवान् च पदं दीर्घे तथा खलु प्रसिध्यति ।। ५१४
सिद्धतायां तलोपस्य हेतुरन्विष्यते तदा ।
"बहुलं" च भवेद् हेतुस्तेन चात्र गतिर्भवेत् ॥ ५१५
तलोपः स्याद् यदा सिद्धो दीर्घस्तदा विधीयते ।
मघवान् च पदं दीर्घे तथा खलु प्रसिध्यति ॥ ५१६
न च पृथक् स्थितः पन्थाः न गतिरन्यथा स्थिता ।
इष्टसिद्धौ "बहुलं" तु गतिरेका भवेदिह ॥ ५१७
"बहुलं" तु समादाय सिद्धता दर्शिता तथा ।
कल्पनागौरवं तत्र न तत्र च सतां रुचिः ॥ ५१८
"मघवा बहुलं" चेति नापि सूत्रं यदा भवेत् ।
मघवान् च पदं दीर्घं प्रसिध्यति तदापि च ॥ ५१९
कल्पनालाघवं तत्र पुनरपि च लभ्यते ।
पक्षे चास्मिन् प्रक्रिया स्यात् यथा परे प्रदर्शिता ॥ ५२०

"श्वनुक्षन्" च स्थितं तत्र मघवन् च तथा भवेत् ।
"पर्व्वे"ति च भवेद् योज्यं दीर्घे स्यात् मघवान् पदम् ॥ ५२१
मतुप् यदा भवेत् तत्र मघवत् च भवेत् तदा ।
"अत्वस्" इति भवेद् योज्यं दीर्घं स्यात् मघवान् पदम् ॥ ५२२

"मघचे"ति यदा न स्यात् शब्दद्वयं तदापि च।
"मघचे"ति यदा न स्यात् मघवान् स्यात् तदापि च ॥ ५२३
"मघचे"ति च सूत्रस्य नास्ति किञ्चित् प्रयोजनम् ।
"मघचे"ति वरं त्याज्यं त्यक्तुं शक्यं भवेदिदम् ॥ ५२४

इति प्रदीपमतम्

प्रदीपस्य मतं चैतत् तद् ग्राह्यं च भवेदिह ।
सिद्धता च तलोपस्य तत्र पुनः समर्थिता ॥ ५२५
प्रक्रियायां तलोपस्य सिद्धता दर्शिता मया ।
निर्म्मूलं न भवेच्चैतत् आकरो हि स्थितो मम ॥ ५२६

सिद्ध एव तलोपः स्याद् दीर्घोऽपि च तथा भवेत् ।
मघवान् स्यात् पदं दीर्घे पदमिष्टं तदेव हि ॥ ५२७

मघवान् इति दीर्घे हि पदं सर्वैः प्रदर्शितम् ।
मघवन् इति ह्रस्वे च न क्वापि दृश्यते पदम् ॥ ५२८

मघवन्तौ पदं च स्यात् मघवन्तः पदं भवेत् ।
हे मघवन् पदं च स्यात् प्रथमायां तथा तथा ॥ ५२९

मघवन्तम् भवेत्तत्र मघवन्तौ तथा भवेत् ।
मघवतः भवेत्तत्र द्वितीयायां तथा तथा ॥ ५३०

मघवता पदं च स्यात् मघवद्भ्याम् पदं भवेत् ।
बुधैरूह्यं पदं शेषं नेह पुनः प्रदीयते ॥ ५३१

न यदा तु समादेशो मघवन् च भवेद् यदा ।
मघवा स्यात् पदं तत्र प्रथमायां हि सौ परे ॥ ५३२

छन्दसीवनिपौ (५)

छन्दसि मत्वर्थे च प्रत्यय ई वनिप् तथा ।
वनिपा मघवन् स्याच्चेत् मध्योदात्तो भवेद् हि सः ॥ ५३३

लौकिके तु पुनस्तत्र विशेषो वर्त्तते खलु ।
लौके यदा प्रयोगः स्यात् अन्तोदात्तो भवेत्तदा ॥ ५३४

मघवानौ पदं च स्यात् मघवानः पदं भवेत् ।
मघवानम् पदं च स्यात् मघवानौ भवेत्तथा ॥ ५३५

मघवन् स्याद् यदा शब्दः प्रत्यय शस् भवेद् यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तने ॥ ५३६

३६२ । श्व-युव-मघोनामतद्धिते । ६।४।१३३

अन्नन्तास्ते यदा तत्र भसंज्ञा च यदा पुनः ।
प्रसारणं भवेत्तेषां तद्धिते न तथा भवेन ॥ ५३७

प्रसारणं यदा तत्र मघ उन् शस् तथा भवेत् ।
यदा सन्धिर्भवेत्तत्र मघोनः स्यात् पदं तदा ॥ ५३८

अन्नन्तश्चेत् तदैव स्यात् अन्यत्र न तथा भवेत् ।
आदेशो मघवत् चेत् स्यात् न तत्र स्यात् तथा पुनः ॥ ५३९

मघवतः पदं तत्र तदा भवेदिति स्थितिः ।
मघवता पदं तत्र तथैव च भवेत् पुनः ॥ ५४०

मघवत् स्याद् यदा शब्दः प्रत्ययो ङीप् भवेद् यदा ।
मघवती तदा तत्र प्रसाधरणं न हि स्थितम् ॥ ५४१

मघवन् स्याद् यदा शब्दः पते वेद् अण् च तद्धितः ।
माघवनम् भवेत्तत्र प्रसारणं न हि स्थितम् ॥ ५४२

मघवन् स्याद् यदा शब्दः प्रत्ययः टा परे यदा ।
मघोना स्यात् तदा तत्र भवेत् खलु प्रसारणम् ॥ ५४३
मघवभ्याम् पदं तत्र भ्याम् यदि च परे भवेत् ।
परं पदं बुधैरूह्यं नेह मया प्रदीयते ॥ ५४४

श्वन्

श्वन् इह च स्थितः शब्दः राजवच्च पदं भवेत् ।
श्वा श्वानौ च श्वानस्तत्र श्वानं श्वानौ भवेत्तथा ॥ ५४५
श्वन् यदा च भवेच् शब्दः प्रत्ययः शस् परे यदा ।
प्रसारणे भवेत् "शु अस्" पूर्व्वरूपे भवेत् शुनः ॥ ५४६
शुना भवेत् पदं तत्र श्वभ्याम् भवेत् पुनः पदम् ।
शुने शुनः शुनोः शुनाम् श्वसु भवेत् पदं तथा ॥ ५४७

युवन्

युवन् इह स्थितः शब्दः राजवच्च पदं भवेत् ।
युवा भवेत् युवाणौ च युवानः च भवेत् पदम् ॥ ५४८
युवानम् स्यात् पदं तत्र युवानौ च पदं भवेत् ।
राजवच्छ पदं तत्र सुपि पदं प्रदर्शितम् ॥ ५४९

युवन् यदा भवेच् शब्दः प्रत्ययः शस् परे यदा ।
"श्वयुवन्" च भवेद् योज्यं प्रसारणं तथा भवेत् ॥ ५५०
प्रसारणं यदा तत्र "यु उ अन्" च तदा भवेत् ।
ततः "संप्रसारणाच्च" पुनः सूत्रं प्रयुज्यते ॥ ५५१
सूत्रं यदा भवेद् युक्तं पूर्व्वरूपं तदा भवेत् ।
पूर्व्वरूपं यदा तत्र "यु उ न्" तदा भवेत् पुनः ॥ ५५२

"अक"श्चेति पुनः सूत्रं भवेद् योज्यं ततः परम् ।
सवर्णदीर्घता तत्र रूपं यूनः तदा भवेत् ॥ ५५३
यून इति भवेद् रूपं सवर्णदीर्घता यदा ।
उकारश्च परो ह्रस्वः पुनर्दीर्घो तदा भवेत् ॥ ५५४
प्रसारणात् पुनर्जातः स उकार इति स्थितिः ।
"अच"श्चेति स्थितं सूत्रम उकारः स्थानिवत् भवेत् ॥ ५५५
उकारस्य स्थानिवत्वात् प्रसारणं स्थितं भवेत् ।
उकारश्चेत् परे तत्र प्रसारणं भवेत् परे ॥ ५५६
यून इति स्थितः शब्दः पूर्व्वं मया प्रदर्शितः ।
यकारस्य परे तावद् उकारश्च प्रवर्त्तते ॥ ५५७
प्रसारणमुकारः स्यादितः पूर्व्वं प्रदर्शितम् ।
यकारस्य परे तस्मात् प्रसारणं स्थितं खलु ॥ ५५८
यकारश्च यदा पूर्व्वं प्रसारणं यदा परे ।
यकारस्य प्रसारणं पुनः प्राप्तं भवेदिह ॥ ५५९
पूर्व्वस्य च यकारस्य यदा प्राप्तं प्रसारणम् ।
तदा तत्र भवेत् सूत्रं मया परे प्रदर्शितम् ॥ ५६०

३६३। न संप्रसारणे संप्रसारणम्। ६।१।६७

प्रसारणं यदा तत्र परे क्वचित् प्रवर्त्तते ।
पूर्व्वस्य च यणस्तत्र न पुनः स्यात् प्रसारणम् ॥ ५६१

पूर्व्वस्य च यकारस्य न तावत् स्यादिकारता ।
पदं यूनः भवेत् तत्र पदमिष्टं तदेव हि ॥ ५६२

पूर्व्वपक्षः

यून इति पदं तावत् प्रक्रियायां प्रदर्शितम् ।
"यू" तत्र च भवेदंशस्तमाकृष्य विचार्य्यते ॥ ५६३
"यू" यदा च भवेत्तत्र वर्णत्रयं तदा भवेत् ।
यकारः स्याद् उकारः स्याद् उकारः स्याद् यथायथम् ॥ ५६४
इह तावद् उकारश्च द्वितीयो यः प्रवर्त्तते ।
न खलु स यकाराच्च परे भवेदिति स्थितिः ॥ ५६५
उकारः प्रथमो यः स मध्ये तत्र स्थितः खलु ।
तेन च रचितं तत्र व्यवधानं सुदुस्तरम् ॥ ५६६

द्वितीयो य उकारः स्यात् न यकारात् परे हि सः ।
उकार प्रथमो यः स्यात् स हि बाधा भवेदिह ।। ५६७
उकारो ये द्वितीयः स्यात् स च जातः प्रसारणात् ।
स्थानिवत्वात् पुनस्तस्य सम्प्रसारणता स्थिता ॥ ५६८
उकारो यो द्वितीयः स्यात् न यकारात् परे हि सः ।
न यकारात् परे तस्मात् स्थितं हि सम्प्रसारणम् ।। ५६९
न यदि स्यात् परे तत्र तादृशं सम्प्रसारणम् ।
कथं तत्र निषेधः स्यात् "ने"ति वा युज्यते कथम् ।। ५७०
"येने"ति यः स्थितो न्यायः न स इह प्रयुज्यते ।
न्यायस्य च पुनस्तस्य न चायं विषयो भवेत् ।। ५७१
"व्यथो लिटि" स्थितं सूत्रं "विव्यथे" च भवेत् पदम् ।
"ने"ति यश्च निषेधः स्यात् चरितार्थः स तत्र च ।। ५७२
यून इति यदा साध्यं "ने"ति न युज्यते तदा ।
न खलु "ने"ति सूत्रस्य प्रदेशो हि भवेदयम् ।। ५७३

उत्तरपक्षः

"व्यथोलिटि" प्रसारः स्यात् विव्यथे च पदं भवेत् ।
"ने"ति यच्च स्थितं सूत्रं चरितार्थं च तत्र तत् ॥ ५७४
इति यत् भवता प्रोक्तं न हि तत् सङ्गतं भवेत् ।
"ने"ति यश्च निषेधः स्याद् अन्यत्रापि स युज्यते ॥ ५७५
तथाविधः प्रसारः स्यात् विषयस्तस्य केवलम् ।
स एव हि प्रसारः स्यात् लक्ष्यमेकं तदा पुनः ॥ ५७७
तथाविधः प्रसारश्चेत् मुनेर्लक्ष्यं भवेदिह ।
"व्यथो यो लिटि" तत्र च सूत्रस्य योजना भवेत् ॥ ५७८
ग्रहणाच्च "यकार"स्य प्रसारणं निषिध्यते ।
ग्रहणाच्च "यकार"स्य सर्व्वं सिद्धं भवेदिह ॥ ५७९
"ने"ति यच्च स्थितं सूत्रं न तत् प्रयोजनं भवेत् ।
निरर्थकं भवेत् सूत्रं तथा यदि स्थितिर्भवेत् ॥ ५८०
न च भवेत् तथा तत्र न च सूत्रं निरर्थकम् ।
निरर्थके प्रयासस्तु मुनेरिह न दृश्यते ॥ ५८१

प्रयोजनं स्थितं तावत् अन्यत् स्थितं प्रयोजनम् ।
"श्वन्नि"ति च प्रसारस्य प्रयोजनं निषेधनम् ॥ ५८२
इह व्यवहिते चापि प्रसारणे स्थिते परे ।
"ने"ति तावत् निषेधश्च यथायथं प्रवर्त्तते ॥ ५८३

पूर्व्वपक्षः

युवन् शब्दे यकारश्च वकारश्च प्रवर्त्तते ।
सकृदेव तयोस्तत्र युज्यते च प्रसारणम् ॥ ५८४
सकृद् यदा तयोस्तत्र प्रसारणं विधीयते ।
पौर्व्वापर्य्यं न तत्र स्यात् व्यर्थो भवेत् निषेधनम् ॥ ५८५
अथवा वा भवेत्तावद् अन्यथापि गतिः पुनः ।
प्रसारणं यकारस्य प्रथमं वा प्रवर्त्तताम् ॥ ५८६
प्रसारणं यकारस्य प्रथमं चेद् भवेदिह ।
प्रसारणं परे नास्ति निषेधो हि निरर्थकः ॥ ५८७
पश्चात् तत्र वकारस्य भवतु वा प्रसारणम् ।
प्रसारणं परे तत्र तदापि च न वर्त्तते ॥ ५८८
इहापि च निषेधः स्यात् पूर्व्ववद्धि निरर्थकः ।
निषेधे यत् कृतं सूत्रं तद् युज्यते न कर्हिचित् ॥ ५८९

उत्तरपक्षः

सर्व्वं मुनिर्व्विजानाति सर्व्वं हि गोचरं मुनेः ।
तथापि च पुनः सूत्रं मुनिनेह प्रयोजितम् ॥ ५९०
ज्ञापकं च मुनेः सूत्रं ज्ञापकं तत्र गृह्यते ।
अन्त्यस्यैव यणस्तत्र पूर्व्वं भवेत् प्रसारणम् ॥ ५९१
प्रसारणे कृते तत्र प्रसारणं परे भवेत् ।
पश्चात् "ने"ति भवेद् योज्यं निषेधश्च प्रवर्त्तते ॥ ५९२
अन्तस्यैव यणस्तत्र सर्व्वादौ स्यात् प्रसारणम् ।
ततः पश्चात् प्रसारः स्यात् अन्यस्यापि यणः पुनः ॥ ५९३
एषः क्रमो भवेद् ग्राह्य एष क्रम इह स्थितः ।
इदं ज्ञातं मुनेः सूत्रात् सूत्रं च ज्ञापकं कृतम् ॥ ५९४
यूना भवेत् यूवभ्याम स्यात् यूवभिश्च पदं भवेत् ।
परं पदं बुधेरूह्यं न च मया प्रदीयते ॥ ५९५

अर्वण्

अर्वण यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
अर्वा च स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ ५९६
अर्वण् यदा भवेच् शब्दः सम्बुद्धौ सु यदा भवेत् ।
हे अर्वण् स्यात् तदा तत्र विशेषश्च न दृश्यते ॥ ५९७

अर्वण् यदा भवेच् शब्दः प्रत्यय औ परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ५९८

३६४ । अर्वणः तृ असौ अनञः । ६।४।१२७

अर्वण् यदा भवेच् शब्दः नञ् यदा न भवेत् पुनः ।
अन्तादेशस्तदा "तृ" स्यात् सु परे चेन् तदा तु न ॥ ५९९

तृ यदा स्यात् समादेशः स्याद् अर्वन्तौ पदं तदा ।
उगित् तावत् तु च तत्र तस्माद् भवेद् नुमागमः ॥ ६००
अर्वन्तः स्यात् पदं तत्र जश् यदि च परे भवेत् ।
अर्वन्तं स्यात् अर्वन्तौ स्यात् अर्वन्तः स्यात् तथा पुनः ॥ ६०१
अर्वता स्यात् पदं तत्र अर्वभ्याम् च पदं भवेत् ।
परं पदं बुधेरूह्यं न च मया प्रदीयते ॥ ६०२

नञ् यदा च भवेत् तत्र यज्ववच्च पदं भवेत् ।
अल्लोपो न भवेत्तत्र शस् भवेच्च परे यदा ॥ ६०३

पथिन्

पथिन् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ६०४

३६५ । पथिमथ्यृभुक्षामात् । ७।१।८५

पथिन् मथिन यदा शब्दः ऋभुक्षिन् च पुन र्यदा ।
आकारः स्यादन्तादेशः सु यदि च परे भवेत् ॥ ६०५

पूर्वपक्षः

आकारः स्यात् नकारस्य नकारश्चानुनासिकः ।
आन्तरतम्यतावशात् भवेद् "आ" चानुनासिकः ॥ ६०६

उत्तरपक्षः

"आत्" यदा च भवेत्तत्र आ आत् इति च छिद्यते ।
शुद्धायाश्च विधिस्तत्र तस्मात् न चानुनासिकः ॥ ६०७

नकारस्य यदा तत्र स्याद् आकारस्तथा पुनः ।
पथि आ स् च तदा तत्र सूत्रं परं ततो भवेत् ॥ ६०८

३६६ । इतोऽत् सर्व्वनामस्थाने । ७।१।८६

सर्व्वनामस्थानं यदि परे तत्र प्रवर्त्तते ।
आकारः स्याद् इकारस्य पथ्यादेरिति च स्थितिः ॥ ६०९

आकारः स्याद् यदा तत्र पथ आ स् च तदा भवेत् ।
ततः सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ६१०

३६७ । थो न्थः । ७।१।८७

सर्व्वनामस्थानं यदि परे तत्र प्रवर्त्तते ।
पथिन् यदा मथिन् यदा थोन्थो भवेत् तदा पुनः ॥ ६११
थकारस्य यदा तत्र "न्थ" पुनश्च प्रयुज्यते ।
पन्थाः भवेत् पदं तत्र विशेषो न परः स्थितः ॥ ६१२
पन्थानौ स्यात् पदं तत्र पन्थानः च पदं भवेत् ।
पन्थानम् स्यात् पदं तत्र पन्थानौ च भवेत् पदम् ॥ ६१३

यदा पथिन् भवेच् शब्दः प्रत्ययः शस् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ६१४

३६८ । भस्य टेर्लोपः । ७।१।८८

शसादिके भसंज्ञा चेत् परे तत्र प्रवर्त्तते ।
पथ्यादेश्च टिभागस्य विलोपः स्यादिति स्थितिः ॥ ६१५

टिभागस्य यदा लोपः पथ् शस् स्याच्च तदा पुनः ।
सन्धिर्यदा भवेत्तत्र पथः स्याच्च पदं तदा ॥ ६१६

पथा भवेत् पदं तत्र पथिभ्याम् च पदं भवेत् ।
परं पदं बुधरूह्यं नेह पुनः प्रदीयते ॥ ६१७

एवं मथिन् भवेदत्र विशेषश्च न विद्यते ।
ऋभुक्षिण् स्यात् पुनश्चैवं विशेषश्च न दृश्यते ॥ ६१८

सुपथी (स्त्रियाम्)

पथिन् यदा भवेच् शब्दः प्रत्ययो ङीप् भवेद् यदा ।
तदापि च भवेद् युक्तं सूत्रमिदमिति स्थितिः ॥ ६१९
पथिन् यदा यदा ङीप् च सूत्रमिदं प्रयुज्यते ।
इन्भागस्य भवेल्लोपः शब्दः "पथी" तदा भवेत् ॥ ६२०
यदा पथी भवेच् शब्दः प्रत्ययः सु भवेद् यदा ।
तदा पथी पदं च स्याद् विशेषश्च न वर्त्तते ॥ ६२१

सुः शोभनः पन्थाः यस्या इति चेद् विग्रहो भवेत् ।
सुपथी स्याद् तदा शब्दः बहुव्रीहिर्भवेदिह ॥ ६२२
सुपथी स्याद् यदा शब्दः प्रत्ययः सु भवेद् यदा ।
सुपथी स्यात् तदा शब्दः विशेषस्तु न वर्त्तते ॥ ६२३

सुपथिन् (नपुंसके)

सु शोभनः पन्था अस्य इति चेद् विग्रहो भवेत् ।
सुपथिन् स्याद् तदा शब्दः बहुव्रीहिर्भवेदिह ६२४

सुपथिन् स्याद् यदा क्लीबे प्रत्ययः सु परे यदा ।
"स्वमो"रिति भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ ६२५
प्रत्ययः सु यदा लुप्तः सुपथिन् च तदा स्थितम् ।
"नलोप"श्च स्थितं सूत्रं तत् तदा च प्रयुज्यते ॥ ६२६
"नलोप"श्च यदा युक्तं नकारोपि विलुप्यति ।
नकारस्य यदा लोपः सुपथि स्यात् पदं तदा ॥ ६२७

पूर्व्वपक्षः

"स्वमो"रिति च सूत्रेण प्रत्ययः सु विलुप्यति ।
प्रत्ययस्य विलोपेऽपि प्रत्ययलक्षणं स्थितम् ॥ ६२८
सुप्रत्यये विलुप्तेऽपि प्रत्ययः सु विराजते ।
प्रत्ययलक्षणं कार्य्यं तस्मादिह प्रसज्यते ॥ ६२९
सु यदा स्यात् परे तत्र "पथि"–सूत्रं प्रयुज्यते ।
"पथि"—यदा भवेद् युक्तम् आत्वं तदा प्रवर्त्तते ॥ ६३०

उत्तरपक्षः

लुक्शब्देन यदा भवेत् प्रत्ययस्य विलोपनम् ।
प्रत्ययलक्षणं कार्य्यं न तदा च प्रवर्त्तते ॥ ६३१
"स्वमोर्लुक्" च भवेत् सूत्रं लुक्शब्दश्च प्रयोजितः ।
प्रत्ययलक्षणं कार्य्यं न तस्माच्च भवेदिह ॥ ६३२
"न लुमता" स्थितं सूत्रं प्रमाणं तदिह स्थितम् ।
लुक्शब्देन विलोपः स्यात् आत्वं तस्मात् न युज्यते ॥ ६३३

सुपथिन् स्याद् यदा क्लीवे प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं वार्त्तिकं तु परं तदा ॥ ६३४
सम्बुद्धौ नपुंसकानां नलोपो वा वाच्यः (वा)
क्लीवे यदा भवेच्च शब्दः सम्बुद्धिश्च परे यदा ।
विभाषया नकारस्य भवेत्तदा विलोपनम् ॥ ६३५
सुपथिन् च स्थितं क्लीवे सम्बुद्धौ सु परे भवेत् ।
नकारस्य विलोपः स्यात् हे सुपथि भवेत् तदा ॥ ६३६
नकारस्य यदा तत्र न भवेच्च विलोपनम् ।
हे सुपथिन् तदा तत्र भवेत् पदमिति स्थितिः ॥ ६३७

पूर्व्वपक्षः

नलोपः स्याद् यदा तत्र हे सुपथि यदा भवेत् ।
"ह्रस्वस्य" च भवेद् योज्यं गुणस्तत्र प्रसज्यते ॥ ६३८

उत्तरपक्षः

"नलोप"श्च स्थितं सूत्रं तदिह च प्रयुज्यते ।
नलोपः स्यादसिद्धश्च सुब्विधिर्हि भवेदयम् ॥ ६३९
असिद्धः स्यात् नलोपश्च नकारश्च स्थितस्ततः ।
"ह्रस्वे"ति न भवेत्तस्मात् गुणो न हि प्रवर्त्तते ॥ ६४०

क्लीवे

सुपथिन् स्याद् यदा क्लीवे प्रत्यय औ परे यदा ।
शीभावः स्यात् तदा तत्र भसंज्ञा च प्रयुज्यते ॥ ६४१
पश्चाद् "भस्य"—भवेद् योज्यम् इन् तदा च विलुप्यते ।
ईकारश्च भवेद् युक्तः सुपथी स्यात् तदा पदम् ॥ ६४२

सुपथिन् स्याद् यदा क्लीवे प्रत्ययो जश् परे यदा ।
"जश्शसोः शि" भवेद् योज्यं शिभावः स्यात् तथा पुनः ॥ ६४३
"शि सर्व्वनामस्थानं" स्यात् सा संज्ञा च भवेदिह ।
"इत"श्चेति भवेद् योज्यं "थो न्थः" पश्चाच्च युज्यं ॥ ६४४
नान्तः पुनः भवेच्च् शब्दः दीर्घस्तस्मात् भवेदिह ।
दीर्घो यदा भवेत्तत्र सुपन्थानि भवेन् पदम् ॥ ६४५

पञ्चन्

पञ्चन् यदा भवेच्च् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेन् साध्यं सूत्रं परं प्रयोजनम् ॥ ६४६

३६९ । ष्णान्ता षट् । १।१।२४

षान्ता यदा भवेन् संख्या नान्ता संख्या भवेद् यदा ।
षट् संज्ञा च तदा तासां संख्यानां स्यादिति स्थितिः ॥ ६४७

पञ्चन् यदा भवेच्च् शब्दः नान्ता संख्या भवेत्तदा ।
षट् संज्ञा स्यात् ततस्तत्र संज्ञाकार्य्यं ततो भवेत् ॥ ६४८
"षड्भ्योलुक्" च भवेद् योज्यं संज्ञाकार्य्यं प्रवर्त्तते ।
जश्शसोलुक् भवेत् तत्र रूपं पञ्चन् तदा भवेत् ॥ ६४९
पश्चात् तत्र नकारस्य लोपोऽपि च प्रसज्यते ।
पञ्च भवेत् तदा तत्र पदमिष्टं तदेव हि ॥ ६५०

न च यदा भवेन् संख्या संज्ञा तदा न युज्यते ।
विप्रुष् पामन् न संख्या स्यात् संज्ञा तस्माद् भवेन्न च ॥ ६५१
संज्ञा यदा न तत्र स्यात् न जशोलुग् भवेदपि ।
विप्रुषः स्यात् जशा तत्र पामानः स्यात् जशा पुनः ॥ ६५२

पूर्व्वपक्षः

शत यदा भवेच्च् शब्दः प्रत्ययो जश् परे यदा ।
"जश्शसो शि" भवेद् योज्यं शिभावः स्यात् तथा पुनः ॥ ६५३
"नपुंसक"—स्थितं सूत्रं तदिह च प्रयुज्यते ।
सूत्रं यदा प्रयुक्तं स्यात् नुमागमो भवेत् तदा ॥ ६५४
नुमागमो यदा तत्र "शतन् शि" स्यात् तदा पुनः ।
शतन् इह भवेत् संख्या नान्ता संख्या पुनर्भवेत् ॥ ६५५

नान्ता यदा भवेत् संज्ञा षट्संज्ञा स्यात् तदा पुनः।
इह नान्ता स्थिता संख्या षट्संख्या च प्रयुज्यते ॥ ६५६
"षड्भ्यो लुक् यत् स्थितं सूत्रं तत् प्रयोज्यं भवेदिह।
जशो लुक् च तथा तत्र प्राप्तो भवेदिति स्थितिः ॥ ६५७

उत्तरपक्षः

सन्निपातपरिभाषा स्थिता या सा प्रयुज्यते।
जशोलुक् न तथा तत्र प्राप्तो भवेदिति स्थितिः ॥ ६५८
सर्व्वनामस्थानं तत्र परे तावत् प्रवर्त्तते।
स्थानं तदुपजीव्येव नुमो जन्म भवेदिह ॥ ६५९
तस्माद् जातः पुनर्नुम् स न तत्स्थानं विनश्यति।
सर्व्वनामस्थानभूतं जशं हन्ति न नुम् च सः ॥ ६६०
यस्माद् यस्य भवेद् जन्म न तं हन्ति कदापि सः।
जश एव नुमो जन्म न हन्ति नुम् जशं च तम् ॥ ६६१
तस्माद् जशो न लुक् तत्र जश् तत्र च विराजते।
शिभावश्च भवेत्तत्र शतानि च पदं भवेत् ॥ ६६२
पञ्चभिः स्यात् पदं तत्र भिस् यदि च परे भवेत्।
पञ्चभ्यः स्यात् पदं तत्र यदा भ्यास् च भवेत् परे ॥ ६६३
पञ्चन् यदा भवेच्च् शब्दः प्रत्यय आम् परे यदा।
"षट्चतुर्भ्यः" भवेद् योज्यं नुमागमो भवेत्तथा ॥ ६६४
नुमागमो यदा तत्र "पञ्चन् नाम्" स्यात् तदा पुनः।
नकारस्य भवेत्तत्र पुनरपि विलोपनम् ॥ ६६५
लोपो न स्यात् नकारस्य स चासिद्धो भवेत् पुनः।
नकारश्च तथा तत्र स्थित एव हि मन्यते ॥ ६६६
नकारः स्याद् यदा तत्र न "नाम्" तदा परे भवेत्।
नाम् यदा न परे तत्र "नामि" दीर्घो न लभ्यते ॥ ६६७
एवं यदा पुनर्दीर्घं प्रक्रियायां न लभ्यते।
विधानार्थं च दीर्घस्य सूत्रं परं प्रयुज्यते ॥ ६६८

३७०। नोपधायाः। ६।४।७

नान्तो यदा भवेच्च् शब्दः भवेद् नाम् च परे यदा।
उपधायास्तदा तत्र दीर्घः खलु प्रयुज्यते ॥ ६६९

"पञ्चन् नाम" च स्थितं तत्र पूर्व्वमेव प्रदर्शितम् ।
अनेन च भवेद् दीर्घः "पञ्चान् नाम्" च तदा भवेत् ।। ६७०
"पञ्चान् नाम्" स्याव यदा तत्र नकारस्य विलोपनम् ।
नकारश्च यदा लुप्तः पञ्चानाम् स्यात् तदा पदम् ॥ ६७१
आदौ तत्र भवेद् दीर्घः षश्चाद् भवेद् विलोपनम् ।
एष क्रमो भवेद् ग्राह्यः स्यादसिद्धिस्तदन्यथा ।। ६७२
यदा पञ्चन् यदा सुप् स्यात् पञ्चसु स्यात् पदं तदा ।
विशेषो न स्थितः कश्चिन् विशेषश्च न दृश्यते ।। ६७३

परमपञ्चन्

परमाश्च ते पञ्च च इति स्याद् विग्रहो यदा ।
शब्दः स्यात् परमपञ्चन् समासे तु तदा पुनः ।। ६७४
यदा स्यात् परमपञ्चन् यदा सु प्रत्ययो भवेत् ।
पदं स्यात् परमपञ्च तदन्तेऽपि भवेद् विधिः ।। ६७५

प्रियपञ्चन् (पुंसि)

प्रियाः पञ्च यस्येति च विग्रहस्तु यदा भवेत् ।
प्रियपञ्चन् भवेच्च शब्दः बहुव्रीहि भं वेदिह ।। ६७६
प्रियपञ्चन् यदा शब्दः प्रत्ययः सु परे यदा ।
प्रियपञ्चा भवेत् तत्र तदा पदमिति स्थितिः ।। ६७७
गौणतायामिह पञ्चन् समासे तु प्रवर्त्तते ।
तस्मात् लुक् न भवेदत्र तस्मात् नुट् न प्रयुज्यते ।। ६७८
"षड्भ्यो लुक" च स्थितं सूत्रं "षट्चतुभ्यः" स्थितं पुनः ।
बहुत्वात् मुख्यता बोध्या षड़र्थ-चतुरर्थयोः ।। ६७९
प्रकृते तु समासे स्याद् अर्थस्य गौणता पुनः ।
सूत्रद्वयं न तस्माच्च पुनरिह प्रयुज्यते ।। ६८०
भवेच्च प्रियपञ्चानौ प्रत्यय औ परे यदा ।
भवेच्च प्रियपञ्चानो प्रत्ययः जस् परे यदा ।। ६८१
प्रियपञ्चाम् पदं च स्यात् आमिह चेत् परे भवेत् ।
राजवच्च पदं सुटि पदमूह्यं परं बुधैः ॥ ६८२
एवं सप्तन् भवेत्तत्र एवं नवन् भवेत् पुनः ।
एवं दशन् भवेत्तत्र पदमूह्यं यथायथन् ॥ ६८३

अष्टन्

अष्टन् यदा भवेच् शब्दः प्रत्ययो जश् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ६८४

३७१ । अष्टन आ विभक्तौ । ७।२।८४

अष्टन् यदा भवेच् शब्दः विभक्तिश्च परे यदा ।
अष्टन्शब्दे नकारस्य स्यादाकारस्तदा खलु ॥ ६८५
आकारः स्यान्नकारस्य "अष्टा जश्" स्यात् तथा पुनः ।
एवं यदा स्थितं तत्र सूत्रं परं प्रवर्त्तते ॥ ६८६

३७२ । अष्टाभ्य औश् । १।१।२१

प्रक्रियायां प्रवृत्तायाम् "अष्टा" यदा भवेदिह ।
जशः स्थाने शसः स्थाने तदा स्याद् औश् इति स्थितिः ॥ ६८७

अष्टा यदा यदा जश् च "अष्टा औश्" स्यात् तथा पुनः ।
यदा तत्र भवेत् सन्धिः पदम् अष्टौ तदा भवेत् ॥ ६८८

पूर्व्वपक्षः

"अष्टाभ्य"श्च पदं सूत्रे मुनिनेह प्रयोजितम् ।
आकारेण विधानस्य नास्ति किञ्चित् प्रयोजनम् ॥ ६८९
"अष्टभ्य"श्च पदं तत्र तत् प्रयोज्यं भवेद् वरम् ।
आकारेण विधानं चेत् लाघवं तु तदा भवेत् ॥ ६९०
अष्टाभ्यः स्यात् पदं तावत् अष्टभ्यश्च पदं भवेत् ।
पश्चम्यान्तु समं तत्र पदद्वयं प्रयुज्यते ॥ ६९१
आकारेण विधानं चेत् "अष्टाभ्य"श्चेत् प्रयुज्यते ।
गौरवं स्यात् तदा तत्र दोषाय तत् भवेत् पुनः ॥ ६९२
अकारेण विधानं चेत् "अष्टभ्य"श्चेत् प्रयुज्यते ।
लाघवं स्यात् तदा तत्र गुणाय तत् भवेत् पुनः ॥ ६९३
लाघवं स्यात् कृते यस्मिन् कार्य्यं भवेत् तदेव च ।
यः पक्षो लाघवाय स्यात् स पक्षो हि सतां मतः ॥ ६९४
अकारेण स्यादष्टाभ्यः प्रयोज्यं तत् पदं वरम् ।
तेन तत्र लाघवं स्यात् लाघवमिष्यते खलु ॥ ६९५
आकारेण स्याद् अष्टाभ्यः तदिह च प्रयोजितम् ।
गौरवं हि तथा तत्र दोषाय तत् भवेत् मुनेः ॥ ६९६

उत्तरपक्षः

आकारेण स्याद् अष्टाभ्यः पदं च तत् प्रयोजितम् ।
आकारेण त्रिधातुं च नूनं स्थितं प्रयोजनम् ॥ ६९७
आकारः स्याद् यदा तत्र तदैवौश च प्रवर्त्तते ।
आकारेण पदं दत्वा ज्ञापयति तथा मुनिः ॥ ६९८
अस्तु वा गौरवं तत्र न दोषाय भवेत्र तत् ।
प्रामाणिकं पदं स्यात् तत् प्रयोजितं प्रयोजने ॥ ६९९

पूर्व्वपक्षः

"अष्टन था" स्थितं सूत्रम् नित्यमात्वं प्रवर्त्तते ।
"अष्टाभ्य औश्" पुनः सूत्रम् औश् भवेद् आश् भवेद यदि ॥ ७००
नित्यमात्वं स्थितं तत्र नित्यमात्वं प्रवर्त्तते ।
आत् यदा स्यात् तदा स्याद् औश् इतीह वा कथं पुनः ॥ ७०१

उत्तरपक्षः

आत् यदा स्यात तदा स्याद् औश् इतीह च प्रयोजनम् ।
विकल्पः स्यात् यथा तत्र तथा मुनिर्व्विचेष्टते ॥ ७०२
यदा स्याद आत् तदा स्याद् औम् इति चेत् वचनं भवेत् ।
न चेद् आत् स्यात् न भवेद औश् इत्यपि लभ्यते तदा ॥ ७०३
न चेद् आत् स्यात् न भवेद् औश् इति यदा भवेदिह ।
तदा तत्र स्थितं क्षेत्रं यत्र भवेत् तथा तथा ॥ ७०४
पदान्तरं तथा तत्र पुनरेवं प्रसिध्यति ।
विकल्पश्च भवेत् प्रोक्तं वैकल्पिकं भवेत् पदम् ॥ ७०५
आत् यदा न भवेत्तत्र न भवेद् औश् यदा पुनः ।
अष्ट भवेत् तदा तत्र नलोपे च पदं भवेत् ॥ ७०६

सूत्रं स्याद "ष्नो दीर्घात्" स्वरे तत्र प्रवर्त्तते ।
तत् सूत्रं च भवेत् ग्राह्यं विकल्पे ज्ञापकं च तत् ॥ ७०७
दीर्घ इति पुनः शब्दः मुनिनेह प्रयोजितः ।
अस्ति पदं विना दीर्घम् इति च ज्ञायते पुनः ॥ ७०८
जश् इह चेद् भवेदष्टौ पूर्व्वं मया प्रदर्शितम् ।
शसि पदं भवेदष्टौ विशेषश्च न वर्त्तते ॥ ७०९

अष्टाभिः स्यात् पदं पश्चात् अष्टाभ्यश्च पदं भवेत् ।
अष्टानाम् स्यात् पदं पश्चात् अष्टासु च भवेत् पदम् ॥ ७१०

"अष्टन आ" स्थितं सूत्रम् आकारो यो भवेदिह ।
विकल्पेन स तावत् स्यात् पूर्व्वमिह प्रदर्शितम् ॥ ७११
अष्टन् यदा भवेत् शब्दः आकारो न भवेद् यदा ।
तदा तत्र भवेद रूपं यथा परे प्रदर्शितम् ॥ ७१२
अष्ट भवेत् भवेदष्ट अष्टभिः स्यात् पदं पुनः ।
अष्टभ्यः स्यात् अष्टानाम् स्यात् अष्टसु स्यात् तथा पदम् ॥ ७१३

प्रियाष्टन्

प्रियाष्टन् स्याद् यदा शब्दः पदं साध्यं भवेद् यदा ।
"अष्टन आ" भवेद् योज्यं तदन्तेपि भवेदिदम् ॥ ७१४
"अष्टन आ" भवेद् योज्यं सर्व्वासु च विभक्तिषु ।
न केवलं हलादौ स्यात् सर्व्वत्र तत् प्रयुज्यते ॥ ७१५
प्रियाष्टन् स्याद् यदा शब्दः अष्टन आ यदा भवेत् ।
प्रियाष्टा स्यात् तदा तत्र स इह प्रकृतिर्भवेत् ॥ ७१६
प्रियाष्टा स्यात् यदा तत्र प्रत्यय सु भवेद् यदा ।
प्रियाष्टाः स्यात् विसर्गे च पदमिष्टं तदेव हि ॥ ७१७
प्रियाष्टा स्यात् यदा तत्र प्रत्यय औ परे यदा ।
प्रियाष्टौ स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७१८
प्रियाष्टा स्याद् यदा शब्द प्रत्ययो जश् भवेद् यदा ।
"अष्टाभ्य औश्" भवेद् योज्यं प्रियाष्टौ स्यात् पदं तदा ॥ ७१९
प्रियाष्टा स्याद् यदा शब्दः अम् प्रत्ययो भवेद् यदा ।
प्रियाष्टाम् स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७२०
प्रियाष्टा स्यात् यदा शब्दः प्रत्यय औ भवेद् यदा ।
प्रियाष्टा स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७२१
प्रियाष्टा स्यात् यदा शब्दः प्रत्ययः शस् परे यदा ।
प्रियाष्टौ स्यात् पदं तत्र अष्टाभ्यः औश् प्रयुज्यते ॥ ७२२
प्रियाष्टा स्याद् यदा तत्र प्रत्ययः टा यदा भवेत् ।
प्रियाष्टा स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७२३

प्रियाष्टा स्यात् यदा शब्दः प्रत्ययो भ्याम् यदा भवेत् ।
प्रियाष्टाभ्याम् पदं च स्यात् पदमिष्टं तदेव हि ॥ ७२४
एवमेव पदं हि स्यात् परासु च विभक्तिषु ।
सर्व्वत्रैव भवेदेवम् ऊहनीयं यथायथम् ॥ ७२५
"अष्टन आ" यदा तत्र स्यादाकारो विभाषया ।
विभाषा स्यात् यथा तत्र तथा पूर्व्वं प्रदर्शितम् ॥ ७२६
आकारो न यदा तत्र प्रियाष्टन् च तदा स्थितम् ।
पदमिह भवेत् तावत् यथा परे प्रदर्शितम् ॥ ७२७
प्रियाष्टन् स्यात् यदा तत्र प्रत्ययः सु परे यदा ।
प्रियाष्टा स्यात् पदं तत्र न विसर्गः प्रयुज्यते ॥ ७२८
प्रियाष्टा स्यात् यदा तत्र प्रत्यय औ भवेद् यदा ।
प्रियाष्टानो तदा च स्यात् औकारान्तं भवेत् पदम् ॥ ७२९
प्रियाष्टन् स्यात् यदा तत्र प्रत्ययो जश् परे यदा ।
प्रियाष्टानः पदं च स्यात् पदमिष्टं तदेव हि ॥ ७३०
प्रियाष्टन् स्याद् यदा शब्दः अम् प्रत्ययः परे यदा ।
प्रियाष्टानम पदं च स्यात् पदमिष्टं तदेव हि ॥ ७३१
प्रियाष्टन् स्यात् यदा शब्दः प्रत्यय औ परे यदा ।
प्रियाष्टानौ पदं च स्यात् पदमिष्टं तदेव हि ॥ ७३२
प्रियाष्टन् स्याद् यदा शब्द प्रत्ययः शस् परे यदा ।
प्रियाष्ट्नः स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७३३
प्रियाष्टन् स्यात् यदा शब्दः प्रत्ययष्टा परे यदा ।
प्रियाष्ट्ना स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ७३४
प्रियाष्टन् स्याद् यदा शब्दः प्रत्ययो भ्याम् परे यदा ।
प्रियाष्टभ्याम् पदं च स्यात् पदमिष्टं तदेव हि ॥ ७३५
एवमेव पदं हि स्यात् परासु च विभक्तिषु ।
यथायथम् भवेद् योज्यम् ऊहनीयं यथायथम् ॥ ७३६

"आ" यदा स्यात् प्रियाष्टा स्यात् हाहावच्च पदं भवेत् ।
जशि शसि विशेषः स्याद् अष्टाभ्य औश् प्रयुज्यते ॥ ७३७
आ यदा न भवेद् तत्र प्रियाष्टन् च तदा स्थितम् ।
राजवत् स्यात् पदं तत्र सर्व्वासु हि विभक्तिषु ॥ ७३८

एष हि सरलः पन्था यथा मया प्रदर्शितः ।
एष पन्था भवेत् श्रेयः समुपस्थापितस्ततः ॥ ७३९
कुत्र किं वा भवेद् रूपं न तत्र निश्चयः स्थितः ।
प्राचीनानां मते भेदः प्रायश इह दृश्यते ॥ ७४०
महाभाष्यं मया दृष्टं दृष्टा च काशिका पुनः ।
सिद्धान्तकौमुदी दृष्टा दृष्टा सा च विशेषतः ॥ ७४१
दिनत्रयं गतं मे च विषयस्य विचिन्तने ।
परे मया पदं दत्तं यथा पूर्व्वं प्रदर्शितम् ॥ ७४२
काशिकाया मतं तावदिह मया समादृतम् ।
इह मया पदं दत्तं तस्मिनमनुसृत्य च ॥ ७४३

इति नान्ताः

अथ धकारान्तप्रकरणम्

बुध्

बुध् यदा च भवेद् धातुः प्रत्ययः क्विन् भवेद् यदा ।
बुध् तदा च भवेत् शब्दः स इह प्रकृतिर्भवेत् ॥ ७४४

बुध् यदा च स्थितः शब्दः प्रत्ययः सु भवेद् यदा ।
पदं यदा भवेत् साध्यं प्रक्रिया च भवेत्तदा ॥ ७४५
यदा "बुध्" स्यात् यदा "सु" स्यात् रूपं "बुध् सु" तदा भवेत् ।
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं प्रत्ययः "सु" विलुप्यति ॥ ७४६
प्रत्ययः सु यदा लुप्तः रूपं "बुध्" च तदा स्थितम् ।
"एकाच"श्च स्थितं सूत्रं परं तत्र प्रयुज्यते ॥ ७४७
"एकाच"श्च यदा युक्तं भष्भावश्च भवेत्तदा ।
धकारस्य भकारः स्यात् "भुध्" रूपं च तदा भवेत् ॥ ७४८
"झलां जश्" च स्थितं सूत्रं पश्चात् तत्र प्रयुज्यते ।
धकारस्य दकारः स्यात् रूपं भुद् च भवेत्तदा ॥ ७४९
"वावसाने" स्थितं सूत्रं तदपि च प्रयुज्यते ।
दकारस्य तकारोवा तदा च स्यात् भवेच्च भुत ॥ ७५०

"भुद्" भवेच्च पदं तत्र पदं "भुत्" च तथा भवेत् ।
सु यदा स्यात् परे तत्र पदद्वयं भवेत् तथा ॥ ७५१

वुधो वुधः भवेत्तत्र बुधा भुद्भ्याम तथा भवेत् ।
भुत्सु भवेत् पदं तत्र यत् स्थितं तत् प्रदर्शितम् ॥ ७५२
इति धान्ताः

अथ जकारान्तप्रकरणम्

युज्

युजिर् यदा भवेद् धातुः प्रत्ययः क्विन् भवेद् यदा ।
युज भवेच्च तदा शब्दः प्रत्ययः क्विन् परेण च ॥ ७५३

३७३ । ऋत्विक्-दधृक्-स्रक्-दिक्-उष्णिक् अञ्चु-युजि-क्रुञ्चां च । ३।२।५९

तस्मात् तस्मात् भवेत् क्विन् च शब्दो भवेत् तथा तथा ।
निपातनात् भवेत् सिद्धं न सिद्धं लक्षणेन यत् ॥ ७५४

युजिर् यदा भवेद् धातुः उपपदं यदा च न ।
तदा क्विन् प्रत्ययस्तत्र कनावितौ मतौ पुन ॥ ७५५
क्विन् भवेत् प्रत्ययस्तत्र कृत्ःप्रत्ययः भवेच्च सः ।
कृत्संज्ञा स्यात् यथा तत्र यथा परे प्रदर्शितम् ॥ ७५६

३७४ । कृदतिङ् । ३।१।९३

अधिकारो "धातो"रिति पुनरिह प्रवर्त्तते ।
तिङ्भिन्नो यो भवेत्तत्र स कृत्संज्ञः पुनर्भवेत् ॥ ७५७

कनावितौ यदा तत्र "वि" तत्र च तदा स्थितः ।
वेरपि च भवेल्लोपः लोपे सूत्रं परं यथा ॥ ७५८

३७५ । वेरपृक्तस्य । ६।१।६७

अपृक्तश्चेत् वकारः स्यात् तस्य लोपो विधीयते ।
लोपो यदा वकारस्य युज् तदात्र स्थितो भवेत् ॥ ७५९
"कृत्तद्धित"—स्थितं सूत्रं तत् तदा च प्रयुज्यते ।
युज् प्रातिपदिकं स्याच्च स्वादिकं च परे भवेत् ॥ ७६०

युज् यदा च भवेत् शब्दः प्रत्ययः सु भवेद् यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ७६१

३७६ । युजेरसमासे । ७।१।७१

युज् यदा च भवेत् शब्दः समासो न भवेद् यदा ।
सर्व्वनामस्थानम् स्याच्चेत् नुमागमो तदा भवेत् ॥ ७६२

नुम् यदा च भवेत्तत्र यु न् ज् सु स्याच्च तदा पुनः ।
हल्ङ्याब्भ्यश्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ ७६३
"संयोगेति" स्थितं सूत्रं तदा च तत् प्रयुज्यते ।
संयोगान्तो विलुप्तः स्यात् जकारश्च विलुप्यति ॥ ७६४
जकारस्य यदा लोपः रूपं युन् च तदा भवेत् ।
ततः परं भवेत् सूत्रं प्रदर्शितं यथा परे ॥ ७६५

३७७ । क्विन्प्रत्ययस्य कुः । ८।२।६२

क्विन्प्रत्ययो भवेद् यस्मात् स शब्दश्चेत् भवेदिह ।
अन्तादेशः कवर्गः स्यात् पदान्ते च विधिर्भवेत् ॥ ७६६

नकारस्य तथा तत्र ङकारः स्यादिति स्थितिः ।
युङ् तदा च भवेत्तत्र पदमिष्टं तदेव हि ॥ ७६७
युज् यदा च भवेच् शब्दः प्रत्यय औ भवेद् यदा ।
युञ्जौ भवेत् पदं तत्र पदमिष्टं तदेव हि ॥ ७६८
"न"श्चेति च स्थितं सूत्रं तदिह च प्रयुज्यते ।
नुमो भवेदनुस्वारो भवेत् परसवर्णता ॥ ७६९
असिद्धत्वात् पुनस्तस्य "चोः कु" रिति न युज्यते ।
कुत्वं तस्मात् न प्राप्नोति युञ्जौ चेति पदं भवेत् ॥ ७७०
युज् यदा च यदा जश् च युञ्जः भवेत् पदं तदा ।
युञ्जम युञ्जौ युञ्जः स्यात् च द्वितीयायां पदं पुनः ॥ ७७१
युजा युग्भ्याम् पदं भवेत् युग्भिः भवेत् पदं तथा ।
युञ्जे भवेत् पदं तत्र विशेषश्च न वर्त्तते ॥ ७७२

सूत्रं "युजेरसमासे" पूर्व्वमिह प्रदर्शितम ।
समासश्चेत् भवेत् तत्र न तावत् नुम प्रयुज्यते ॥ ७७३

सुयुज्

"सुयुज्" इह समासे स्यात् प्रत्ययः "सु" परे भवेत् ।
न तावन्नुम् भवेदत्र "सुयुज सु" च तदा स्थितम् ॥ ७७४

"सुयुज् सु स्याद् यदा तत्र "हल्ङ्याब्भ्यः" सु विलुप्यति ।
सुयुज् तदा स्थितं तत्र ततः सूत्रं परं भवेत् ॥ ७७५

३७८ । चोः कुः । ८।२।३०

झशि परे पदान्ते च चवर्गस्य कवर्गता ।
एवं तत्र चवर्गस्य कवर्गः स्यात् इति स्थितिः ॥ ७७६

पूर्वपक्षः

"क्विन् प्रत्ययः" स्थितं सूत्रं तदिह च प्रयुज्यते ।
तेनैव च भवेत् कुत्वं "चो कु." नास्ति प्रयोजनम् ॥ ७७७

उत्तरपक्षः

"क्विन् प्रत्ययः" परं शास्त्रं तदसिद्धं भवेदिह ।
"चोः कु" रिह भवेत् पूर्वं तेन कुत्वं भवेदिह ॥ ७७८

सुयुक् स्याच्च पदं तत्र सुयुग् स्याच्च पदं पुनः ।
सुयुजौ स्यात् सुयुजः स्यात् पदमूह्यं परं बुधैः ॥ ७७९

युजिर् योगे (रुधादौ)

युज् समाधौ (दिवादौ)

सूत्रं "युजेरसमासे" पूर्वमिह प्रदर्शितम् ।
युजिर् भवेद् रुधादौ च तस्येह ग्रहणं मतम् ॥ ७८०

"युज् समाधौ" दिवादौ स्यात् न तस्य ग्रहणं भवेत् ।
सूत्रं युजेरसमासे न च तस्मिन् प्रयुज्यते ॥ ७८१

युज् समाधौ स्थितं यत् स्यात् तस्मात् शब्दो भवेद् यदि
तदा पदं भवेद् युक् च न युङ् भवेत् तदा पुनः ॥ ७८२

स्वञ्ज्

यदा स्वजि भवेद् धातुः प्रत्ययः क्विप् भवेद् यदा ।
स्वञ्ज् तदा च भवेत् शब्दः स इह प्रकृतिर्भवेत् ॥ ७८०

यदा स्वञ्ज् स्यात् यदा सु स्यात् सुप्रत्ययो विलुप्यति ।
हकारस्य भवेल्लोपः स्वन् पदं च तदा भवेत् ॥ ७८४

राज्

राज् यदा च भवेद् शब्दः प्रत्ययः सु परे यदा ।
सुप्रत्ययः विलुप्तः स्यात् रूपं राज् च तदा भवेत् ॥ ७८५
"व्रश्च" – इति स्थितं सूत्रं तत् तदा च प्रयुज्यते ।
हकारस्य षकारः स्यात् राष् भवेच्च तदा पुनः ॥ ७८६
"झलां जश्" च स्थितं सूत्रं परं च तत् प्रयुज्यते ।
षकारस्य डकारः स्यात् पदं राड् च तदा भवेत् ॥ ७८७
"वावसाने" स्थितं सूत्रं तदपि च प्रयुज्यते ।
चर्त्वं तत्र विभाषा स्यात् पदं राट् च तदा भवेत् ॥ ७८८
पदं राड् स्यात् पदं राट् स्यात् पदद्वयं भवेत्तथा ।
राजौ राजः परे तत्र राट्सु राट्त्सु पुनः परे ॥ ७८९

विभ्राज् (टु भ्राज् दीप्तौ-कणादौ)

टु भ्राज् च स्थितो धातुः कणादौ च प्रवर्त्तते ।
भ्राज् यदा यदा क्विप् स्यात् भ्राक् शब्दश्च भवेत्तदा ॥ ७९०
विशिष्य भ्राजते चेत् स्यात् विभ्राज् तदा भवेत् पुनः ।
स हि विभ्राज् पुनश्चात्र प्रकृतिरिति गृह्यते ॥ ७९१
विभ्राज् यदा यदा सु स्यात् पदं विभ्राट् भवेत् तदा ।
"व्रश्चे"ति च स्थितं सूत्रं षत्वं तेन प्रजायते ॥ ७९२
"झलां जश्" च डकारः स्यात् "वावसाने" पुनश्च टः ।
पदं विभ्राड् पदं विभ्राट् द्वयमिह भवेत्तथा ॥ ७९३
विभ्राजौ स्यात् पदं तत्र विभ्राजः स्यात् पदं तथा ।
न विशेषः स्थितस्तत्र पदमूह्य परं बुधैः ॥ ७९४

विभ्राज् (भ्राज् दीप्तौ)

भ्राज् दीप्तौ स्थितो धातु पृथक् धातुर्भवेद्धि सः ।
न स धातुः कणादौ स्यात् स इह गृह्यते पुनः ॥ ७९५
भ्राज् यदा भवेद् धातुः प्रत्ययः क्विप् भवेद् यदा ।
भ्राज् तदा च भवेत् शब्दः स इह गृह्यते पुनः ॥ ७९६
विशिष्य भ्राजते चेत् स्यात् विभ्राज् तदा भवेदिह ।
स हि विभ्राज् पुनश्चात्र प्रकृतिरिति गृह्यते ॥ ७९७

विभ्राज् यदा यदा सु स्यात् पदं विभ्राग् तदा भवेत् ।
कुत्वमिह भवेत्तावत् न हि षत्वं भवेदिह ॥ ७९८
"वावसाने" स्थितं सूत्रं तत् यदा च प्रयुज्यते ।
चर्त्वं तदा विभाषा स्यात् पदं विभ्राक् भवेत्तदा ॥ ७९९

"टुभ्राज" यः कणादौ स्यात् सः इह गृह्यते यदा ।
भ्रश्चेति स्यात् तदा तत्र षत्वं तदा प्रवर्त्तते ॥ ८००
"भ्राजृ दीप्तौ" पृथक् धातुः स इह गृह्यते यदा ।
चोः कुरिति प्रयुक्तं स्यात् कुत्वं तदा प्रवर्त्तते ॥ ८०१

देवेज्

य देवान् यजते तत्र स देवेज् स्यादिति स्थितिः ।
देवेड् देवेट् च देवेजौ देवेजः स्यात् पदं पुनः ॥ ८०२

विश्वसृज्

विश्वसृड् स्यात् पदं तत्र विश्वसृट् च पदं भवेत् ।
विश्वसृजौ भवेत्तत्र विश्वसृजः पुनः पदम् ॥ ८०३
"सृजिदृशोः" स्थितं सूत्रं भाष्यं तत्र स्थितं खलु ।
विश्वसृट् च पदं तत्र भाष्ये खलु प्रदर्शितम् ॥ ८०४
टकारान्तः प्रयोगश्च भाष्ये तत्र प्रदर्शितः ।
टकारान्तो भवेद् ग्राह्यः कुत्वमिह न वर्त्तते ॥ ८०५

परिमृज्

परिपूर्व्वाद् यदा मार्ष्टेः प्रत्ययः क्विप् प्रयुज्यते ।
परिमृज् स्यात् तदा शब्दः परिमृट् च भवेत् पदम् ॥ ८०६

परिव्राज्

परौ व्रजेः षः पदान्ते (उ २१७)

परि यदा भवेत् पूर्व्वं व्रजि परे भवेद् यदा ।
प्रत्ययः क्विप् पुनः दीर्घः परिव्राज् स्यात् तदा पुनः ॥ ८०७
पदान्ते च जकारस्य पुनर्भवेत् षकारता ।
परिव्राट् स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ८०८

परिव्राजौ भवेत्तत्र परिव्राजः पदं भवेत् ।
विशेषो न स्थितस्तत्र पदमूह्यं परं बुधे ॥ ८०९

विश्वराज्

विश्व यदा भवेत् पूर्व्वं राज् यदा परे भवेत् ।
"सत्मू" चेति भवेद् योज्यं विश्वराज् स्यात् तदा पुनः ॥ ८१०

विश्वराज् स्यात् यदा शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ८११

३७९। विश्वस्य वसुराटोः। ६।३।१२८

विश्व यदा भवेत् पूर्व्वं वसु राट् च परे यदा ।
दीर्घो भवेदकारस्य विश्व विश्वा तदा भवेत् ॥ ८१२

विश्वाराट् स्यात् पदं तत्र दीर्घो यदा विधीयते ।
विश्वावसुर्भवेत्तत्र दीर्घो भवेद् यदा पुनः ॥ ८१३

राटोरिति पदं सूत्रे टकारान्तं प्रदर्शितम् ।
पदान्ते च टकारः स्याद् इति तेन च बोधितम् ॥ ८१४

केवलं हि भवेच् चर्त्वम् इति नेह विवक्षितम् ।
अन्यदपि भवेत्तत्र विश्वाराड् स्यात् तथा पुनः ॥ ८१५

विश्वाराजौ पदं च स्यात् विश्वाराजः पदं भवेत् ।
विश्वाराड्भ्याम् पदं च स्यात् पदमूह्यं परं बुधैः ॥ ८१६

भ्रस्ज् (भृस्ज्)

भ्रस्ज् पाके स्थितो धातुः प्रत्ययः क्विप् प्रयुज्यते ।
"ग्रहिज्या"--च प्रसारः स्यात् रेफस्य स्याद् ऋकारता ॥ ८१७

पुनः "सम्प्रसारणा"च्च पूर्व्वरूपं प्रपद्यते ।
भृस्ज् च शब्दो भवेत्तत्र स इह प्रकृतिर्भवेत् ॥ ८१८

भृस्ज् च यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्य"श्च सुलोपः स्यात् भृस्ज् च तदा स्थितं खलु ॥ ८१९

भृस्ज् च यदा स्थितं तत्र पदान्तश्च भवेद् यदा ।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ८२०

३८०। स्कोः संयोगाद्योरन्ते च। ८।२।२९

झल् इह चेत् परे तत्र पदान्तश्चेत् भवेत् परे ।
संयोगाद्योः तदा स्कोः स्यात् पुनरिह विलोपनम् ॥ ८२१

सकारस्य यदा लोप इत्थं तत्र प्रसज्यते ।
भृज् तदा च भवेद् रूपम् चर्त्ते जश्त्वे भवेच्च भृड् ॥ ८२२
"वावसाने" स्थितं सूत्रं तत् पुनश्च प्रयुज्यते ।
चर्त्वं तत्र विभाषा स्यात् पदं च भृट् तदा भवेत् ॥ ८२३
भस्ज् च यदा स्थितः शब्दः प्रत्यय औ परे यदा ।
न पदान्तः न झल् तत्र न तस्मात् "स्कोः" प्रयुज्यते ॥ ८२४
"झलां" जश् स्यादसिद्धं च तस्माद् जशत्वं भवेन्न च ।
श्चुत्वं भवेत् भवेत् "श"श्च जश्त्वेन "जः" भवेत् पुनः ॥ ८२८
भृजौ भवेत् पदं तत्र तथा तथा स्थिते सति ।
भृजः पदं भवेत्तत्र पदमूह्यं परं बुधैः ॥ ८२६

ऋत्विज्

ऋतु यदा भवेत् पूर्वं प्रत्ययः क्विन् परे यदा ।
शब्दः ऋत्विज् तदा तत्र स इह प्रकृतिर्भवेत् ॥ ८२७
ऋत्विज् यदा भवेत् शब्दः प्रत्यय सु परे यदा ।
हल्ङ्याब्भ्यश्च सुलोपः स्यात् रूपं ऋत्विज् तदा भवेत् ॥ ८२८
रूपम् ऋत्विज् तदा तत्र क्विन्निति "कु" भवेदिह ।
ऋत्विग् भवेत् पदं तत्र पदं ऋत्विक् भवेत् तथा ॥ ८२९
ऋत्विजौ स्यात् पदं तत्र ऋत्विज" स्यात् पदं पुनः ।
विशेषो न स्थितः कश्चित् पदयूहं परं बुधैः ॥ ८३०

ऊर्ज

ऊर्ज बलप्राणनयोः चुरादिणिर्भवेदिह ।
"भ्राजभास" भवेत् क्विप् च णिलोपश्च विधीयते ॥ ८३१
ऊर्ज् इह स्यात् तदा शब्दः स इह प्रकृतिर्भवेत् ।
तस्मात् शब्दात् परं तत्र सुबुत्पत्तिर्भवेदिह ॥ ८३२
ऊर्ज् यदा स्यात् यदा सु स्यात् "हल्ङ्याब्भ्यः" सु विलुप्यति ।
ऊर्ज् तदा च स्थितं रूपं "चोः कुः" पुनः प्रसज्यते ॥ ८३३
ऊर्ज् भवेच्च तदा पदम् पदमिष्टम् तदेव हि ।
"वावसाने" यदा चर्त्वं ऊर्क् चापि च पदं तदा ॥ ८३४
ऊर्जौ भवेत् पदं तत्र ऊर्जः स्याच्च पदं पुनः ।
शेषं पदं बुधैरूह्यं नेह मया प्रदीयते ॥ ८३५

इति नान्ताः

अथ दकारान्तप्रकरणम्

त्यद्

त्यद् यदा च स्थितः शब्दः पदं साध्यं भवेद् यदा।
"त्यदादीनां" स्थितं सूत्रं तत् सर्व्वादौ प्रयुज्यते ॥ ८३६
"त्यदादीनां" यदा युक्तम् अकारश्च भवेत्तदा।
"त्य अ" तदा तथा रूपं प्रपद्यते इति स्थितिः ॥ ८३७
"अतो गुणे" स्थितं सूत्रं तत्तदा च प्रयुज्यते।
"त्य" भवेच्च तदा तत्र स इह प्रकृतिर्भवेत् ॥ ८३८
"त्य" यदा च स्थितः शब्दः प्रत्ययः सु परे यदा।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ८३९

३८१। तदोः सः सौ अनन्तयोः। ७।२।१०६

त्यदादीनां तकारश्चेत् दकारश्चेत् न चान्ततः।
तयोर्भवेत् सकारश्च सु यदीह परे भवेत् ॥ ८४०

तकारस्य यदा तत्र सकारश्च प्रवर्त्तते।
"सत् सु" तदा भवेत् तत्र पदं च "स्यः" ततो भवेत् ॥ ८४१

३८२। ङे प्रथमयोरम्। ७।१।२८

"स्यः" भवेच्च पदं तत्र सु यदि च परे भवेत्।
त्यौ भवेच्च पदं तत्र यदा स्याद् औ पुनः परे ॥ ८४२
त्ये भवेच्च पदं तत्र जश् यदा स्यात् परे पुनः।
त्यम् भवेच्च पदं तत्र स्याद् अम् परे पुनर्यदा ॥ ८४३
त्यौ भवेच्च पदं तत्र यदा स्याद् औट् परे पुनः।
त्यान् भवेच्च पदं तत्र शस् यदा च परे भवेत् ॥ ८४४

तद्

सः तौ ते स्यात् पदं तत्र विशेषश्च न वर्त्तते।

परमतद्

परमसः परमतौ परमते भवेत् पदम् ॥ ८४५

पूर्व्वपक्षः

त्यदादीनां तकारस्य सकारश्च भवेदिह।
इति यत् भवता प्रोक्तं साधु तत् गृह्यते मया ॥ ८४६

युष्मद् शब्दः स्थितस्तत्र त्यदादीनां गणे स्थितः ।
युष्मद् शब्द समादेशः "त्वमि"ति च विधीयते ॥ ८४७
तुम् यदा स्यात् समादेशस्तकारो वर्त्तते तदा ।
तकारस्य सकारः स्यात् सूत्रमिदं च युज्यते ॥ ८४८

उत्तरपक्षः

त्यदादीनां गणे तत्र युष्मद शब्दः स्थितः खलु ।
तथापि च पुनस्तस्मिन् विधिरेष न युज्यते ॥ ८४९
"त्यदादीनाम्" स्थितं सूत्रं खलु पूर्व्वं प्रदर्शितम ।
वार्त्तिकं "द्विपर्य्यन्तायाम्" पुनस्तत्र प्रवर्त्तते ॥ ८५०
"तदोः सः सौ" पुनः सूत्रं परे तत्र स्थितं खलु ।
वार्त्तिकं "द्वितर्य्यन्तानयं" तत्रापि चानुवर्त्तते ॥ ८५१
द्विपर्य्यन्ता स्थिता ये च तेषु "तदोः" प्रयुज्यते ।
तेषां बाह्यो भवेद् यश्च तस्मिन् "तदोः" न वर्त्तते ॥ ८५२
युष्मद् शब्दो भवेद् बाह्यः तेषां मध्ये भवेन्न च ।
त्वमित्यस्य तकारस्य न तावत् स्यात् सकारता ॥ ८५३

त्यद्-संज्ञायाम्

त्यद् शब्द स्यात् यदा तत्र यदा संज्ञा प्रतीयते ।
"त्यदादीनाम् तदा न स्यात् "तदोश्चापि न युज्यते ॥ ८५४
त्यद् भवेच्च तदा रूपं त्यदौ रूपं भवेत्तदा ।
त्यदः स्याच्च तदा रूपम् त्यद् भवेन्नाम कस्यचित् ॥ ८५५

त्यद् शब्दः स्याद् यदा गौने समासश्च भवेद् यदा ।
"त्यादादीनाम्" तदा न स्यात् "तदो" श्चापि न युज्यते ॥ ८५६
अतित्वद् स्यात् तदा रूपम् अतित्वदौ भवेत् परे ।
अतित्वदः भवेत् रूपम् गौणे रूपं भवेत्तथा ॥ ८५७

यद्

"यः" भवेच्च पदं तत्र "यौ" भवेच्च पदं तथा ।
"ये" भवेच्च पदं तत्र पदमूह्यं परं बुधेः ॥ ८५८

एतद्

एषः भवेत् पदं तत्र एतौ भवेत् पदं तथा ।
एते भवेत् पदं तत्र पदमूह्यं परं बुधैः ॥ ८५९

एतद्-अन्वादेशे

एतद् यदा भवेच् शब्दः अन्वादेशो यदा भवेत् ।
एनम् एनौ भवेत्तत्र भवेद् एनान् पुनः पदम् ॥ ८६०
एनेन स्यात् पदं तत्र स्यादेनयोः पदं तथा ।
एनयोः स्यात् पदं तत्र अन्वादेशे भवन्ति ते ॥ ८६१

युष्मद् अस्मद्

युष्मद् अस्मद् यदा शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयोजनम् ॥ ८६२

३८२ । ङे प्रथमयोरम् । ७।१।२८

प्रथमा चेत् परे तत्र द्वितीया चेत् भवेत् परे ।
ङे यदा स्यात् परे तत्र अम् युष्मदस्मदोर्भवेत् ॥ ८६३

एवमिह समादेशो यदा स्याद् अम् तथा पुनः ।
"युष्मद् अम्" च तदा स्थितम् "अस्मद् अम्" च स्थितं तदा ॥ ८६४

समादेशः पुनश्चान्यो भवेत्तत्र प्रयोजनम् ।
पुनः प्राक् च समादेशात् सूत्रमिदं भवेदिह ॥ ८६५

३८३ । मपर्य्यन्तस्य । ७।२।९१

युष्मदस्मद् यदा शब्दः समादेशो भवेद् यदा ।
ग्रहणं मपर्य्यन्तं स्याद् अधिकारो भवेदयम् ॥ ८६६
"युष्म" भवेद् मपर्य्यन्तं युष्मद्शब्दो भवेद् यदा ।
"अस्म" भवेत् मपर्य्यन्तम् अस्मद्शब्दो यदा भवेत् ॥ ८६७

एवं तत्र समादेशो सीया यदा प्रदर्शिता ।
तदा सूत्रं भवेद् योज्यं प्रदर्शितं यथा परे ॥ ८६८

३८४ । त्वाहौ सौ । ७।२।९४

युष्मद् अस्मद् यदा शब्दः प्रत्ययः "सु" परे यदा ।
युष्मदः स्यात् तदा च "त्व" अस्मदश्च भवेद् "अह" ॥ ८६९

"त्व" युष्मदो यदा च स्यात् "अह" स्यादस्मदो यदा ।
"त्व अद् अम्" च तदा तत्र "अह अद् अम्" तदा पुनः ॥ ८७०

३८५ । शेषे लोपः । ७।२।९०

आत्वं यत्वं यदा न स्मात् विभक्तिश्च परे यदा ।
युष्मदश्चास्मदस्तत्र स्यादन्तस्य विलोपनम् ॥ ८७१

अन्त्यस्य च दकारस्य यदा तत्र विलोपनम् ।
"त्व अ अम्" स्यात् तदा तत्र "अह अ अम्" तदा भवेत् ॥ ८७२
"अतो गुणे" स्थितं सूत्रं तदिह च प्रयुज्यते ।
"त्व अम्" तदा भवेद् रूपम् "अह अम्" च तदा भवेत् ॥ ८७३
"अमि पूर्व्वं" स्थितं सूत्रं परं च तत् प्रयुज्यते ।
"त्वम्" भवेच्च तदा तत्र भवेद् "अहम्" तदा पुनः ॥ ८७४

पूर्व्वपक्षः

इह यद् भवता प्रोक्तं न रुचिरं भवेच्च तत् ।
इह यद् भवता प्रोक्तं न न्याय्यं तत् प्रतीयते ॥ ८७५
अन्यच्च कारणं तत्र स्थितं हि बलवत्तरम् ।
येन तत्र तकारस्य न तावत् स्यात् सकारता ॥ ८७६
"त्वाहौ सौ" च स्थितं सूत्रं मुनिनेह प्रयोजितम् ।
उच्चारणं तकारस्य विशिष्टेह विधीयते ॥ ८७७
उच्चार्य्येह तकारं तं दर्शयति च सूत्रकृत् ।
तकारो हि यदा तिष्ठेत् न तस्य स्यात् सकारता ॥ ८८७
तकारस्य सकारश्चेत् मुनेरिष्टो भवेदिह ।
"स्वाहौ" चेति तदा ब्रूयात् त्वाहौ ब्रूयात् मुनिर्न च ॥ ८७९
उच्चारणस्य सामर्थ्यात् तकार एव वर्त्तते ।
न तस्य च सकारः स्यात् प्रकृते हि कथञ्चन ॥ ८८०
वार्त्तिकस्य चानुवृत्तेर्नास्ति किञ्चित् प्रयोजनम् ।
अनुवृत्तिर्भवेद व्यर्था मतमेतद् भवेद् हि नः ॥ ८८१

उत्तरपक्षः

उच्चारणात् तकारस्य सकारो न भवेदिह ।
वार्तिकस्य चानुवृत्तिः पुनर्व्यर्था भवेदिह ॥ ८८२
इति यत् भवता प्रोक्तं न तत् न्याय्यं भवेत् खलु ।
अनुवृत्ति र्न व्यर्था स्यात् स्थितं तस्य प्रयोजनम् ॥ ८८३

अनुवृत्ति र्न चेत् तत्र भवेदेव सकारता ।
त्यादादीनां गणे शब्दः यतः खलु प्रवर्त्तते ॥ ८८४
उच्चारणं तकारस्य न च पुनर्निरर्थकम् ।
अस्तित्वम् स्याद् यदा गौणे तदा तस्य प्रयोजनम् ॥ ८८५

पूर्व्वपक्षः

त्वं यदा च भवेत् स्त्रियाम् अहं स्त्रियां भवेद् यदा ।
तदापि च भवेत् "त्व अम्" "अह अम्" स्यात् तदापि च ॥ ८८६
प्रत्ययष्टा तदा च स्याद् अन्तरङ्गं प्रवर्त्तते ।
वहिरङ्गं परं चापि पूर्व्वरूपं च वाध्यते ॥ ८८७

उत्तरपक्षः

न युष्मदः स्थितं लिङ्गं न लिङ्गम् अस्मदः स्थितम् ।
अलिङ्गे युष्मदस्मदौ न तस्मात् टाप् भवेत् स्त्रियाम् ॥ ८८८

पृथक् इह समाधानं केषाञ्चिच्च पुनः स्थितम् ।
तदपि भवतां तृप्त्यै दर्शयामि परे पुनः ॥ ८८९

"शेषे लोपः" स्थितं सूत्रं तस्य-व्याख्या पृथक् भवेत् ।
शेषस्येति च षष्ठ्यर्थः इह तावत् प्रतीयते ॥ ८९०
सः शिष्येते स शेषः स्यात् तस्य लोपो भवेदिह ।
अद् इह च भवेच् शेषस्तस्य लोपो विधीयते ॥ ८९१

त्व अद् तत्र स्थितं तावत् अह अद् च स्थितं पुनः ।
आदौ भवेदन्तरङ्गम् अतो गुणे प्रयुज्यते ॥ ८९२
अतो गुणे यदा युक्तं पररूपं भवेत् तदा ।
त्वद् तदा च भवेत्तत्र भवेद् अहद् तदा पुनः ॥ ८९३
अदो लोपः पुनः पश्चात् तत्र तावद् विधीयते ।
तदा तत्र भवेत् तावत् "त्व्" भवेद् अह् च तदा पुनः ॥ ८९४
हलन्तं च भवेद् द्वयम् अदन्तं न भवेत् पुनः ।
"अजाद्यतः" न तस्मात् स्यात् टाप् तदा न प्रयुज्यते ॥ ८९५
परमत्वम् पदं च स्यात् परमाहं पदं भवेत् ।
"ङे" चेति च स्थितं सूत्रं तदन्तेऽपि प्रयुज्यते ॥ ८९६

अतिस्वम् स्यात् तथा तत्र स्याद् अन्त्यहं तथा पुनः ।
"ङे" चेति च भवेद् गौणो न बाधा च प्रवर्त्तते ॥ ८९७

३८६ । युवावौ द्विवचने । ७।२।९२

युष्मद् अस्मद् यदा शब्दो द्विवचनं भवेद् यदा ।
युवावौ मपर्य्यन्तस्य विभक्तौ च परे तदा ॥ ८९८

युष्मद् यदा स्थितः शब्दः अस्मद् शब्दो भवेद् यदा ।
युव अद् स्यात् तदा तत्र आव अद् च तदा भवेत् ॥ ८९९
"शेषे लोपः" स्थितं सूत्रं तत् प्राप्तश्च भवेदिह ।
एवं यदा भवेत् प्राप्तं सूत्रं परं प्रयुज्यते ॥ ९००

३८७ । प्रथमायाश्च द्विवचने भाषायाम् । ७।२।८८

युष्मद् यदा भवेच्च शब्दः शब्दश्चास्मद् भवेद् यदा ।
अन्तादेश आकारः स्यात् भाषायां हि तथा भवेत् ॥ ९०१

आकारश्च दकारस्य यदा चैवं प्रसज्यते ।
"युव अ आ" तदा भवेत् "आव अ आ" तदा भवेत् ॥ ९०२
अकारयोश्च पूर्वयोः पररूपं तदा भवेत् ।
युव आ स्यात् तदा तत्र आव आ स्यात् तदा पुनः ॥ ९०३
ततः सवर्णदीर्घश्च पुनस्तत्र प्रसज्यते ।
युवा भवेत् तदा तत्र भवेत् आवा तदा पुनः ॥ ९०४
"ङे" चेति च स्थितं तत्र भवेद् अम् च पुनस्तथा ।
युवा अम् च तथा तावत् आवा अम् च तथा भवेत् ॥ ९०५
"अमि पूर्व्वः" भवेद् योज्यं पूर्व्वरूपं भवेत् तथा ।
युवाम् भवेत् पदं तत्र पदम् आवाम् तदा भवेत् ॥ ९०६

भाषायान्तु भवेदेवं वैदिके न तथा भवेत् ।
"युवं वस्त्राणि" वेदे स्यात् इह "युवम्" "युवाम्" च न ॥ ९०७

पदं च "मपर्य्यन्तस्य" पूर्व्वादिहानुवर्त्तते ।
मपर्य्यन्तं भवेद् ग्राह्यं तदधिकं न गृह्यते ॥ ९०८
अधिकं चेद् गृहीतं स्याद् अनिष्टं तु तदा भवेत् ।
अकच् चेत् प्रत्ययस्तत्र युवाम् आवाम् भवेत् तदा ॥ ९०९

युवकाम् न भवेत्तत्र न भवेदावकाम् पुनः ।
"युवकाम्" च भवेद् इष्टम् इष्टं स्याद् "आवकाम्" पदम् । ६१०

मपर्य्यन्तं भवेद् ग्राह्यं तदधिकं न गृह्यते ।
अधिकं चेद् गृहीतं स्यात् त्वा म्या तदा पदं भवेत् ॥ ६११
यदा त्वा स्यात् यदा म्या स्यात् अनिष्टं स्यात् तदा पुनः ।
तया भवेत् पदमिष्टम् इष्टं पदं भवेत् मया ॥ ६१२
मपर्य्यन्तं भवेद् ग्राह्यं तदधिकं न गृह्यते ।
अधिकं चेत् गृहीतं स्यात् अनिष्टं स्यात् तदा पुनः ॥ ६१३
युवकाभ्याम् भवेदिष्टं पदमिष्टं न सिध्यति ।
आवकाभ्याम् भवेदिष्टं न सिध्यति पुनश्च तत् ॥ ६१४
युष्मद् अष्मद् यदा शब्दः प्रत्ययो जश् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ६१५

३८८ । यूयवयौ जसि । ७।२।९३

यदा युष्मद् यदा जश् स्यात् अष्मद् यदा यदा च जश् ।
"यूय" भवेत् समादेशः समादेशो भवेद् "वय" ॥ ६१६

यदा "यूय" समादेशो समादेशो यदा "वय" ।
पदं तदा भवेद् यूयम् भवेद् वयं पदं तदा ॥ ६१७
आङ्गत्वात्र विधिस्तत्र पदान्तऽपि प्रयुज्यते ।
भवेत् परमयूयम् च स्यात् परमवयं तथा ॥ ६१८
गौणेऽपि च विधिस्तत्र सममेव प्रयुज्यते ।
अतियुयं पदं च स्याद् अतिवयं पदं भवेत् ॥ ६१९

पूर्व्वपक्षः

युष्मद् अष्मद् यदा शब्दः प्रत्यय औ परे यदा ।
"शेषे लोपः" स्थितं सूत्रम् तदा च तत् प्रयुज्यते ॥ ६२०
अन्त्यस्य च भवेल्लोपः सूत्रं यदा प्रवर्त्तते ।
"युष्म" भवेत् तदा तत्र "अष्म" भवेत् तदा पुनः ॥ ६२१
अकारान्तो भवेद् "युष्म" भवेद् "अष्म" तथैव च ।
"जशः शी" च स्थितं सूत्रं शीभावश्च तथा भवेत् ॥ ६२२

उत्तरपक्षः

शीभावो न भवेदत्र न शीभावः प्रवर्त्तते ।
परिभाषा स्थिता शास्त्रे सा प्रमाणं भवेदिह ॥ ६२३

अङ्गकार्य्ये कृते पुन नाङ्गकार्य्यम् (प)

अङ्गकार्य्ये कृते तत्र नाङ्गकार्य्यं भवेत् पुनः ।
"शेषे लोपः" प्रयुक्तं च "जशः शी" न प्रयुज्यते ॥ ६२४

शीभावो न भवेत्तत्र स्थितमन्यत् च कारणम् ।
कारणं तु भवेदत्र यथा वच्मि परे पुनः ॥ ६२५
सूत्रं "ङे प्रथमयोरम्" इति तत्र प्रवर्त्तते ।
प्रश्लेषेण मकारश्च द्वितीयोऽपि भवेदिह ॥ ६२६
प्रश्लेषेण पुनस्तत्र तदिदं ज्ञापितं भवेत् ।
मान्त एव स तिष्ठेद् "अम्" न तस्य विकृतिः क्वचित् ॥ ६२७

युष्मद् अस्मद् यदा शब्दः अम्प्रत्ययः परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ६२८

३८९ । त्वमावेकवचने । ७।२।९७

युष्मद् अस्मद् यदा शब्दः स्यादेकवचनं यदा ।
"त्व" भवेच्च समादेशः समादेशो भवेच्च "म" ॥ ६२९

"त्व अद अम्" च तदा तत्र "म अद् अम्" च तदा पुनः ।
एवं यदा स्थितं तत्र सूत्रं परं प्रयुज्यते ॥ ६३०

३९० । द्वितीयायां च । ८।२।८७

युष्मद् अस्मद् यदा शब्दः द्वितीया च परे यदा ।
आकारश्च तदा तत्र तयोर्भवेदिति स्थितिः ॥ ६३१

त्व अ आ अम् तथा तत्र म अ आम् अम् तथा पुनः ।
त्वाम् भवेच्च पदं तत्र माम् भवेच्च पुनः पदम् ॥ ६३२

युवाम् भवेत् पदं तत्र पदम् आवाम् भवेत् पुनः ।
पूर्व्ववच्च भवेद् रूपं विशेषश्च न वर्त्तते ॥ ६३३

युष्मद् अष्मद् यदा शब्दः द्वितीया च परे यदा ।
सूत्रं तदा भवेद् योग्यं यथा परे प्रदर्शितम् ॥ ६३४

३९१ । शसो न । ७।१।२९

युष्मद् अष्मद् यदा शब्दः प्रत्ययः शस् परे यदा ।
शसस्तत्र नकारः स्यात् न तावदम् प्रवर्त्तते ॥ ६३५

युष्मद् शस् च यदा हि स्यात् अष्मद् शस् च यदा भवेत् ।
"युष्म न् स् स्याच्च तदा तत्र "अष्म न् स्" स्याच्च तदा पुनः ॥ ६३६
"संयोगान्तस्य लोपः" स्यात् सकारश्च विलुप्यति ।
"युष्म न्" स्याच्च तदा तत्र "अष्म न्" स्याच्च तदा पुनः ॥ ६३७
"द्वितीयायाम्" भवेद् योज्यम् आकारः स्यात् पुनस्तथा ।
युष्मान् भवेत् पदं तत्र पदम् अष्मान् तथा भवेत् ॥ ६३८
शसो यदा नकारः स्यात् अकारस्य भवेत् तदा ।
सूत्रम् "आदेः परस्य" स्यात् परस्यादेस्तथा भवेत् ॥ ६३९
युष्मद् आ च यदा तत्र अष्मद् आ च यदा पुनः ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ६४०

३९२ । योऽचि । ७।२।८९

युष्मद् अष्मद् यदा शब्दः अजादिका परे यदा ।
स्यादनयोः यकारश्च आदेशश्चेत् तदा तु न ॥ ६४१

दकारस्य यकारश्च यदा तथा प्रवर्त्तते ।
त्वया भवेत् पदं तत्र पदं तत्र भवेत् मया ॥ ६४२

युष्मद् भ्याम् च यदा तत्र अष्मद् भ्याम् च यदा पुनः ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ६४३

३९३ । युष्मदष्मदोरनादेशे । ७।२।८६

युष्मद् अष्मद् यदा शब्दः हलादिका परे यदा ।
आकारः स्यात् तदा तयोः आदेशश्चेत् तदा तु न ॥ ६४४

आकारः स्याद् यदा तत्र युवाभ्याम् च पदं भवेत् ।
आकारः स्याद् यदा तत्र आवाभ्याम् च भवेत् पदम् ॥ ६४५

युष्माभिः स्यात् पदं तत्र विशेषश्च न वर्त्तते ।
अस्माभिः स्यात् पदं तद्वत् न विशेषः स्थितः पुनः ॥ ९४६
युष्मद् ङे स्यात् यदा तत्र अस्मद् ङे स्यात् यदा पुनः ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ९४७

३९४ । तुभ्यमह्यौ ङयि । ७।२।९५

युष्मद् अस्मद् यदा शब्दः प्रत्ययो ङे परे यदा ।
"तुभ्य" भवेत् भवेत् "मह्य" समादेशो यथाक्रमम् ॥ ९४८

अमादेशो भवेत्तत्र "शेषे लोपः" भवेत् पुनः ।
तुभ्यम् भवेत् तदा तत्र मह्यम् भवेत् पुनः पदम् ॥ ९४९

पदं स्यात् परमतुभ्यम् पदान्तेऽपि विधिर्भवेत् ।
पदं स्यात् परममह्यम् तदन्ते च भवेद् विधिः ॥ ९५०
अतितुभ्यम् पदं च स्यात् गौणो चापि भवेद् विधिः ।
अतिमह्यम् पदं च स्यात् गौणो विधिः प्रयुज्यते ॥ ९५१

युवाभ्याम् स्यात् पदं तत्र पूर्व्ववच्च भवेदिह ।
आवाभ्याम् स्यात् पदं तत्र भवेदिह च पूर्व्ववत् ॥ ९५२

युष्मद् यदा भवेच्च शब्दः अस्मद्शब्दो भवेद् यदा ।
प्रत्ययो भ्यस् परे यत्र सूत्रं तदा परं भवेत् ॥ ९५३

३९५ । भ्यसो भ्याम् । ७।१।३०

युष्मद् अस्मद् यदा शब्दः प्रत्ययो भ्यम् परे यदा ।
भ्यम् भवेद् वा समादेशः अभ्यम् वापि भवेत् भ्यसः ॥ ९५४
यदा युष्मद् यदा भ्यस् च युष्मभ्यं च पदं भवेत् ।
अस्मद् यदा यदा भ्यस् च स्याद् अस्मभ्यः पदं तदा ॥ ९५५
भ्यसो भ्यम् च स्थितं सूत्रं संशयस्तु भवेदिह ।
समादेश इह स्याद् भ्यम् अभ्यम् स्यादथवा पुनः ॥ ९५६
सूत्रमिदं द्विधा छेत्तुं शक्यं भवेदिति स्थितिः ।
"भ्यसः भ्यम्" च भवेच्छेदः "भ्यसः अभ्यम्" भवेदपि ॥ ९५७

"भ्यसः भ्यम्" चेद् भवेच्छेदः भ्यमिह चेत् भवेत् पुनः ।
"शेषे लोपः" स्थितं सूत्रं रूपद्वयं तदा भवेत् ॥ ९५८
दकारस्य यदा लोपो युष्म भ्यम् स्यात् तदा पुनः ।
अदो लोपो यदा तत्र युष्म् भ्यम् भवेत् पुनस्तदा ॥ ९५९

"भ्यसः अभ्यम्" यदा छेदः स्याद् अभ्यम् च यदा पुनः ।
"शेषे लोपः" स्थितं सूत्रं रूपद्वयं तदापि च ॥ ९६०
दकारस्य यदा लोपः युष्म अभ्यम् तदा भवेत् ।
अदो लोपो यदा तत्र युष्म् अभ्याम् च भवेत्तदा ॥ ९६१

युष्मद् यदा भवेत्तत्र रूपचतुष्टयं भवेत् ।
अष्मद् यदा भवेत्तत्र भवेदेवं तदापि च ॥ ९६२

पूर्व्वपक्षः

प्रथमं चेद् भवेद् रूपं "युष्म भ्यम्" चेद् भवेदिह ।
सूत्रं "बहुवचने" च तदा तत्र प्रयुज्यते ॥ ९६३
एकारः स्यात् तथा तत्र युष्मेभ्यम् स्यात् पदं तदा ।
तत् पदं न भवेदिष्टम् अनिष्टं तु तदा भवेत् ॥ ९६४

उत्तरपक्षः

सूत्रं "बहुवचने" च नेह तावत् प्रयुज्यते ।
एकं यदि भवेदाङ्गम् अन्यदाङ्गं भवेन्न च ॥ ९६५
"शेषे लोपः" प्रयुक्तं च सूत्रमाङ्गं भवेदिदम् ।
आङ्गं "बहुवचने" च तस्मादिदं न युज्यते ॥ ९६६
एकारो न भवेत्तत्र युष्मेभ्याम् न भवेत् पदम् ।
युष्मभ्याम् स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ९६७

द्वितीयश्चेद् भवेद् पक्षः "युष्म् भ्याम्" यदा भवेत् ।
न तत्र च भवेत् पदं पदं तत्र न लभ्यते ॥ ९६८

तृतीयश्च यदा पक्षः "युष्म अभ्यम्" यदा भवेदिह ।
युष्मभ्यम् स्यात् पदं तत्र पदमिष्टं भवेत् तदा ॥ ९६९

चतुर्थश्च यदा पक्षः "युष्म् अभ्यम्" च भवेद् यदा ।
युष्मभ्यम् स्यात् पदं तत्र पदमिष्टं तदापि च ॥ ९७०

अष्मद् भ्यम् च यदा तत्र भवेदेव तदापि च ।
अष्मभ्यम् स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ९७१
युष्मद् अष्मद् यदा शब्दः ङसिर्यदा भवेत् परे ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ९७२

३९६। **एकवचनस्य च।** ७।१।३२

युष्मद् अष्मद् यदा शब्दः तदा स्याद् अत् इति स्थितिः ।
पञ्चम्यामेकवचनं यदा परे प्रवर्त्तते ॥ ९८३

युष्मद् यदा भवेच् शब्दः पदं त्वत् च तदा भवेत् ।
अष्मद् यदा भवेच् शब्दः पदम् मत् च भवेत् तदा ॥ ८७४

युष्मद् यदा यदा भ्याम् स्यात् युवाभ्याम् च पदं भवेत् ।
युष्मद् यदा यदा भ्याम् स्यात् आवाभ्याम् स्यात् पदं तदा ॥ ९७५
युष्मदष्मद् यदा शब्दः प्रत्ययो भ्यस् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ९७६

३९७। **पञ्चम्या अत्।** ७।२।३१

युष्मदष्मद् यदा शब्दः पञ्चम्यां भ्यस् परे यदा ।
समादेशस्तदा स्यादत् इति स्थितिर्भवेदिह ॥ ९७७

युष्मद् यदा भवेच् शब्दः पदं युष्मत् तथा भवेत् ।
अष्मद् यदा भवेच् शब्दः पदम् अष्मत् भवेत् तथा ॥ ९७८
युष्मद् अष्मद् यदा शब्दः प्रत्ययो ङस् यदा परे ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ९७९

३९८। **तवममौ ङसि।** ७।२।९६

युष्मदष्मद् यदा शब्दः प्रत्ययो ङस् परे यदा ।
अनयोर्मपर्य्यन्तस्य तव मम भवेत् तदा ॥ ९८०

युष्मद् अष्मद् यदा तत्र तत्र मम भवेद् यदा ।
सूत्रं पुनर्भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ९८१

३९९। **युष्मदष्मद्भ्याम् ङसोऽश्।** ७।१।२७

युष्मद् अष्मद् यदा शब्दः प्रत्ययो ङस् परे यदा ।
समादेशो ङसः स्थाने तदा स्याद् अश् इति स्थितिः ॥ ९८२

तव अश् स्यात् तदा तत्र मम अश् स्यात् तदा पुनः ।
"अतोगुणे" भवेद् योज्यं तव मम भवेद् तदा ॥ ६८३

युष्मदष्मद् यदा शब्दः प्रत्यय ओस् परे यदा ।
युवयोरावयोः स्याच्च तथा तया पदं भवेत् ॥ ६८४

युष्मद् अष्मद् यदा शब्दः प्रत्यय आम् यदा परे ।
पदं यदा भवेत् साध्यं सूत्रं परं तदा भवेत् ॥ ६८५

४०० । साम आकम् । ७।१।३३

युष्मद अष्मद् यदा शब्दः प्रत्ययः आम् परे यदा ।
साम आकम् तदा तत्र समादेशः प्रयुज्यते ॥ ६८६

युष्मद् यदा भवेच्च शब्दः युष्माकं च पदं भवेत् ।
अष्मद् यदा भवेच्च शब्दः अष्माकं स्यात् पदं तदा ॥ ६८७

पूर्व्वपक्षः

"साम" इति पदं सूत्रे मुनिनेह प्रयोजितम् ।
"साम" इति सुटा तत्र विधानं च न युज्यते ॥ ६८८
"युष्मद् आम् स्याद् यदा रूपम् "अष्मद् आम" स्याद यदा पुनः ।
अवर्णान्तात् परत्वं न तस्मात् सुट् न प्रसज्यते ॥ ६८९
यदा तत्र भवेद् आकम् न सुट् तदा भवेदिह ।
न यदा सुट् तदा सुटा विधानं च न युज्यते ॥ ६९०
यस्मिन् काले भवेद् आकम् तस्मिन् काले न सुट् स्थितम् ।
न यदा सुट् तदा सुटा विधानं वा भवेत् कथम् ॥ ६९१

उत्तरपक्षः

प्रक्रियायां प्रवृत्तायां पश्चाच्च सुट् भविष्यति ।
भाविनं सुटमादाय विधानं कुरुते मुनिः ॥ ६९२
प्रक्रियायां यदा सूत्रं "शेषे लोपः" प्रसज्यते ।
दकारस्य तदा तत्र भवेत् खलु विलोपनम् ॥ ६९३
युष्म आम् स्यात् तदा रूपम् अष्म आम् स्यात् तदा पुनः ।
"आमि" चेति प्रयोज्यं स्यात् सुट् तदा च प्रसज्यते ॥ ६९४
एवमिह यदा पश्चात् आमि सुट् च प्रवर्त्तते ।
एवमिह यदा पश्चात् आम् भवेच्च सुटा सह ॥ ६९५

सुटा सह तदा तावद आम आकम् भवेदिह ।
मिलितयोस्तयोस्तत्र भवेद् आकमिति स्थितिः ॥ ৯৯৬
मिलितयोस्तयोस्तत्र भवेद् आकम् यदा पुनः ।
सुट् तदा च पृथक् स्थातु प्रसरं लभते न हि ॥ ৯৯৭
मिलितयोस्तयोस्तत्र समादेशो भवेद् यदा ।
पृथक् सत्त्वं सुटस्तत्र निवृत्तं स्याद् यदा पुनः ॥ ৯৯৮
भविष्यतः सुटस्तत्र निवृत्तिः स्याद् यथा खलु ।
मुनिना च तथा सूत्रे विधानं क्रियते सुटा ॥ ৯৯৯

"साम आकम्" भवेत् सुटा सूत्रं न चेत् तथा भवेत् ।
विना सुटम् "आम आकम्" इति सूत्रं भवेद् यदि ॥ ১০০০
अनिष्टं तु तदा तत्र महद् आपतितं भवेत् ।
इष्टं पदं यदत्र स्यात् तदिह च न सिध्यति ॥ ১০০১
प्रक्रियायां यदा सूत्रं "शेषे लोपः" प्रयुज्यते ।
दकारस्य यदा तत्र भवेन् खलु विलोपनम् ॥ ১০০২
युष्म आम् स्यात् तदा रूपम् अस्म आम् स्यात् तदा पुनः ।
युष्म आकम् भवेत् पश्चात् अस्म आकम् पुनर्भवेत् ॥ ১০০৩
"आमि" चेति भवेद् योज्यम् सुट् तदा च प्रसज्यते ।
भवेद् एत्वं भवेन् षत्वं भवेद् द्वयं यथायथम् ॥ ১০০৪
युष्मेषाकम् पदं च स्याद् अस्मेषाकं भवेत् पदम् ।
अनिष्टं तु तदा तत्र महदापतितं भवेत् ॥ ১০০৫
युष्माकं च पदमिष्टं तदिह च स सिध्यति ।
अस्माकं च पदमिष्टं न सिध्यति पुनश्च तत् ॥ ১০০৬
सुटा यदा विधानं स्यात् निवृत्तिः स्यात् तदा सुटः ।
युष्माकम् स्यात् पदं तावत् अस्माकं च पदं भवेत् ॥ ১০০৭
त्वयि भवेत् पदं तत्र मयि भवेत् पदं पुनः ।
युवयोः स्यात् पदं तत्र पदं स्यादावयोस्तथा ॥ ১০০৮
युष्मासु स्यात् पदं तावद् अस्मासु च पदं भवेत् ।
सर्व्वासु च विभक्तिषु पदं मया प्रदर्शितम् ॥ ১০০৯
युष्मद् अस्मद् यदा शब्दः समासे च प्रवर्त्तते ।
तदा पदं कथं सिध्येद् इति प्रश्नो भवेदिह ॥ ১০১০

"त्वमौ" चेति स्थितं सूत्रं तेन पदं प्रसिध्यति ।
"युवावौ" च स्थितं सूत्रं सिध्यति च पदं तथा ॥ १०११
"त्वमावेकवचने" च सूत्रमिह स्थितं च यत् ।
तत्रै "कवचन"शब्दः योगिको गृह्यते खलु ॥ १०१२
"युवावौ द्विवचने" च सूत्रमिह स्थितं च यत् ।
तत्र "द्विवचन"-- शब्दः योगिको गृह्यते पुनः ॥ १०१३
युष्मद् अष्मद् यदा तत्र समासे च प्रयुज्यते ।
व्याख्यामिमां समाश्रित्य तदा गतिर्भवेदिह ॥ १०१४
इह च कारिकाः काश्चित् प्राचीनानां स्थिताः खलु ।
सव्याख्याः कारिकाश्च ताः दर्शयामि परे पुनः ॥ १०१५

कारिका

समस्यमाने द्व्येकत्ववाचिनी युष्मदष्मदो ।
समासार्थोऽन्यसंख्यश्चेत् स्तो युवावौ त्वमावपि ॥ १

व्याख्या

एके यदा भवेद् युष्मद् अष्मद एके यदा भवेत् ।
पदस्य च समस्तस्य संख्या वा स्याद् यथा तथा ॥ १०१६
"त्वमौ" चेति स्थितं सूत्रं तदेव हि प्रयुज्यते ।
त्वमौ तत्र समादेशौ तदा स्यातामिति स्थितिः ॥ १०१७
सु जश् ङे ङस् इति तत्र विहाय च चतुष्टयम् ।
सप्तदशविभक्तिषु शिष्टासु च विधिर्भवेत् ॥ १०१८
द्वित्वे यदा भवेद् युष्मद् अष्मद् द्वित्वे भवेद् यदा ।
पदस्य च समस्तस्य संख्या वा स्यात् यथा तथा ॥ १०१९
"युवावौ" च स्थितं सुत्रं तदेव हि प्रयुज्यते ।
युवावौ च समादेशौ तदा स्यातामिति स्थितिः ॥ १०२०
सु जश् ङे ङस् इति तत्र विहाय च चतुष्टयम् ।
सप्तदशविभक्तिषु शिष्टासु च विधिर्भवेत् ॥ १०२१

कारिका

सु-जश्-ङे-ङस्सु परत आदेशाः स्युः सदैव ते ।
"त्वाहौ" "यूयवयौ" "तुभ्यमह्यौ" "तवममा"वपि ॥ २

व्याख्या

एके यदा भवेद् युष्मद् अस्मद् एके भवेद् यदा ।
पदस्य च समस्तस्य संख्या वा स्याद् यथा तथा ॥ १०२२
सु यदा स्यात् तदा "त्वाहौ" सूत्रं खलु प्रयुज्यते ।
जश् यदा स्यात् तदा तत्र "यूयवयौ" प्रवर्त्तते ॥ १०२३
ङे यदा स्यात् तदा तत्र "तुभ्यमह्यौ" भवेत् पुनः ।
ङस् यदा स्यात् तदा तत्र "तवममौ" प्रसज्यते ॥ १०२४
चतुर्षु च विभक्तिषु पदं तथा प्रसिध्यति ।
सप्तदशसु यथा सुस्तथा पूर्व्वं प्रदर्शितम् ॥ १०२५

द्वित्वे यदा भवेद् युष्मद् अस्मद् द्वित्वे भवेद् यदा ।
पदस्य च समस्तस्य संख्या वा स्यात् यथा तथा ॥ १०२६
सु यदा स्याद तदा "त्वाहौ" सूत्रं खलु प्रयुज्यते ।
जश् यदा स्यात् तदा तत्र "यूयवयौ" प्रवर्त्तते ॥ १०२७
ङे यदा स्यात् तदा तत्र "तुभ्यमह्यौ" पुनर्भवेत् ।
ङस् यदा स्याद् तदा तत्र "तवममौ" प्रवर्त्तते ॥ १०२८
चतुर्षु च विभक्तिषु पदं तथा प्रसिध्यति ।
सप्तदशसु यथा स्युस्तथा पूर्व्वं प्रदर्शितम् ॥ १०२९

कारिका

एते परत्वाद् बाधन्ते युवावौ विषये द्वके ।
त्वमावपि प्रबाधन्ते पूर्व्वविप्रतिषेधतः ॥ ३

व्याख्या

पूर्व्वपक्षः

द्वित्वे यदा भवेद् युष्मद् अस्मद् द्वित्वे भवेत् यदा ।
सु जश् ङे ङस् यदा तत्र "युवावौ" स्यात् तदापि च ॥ १०३०
एके यदा भवेद् युष्मद् अस्मद् एके यदा भवेत् ।
सु जश् ङे ङस् यदा तत्र "त्वमौ" भवेत् तदापि च ॥ १०३१

उत्तरपक्षः

द्वित्वे यदा भवेद् युष्मद् अस्मद् द्वित्वे यदा भवेद् ।
सु जश ङे ङस् यदा तत्र "युवावौ" तु न युज्यते ॥ १०३२

"युवावौ" च स्थितं पूर्व्वं "त्वाहा"—दिकं परे स्थितम् ।
वाधितं च भवेत् पूर्व्वं परमेव प्रवर्त्तते ॥ १०३३
एके यदा भवेद् युष्मद् अष्मद् एके यदा भवेत् ।
सु जश् ङे ङस् यदा तत्र "त्वमौ" तदा न युज्यते ॥ १०३४
"त्वमौ" परे स्थितं सत्यं तथापि तद् न युज्यते ।
सत्यपि विप्रतिषेधे क्वचित् पूर्व्वं प्रवर्त्तते ॥ १०३५

कारिका

द्व्येकसङ्ख्यः समासार्थौ वह्वर्थे युष्मदष्मदी ।
तयोरेद्व्येकतार्थत्वान्न युवावौ त्वमौ च न ॥ ४

व्याख्या

युष्मद् अष्मद् यदा तत्र वहुत्वे च प्रवर्त्तते ।
एकत्वम् अथवा द्वित्वं समासार्थौ भवेद् यदा ॥ १०३६
"युवावौ" च "त्वमौ" तत्र तदा खलु न युज्यते ।
एकत्वमथवा द्वित्वं युष्मदो न न चाष्मदः ॥ १०३७
एकत्वं चेद् भवेदर्थस्तदा "त्वमौ" प्रवर्त्तते ।
युष्मदश्चाष्मदस्तत्र न चैकत्वं स्थितं खलु ॥ १०३८
द्वित्वं यदा भवेदर्थो "युवावौ" च तदा भवेत् ।
युष्मदश्चाष्मदस्तत्र न हि द्वित्वं स्थितं खलु ॥ १०३९
एकत्वम् अथवा द्वित्वं कारणं न यदा स्थितम् ।
"त्वमौ" चेति "युवावौ" वा तदा कार्य्यं भवेत् कथम् ॥ १०४०

युष्मद् अष्मद् यदा शब्दः समासे च प्रवर्त्तते ।
पदं यदा भवेत् साध्यं कारिका च भवेत् तदा ॥ १०४१
कारिकां तु समाश्रित्य साध्यं पदं यथायथम् ।
पदं यथा भवेत् तत्र तथा परे प्रदर्शितम् ॥ १०४२

अतियुष्मद् = अतिक्रान्तस्त्वाम् (युष्मद् एकत्वे)
अति-अष्मद् = अतिक्रान्तः माम् (अष्मद् एकात्वे)

प्रथमा

अतित्वम् स्याद् अतित्वाम् स्यात् अतियूयम् पदं भवेत् ।
अत्यहं स्याद् अतिमाम् स्यात् अतिवयं भवेत् पदम् ॥ १०४३

द्वितीया

अतित्वाम् स्यात् अतित्वाम् स्यात् अतित्वान् च पदं भवेत् ।
अतिमाम् स्यात् अतिमाम् स्यात् अतिमान् च भवेत् पदम् ॥ १०४४

तृतीया

अतित्वया अतित्वाभ्याम् अतित्वाभिः पदं भवेत् ।
अतिमया अतिमाभ्याम् अतिमाभिः भवेत् पदम् ॥ १०४५

चतुर्थी

अतितुभ्यम् अतित्वाभ्याम् अतित्वभ्यं पदं भवेत् ।
अतिमह्यम् अतिमाभ्याम् अतिमभ्यं भवेत् पदम् ॥ १०४६

पञ्चमी

अतित्वत् स्यात् अतित्वभ्याम् अतित्वत् च पदं भवेत् ।
अतिमत् स्यात् अतिमभ्याम् अतिमत् च भवेत् पदम् ॥ १०४७

षष्ठी

अतितव अतित्वयोः अतित्वाकम् पदं भवेत् ।
अतिमम अतिमयोः अतिमाकं भवेत् पदम् ॥ १०४८

सप्तमी

अतित्वयि अतित्वायोः अतित्वासु पदं भवेत् ।
अतिमयि अतिमयोः अतिमासु भवेत् पदम् ॥ १०४९

अतियुष्मद् = अतिक्रान्तो युवाम् (युष्मद् द्वित्वे)

अति-अष्मद् — अतिक्रान्त आवाम् (अष्मद् द्वित्वे)

प्रथमा

अतित्वम् स्याद् अतियुवाम् अतियूयं पदं भवेत् ।
अत्यहम् स्यात् अत्यावाम् स्याद् अतिवयं भवेत् पदम् ॥ १०५०

द्वितीया

अतियुवाम् अतियुवाम् अतियुवान् पदं भवेत् ।
अत्यावाम् स्याद् अत्यावाम् स्याद् अत्यावान् च भवेत् पदम् ॥ १०५१

तृतीया

स्यादतियुवया तत्र टा यदि च परे भवेत् ।
भवेद् अतियुवाभ्याम् च यदा भ्याम् च भवेत् परे ॥ १०५२
भवेद् अतियुवाभिश्च भिस् यदि स्यात् परे पुनः ।
युष्मद् यदा भवेद् द्वित्वे तदा पदं भवेत्-तथा ॥ १०५३

अत्यावया पदं च स्याद् अत्यावाभ्याम् पदं भवेत् ।
अत्यावभिः पदं च स्यात् अष्मद् द्वित्वे भवेद् यदा ॥ १०५४

चतुर्थी

अतितुभ्यम् पदं च स्यात् ङे यदि च परे भवेत् ।
भवेद् अतियुवभ्याम् च भ्याम् यदा च भवेत् परे ॥ १०५५
भवेद् अतियुवभ्यम् च भ्यम् यदि च परे भवेत् ।
युष्मद् यदा भवेद् द्वित्वे तदा रूपं भवेत् तथा ॥ १०५६
अतिमह्यम पदं च स्याद् अत्यस्माभ्याम् भवेत् पदम् ।
अत्यस्मभ्यम् पदं च स्याद् अस्मद् द्वित्वे यदा भवेत् ॥ १०५७

पञ्चमी

अतियुष्मद् पदं च स्यात् ङस् यदा च भवेत् परे ।
भवेद् अतियुष्माभ्याम् च भ्याम् यदा च परे भवेत् ॥ १०५८
अतियुष्मत् पदं च स्यात् भ्यम् यदि च भवेत् परे ।
युष्मद् यदा भवेद् द्वित्वे तदा रूपं तथा भवेत् ॥ १०५९
अत्यस्मत् स्यात् पदं तत्र यदा ङस् च परे भवेत् ।
अत्यस्मभ्याम् पदं च स्यात् यदा भ्याम् च भवेत् परे ॥ १०६०
अत्यस्मत् स्यात् पदं तत्र भ्यस् यदा च परे भवेत् ।
अष्मद् यदा भवेद् द्वित्वे पदं तदा भवेत् तथा ॥ १०६१

षष्ठी

अतितव पदं च स्याद् ङस् यदा च परे भवेत् ।
स्याद् अतियुष्मयोः पदम् ओस् यदा च भवेत् परे ॥ १०६२
पदं स्याद् अतियुष्माकम् आम् यदि स्यात् परे पुनः ।
युष्मद् यदा भवेद् द्वित्वे पदं तदा तथा भवेत् ॥ १०६३
अतिमम पदं च स्याद् ङस् यदा च परे भवेत् ।
अत्यस्मयाः पदं च स्यात् ओस् यदा च भवेत् परे ॥ १०६४
अत्यस्माकम् पदं च स्यात् आम् यदा च परे भवेत् ।
अष्मद् यदा भवेद् द्वित्वे तदा रूपं भवेत् तथा ॥ १०६५

सप्तमी

पदम् अतियुष्मयि स्यात् ङि परे चेत् प्रवर्त्तते ।
पदम् अतियुष्मयोः स्यात् औस् इह चेत् परे भवेत् ॥ १०६६

पदम् अतियुष्मासु स्यात् सुप् यदि च परे भवेत् ।
युष्मद् यदा भवेद् द्वित्वे तदा रूपं भवेत् तथा ॥ १०६७
अत्यस्मयि पदं च स्याद् अत्यस्मयोः पदं भवेत् ।
अत्यस्मासु पदं च स्याद् अस्मद् द्वित्वे भवेद् यदा ॥ १०६८
अतियुष्मद् — अतिक्रान्तो युष्मान् (युष्मद् बहुत्वे)
अति अस्मद् — अतिक्रान्तः अस्मान् (अस्मद् बहुत्वे)

प्रथमा

अतित्वम् स्याद् अतियुष्माम् अतियूयं पदं भवेत् ।
अत्यहम् स्याद् अत्यस्माम् स्यात् अतिवयं भवेत् पदम् ॥ १०६९

द्वितीया

अतियुष्माम् अतियुष्माम् अतियुष्मान् पदं भवेत् ।
अत्यस्मान् स्याद् अत्यस्माम् स्यात् अत्यस्मान् च भवेत् पदम् ॥ १०७०

तृतीया

स्याद् अतियुष्मया तत्र टा यदि च परे भवेत् ।
पदम् अतियुष्माभ्याम् स्यात् भ्याम् यदि च भवेत् परे ॥ १०७१
पदं स्याद् अतियुष्माभिः भिस् यदि च परे भवेत् ।
बहुत्वे च यदा युष्मद् तदा पदं भवेत् तथा ॥ १०७२
अत्यस्मया पदं च स्याद् टा यदि च भवेत् परे ।
पदं भवेद् अत्यस्माभ्याम् भ्याम् यदि च परे भवेत् ॥ १०७३
पदं भवेद् अत्यस्माभिः भिस् यदि च भवेत् परे ।
अस्मद् यदा बहुत्वे स्यात् पदं तदा तथा भवेत् ॥ १०७४

चतुर्थी

अतितुभ्यम् पदं च स्याद् ङे यदा च परे भवेत् ।
पदं स्याद् अतियुष्माभ्याम् भ्याम् यदा च भवेत् परे ॥ १०७५
पदं स्याद् अतियुष्मभ्यम् भ्यम् यदा च परे भवेत् ।
अस्मद् यदा बहुत्वे स्याद् पदं तदा भवेत् तथा ॥ १०७६
अतिमह्यम् पदं च स्याद् ङे यदा च परे भवेत् ।
पदं स्याद् अत्यस्मभ्यम् च भ्यम् यदा च भवेत् परे ॥ १०७७
अत्यस्मभ्यम् पदं च स्यात् भ्यस् यदा च परे भवेत् ।
अस्मद् यदा बहुत्वे स्यात् तदा रूपं भवेत् तथा ॥ १०७८

पञ्चमी

अतियुष्मत् पदं च स्यात् ङसि यदा भवेत् परे ।
पदं स्यादतियुष्माभ्याम भ्याम् यदा च परे भवेत् ॥ १०७९
अतियुष्मत् पदं च स्यात् भ्यस् यदा च भवेत् परे ।
युष्मद् यदा वहुत्वे स्यात् तदा रूपं भवेत् तथा ॥ १०८०
अत्यस्मत् स्यात् पदं तत्र ङसि यदा परे भवेत् ।
अत्यस्माभ्याम पदं च स्यात् भ्याम् यदा च भवेत् परे ॥ १०८१
अत्यस्मत् स्यात् पदं तत्र भ्यस् यदा च परे भवेत् ।
अस्मद् यदा वहुत्वे स्यात् तदा पदं तथा भवेत् ॥ १०८२

षष्ठी

अतितव पदं च स्याद् ङस् यदा च परे भवेत् ।
पदं स्याद् अतियुष्मयो ओम् यदा च भवेत् परे ॥ १०८३
पदं स्याद् अतियुष्पाकम् आम् यदा च परे भवेत् ।
युष्मद् यदा वहुत्वे स्यात् तदा पदं भवेत् तथा ॥ १०८४
अतिमम पदं च स्यात् ङस् यदा च परे भवेत् ।
अत्यस्मयोः पदं च स्यात् ओम् यदा च भवेत् परे ॥ १०८५
अत्यस्माकम् पदं च स्यात् आम् यदा च परे भवेत् ।
अस्मद् यदा वहुत्वे स्यात् तदा रूपं भवेत् तथा ॥ १०८६

सप्तमी

स्याद् अतियुष्मस् च तत्र ङि यदि च भवेत् परे ।
पदं स्याद् अतियुष्मयोः ओस् यदि च परे भवेत् ॥ १०८७
पदं स्याद् अतियुष्मासु सुप् यदा च परे भवेत् ।
युष्मद् यदा वहुत्वे स्यात् तदा रूपं भवेत् तथा ॥ १०८८
अत्यस्मयि पदं च स्यात् ङि परे चेत् प्रवर्त्तते ।
अत्यस्मयोः पदं च स्यात् ओस् परे च भवेद् यदा ॥ १०८९
अत्यष्मासु पदं च स्यात् सुप् परे चेत् प्रवर्त्तते ।
अस्मद् यदा वहुत्वे स्यात् तदा रूपं भवेत् तथा ॥ १०९०

४०१ । पदस्य । ८।१।१६

अधिकारे स्थितं सूत्रम् अधिकारो विधीयते ।
इतश्च प्रागपदान्ताद् यत् स्यात् तत् स्यात् पदस्य हि ॥ १०९१

४०२ । पदात् । ८।१।१७

अधिकारे स्थितं सूत्रम् अधिकारो विधीयते ।
"प्राक्कुत्सने" स्थितं सूत्रं ततः प्राग् यत् पदात् हि तत् ॥ १०९२

४०३ । अनुदात्तं सर्व्वमपादादौ । ८।१।१८

अधिकारे स्थितं सूत्रं एवमधिकृतं भवेत् ।
अनुदात्तमपदादौ सर्व्वमिति त्रयं च तत् ॥ १०९३

४०४ । युष्मदस्मदोः षष्ठी-चतुर्थी-द्वितीयास्थयोः वाम्-नावौ । ८।१।२०

यदा षष्ठी चतुर्थी स्यात् द्वितीया स्याद् यदा पुनः ।
युष्मदो वाम् भवेद् द्वित्वे नौ द्वित्वे चास्मदो भवेत् ॥ १०९४
अनुदात्तो भवेत् वाम् सः अनुदात्तः स नौ पुनः ।
पदात् परमपादादौ विधिश्चायं प्रयुज्यते ॥ १०९५

४०५ । बहुवचनस्य वस्नसौ । ८।१।२१

यदा षष्ठी-चतुर्थी स्यात् द्वितीया स्याद् यदा पुनः ।
युष्मदो वस् बहुत्वे स्याद् अस्मदो नस् तथा भवेत् ॥ १०९६
अनुदात्तो भवेद् वस् सः अनुदात्तः स नस् पुनः ।
पदात् परमपादादौ विधिश्चायं प्रयुज्यते ॥ १०९७

४०६ । ते मे एकवचनस्य । ८।१।२२

यदा षष्ठी चतुर्थी स्यात् स्यादेकवचनं यदा ।
युष्मदस्ते भवेत्तत्र मे भवेत् अस्मदः पुनः ॥ १०९८
अनुदात्तो भवेत् ते स अनुदात्तः स मे भवेत् ।
पदात् परम् अपादादौ विधिश्चायं प्रयुज्यते ॥ १०९९

४०७ । त्वामौ द्वितीयायाः । ८।१।२३

द्वितीया स्याद् यदा तत्र स्यादेकवचनं यदा ।
युष्मदस्त्वा भवेत्तत्र मा तत्र चास्मदो भवेत् ॥ ११००
अनुदात्तो भवेत् त्वा सः अनुदात्तः स मा पुनः ।
पदात् परमपादादौ विधिश्चायं प्रयुज्यते ॥ ११०१
कथमिह प्रयोगः स्यात् तदुच्यते परं पुनः ।
प्राचीनाः कारिकाः काश्चिद् प्रदीयन्ते यथास्थितम् ॥ ११०२

"श्रीशस्त्वाऽवतु माऽपीन्द्र दत्तात्ते मेऽपि शर्म सः।
स्वामी ते मेऽपि स हरिः पातु वामपि नौ विभुः॥ ११०३
सुखं वां नौ ददात्वीशः पतिर्वामपि नौ हरिः।
सोऽव्याद् वो नः शिवं वो नो दद्यात् सेव्योऽत्र वः स नः"॥ ११०४

पदात् परमिति प्रोक्तं वाक्यादौ न भवेत्ततः।
"त्वां पातु" च प्रयोगः स्यात् "त्वा पातु" न प्रयुज्यते॥ ११०५
पुनः प्रोक्तम् "अपादादौ" पादादौ न भवेत्ततः।
"अस्मान् कृष्णः" प्रयोगः स्यात् नसित्येवं भवेन्न च॥ ११०६
"स्थ"-ग्रहणं कृतं सूत्रे विभक्तिश्चेद् तदा भवेत्।
"युष्मत्पुत्र" विभक्तिर्न तस्माद् "तव" न युज्यते॥ ११०७

समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः (वा)

युष्मदश्चास्मदस्तत्र समादेशा भवन्ति ये।
एकवाक्ये सदा ते स्युः निघातेऽपि तथैव च॥ ११०८
एकतिङ् चेद् भवेद् वाक्यम् एकवाक्यं तदा भवेत्।
निघात एकवाक्ये स्यात् वामादिकं तथैव च॥ ११०९
"हे राम ओदनं पच भक्ष्यं तव भविष्यति।"
एकवाक्यं न तावत् स्यात् तस्मात् "ते" न प्रयुज्यते॥ १११०
"शालीनामोदनं तेऽहं दास्यामि च सुनिश्चयम्।"
एकवाक्यं भवेदत्र तस्मात् "ते" च प्रयुज्यते॥ ११११

एते वाम्नावादयः आदेशा
अनन्वादेशे वा वक्तव्याः (वा)

वामादिकं विभाषा स्यात् अन्वादेशो न चेद् भवेद्।
अन्वादेशो यदा तत्र नित्यं खलु भवेद् विधिः॥ १११२
"धाता ते भक्तो भवति" इत्येवं च प्रयुज्यते।
धाता तव भक्तश्चेति प्रयोगोऽपि भवेत् खलु॥ १११३
विभाषा च प्रयोगः स्यात् इह खलु निदर्शने।
अन्वादेशो न तावत् स्यात् "ते" "तव" च तथा भवेत्॥ १११४
अन्वादेशो यदा तत्र नित्यं खलु भवेद् विधिः।
"तस्मै ते नम" इत्यत्र नित्यं "ते" च प्रयुज्यते॥ १११५

४०८। न चवाहाहैवयुक्ते। ८।१।२४

यदि "च" स्यात् यदि "वा" स्यात् "अह" "न" च भवेद् यदि।
"एवं" यदि भवेत्तत्र समादेशो न युज्यते॥ १११६
"रक्षतु हरिस्त्वां मां च" भवेदिह निदर्शनम्।
त्वां मामिह प्रयोगः स्यात् "त्वा" "मा" खलु न युज्यते॥ १११७
"युक्त" इति पदं सूत्रे मुनिनेह प्रयोजितम्।
साक्षाद्योगे निषेधः स्यात् गौणे न च निषेधनम्॥ १११८
"हतो हरिश्च मे स्वामो" भवेदिह निदर्शनम्।
इह योगो भवेद् गौणस्तस्मात् "ने"ति न युज्यते॥ १११९

४०९। पश्यार्थैश्चानालोचने। ८।१।२५

ज्ञानं यदि प्रतीतं स्यात् चाक्षुषं न भवेद् यदि।
तदा न ते समादेशाः "वामादिकं तदा च न॥ ११२०
निदर्शनं भवेत्तावत् "चेतसा त्वां समीक्षते"।
इह ज्ञानं भवेदर्थः न ज्ञानं चाक्षुषं पुनः॥ ११२१

अपि गौणे च सम्बन्धे निषेधोऽयं प्रवर्त्तते।
"भक्तस्तत्र रूपं ध्यायेद्" गौणेऽपि च निषेधनम्॥ ११२२
चाक्षुषं चेद् भवेद् ज्ञानं समादेशो भवेत् खलु।
भक्तस्त्वा चक्षुषा खलु पश्यतीति निदर्शनम्। ११२३

४१०। सपूर्व्वायाः प्रथमाया विभाषा। ८।१।२६

प्रथमान्तात् पदात् पूर्व्वं पदमन्यद् यदा भवेत्।
समादेशो विभाषा स्यात् आवादेशो स्थितेऽपि च॥ ११२४
निदर्शनं भवेदत्र यथा परे प्रदर्शितम्।
"भक्तस्त्वमप्यहं तेन हरिस्त्वां त्रायते स माम्॥ ११२५

विधिस्तावद् विभाषा च पुनरिह प्रवर्त्तते।
तस्मात् त्वा च भवेदत्र तस्मादत्र भवेच्च मा॥ ११२६
अपादादौ यदा च स्याद् वामादिकं प्रयुज्यते।
इह तावत् मया पूर्व्वमेतत् खलु प्रदर्शितम्॥ ११२७
"अग्रे तव" यदा च स्यात् अपादादौ तदा भवेत्।
पदं ते च तदा तत्र भवेत् प्राप्तमिति स्थितिः॥ ११२८

पदं "ते" च न तत्र स्यात् पदं "ते" च न युज्यते ।
विषये च पुनस्तस्मिन् सूत्रं परं प्रवर्त्तते ॥ ११२९

४११ । साऽमन्त्रितम् । २।३।४८

प्रथमा सम्बोधने च यदा खलु प्रयुज्यते ।
प्रथमान्तं पदं तत्र भवेद् आमन्त्रितं तदा ॥ ११३०

४१२ । आमन्त्रितं पूर्व्वमविद्यमानवत् । ८।१।७२

आमन्त्रितं स्थितं पूर्व्वं न स्थितमिव मन्यते ।
स्थिते तस्मिन् भवेद् यत् च न तदिह भवेत् खलु ॥ ११३१
असति यद् भवेत् कार्य्यं तत् कार्य्यं च पुनर्भवेत् ।
वामादिकः समादेशः प्रकृते च न युज्यते ॥ ११३२

"अग्ने तव" यदा तत्र "अग्ने" भवेदामन्त्रितम् ।
स्थितमपि स्थितं न तत् अपादादौ ततश्च न ॥ ११३३
अपादादौ यतो न स्यात् वावादिकं न युज्यते ।
पदं "तव" भवेत्तत्र पदं "ते" तु भवेन्न च ॥ ११३४
आमन्त्रितं स्थितं पूर्व्वं न स्थितमेव मन्यते ।
स्थिते तस्मिन् भवेद् यच्च न तदिह भवेत् खलु ॥ ११३५
असति यद् भवेत् कार्य्यं तत् कार्य्यं च पुनर्भवेत् ।
आमन्त्रितनिघातो न न तिङन्तनिघातनम् ॥ ११३६

४१३ । नामन्त्रिते समानाधिकरणे सामान्यवचनम् । ८।१।७३

समानाधिकरणं चेद् आमन्त्रितं भवेत् परे ।
विशेष्यम् अविद्यमानवत् न हि तदा मतं भवेत् ॥ ११३७
हरे दयालो नः पाहि भवेदिह निदर्शनम् ।
अग्ने तेजस्विन् इति च निदर्शनं परं भवेत् ॥ ११३८

४१४ । विभाषितं विशेषवचने । ८।१।७४

समानाधिकरणं चेद् आमन्त्रितं भवेत् परे ।
विशेष्यं यद् वहुत्वे स्यात् नाविद्यमानवत् हि तत् ॥ ११३९
स्याद् "यूयं प्रभवो देवाः शरण्या" हि निदर्शनम् ।
"युष्मान् भजे वो भजे" स्यात् समादेशो विभाषया ॥ ११४०

सुपाद्

सुपाद् सुपात् सुपादौ स्यात् सुपादः स्यात् पदं तथा ।
सुपादम् स्यात् सुपादौ स्यात् पदमिह यथाक्रमम् ॥ ११४१

सुपाद् यदा भवेच्च शब्दः प्रत्ययः शस् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रवर्त्तते ॥ ११४२

४१५ । पादः पत् । ६।४।१३०

पाच्छब्दान्तं यदङ्गं भं प्रक्रियायां प्रवर्त्तते ।
तदवयवस्य पादः स्यात् पदादेश इति स्थितिः ॥ ११४३

सुपदः स्यात् पदं तत्र शस् यदा च परे भवेत् ।
सुपदा स्यात् पदं तत्र टा यदा च भवेत् परे ॥ ११४४

सुपाद्भ्यां स्यात् पदं तत्र सुपाद्भिश्च पदं भवेत् ।
शेषं पदं बुधैरूह्यं न विशेषः स्थितः क्वचित् ॥ ११४५

इति दान्ताः

अथ थकारान्तप्रकरणम्

अग्निमथ् (अग्नि-मन्थ + क्विप्)

अग्निमथ् स्यात् यदा शब्दः प्रत्ययः सु परे यदा ।
अग्निमत् स्यात् तदा रूपं अग्निमद् च भवेत् पुनः ॥ ११४६

अग्निमथौ पदं च स्यात् अग्निमद्भ्यां पदं भवेत् ।
अग्निमद्भिः पदं च स्यात् शेषमूह्यं पुनर्बुधैः ॥ ११४७

इति थान्ताः

प्राञ्च् (गतौ)

उपसर्गो यदा "प्र" स्यात् धातुरञ्च् गतौ यदा ।
"ऋत्विग्" इति प्रत्ययः क्विन् तदा खलु प्रयुज्यते ॥ ११४८

प्राञ्च् इति च तदा रूपं प्रजायते इति स्थितिः ।
ततः परं भवेद् योज्यं सूत्रमिह यथा परे ॥ ११४९

४१६ । अनिदितां हल उपधायाः क्ङिति । ६।४।२४

प्रत्ययः कित् प्रत्ययः ङित् यदा परे प्रवर्त्तते ।
अनिदितां हलन्तानामुपधायाः प्रयाति नः ॥ ११५१

नकारस्य यदा लोपः प्राच् इति च तदा भवेत् ।
सुबादिकं ततः पश्चात् प्रयुज्यते यथायथम् ॥ ११५२

यदा प्राञ्च् स्यात् यदा सु ्यात् पदं साध्यं भवेद् यदा ।
"उगिदचां" भवेद् योज्यं रूपं प्रान्च् च तदा भवेत् ॥ ११५३
'संयोगान्तस्य" च सूत्रं च पुनरिह प्रयुज्यते ।
चकारस्य भवेल्लोङ् रूपं प्रापो हि तदा भवेत् ॥ ११५४
"क्विन्"—इति च पुनः सूत्रं ततः परं प्रयुज्यते ।
कुत्वेन च ङकारः स्यात् पदं प्राङ् हि भवेद् तदा ॥ ११५५
प्राञ्चौ भवेत् ततः पश्चात् प्राञ्चः भवेत् ततः परम् ।
प्राञ्चम् प्राञ्चौ पदं पश्चात् अनुस्वारः सवर्णता ॥ ११५६
प्राच् यदा च स्थितः शब्दः प्रत्ययः शस् परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ ११५७

४१७ । अचः । ६।४।१३८

अञ्चतेश्चेद् नलोपः स्यात् अच् यदि च प्रजायते ।
अकारस्य तदा भस्य भवेत् खलु विलोपनम् ॥ ११५८

अकारस्य यदा लोपः "प्र च्" रूपं च तदा भवेत् ।
ततः परं पुनः सूत्रं भवेद् योज्यं यथा परे ॥ ११५९

४१८ । चौ । ६।३।१३८

अकारश्च नकारश्च यदा खलु विलुप्यते ।
पूर्वस्याणस्तदा दीर्घः स्यादञ्चतौ परे खलु ॥ ११६०

अकारस्य यदा दीर्घः प्र "प्रा" तदा भवेदिह ।
प्राचः भवेत् पदं तत्र पदमिष्टं तदेव हि ॥ ११६१

प्राचा भवेत् पदं तत्र विशेषस्तु न विद्यते ।
प्राङ्भ्यां भवेत् पदं तत्र न विशेषः स्थितः पुनः ॥ ११६२

प्रत्यञ्च्

प्रत्यङ् भवेत् पदं तत्र प्रत्यञ्चौ च पदं भवेत् ।
प्रत्यञ्चः स्यात् पदं तत्र विशेषश्च न विद्यते ॥ ११६३
प्रत्यञ्चं स्यात् पदं तत्र प्रत्यञ्चौ च पदं भवेत् ।
न विशेषः स्थितः कश्चित् न विशेषः प्रवर्त्तते ॥ ११६४
प्रत्यञ्च् भवेद् यदा शब्दः प्रत्ययः शस् भवेद् यदा ।
प्रतीचः स्यात् पदं तत्र विशेषो वर्त्तते खलु ॥ ११६५

प्रति अञ्च् शस् यदा तत्र सूत्रद्वयं प्रवर्त्तते ।
"इक" श्चेति भवेद् योज्यम् "अचः" योज्यं भवेत्तथा ॥ ११६६
अन्तरङ्गं भवेत् कार्य्यम् "इक"श्चेति यदा भवेत् ।
यण्निमित्तमकारो यः अन्तरेव स विद्यते ॥ ११६७
बहिरङ्गं भवेत् कार्य्यम् "अच"श्चेति यदा भवेत् ।
लोपो यः स्यादकारस्य तन्निमित्तं बहिश्च शस् ॥ ११६८
अन्तरङ्गं भवेत् कार्य्यं बहिरङ्गं भवेन्न च ।
अन्तरङ्गपरिभाषा पुनरिह प्रयुज्यते ॥ ११६९
परिभाषा परन्तु सा नेह खलु प्रवर्त्तते ।
"अकृते"ति परिभाषा गतिरिह भवेत् खलु ॥ ११७०
प्रतीचः स्यात् पदं तावद् "अकृते"ति यदा भवेत् ।
पदं तावत् प्रतीचः स्यादिष्टमिह सतां पुनः ॥ ११७१
प्रतीचा स्यात् पदं तत्र विशेषश्च न वर्त्तते ।
परं पदं बुधैर्ज्ञेयं नेह मया प्रदीयते ॥ ११७२

अमुमञ्चति इति

अदस्+अञ्च्+क्विन्

अमुमञ्चतीति तत्र विग्रहस्तु भवेद् यदा ।
प्रत्ययः क्विन् भवेद् योज्यः अदस् अञ्च् क्विन् तदा भवेत् ॥ ११७३
एवं यदा स्थितं तत्र शब्दः कार्य्यो भवेद् यदा ।
तदा सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ११७४

४१९ । विष्वक्देवयोश्च टेरद्र्यञ्चतौ वप्रत्यये । ६।३।९२

अञ्चतिर्वप्रत्ययान्तो यदा परे प्रवर्त्तते ।
अनयोः सर्व्वनाम्नश्च टेरद्रि स्यात् तदा पुनः ॥ ११७५

अदस् अञ्च् क्विन् यदा तत्र टेरद्रि स्यात् यदा पुनः ।
"अदद्रि अञ्च" तदा तत्र भवेद् रूपमिति स्थितिः ॥ ११७६
अदद्रि अञ्च् यदा तत्र सन्धि र्यदा पुनर्भवेत् ।
"अदद्र्य् अञ्च्" च तदा तत्र रूपं खलु प्रजायते ॥ ११७७

अदद्र्य् अञ्च्

एवं यदा स्थितं तत्र शब्दः कार्य्यो भवेद् यदा ।
पुनः सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ११७८

४२०। अदसोऽसेर्दादु दो मः। ८।२।८०

व्याख्यात्रयं स्थितं शास्त्रे शब्दत्रयं तथा भवेत्।
व्याख्यात्रयं च सूत्रस्य यथाक्रमं प्रदर्शितम्॥ ११७९

प्रथमा व्याख्या

दकारस्य परे यः स्यात् उद्भूत् तस्य प्रजायते।
दकारस्य पुनः मः स्यात् असान्तश्चेद् भवेद् अदस्॥ ११८०
उ इति च पदं सूत्रे मुनिनेह प्रदर्शितम्।
समाहारे भवेद् द्वन्द्व उत् ऊद् इति च गृह्यते। ११८१

ह्रस्व-व्यञ्जनयोर्ह्रस्व उकारस्य भवेदिह।
दीर्घस्य स्यात् पुनर्दीर्घ आन्तरतम्यतावशात्॥ ११८२

अदद्र्य् अञ्च् च स्थितं तत्र पूर्व्वं मया प्रदर्शितम्।
अकारश्च रकारश्च दकारात् परतो भवेत्॥ ११८३
उकारः स्यात् उकारः स्यात् तस्य तस्य पुनर्यदा।
अदद्रुय् अञ्च् तदा तत्र रूपं खलु प्रजायते॥ ११८४
दकारस्य यदा तत्र मकारश्च पुनर्भवेत्।
अमुमुय् अञ्च् तदा तत्र रूपं भवेदिति स्थितिः॥ ११८५
अमुमुयञ्च् तदा शब्दः प्रक्रियायां प्रजायते।
अमुमुयञ्च् भवेच् शब्दः सुबुत्पत्तिः ततः परम्॥ ११८६

अमुमुयञ्च्

अमुमुयञ्च् यदा शब्दः प्रत्ययः सु यदा पुनः।
अमुमुयङ् पदं तत्र विशेषश्च न दृश्यते॥ ११८७
पदम् अमुमुयञ्चौ स्यात् प्रत्यय औ भवेद् यदा।
पदम् अमुमुयञ्चः स्यात् प्रत्ययो जश् यदा परे॥ ११८८
पदम् अमुमुयञ्चं स्यात् अम् यदा च परे भवेत्।
भवेद् अमुमुयञ्चौ च प्रत्यय औट् परे यदा॥ ११८९
पदम् अमुमुईचः स्यात् शस् यदा च परे भवेत्।
पदम् अमुमुईचा स्यात् टा यदा च भवेत् परे॥ ११९०
पदम् अमुमुयग्भ्याम् स्यात् भ्याम् यदा च परे भवेत्।
परं पदं बुधेशह्यं न विशेषः स्थितः क्वचित्॥ ११९१

पूर्व्वपक्षः

पदम् अमुमुईचः स्यात् इति शसि प्रदर्शितम् ।
सन्धेरिह प्रसङ्गः स्यात् सन्धिर्न क्रियते कथम् ॥ ११९२

उत्तरपक्षः

मुत्वं तावदसिद्धं स्यात् तस्मात् सन्धिर्न वर्त्तते ।
"अदस" श्चाष्टमे तत्र षष्ठे "इकः" खलु स्थितम् ॥ ११९३

द्वितीया व्याख्या

दकारस्य परे यः स्यात् उदूत् तस्य प्रजायते ।
दकारस्य पुनः मः स्यात् असान्तश्चेद् भवेद् अदस् ॥ ११९४
द्वितीयो यो दकारः स्यात् तस्य भवेत् मकारता ।
प्रथमो यो दकारः स्यात् न तस्य हि तथा भवेत् ॥ ११९५
परिभाषा स्थिता शास्त्रे सा प्रमाणं भवेदिह ।
परिभाषा भवेदत्र यथा परे प्रदर्शितम् ॥ ११९६

अन्त्यबाधे अन्त्यसदेशस्य (वा)

अदद्र्य् अञ्च् स्यात् तदा तत्र पूर्व्वमेव प्रदर्शितम् ।
द्वितीयस्य विधिश्च स्यात् अदमुयञ्च् तदा भवेत् ॥ ११९७
अदमुयञ्च् यदा शब्दः प्रत्यय सु परे यदा ।
अदमुयञ्च् पदं च स्यात् विशेषेन स्थितः खलु ॥ ११९८

तृतीया व्याख्या

अः सेः यस्य स तावत् च बहुव्रीहौ भवेद् "असिः" ।
असेस्तस्य मकारः स्यात् नान्यस्य स्यात् मकारता ॥ ११९९

"त्यदादीनाम" इत्येवं यस्य भवेद् अकारता ।
तस्यैव हि मकारः स्यात् नान्यस्य च तथा भवेत् ॥ १२००
इह तावत् सकारस्य मकारता न जायते ।
"अद्रि" भवेत् समादेशः नहि भवेद् "अ"कारता ॥ १२०१
अकारता न तावत् स्यात् तस्मात् सूत्रं न युज्यते ।
मकारता ततो नास्ति मगर्भश्च न सिध्यति ॥ १२०२
"अदद्र्य् अञ्च्" यत् स्थितं पूर्व्वं तदेव खलु तिष्ठति ।
अदद्र्यञ्च् च भवेच् शब्दः स इह प्रकृतिर्भवेत् ॥ १२०३

अदद्र्यञ्च्

अदद्र्यञ्च् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
अदद्र्यङ् स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ १२०४

प्राचीना कारिका काचित् भाष्ये खलु समुद्धृता ।
इहापि भवतां तृप्त्यै सा दीयते परे मया ॥ १२०५
"अदसोऽद्रेः पृथङ्मुत्वं केचिदिच्छन्ति लत्ववत् ।
केचिदन्त्यसदेशस्य नेत्येकेऽसेहि दृश्यते ॥" १२०६

उदञ्च्

उदङ् भवेत् पदं तत्र उदञ्चौ स्यात् पदं तथा ।
उदञ्चः स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ १२०७
उदञ्चं स्यात् पदं तत्र स्याद् उदञ्चौ पदं पुनः ।
उदञ्च् यदा यदा शस् स्यात् सूत्रं परं प्रयुज्यते ॥ १२०८

४२१ । उद ईत् । ६।४।१३९

उत्परं स्यादञ्चेश्चेत् नकारस्य विलोपनम् ।
अकारस्य तदा भस्य भवेद् ईत् च मतां मते ॥ १२०९

अकारस्य यदा स्याद् ईत् उदीचः स्यात् पदं तदा ।
उदीचा स्यात् पदं तत्र स्यादुदग्भ्याम पदं परम् ॥ १२१०
उदञ्च् यदा यदा भिस् स्यात् उदग्भिश्च पदं भवेत् ।
परं पदं बुधैरूह्यं विशेषश्च न दृश्यते ॥ १२११

सम्यञ्च्

सम्यञ्च् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयुज्यते ॥ १२१२

४२२ । समः समि । ६।३।९३

अञ्चतिर्वप्रत्ययान्तः परे यदि प्रवर्तते ।
समः "समि" समादेशस्तदा खलु प्रयुज्यते ॥ १२१३

सम्यक् सम्यङ् पदं तत्र सम्यञ्चौ च पदं भवेत् ।
सम्यञ्चः स्यात् पदं तत्र विशेषश्च न दृश्यते ॥ १२१४
सम्यञ्चौ स्यात् पदं तत्र समीचः च पदं भवेत् ।
परं पदं बुधैरूह्यं विशेषश्च न दृश्यते ॥ १२१५

४२३। सहस्य सध्रिः। ६।३।९५

अञ्चतिर्वप्रत्ययान्तः परे यदि प्रवर्त्तते।
सहस्य स्यात् तदा सध्रिः रूपं सध्र्यञ्च् तदा भवेत्॥ १२१६

सध्रि + अञ्च् = सध्र्यञ्च्

सध्र्यङ् भवेत् पदं तत्र सध्र्यञ्चौ च पदं भवेत्।
सध्र्यञ्चः स्यात् पदं तत्र विशेषश्च न दृश्यते॥ १२१७
सध्रीचः स्यात् पदं तत्र सध्रीचा च पदं भवेत्।
परं पदं बुधैरूह्यं नेह मया प्रदीयते॥ १२१८

तिरस् + अञ्च् + क्विन् = तिर्य्यञ्च्

४२४। तिरसस्तिरि अलोपे। ६।३।९४

अञ्चतिर्वप्रत्ययान्तः परे यदि प्रवर्त्तते।
अकारस्य न लोपश्चेत् तिरसः स्यात् तदा "तिरि"॥ १२१९

तिरि + अञ्च् = तिर्य्यञ्च्

तिर्य्यङ् भवेत् पदं तत्र तिर्य्यञ्चौ च पदं भवेत्।
तिर्य्यञ्चः स्यात् पदं तत्र विशेषश्च न दृश्यते॥ १२२०
तिर्य्यञ्चं स्यात् पदं तत्र तिर्य्यञ्चौ च पदं भवेत्।
तिरश्चः स्यात् पदं तत्र पदमूह्यं परं बुधैः॥ १२२१

प्राञ्च् (पूजायाम्)

उपसर्गो यदा प्र स्यात् अञ्च् स्यात् पूजने यदा।
"ऋत्विग्"—इति प्रत्ययः क्विन् तदा खलु प्रयुज्यते॥ १२२२
एवं यदा स्थितं तत्र तदा प्रश्नो भवेदिह।
"अनिदिताम्" इति तत्र नकारो लुप्यते नवा॥ १२२३
एवमिह स्थिते प्रश्ने समाधानं प्रयोजनम्।
समाधाने भवेत् सूत्रं यथा परे प्रदर्शितम्॥ १२२४

४२५। नाञ्चेः पूजायाम्। ६।४।३०

अञ्चतिश्चेद भवेद् धातुः पूजा यदि प्रतीयते।
उपधाया नकारस्य न हि भवेद् विलोपनम्॥ १२२५

उपधाया नकारस्य यदा नास्ति विलोपनम्।
तदा रूपं भवेत् प्राञ्च् हि स इह प्रकृतिर्भवेत्॥ १२२६

प्राञ्च्

प्राञ्च् यदा स्यात् यदा सु स्यात् पदं प्राङ् हि तदा भवेत् ।
नलोपो न भवेत्तत्र तस्माद् न नुम् प्रयुज्यते ॥ १२२७
प्राञ्चौ भवेत् पदं तत्र पदं प्राञ्चः तथा भवेत् ।
प्राञ्चम् प्राञ्चौ भवेत्तत्र विशेषश्च न दृश्यते ॥ १२२८
यदा प्राञ्च् स्यात् यदा शस् स्यात् पदं प्राञ्चः तदापि च ।
लोपो नास्ति नकारस्य अकारोऽपि न लुप्यति ॥ १२२९
प्राचा भवेत् पदं तत्र प्राङ्भ्याम् भवेत् पदं तथा ।
प्राङ्षु प्राङ्क्षु पदं च स्यात् पदमूह्यं परं बुधैः ॥ १२३०
प्रत्यञ्च् शस् स्यात् यदा तत्र स्याद् अञ्च् पूजने यदा ।
अकारस्य न लोपः स्यात् प्रत्यञ्चः स्यात् पदं तदा ॥ १२३१
अदद्र्यञ्च् शस् यदा तत्र स्याद अञ्च् पूजने यदा ।
अकारस्य न लोपः स्यात् अमुमुयञ्च एव हि ॥ १२३२
उदञ्च् शस् स्यात् यदा तत्र स्याद् अञ्च् पूजने यदा ।
अकारस्य न लोपः स्यात् स्याद् उदञ्चा पदं तदा ॥ १२३३
अञ्च् यदि भवेत्तत्र पूजा यदि प्रतीयते ।
अकारस्य न लोपः स्यात् शसि तत्र च तत्र च ॥ १२३४

क्रुञ्च्

अल्पीभावे च कौटिल्ये धातुः क्रुञ्च् प्रवर्त्तते ।
प्रत्ययः क्विन् भवेदत्र "ऋत्विगि"ति प्रयुज्यते ॥ १२३५
नलोपस्य पुनश्चात्र "अभावो यो हि दृश्यते ।
स चापि भवेत् सिद्धः पुनरिह निपातनात् ॥ १२३६

क्रुञ्च् यदा च भवेच्च् शब्दः प्रत्ययः सु भवेद् यदा ।
पदं क्रुङ् स्यात् तदा तत्र विशेषश्च न दृश्यते ॥ १२३७
क्रुञ्चौ भवेत् पदं तत्र पदं क्रुञ्चः तथा भवेत् ।
पदं क्रुङ्भ्याम् भवेत् तत्र शेषमूह्यं पदं बुधैः ॥ १२३८

पयोमुच्

पयोमुच् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
पयोमुक् स्यात् पयोमुग् स्यात् "चोः कुरि"ति प्रयुज्यते ॥ १२३९

पयोमुचौ पदं तत्र पयोमुचः पदं भवेत् ।
शेषमूह्यं पदं बुधैः न विशेषः स्थितः क्वचित् ॥ १२४०

सुवृश्च्

सु शोभनं वृश्चतीति प्रत्ययः क्विप् प्रयुज्यते ।
"ग्रहिज्या"—च सम्प्रसारः स्यात् शब्दः सुवृश्च् तदा भवेत् ॥ १२४१
सुवृश्च् यदा भवेच्च् शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ १२४२
सुवृश्च् तदा भवेद् रूपं व्रश्चेति युज्यते पुनः ।
चकारस्य तदा तत्र भवेत् खलु षकारता ॥ १२४३
चकारस्य षकारः स्यात् सुवृश्च रूपं तदा भवेत् ।
"स्को"रिति च पुनर्योज्यं "सः" दन्त्यश्च विलुप्यति ॥ १२४४

पूर्व्वपक्षः

दन्त्यो यदि सकारः स्यात् सूत्रं "स्कोः" युज्यते तदा ।
शकारः इह तालव्यः सूत्रं "स्कोः" युज्यते कथम् ॥ १२४५

उत्तरपक्षः

आदौ धातुर्भवेद् "व्रस्चू" दन्त्यः सः श्रूयते खलु ।
तालव्यः शो भवेत् पश्चात् "श्चुना" यदा प्रयुज्यते ॥ १२४६
दन्त्य एव सकारो हि यस्मिन्नादौ प्रवर्त्तते ।
स एव गृह्यते "व्रस्चू" आदि "व्रस्चु" हि गृह्यते ॥ १२४७
दन्त्य एव सकारो हि यदा तत्र स्थितो भवेत् ।
तदा "स्को"श्च भवेद् योज्यं बाधा काचिद् न दृश्यते ॥ १२४८
दन्त्यो भवेत् सकारो यस्तस्य भवेद् विलोपनम् ।
दन्त्यः सश्चेद् विलुप्तः स्यात् तालिव्यः शः कुतो भवेत् ॥ १२४९

पूर्व्वपक्षः

"श्चुना" यदि प्रयुक्तं स्यात् तालव्यः शः प्रजायते ।
तालव्यं शं तमाश्रित्य कार्य्यं समुचितं भवेत् ॥ १२५०

उत्तरपक्षः

"श्चुना" चेति भवेत् श्चुत्वं "श्चुना" हि त्रिपाद्यां स्थितम् ।
श्चुत्वं तावदसिद्धं स्यात् न कार्य्यं स्यात् तदाश्रितम् ॥ १२५१

तालव्यं शं समाश्रित्य कार्य्यमिह भवेन्न च ।
दन्त्यं सं तु समाश्रित्य सूत्रं "स्को"रिह युज्यते ॥ १२५२
दन्त्यः सः स्याद् यदा लुप्तः तालव्यः शो न तिष्ठति ।
सुवृण् भवेत् तदा रूपं ततः कार्य्यं भवेत् परम् ॥ १२५३
"झलां जश्" च प्रयुक्तं स्यात् जशत्वं तथा भवेदिह ।
"वावसाने" भवेत् चर्त्वं सुवृट् सुवृड् पदं भवेत् ॥ १२५४
सुवृश्चौ स्यात् पदं तत्र सुवृश्चः स्यात् पदं तथा ।
सुवृट्सु स्यात् सुवृट्त्सु स्यात् पदमूह्यं परं बुधै ॥ १२५५

इति

चान्ताः

अथ तकारान्त प्रकरणम्

महत्

"वर्त्तमाने" स्थितं सूत्रं महत्-शब्दः प्रजायते ।
शतृवच्च भवेत् कार्य्यमित्यपि जायते पुनः ॥ १२५६

यदा महत् भवेच् शब्दः प्रत्ययः सु परे यदा ।
शतृवच्च भवेत् कार्य्यम् "उगित्"– नुम् च प्रवर्त्तते ॥ १२५७
"सान्त"--चेति स्थितं सूत्रं तदपि च प्रयुज्यते ।
उपधाया भवेद् दीर्घः रूपं महान्त् तदा भवेत् ॥ १२५८
"संयोगे"ति स्थितं सूत्रं तदपि च प्रयुज्यते ।
तकारस्य भवेल्लोपः पदं भवेत् तदा महान् ॥ १२५९
महान्तौ स्यात् पदं तत्र महान्तः स्यात् तथा पदम् ।
महान्तं स्यात् महान्तौ स्यात् महतः स्यात् पदं तदा ॥ १२६०
महता स्यात् पदं तत्र महद्भ्यां स्यात् पदं तथा ।
सम्बुद्धौ हे महत् स्याच्च सर्व्वं मया प्रदर्शितम् ॥ १२६१

धीमत्

धीः यदा स्यात् यदा मतुप् शब्दो धीमत् भवेत् तदा ।
तद्धितान्तो भवेच् शब्दः प्रातिपदिकता ततः ॥ १२६२
धीमत् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयोजनम् ॥ १२६३

४२६ । अत्वसन्तस्य चाधातोः । ६।४।१४

सु यदा स्यात् परे तत्र सम्बुद्धिर्न परे यदा ।
अत्वन्तस्य भवेद् दीर्घ उपधाया इति स्थितिः ॥ १२६४
असन्तश्च यदा शब्दस्तदापि च विधिर्भवेत् ।
स तावद् अस् यदा धातोस्तदा विधिर्नयुज्यते ॥ १२६५

यदा धीमत् यदा सु स्यात् दीर्घस्तदा भवेदिह ।
पश्चान्नुम च भवेदत्र रूपं धीमान्त् तदा भवेत् ॥ १२६६
"संयोगे"ति स्थितं सूत्रं तदापि च प्रयुज्यते ।
धीमान् भवेत् पदं तत्र पदमिष्टं तदेव हि ॥ १२६७

पूर्व्वपक्षः

नुमविधिस्तु भवेन्नित्यो नुमविधिः स्यात् परोऽपि च ।
तस्माद् नुम् च भवेदादौ नुमादौ हि प्रवर्त्तते ॥ १२६८

नुमो यदा प्रवृत्तिः स्यात् अत्वन्तता भवेन्न च ।
न दीर्घश्च भवेन् प्राप्तः पदं धीमान् न सिध्यति ॥ १२६९

उत्तरपक्षः

वचनस्य हि सामर्थ्यात् आदौ दीर्घः प्रवर्त्तते ।
पश्चान्नुम च भवेत्तत्र पदं धीमान् तथा भवेत् ॥ १२७०
धीमन्तौ स्यात् पदं तत्र धीमन्तः स्यात् पदं तथा ।
हे धीमन् स्यात् पदं तत्र महत्-वत् च भवेत् परम् ॥ १२७१
असन्तश्चेद् भवेच्च शब्दो दीर्घः खलु प्रजायते ।
धातोश्चेदस् न दीर्घः स्यात् इति पूर्व्वं प्रदर्शितम् ॥ १२७२
अत्वन्तश्चेद् भवेच्च शब्दो गतिर्भवेत् पृथक् तदा ।
धातोरपि स चेदत् स्यात् खलु दीर्घो विधीयते ॥ १२७३
"गोमत् सु" स्याद् यदा तत्र धातोरद् हि भवेत्तदा ।
तथापि च भवेद् दीर्घः पदं गोमान् तथा भवेत् ॥ १२७४
गोमन्तमिच्छतीति च यदा वाक्यं प्रयुज्यते ।
गोमन् भवेत् तदा शब्दः क्यजन्तात् क्विप् प्रवर्त्तते ॥ १२७५
गोमानिवाचरतीति वाक्यं स्यादथवा यदि ।
शब्दो गोमान् तदापि स्यात् क्विबन्तात् स्तात् पुनश्च क्विप् । १२७६

आदौ तत्र धातोरत् स्यात् धातोरत् स्यात् परेऽपि च ।
तथापि च भवेद् दीर्घो दीर्घः खलु विधीयते ॥ १२७७
"उगिदचां" स्थितं सूत्रं तदापि च प्रयुज्यते ।
तेन तत्र भवेत् नुम च पदं गोमान् तथा भवेत् ॥ १२७८

पूर्व्वपक्षः

"उगिदचां" प्रयुक्तं स्यात् तेन च नुम भवेदिह ।
इति यद् भवता प्रोक्तं न साधु प्रतिभाति तत् ॥ १२७९
उगिदचां स्थितं सूत्रम् "अच्" ग्रहणं कृतं खलु ।
धातोर्नुम चेद् भवेत् क्वचिद् अञ्चतेःकेवलं भवेत् ॥ १२८०
अज्-ग्रहणं कृतं सूत्रे नियमार्थं भवेत् हि तत् ।
केवलमञ्चतेरेव नुमागमो नियम्यते ॥ १२८१
अन्यो यदि भवेद्धातुर्न तावत् स्यात् नुमागमः ।
"स्रद्" अन्यः स्यात् "ध्वत्" अन्यः स्यात् नुमागमो भवेन्न च ॥ १२८२
इह "गोमत्" स्थितः शब्दो धातुरन्यो भवेदिह ।
नुमागमो न तावत् स्यात् "उगिदचां" न युज्यते ॥ १२८३

उत्तरपक्षः

अञ्चतेः केवलं नुम स्यात् नान्यस्य नुम प्रयुज्यते ।
इति यद् भवता प्रोक्तं सत्यं हि तत् न संशयः ॥ १२८५
तदेव च पुनः सूत्रं योज्यमिह तथापि च ।
तेनैव नुम भवेदत्र दर्शयामि यथा परे ॥ १२८६
"उगिदचाम्" इति सूत्रे अन्यदपि पदं स्थितम् ।
"अधातो"रिति तत्र च पदं खलु प्रयोजितम् ॥ १२८७
न धातुश्चेत् स्थितः पूर्व्वे परे धातुर्भवेद् यदि ।
अधातुभूतपूर्व्वस्य भवेत् खलु नुमागमः ॥ १२८८
गोमत् इह स्थितः शब्दः क्यच् क्विप् इह प्रयुज्यते ।
क्यच् क्विप् यदा प्रयुक्तं स्यात् तदा भवेद् हि धातुता ॥ १२८९
क्यज् यदा न स्थितस्तत्र क्विप् यदा न स्थितः पुनः ।
न तदा धातुता तत्र धातुता न स्थिता तदा ॥ १२९०
क्यजुत्पत्तेः क्विबुत्पत्तेः प्राग् धातुता स्थिता हि न ।
अधातुता स्थिता तत्र सा दशा गृह्यते पुनः ॥ १२९१

अधातुता यदा च स्यात् "उगिदचां" प्रयुज्यते ।
सूत्रं यदा प्रयुक्तं स्यात् नुमपि च भवेत्तदा ॥ १२६२
नुमि पदं भवेत् गोमान् न बाधा दृश्यते क्वचित् ।
नुमागमो भवेत् प्राप्तः सर्व्वथैव न संशयः ॥ १२६३
गोमान् भवेत् पदं तत्र गोमन्तौ च पदं भवेत् ।
गोमन्तः स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ १२६४

भा + भवतु = भवत्

औणादिको यदा तत्र भातेश्च भवतुर्भवेत् ।
अत्वन्तश्च भवेच्च शब्दो दीर्घोऽपि च भवेत्ततः ॥ १२६५
भवान् भवेत् पदं तत्र दीर्घे नुमि पदं भवेत् ।
अन्यत्र न विशेषः स्यात् पदमूह्यं यथायथम ॥ १२६६

भू + शतृ = भवत्

"भू शतृ" स्याद् यदा तत्र शब्दो "भवत्" भवेत्तदा ।
अत्वन्तो न भवेच्च शब्दो दीर्घश्चापि न लभ्यते ॥ १२६७
"भवन्" भवेत् पदं तत्र दीर्घो न हि प्रयुज्यते ।
अन्यत्र न विशेषः स्यात् पदमूह्यं परं बुधैः ॥ १२६८

दा + शतृ = ददत्

दा शतृ चेद् भवेद् ददत् ऋदन्तश्च भवेत् शतृ ।
"उगिदचां" भवेत् प्राप्तं नुमपि लभ्यते तथा ॥ १२६९
परन्तु नुम् न तावत् स्याद् अभ्यस्तता भवेदिह ।
अभ्यस्तता कथं तत्र तदुच्यते प्रसङ्गतः ॥ १३००

४२६ । उभे अभ्यस्तम् । ६।१।५

द्वित्वप्रकरणे षष्ठे द्वे खलु विहिते स्थिते ।
अभ्यस्तमिति संज्ञा स्यात् मिलितयोस्तयोरिह ॥ १३०१

४२७ । नाभ्यस्ताच्छतुः । ७।१।७८

न चाभ्यस्तात् परं तत्र शतुर्नुम स्यादिति स्थितिः ।
ददत् ददद् पदं च स्यात् ददतौ ददतस्तथा ॥ १३०२

जक्षत्

जक्ष शतृ यदा तत्र शब्दो जक्षत् तदा भवेत् ।
शतृ पुनः ऋदन्तः स्यात् "उगिदचां" भवेच्च नुम् ॥ १३०३

नुमिह न भवेत् प्राप्तः स्थिता चाभ्यस्तता खलु ।
अभ्यस्तता यथा तत्र तथा सूत्रं परं भवेत् ॥ १३०४

४२८ । जक्षित्वादयः षट् । ६।१।६

अन्ये षट् धातवस्तत्र जक्षितिः सप्तमः पुनः ।
एषामभ्यस्तसंज्ञा स्यात् न तस्मात् नुम् प्रवर्त्तते ॥ १३०५
जक्षत् भवेत् पदं तत्र पदं जक्षद् तथा भवेत् ।
जक्षतौ जक्षतः स्यान्न पदमूह्यं परं बुधैः ॥ १३०६

एवं जाग्रत् दरिद्रत् स्यात् एवं शासत् भवेत् पुनः ।
एवं स्यात् चकासत् तत्र विशेषश्च न दृश्यते ॥ १३०७
दीध्यद् भवेदेवमेव व्येव्यत् एवं भवेत् पुनः ।
परस्मैपदिता वेदे ङित्वात् तङ् लोकतः खलु ॥ १३०८

इति तान्ताः

अथ पकारान्तप्रकरणम्

गुप्

चुरादौ गुप् यदा तत्र प्रत्ययः क्विप् परे यदा ।
गुप् तदा च भवेच्छब्दः स इह प्रकृतिर्भवेत् ॥ १३०९
गुप् गुब् स्यान्न पदं तत्र गुपौ गुपः पदं भवेत् ।
गुब्भ्याम भवेत् पदं तत्र पदमूह्यं परं बुधैः ॥ १३१०

इति पान्ताः

अथ शकारान्तप्रकरणम्

तादृश्

तादृश् इति स्थितः शब्दः स कथं वा भवेदिह ।
उत्पत्तिः स्यात् कथं तस्य तदिह दर्शितं परे ॥ १३११

४३० । त्यदादिषु दृशोऽनालोचने कञ् च । ३।२।६०

त्यदादिकं यदा पूर्व्वं न ज्ञाने च यदा दृशिः ।
प्रत्ययः कञ् तदा च स्यात् चकारात् क्विन् भवेदपि ॥ १३१२

तद् इह च भवेत् पूर्व्वं धातुः दृशिः भवेत् पुन ।
प्रत्ययः क्विन् भवेदत्र तद् दृश् क्विन् च तदा स्थितम् ॥ १३१३

एवं यदा स्थितं तत्र पुनः सूत्रं प्रयोजनम् ।
सूत्रमिह भवेद् योग्यं यथा परे प्रदर्शितम् ॥ १३१४

४३१ । आ सर्व्वनाम्नः । ६।३।९१

दृक् दृश् यदा परे तत्र स्याद् अवतु परे यदा ।
अन्तादेश आकारः स्यात् सर्व्वनाम्नस्तदा पुनः ॥ १३१५
तद् दृश् क्विन् च स्थितं रूपम् इति पूर्व्वं प्रदर्शितम् ।
आकारः स्याद् दकारस्य तादृश् रूपं भवेत् तदा ॥ १३१६
तादृश् इति भवेच्च शब्दः स इह प्रकृतिर्भवेत् ।
तादृश् सु स्यात् यदा तत्र तादृक् तादृस् भवेत् तदा ॥ १३१७

तादृश् सु स्याद् यदा तत्र क्विन् इति "कुः" भवेदिह ।
परं कुत्वम् असिद्धं स्यात् न कार्य्यं स्यात् तदाश्रितम् ॥ १३१८
"व्रश्चे"ति च स्थितं सूत्रं तदिह च प्रयुज्यते ।
तादृश् इति शकारस्य तथा भवेत् षकारता ॥ १३१९
तादृष् तदा भवेत्तत्र "झलां जश्" च प्रयुज्यते ।
षकारस्य डकारः स्यात् रूपं तादृड् तदा भवेत् ॥ १३२०
क्विन् इति च स्थितं तत्र तत्तदा च प्रयुज्यते ।
डकारस्य कवर्गं स्यात् रूपं तादृग् तदा भवेत् ॥ १३२१
"वावसाने" स्थितं सूत्रं तत् तदा च प्रयुज्यते ।
गकारस्य ककारः स्यात् रूपं तादृक् तदा भवेत् ॥ १३२२
तादृक् स्याच्च पदं तत्र तादृग् स्याच्च पदं पुनः ।
सु यदा स्यात् परे तत्र पदद्वयं तथा भवेत् ॥ १३२३
तादृशौ स्यात् पदं तत्र तादृशः स्यात् पदं पुनः ।
सु औ जश् स्यात् यदा तत्र पदं भवेत् तथा तथा ॥ १३२४

तादृक् चेति ककारान्तं पदं तत्र प्रदर्शितम् ।
स्थितश्चात्र मते भेदः तदुच्यते परे मया ॥ १३२५

कैयटमतम्

"तादृश् सु" स्याद् यदा तत्र पदं तादृख् तदा भवेत् ।
खकारान्तं पदं च स्यात् ककारान्तं न सिध्यति ॥ १३२६

"व्रश्चे"ति च शकारस्य भवेत् खलु षकारता।
"क्विन्नि"ति च भवेत्तावत् शकारता कवर्गता ॥ १३२७
"व्रश्चेति" यत् स्थितं सूत्रं तदिह न प्रयुज्यते ।
"क्विन्नि"ति यत् भवेत् सूत्रं तदेव युज्यते खलु ॥ १३२८
अपवादे च पूर्व्वस्य परं सूत्रं भवेदिह ।
अपवादे च षत्वस्य कुत्वमिह भवेद् वरम् ॥ १३२९
शकारस्य कवर्गश्च यदा प्राप्तो भवेदिह ।
तदा खलु भवेत् प्रश्नः को वा वर्गो भवेत् पुनः ॥ १३३०
सदृशतम आदेशः पुनरिह प्रयुज्यते ।
शकारस्य खकारो हि स्यात् सदृशतमः खलु ॥ १३३१
अघोषश्च महाप्राणः शकारो हि सतां मते ।
अघोषश्च महाप्राणः खकारो हि पुनर्मतः ॥ १३३२
सदृशतम आदेशो यदा खलु प्रयुज्यते ।
शकारस्य खकारो हि तदा प्राप्तो भवेदिह ॥ १३३३
शकारस्य खकारश्च यदा तत्र प्रयुज्यते ।
तादृख् स्याच्च पदं तत्र खकारान्तं भवेत् पदम् ॥ १३३४

हरदत्तमतम्

"तादृश् सु" स्याद् यदा तत्र पदं तादृश् तदा भवेत् ।
खकारान्तं पदं च स्यात् गकारान्तं न सिध्यति ॥ १३३५
"क्विन्नि"ति च कवर्गः स्यात् तेन भवेत् खकारता ।
"झलां जश्" च भवेद् योज्यं गकारता तदा भवेत् ॥ १३३६
"क्विन्नि"ति यत् स्थितं शास्त्रं परे तच्च प्रवर्त्तते ।
"झलां" यच्च स्थितं शास्त्रं पूर्व्वं हि तत् स्थितं खलु ॥ १३३७
पूर्व्वं प्रति परं शास्त्रमसिद्धं स्यादिति स्थितिः ।
जश्त्वं प्रति चासिद्धं स्यात् कुत्वमिह च सर्व्वथा ॥ १३३८
"क्विन्निति यः खकारः स्यात् स चासिद्धो भवेदिह ।
"झलाम्" इति गकारस्तु तस्मादिह न वर्त्तते ॥ १३३९
तादृख् चेति खकारान्तं पदं खलु भवेदिह ।
तादृग् चेति गकारान्तं पदं खलु न सिध्यति ॥ १३४०

मन्तव्याम

षकारो यो भवेदत्र स चासिद्धो भवेदिह ।
इति यत्र भवेदुक्तं न सङ्गतं भवेदि तत् ॥ १३४१
खकारं तु समाश्रित्य सकारो वर्त्तते खलु ।
"दिगादिभ्यः" स्थितं सूत्रं प्रमाणं तद् भवेदिह ॥ १३४२
तादृग् चेति गकारान्तं पदं तस्माच्च सिध्यति ।
तादृग् चेति गकारान्तं पदं ग्राह्यं भवेदिह ॥ १३४३

विश्

विश् यदा स्यात् यदा क्विन् स्यात् शब्दश्च विश् तदा भवेत् ।
विश् इह च भवेच् शब्दः सुबुत्पत्तिस्ततः परम् ॥ १३४४
विश् यदा स्यात् यदा सु स्यात् हल्ङ्याब्भ्यश्च प्रयुज्यते ।
सुलोपश्च भवेत्तत्र रूपं विश् च तदा भवेत् ॥ १३४५
व्रश्चेति यत् स्थितं सूत्रं तदपि च प्रयुज्यते ।
शकारस्य तदा तत्र भवेत् खलु षकारता ॥ १३४६
झलां जश् च भवेद् युक्तं षकारस्य डकारता ।
विड् भवेच्च तदा तत्र पदमिष्टं तदेव हि ॥ १३४७
"वावसाने" स्थितं सूत्रं तदपि च प्रयुज्यते ।
चर् विभाषा भवेत्तत्र पदं च विट् तदा भवेत् ॥ १३४८

विट् विड् भवेन् पदं तत्र पदं विशौ भवेत् पुनः ।
विशः स्याच्च पदं यत्र विशम् पदं भवेत् तथा ॥ १३४९

नश्

नश् यदा स्यात् यदा सु स्यात् पदं साध्यं भवेद् यदा ।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम् ॥ १३५०

४३२ । नशेर्वा । ८।२।६३

अन्तादेशः कवर्गः स्याद् पदान्ते च नशेरिह ।
आदेशो यो भवेच्चायं स भवेच्च विभाषया ॥ १३५१
नट् नड् स्याच्च पदं तत्र नक् नग् स्याच्च पदं तथा ।
सु यदा स्यात् परे तत्र पदचतुष्टयं तदा ॥ १३५२

घृतस्पृश्

यदा "घृतं स्पृशती"ति वाक्यमिह प्रयुज्यते ।
प्रत्ययः क्विन् तदा तत्र सूत्रमत्र परं भवेत् ॥ १३५३

४३३। स्पृशोऽनुदके क्विन्। ३।२।५८

पूर्व्वं यदि सुबन्तं स्यात् उदकं चेन् न पूर्व्वतः ।
स्पृशः क्विन् प्रत्ययः स्याच्च घृतस्पृश् स्यात् तथा पुनः ॥ १३५४

"घृतस्पृश् सु" यदा तत्र घृतस्पृक् स्यात् पदं तदा ।
घृतस्पृग् स्यात् पदं तथा ष-ङ्-ग काः यथायथम् ॥ १३५५

क्विप् प्रत्ययो भवेद् यस्मात् स हि क्विन्-प्रत्ययो भवेत् ।
एवं चेत् स्यात् बहुव्रीहि क्विपि चापि भवेच्च कुः ॥ १३५६

स्पृशतीति यदा क्विप् स्यात् शब्दः स्पृश् च तदा भवेत् ।
शब्दः स्पृश् च प्रकृतिः स्यात् सुबुत्पत्तिः ततः परम् ॥ १३५७
यदा "स्पृश सु" भवेदत्र पदं च स्पृक् तदा भवेत् ।
इहापि च भवेत् कुत्वं पूर्व्ववच्च यथायथम् ॥ १३५८

इति शान्ताः

अथ षकारान्तप्रकरणम्

दधृष्

ञि धृषा च स्थितो धातुः प्रागल्भ्ये च प्रवर्त्तते ।
"ऋत्विग्" इति भवेद् योज्यं प्रत्ययः क्विन् तथा भवेत् ॥ १३५९
निपातनाद् भवेद् क्वित्वम् आन्तोदात्तं निपातनात् ।
दधृष् स्याच्च तदा शब्दः स इह प्रकृतिर्भवेत् ॥ १३६०

दधृष् सु स्याद् यदा तत्र दधृक् दधृग् पदं भवेत् ।
आदौ जश्त्वे डकारः स्यात् पश्चात् कुत्वं प्रवर्त्तते ॥ १३६१
दधृषौ स्यात् पदं तत्र दधृषः स्यात् पदं तथा ।
दधृग्भ्यां च पदं तत्र पदमूह्यं परं बुधैः ॥ १३६२

रत्नमुष्

रत्नानि मुष्णातीति चेत् रत्नमुष् च भवेदिह ।
रत्नमुष् सु यदा तत्र रत्नमुट् रत्नमुड् भवेत् ॥ १३६३

रत्नमुषौ भवेत्तत्र रत्नमुषः पदं तथा ।
विशेषो न स्थितः कश्चित् पदमूह्यं परं बुधैः ॥ १३६४

षष्

षष् यदा च भवेच्छब्दः जश् शस् यदा परे भवेत् ।
"षड्भ्यो लुक्" च भवेद् योज्यं जश्शसोर्लुक् भवेत्तथा ॥ १३६५
षट् भवेच्च पदं तत्र षड् भवेच्च पदं तथा ।
जसि षट् षड् शसि षट् षड् उभयत्र समं पदम् ॥ १३६६
षष् यदा स्यात् यदा भिस् स्यात् षड्भिः भवेत् पदं तदा ।
षष् यदा स्यात् यदा भ्यस् स्यात् षड्भ्यः पदं तदा भवेत् ॥ १३६७
षष् यदा स्यात् यदा स्याद् आम् पदं षण्णाम् भवेत्तदा ।
इह तावद् विशेषः स्यात् विशेष उच्यते परे ॥ १३६८
षष् यदा स्यात् यदा स्याद् आम् "षट्चतुर्भ्यः" प्रयुज्यते ।
नुटागमो भवेत्तत्र रूपं षट् नाम तदा भवेत् ॥ १३६९
"न पदान्ताट्टोरनाम्" च पुनरिह प्रसज्यते ।
"अनामिति" भवेदुक्तं ष्टुत्वं तस्माद् भवेदिह ॥ १३७०
ष्टुत्वं यदा भवेत्तत्र षट् णाम् रूपं भवेत्तदा ।
"यरोऽनुनासिके" सूत्रं पुनः प्राप्तं भवेदिह ॥ १३७१
विकल्प इह च प्राप्तः बाधितश्च भवेत् खलु ।
"प्रत्यये भाषायां नित्यम्" तत्सूत्रे वार्त्तिकं स्थितम् ॥ १३७२
वार्त्तिकं बलवत् स्याच्च नित्यं स्यादनुनासिकः ।
टकारस्य यदा तत्र स्यादनुनासिकः पुनः ॥ १३७३
"षण्" भवेच्च तदा तत्र परे "णाम्" च स्थितं पुनः ।
यदा द्वयोर्भवेद् योगः पदं षण्णाम् तदा भवेत् ॥ १३७४

षष् यदा स्यात् यदा स्यात् सुप् षट्त्सु पदं भवेत्तदा ।
षट्सु चापि पदं तत्र पदद्वयं भवेत् सुपि ॥ १३७५

प्रियषष्-षष् मुख्ये

समासो वा भवेत्तत्र षष् मुख्ये चेत् प्रवर्त्तते ।
"षड्भ्यो लुक्" च "षट्चतुर्भ्यः" सममेव प्रयुज्यते ॥ १३७६
परमषष् यदा तत्र जश् शस् यदा परे भवेत् ।
परमषट् परमषड् पदं भवेत् समं खलु ॥ १३७७

परमषष् यदा तत्र प्रत्यय आम् परे यदा ।
पदं स्यात् परमषण्णाम् पूर्व्ववत् प्रक्रिया भवेत् ॥ १३७८
केवलं षष् यदा तत्र तदा यो यो विधिर्भवेत् ।
समासे षष् यदा मुख्ये स स विधिस्तदापि च ॥ १३७९
तस्मिन् भवेद् यथा तत्र तदन्तेऽपि तथा भवेत् ।
षषि यथा तथैव स्यात् परमषषि निश्चितम् ॥ १३८०

प्रियषष्-षष् गौणे

समासः स्याद् यदा तत्र गौणे षष् च भवेद् यदा ।
न तदा तु भवेत्तत्र पूर्व्वं यथा प्रदर्शितम् ॥ १३८१
प्रियषष् स्याद् यदा तत्र षष् गौणे च भवेद् यदा ।
जशि शसि परे तत्र प्रियषषः पदं भवेत् ॥ १३८२
आम् यदा स्यात् परे तत्र प्रियषषम् पदं तदा ।
"षड्भ्यो लुक् "च" षट् चतुर्भ्यः" नेह खलु प्रयुज्यते ॥ १३८३

पिपठिष्

पिपठिष् च भवेद् धातुः प्रत्ययः क्विप् प्रयुज्यते ।
पिपठिष् स्यात् तदा शब्दः सुबुत्पत्तिस्ततः परम् ॥ १३८४
पिपठिष् सु यदा तत्र "हल्ङ्याब्भ्यः" सु विलुप्यति ।
पिपठिष् च तदा रूपं भवेत् प्राप्तमिति स्थितिः ॥ १३८५
"ससजुषोः स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
सकारस्य रकारः स्यात् पिपठिर् च तदा भवेत् ॥ १३८६

पूर्व्वपक्षः

मूर्द्धन्यः षः स्थितस्तत्र दन्त्यः स न स्थितः पुनः ।
"ससजुषोः" कथं योज्यं दन्त्यस्य हि विधिर्भवेत् ॥ १३८७

उत्तरपक्षः

"इणः ष"श्च स्थितं सूत्रं मूर्धन्यः षस्तथा भवेत् ।
"इणः यश्च" स्थितं पश्चात् अष्टकस्य क्रमे खलु ॥ १३८८
षत्वं तस्मादसिद्धं स्यात् न स्थितम् इव मन्यते ।
आदौ दन्त्यः सकारो यः स इह गृह्यते खलु ॥ १३८९
दन्त्यो यदा सकारः स्यात् "ससजुषोः" प्रयुज्यते ।
रूत्वं तथा भवेत् प्राप्तं पिपठिर् स्यात् तथा पुनः ॥ १३९०

ह्रस्वं यदा भवेत्तत्र पिपठिर् च तदा भवेत् ।
पश्चात् सूत्रं भवेद् योज्यं यथा परे प्रदर्शितम् ॥ १३९१

४३४ । **र्वोरुपधाया दीर्घ इकः ।** ८।२।७६

वान्तो यदा भवेच्च शब्दः रान्तः शब्दो यदा भवेत् ।
उपधाया इको दीर्घस्तदा खलु प्रमज्यते ॥ १३९२
उपधाया यदा दीर्घः पिपठीर् स्यात् तदा पुनः ।
पिपठीर् स्यात् पदं चात्र पदमिष्टं तदेव हि ॥ १३९३

पिपठिषौ पदं च स्यात् पिपठिषः पदं भवेत् ।
पिपठीर्भ्याम् पदं च स्यात् पदमूह्यं परं बुधैः ॥ १३९४

पिपठिष् सुप् यदा तत्र पदं साध्यं भवेद् यदा ।
प्रक्रिया स्यात् तदा तत्र यथा परे प्रदर्शिता ॥ १३९५
पिपठिष् सुप् यदा तत्र सूत्रमेतत् प्रयुज्यते ।
एतेन च भवेद् दीर्घः पिपठीष् सु तदा भवेत् ॥ १३९६
"वा शरि" च भवेद् योज्यं विसर्गः स्याद् विभाषया ।
पिपठीःसु तदा तत्र रूपं भवेदिति स्थितिः ॥ १३९७
"सु" चेति यः सकारः स्यात् इणः कोर्न परे च सः ।
"आदेशप्रत्यये"ति च सकारोऽपि भवेत् पुनः ॥ १३९८
न तस्मान्न सकारस्य तस्य भवेत् षकारता ।
सूत्रमन्यद् भवेद् योज्यं षकारता यथा भवेत् ॥ १३९९

४३५ । **नुम्विसर्जनीयशर्व्यवायेऽपि ।** ८।३।५८

प्रत्येकं व्यवधानेऽपि सकारस्य षकारता ।
इणः परे यदि स्यात् सः कोः परे सः भवेद् यदि ॥ १४००
विसर्गेन व्यवायश्च पुनरिह प्रवर्त्तते ।
इणः परं सकारोऽपि तस्मात् षत्वं भवेदिह ॥ १४०१
षत्वं यदा भवेत्तत्र पिपठीः षु तदा भवेत् ।
तदेकं च पदं तत्र सुपि परे भवेदिह ॥ १४०२

अपरं च पदं तत्र सुपि प्राप्तं भवेदिह ।
पिपठीष्षु पदं तत् च तत् दर्शितं परे यथा ॥ १४०३

"वा शरि" स्याद् यदा तत्र विसर्गः स्याद् विभाषया।
विसर्गो न यदा तत्र दन्त्यो हि "सः" तदा भवेत्॥ १४०४
"पिपठीस् सु" तदा तत्र रूपं भवेदिति स्थितिः।
द्वितीयस्य सकारस्य भवेत् पुनः षकारता॥ १४०५
प्रथमेन सकारेण व्यवधानं शरा स्थितम्।
इणः परं भवेच्चापि ईकाराद्धि परे भवेत्॥ १४०६
द्वितीयस्य सकारस्य यदा भवेत् षकारता।
पिपठीस् षु तदा तत्र स्थितं रूपमिति स्थितिः॥ १४०७
एवं यदा स्थितं तत्र "ष्टुना ष्टु"श्च प्रयुज्यते।
प्रथमस्य सकारस्य पुनर्भवेत् षकारता॥ १४०८
एवं यदा भवेत्तत्र पिपठीष्षु पदं भवेत्।
पदं तद्धि द्वितीयं स्यात् तथापि च पदं सुपि॥ १४०९
एकस्य चेदधिकेन व्यवधानं भवेत् क्वचित्।
न तदा च भवेत् षत्वमिति ज्ञेयं भवेदिह॥ १४१०
निंस्स्व निंस्से पदं तत्र व्यवधानं द्वयेन च।
न च तस्मात् भवेत् षत्वं दन्त्यः स हि स्थितः खलु॥ १४११

पूर्व्वपक्षः

"शरि"ति च पदं सूत्रे मुनिनेह प्रयोजितम्।
शरिति चेद् भवेदुक्तमनुस्वारोऽपि गृह्यते॥ १४१२
"शर्षु जश्भावषत्वे" च वार्त्तिकं तत्र वर्त्तते।
अनुस्वारः शरा ग्राह्यः षत्वाय हि प्रकल्पते॥ १४१३
षत्वार्थमनुस्वाराय पुन "नुम" न प्रयोजनम्।
"शर्" इति वर्त्तते सूत्रे तेनैव हि गतार्थता॥ १४१४

उत्तरपक्षः

"नुम" इति यत् पदं सूत्रे न हि तत् स्याद् निरर्थकम्।
"शर्" इति ग्रहणात् सूत्रे नापि तत्र गतार्थता॥ १४१५
"नुम" इति च पदं सूत्रे मुनिनेह प्रयोजितम्।
नुमो यः स्यादनुस्वारः स इह लक्षितो भवेत्॥ १५१६
नुमो यः स्यदनुस्वारस्तेन व्यवहितं यदि।
तदा तत्र भवेत् षत्वं यजूंषि च निदर्शनम्॥ १४१७

अन्यश्चेत् स्यादनुस्वारो न हि षत्वं भवेत् तदा ।
"सुहिन्सु पुंसु" चान्यः स्यात् षत्वं तस्मात् न वर्त्तते ॥ १४१८
अनुस्वारः शरा ग्राह्यो नेह खलु विवक्षितः ।
अनुस्वारः शरा ग्राह्यो नेह वा लक्षितो भवेत् ॥ १४१९
"शर्" इति चेद् भवेदुक्तं लक्ष्यं सिद्धं भवेन्न च ।
"शर्" इति चेद् भवेदुक्तम् इष्टम् उक्तं भवेन्न हि ॥ १४२०
नुमो यः स्यादनुस्वारः स षत्वाय प्रकल्पते ।
एतद् दर्शयितुं सूत्रे "नुम्" इत्यस्य प्रयोजनम् ॥ १४२१
शर् ग्रहणात् न चात्र च गतार्थता कथञ्चन ।
"नुम्" इत्यस्य पृथङ्न्यासः सूत्रे खलु प्रयोजनम् ॥ १४२२

चिकीर्ष

चिकीर्षतेर्यदा क्विप् स्यात् चिकीर्ष् शब्दस्तदा भवेत् ।
प्रकृतिः स्याद् इह चिकीर्ष् सुबुत्पत्तिस्ततः परम् ॥ १४२३
चिकीर्ष् यदा यदा सु स्यात् "हल्ङ्याब्भ्यः" सु विलुप्यति ।
सु यदा च विलुप्तः स्यात् रूपं चिकीर्ष् तदा भवेत् ॥ १४२४
"रात्सस्य" च स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
सकारस्य भवेल्लोपः पदं चिकी तदा भवेत् ॥ १४२५

पूर्व्वपक्षः

चिकीर्ष् इति षकारः स्यात् स चासिद्धो भवेदिह ।
चिकीस् इति सकारान्तं रूपं खलु च गृह्यते ॥ १४२७
"रात् सस्य" च भवेद् युक्तं सकारश्च विलुप्यति ।
तदा भवेत् पदं चिकीः पदमिष्टं तदेव हि ॥ १४२८
चिकीर्ष् यदा यदा सुप् स्यात् चिकीर्ष् स्यात् पदं तदा ।
"रो सुपि" नियमात् तत्र न विसर्गः प्रवर्त्तते ॥ १४२९
रोरेव चेद् रकारः स्यात् विसर्गः स्यात् तदैव च ।
रोरिह न रकारः स्यात् विसर्गो न भवेत्ततः ॥ १४३०

दोष्

दम् यदा च भवेद् धातु डोस् यदा स्यादुणादिके ।
दोष् भवेच्च तदा शब्दः ङित्वादम च विलुप्यति ॥ १४३१
दोष् यदा च भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं रूपं दोष् स्यात् तदा पुनः ॥ १४३२

"ससजुषोः" स्थितं सूत्रं तत् पुनश्च प्रयुज्यते ।
सकारस्य भवेद्रुत्वं विसर्गः स्यात् भवेच्च दोः ॥ १४३३

पूर्व्वपक्षः

दोष् यदा च भवेच् शब्दो मूर्धन्य षः भवेत् तदा ।
"ससजुषोः" कथं योज्यं दन्त्यः सः न स्थितः खलु ॥ १४३४

उत्तरपक्षः

षत्वं तावदसिद्धं स्यात् मूर्धन्यः षो न गृह्यते ।
दोस् इति सो भवेद् दन्त्यः स इह गृह्यते पुनः ॥ १४३५

दोषो भवेत् पदं तत्र पदं दोषः भवेत् तथा ।
दोषम् दोषौ भवेत् तत्र विशेषो न स्थितः क्वचित् ॥ १४३६
दोष् यदा स्यात् यत्र शस् स्यात् पदं दोषस्तदा भवेत् ।
"पद्दन्" इति प्रयुक्तं चेत् दोष्णः स्याच्च पदं तदा ॥ १४३७
दोष्णा दोषा यदा टा स्यात् दोष्णे दोषे यदा च ङे ।
भ्यामादिके न चान्यत्र विशेषो वर्त्तते क्वचित् ॥ १४३८

विविक्ष्

यदा वेष्टुमिच्छतीति विग्रहस्तु भवेदिह ।
विशेः सन् प्रत्ययस्तत्र "हलन्ताच्च" गुणो न हि ॥ १४३९
"सन्यङो"श्च भवेद् द्वित्वं हलादिः शिष्यते पुनः ।
"व्रश्चे"ति च शकारस्य भवेत् खलु षकारता ॥ १४४०
"षढोः कः सि" स्थितं सूत्रं तदपि च प्रयुज्यते ।
षकारस्य ककारस्तु तथा खलु प्रजायते ॥ १४४१
प्रत्ययस्यावयवत्वात् सस्य षत्वं भवेत् पुनः ।
"विविक्ष च तदा तत्र रूपं खलु प्रजायते ॥ १४४२
"सनाद्यन्ताः"—स्थितं सूत्रं धातुता च भवेत् तदा ।
धातुता स्याद् यदा तत्र क्विप् चापि प्रत्ययो भवेत् ॥ १४४३
"विविक्ष क्विप्" तदा तत्र रूपं भवेद् इति स्थितिः ।
"अतो लोपः" भवेद् योज्यं विविक्ष् रूपं तदा भवेत् ॥ १४४४

विविक्ष् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्यः" च भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ १४४५

प्रत्ययः सु यदा लुप्तो रूपं विविक्ष् तदा पुनः ।
"संयोगान्त"—सकारस्य पुनर्भवेत् विलोपनम् ॥ १४४६
षकारस्य यदा लोपः विविक् रूपं तदा भवेत् ।
एवं यदा स्थितं तत्र परे कार्य्यं भवेद् यथा ॥ १४४७

पूर्व्वपक्षः

विविक् यदा स्थितं तत्र स्कोरिति च प्रयुज्यते ।
अन्त्यस्य च ककारस्य तथा लोपः प्रसज्यते ॥ १४४८

उत्तरपक्षः

"षढोः कः सि:" परं शास्त्रं तेन कश्च भवेदिह ।
स चासिद्धो भवेदत्र "स्कोरिति कः" न लुप्यति ॥ १४४९

रूपं विविक् स्थितं तत्र पूर्व्वमेव प्रदर्शितम् ।
"व्रश्चे"ति च शकारस्य भवेत् खलु षकारता ॥ १४५०

पूर्व्वपक्षः

रूपं विविक् यदा तत्र ककारो हि तदा भवेत् ।
शकारो न भवेत्तत्र "व्रश्चे"ति वा भवेत् कथम् ॥ १४५१

उत्तरपक्षः

रूपं विविक् स्थितं तत्र ककार एव हि स्थितः ।
तथापि च भवेद् "व्रश्च"—दर्शयामि यथा परे ॥ १४५२
सनो दन्त्यः सकारो हि यदा परे प्रवर्त्तते ।
तदेव तं समाश्रित्य "षढोः कः सि:" भवेद् हि कः ॥ १४५३
ककारे च निमित्तं स्यात् स सकारः सनः खलु ।
सकारश्च यदा लुप्तः ककारोऽपि विलुप्यति ॥ १४५४
निमित्तं न यदा तत्र नैमित्तिकं न तिष्ठति ।
न यदा सः न तदा कः मूर्द्धन्यः षस्तदा भवेत् ॥ १४५५
विविष् तदा भवेत्तत्र मूर्द्धन्यः षो भवेत् यदा ।
व्युत्क्रमेण विविष् चेति रूपं तत्र च लभ्यते ॥ १४५६
विविष् इति षकारे च निमित्तं झल् पुरा स्थितम् ।
झलं तु तं समाश्रित्य "व्रश्चेति" च प्रयोजितम् ॥ १४५७
सनो दन्त्यः सकारो यः स खलु झल् भवेदिह ।
झलो यदा भवेल्लोपः "व्रश्चेति" च प्रयोजितम् ॥ १४५८

निमित्तं न यदा तत्र नैमित्तिकं न तिष्ठति ।
न यदा सः न तदा षः तालव्यः शस्तदा भवेत् ॥ १४५९

तालव्यशो यदा तत्र विविश् रूपं भवेत्तदा ।
व्यत्क्रमेण पुना रूपं विविश् चेति च लभ्यते ॥ १४६०

विविश् भवेद् यदा तत्र तालव्यः शो भवेद् यदा ।
"व्रश्चे"ति च तदा सूत्रम् अवश्यं युज्यते खलु ॥ १४६१

"व्रश्चेति" च यदा युक्तं मूर्द्धन्यः षस्तदा भवेत् ।
विविश् इति तदा तत्र भवेद् रूपमिति स्थितिः ॥ १४६२

"झलां जश्" च भवेद् योज्यं रूपं विविड् तदा भवेत् ।
"वावसाने" विभाषा चर् पदं विविट् भवेत् तथा ॥ १४६३

विविक्षौ स्यात् पदं तत्र विविक्षः स्यात् पदं तथा ।
अन्यत्र न विशेषः स्यात् आरभ्यते परं पुन ॥ १४६४

तक्ष्

तक्षु स्थितस्तनूकारे तस्मात् क्विप् च प्रयुज्यते ।
तक्ष् तत्र च भवेद् शब्दः स इह प्रकृतिर्भवेत् ॥ १४६५

यदा तक्ष् स्यात् यदा सु स्यात् हल्ङ्याभ्यश्च प्रयुज्यते ।
प्रत्ययः सु विलुप्तः स्यात् रूपं तक्ष् च तदा भवेत् ॥ १४६६

"को"रिति च भवेद् योज्यं ककारस्य विलोपनम् ।
तष् भवेच्च तदा रूपं तट् तड् पदं ततो भवेत् ॥ १४६७

तक्षौ भवेत् पदं तत्र तक्षः स्याच्च पदं परम् ।
अन्यत्र न विशेषः स्यात् आरभ्यये परं पुनः ॥ १४६८

गोरक्ष् (गो + रक्ष् + क्विप्

गोरट् गोरड् पदं तत्र पूर्व्ववच्च भवेत् पदम् ।
गोरक्षौ स्यात् गोरक्षः स्यात् विशेषो न स्थितः पुनः ॥ १४८९

गोरक्ष् (गो + रक्ष + णिच् + क्विप् + णिलोपः)

तक्ष् (तक्ष् + णिच् + क्विप् णिलोपः)

तक्ष् रक्ष् तत्र स्थितो धातुः "हेतुमति" भवेच्च णिच् ।
तक्षि रक्षि तदा च स्याद् "सनाद्यन्ताः"-- च धातुता ॥ १४७०

धातुता स्याद् यदा तत्र प्रत्ययः क्विप् प्रयुज्यते ।
"णेरनिटि" णिचो लोपः क्विपपि च विलुप्यति ॥ १४७१
तक्ष्, रक्ष्, तदा भवेच्, शब्दः स स च प्रकृतिर्भवेत् ।
ततः परं सुबादिकं भवेत्तत्र यथायथम् ॥ १४७२
तक्ष् यदा च भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हलङ्याब्भ्य"श्च भवेद्द योज्यं प्रत्ययः सु विलुप्यति ॥ १४७३
सु यदा च विलुप्तः स्यात् रूपं तक्ष् च तदा भवेत् ।
पुनः प्रश्नो भवेदत्र "स्को"रिति युज्यते न वा ॥ १४७४
"स्को"रिति यत् स्थितं सूत्रं तदिह तु न युज्यते ।
णिलोपो यो भवेदत्र स स्थानिवत् भवेत् खलु ॥ १४७५
णिः यदा स्यात् परे तत्र सूत्रं "स्कोः" न प्रयुज्यते ।
ककारस्य ततो नास्ति पुनरिह विलोपनम् ॥ १४७६

पूर्व्वपक्षः

पूर्व्वत्रासिद्धे न स्थानिवत् (वा)

न च पूर्व्वत्रासिद्धीये स्थानिवत्त्वं प्रसज्यते ।
वार्त्तिकं तु स्थितं तत्र प्रमाणं तद् भवेत् खलु ॥ १४७७

उत्तरपक्षः

तस्य दोषः संयोगादिलोप लत्व-णत्वेषु (वा)

संयोगादे र्विलोपश्चेत् लत्वं णत्वं भवेद्द यदि ।
भवेच्च स्थानिवद्भावः स्थानिवत्त्वं हि गृह्यते ॥ १४७८
संयोगादे र्विलोपश्च प्रकृते विषयो भवेत् ।
स्थानिवत्त्वं ततश्च स्यात् स्थानिवत्त्वं च गृह्यते ॥ १४७९
यद्यपि णेर्विलोपः स्यात् णिः स्थित इव मन्यते ।
णेरिति स्को ककारस्य न प्राप्नोति विलोपनम् ॥ १४८०
संयोगान्तस्य विलोपस्तत एव गति र्भवेत् ।
षकारस्य तथा तत्र भवेत् खलु विलोपनम् ॥ १४८१
षकारस्य यदा तत्र तथा भवेद् विलोपनम् ।
तक् तदा भवेद्द तत्र पदमिष्टं तदेव हि ॥ १४८२
तग् चापि च पदं तत्र यथायथं भवेत् खलु ।
तक्ष् यदा स्यात् यदा सु स्यात् पदद्वयं भवेत् तथा ॥ १४८३

रक्ष् इह चेद् भवेत् शब्दः समा खलु गतिर्भवेत् ।
गोरक्ष् यदा भवेच्च् शब्दः तदापि स्यात् तथैव च ॥ १४८४
गोरक् भवेत् पदं तत्र गोरग् पदं भवेत् तथा ।
परत्र न विशेषः स्यात् पदमूह्यं यथायथम् ॥ १४८५

पिपक्ष् (पच् + सन् + क्विप्)

डुपचष् च भवेत् पाके प्रत्ययः सन् प्रयुज्यते ।
"सन्यङो"श्च भवेद् द्वित्वं हलादिः शिष्यते पुनः ॥ १४८६
"सनत्य"श्च स्यादिकारः "चोः कुः" कुत्वं प्रवर्त्तते ।
पिपक्ष् भवेत् तदा शब्दः स इह प्रकृतिर्भवेत् ॥ १४८७

पिपक्ष् यदा तदा सु स्यात् "हलङ्याब्भ्यः" सु विलुप्यति ।
पिपक्ष् तदा भवेत् रूपं षकारश्च विलुप्यति ॥ १४८८

पूर्व्वपक्षः

"स्को"रिति च ककारस्य प्राप्तं खलु विलोपनम् ।

उत्तरपक्षः

"चोः कुरि'ति भवेत् कुत्वं तदसिद्धं भवेदिह ॥ १४८९
पिपक् पिपग् पदं तत्र विशेषश्च न वर्त्तते ।

दिधक् (दह + सन् + क्विप्)

दिधक् दिधग् पदं च स्यात् न विशेष इहापि च ॥ १४९०

इति षान्ताः

अथ सकारान्तप्रकरणम्

सुपिस् (सु + पिस् + क्विप्)

सुष्ठु स पेसतीति च शब्दः सुपिस् भवेदिह ।
पिसृ गतौ स्थितो धातुः प्रत्ययः क्विप् ततः परम् ॥ १४९१
सुपिस् सु स्यात् यदा तत्र सुपीः पदं भवेत् तदा ।
"र्वो"रिति च स्थितं सूत्रं तेन दीर्घः प्रजायते ॥ १४९२
सुपिसौ स्यात् पदं तत्र सुपिसः स्यात् पदं पुनः ।
सुपिसा स्यात् सुपीर्भ्याम् स्यात् सुपीर्भिः स्यात् तथा पदम् ॥ १४९३
सुपीःषु स्यात् पदं तत्र सुपीष्षु स्यात् पदं पुनः ।
अन्यत्र न विशेषः स्यात् पदमूह्यं यथायथम् ॥ १४९४

सुतुस् (सु+तुस्+क्विप्)

सु सुष्ठु तोसतीति च शब्दः सुतुस् भवेदिह ।
तुस च खण्डने धातुः तस्मात् क्विप् प्रत्ययो भवेत् ॥ १४९५
सुपिस् सु स्याद् यदा तत्र सुतुः पदं भवेत् तदा ।
"र्वो"रिति च स्थितं सूत्रं दीर्घत्वेन प्रजायते ॥ १४९६
सुतुषौ स्यात् पदं तत्र सुतुसः च पदं भवेत् ।
परत्र न विशेषः स्यात् पदमूह्यं यथायथम् ॥ १४९७

विद्वस्

अदादौ च "विद ज्ञाने" "लटः शतृ" प्रयुज्यते ।
"विदेः शतुर्वसु" स्तत्र शब्दो विद्वस् भवेत्तथा ॥ १४९८
विद्वस् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
रूपं तदा भवेद् विद्वस् स् ततः कार्य्यं यथायथम् ॥ १४९९
"वसु"र्भवेद् उगित् तत्र उगित्वात् नुम् प्रवर्त्तते ।
नुम् यदा स्यात् तदा रूपं विद्वन्स् स् भवेदिति स्थितिः ॥ १५००
सूत्रं "सान्तमहत"श्च पुनस्तत्र प्रयुज्यते ।
तेन तत्र भवेद् दीर्घः रूपं विद्वान्स् स् तदा भवेत् ॥ १५०१
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ।
सु यदा च विलुप्तः स्यात् रूपं विद्वान्स् तदा पुनः ॥ १५०२
"संयोगान्तस्य लोप"श्च पुनरिह प्रसज्यते ।
सकारस्य यदा लोपः रूपं विद्वान् तदा भवेत् ॥ १५०३

पूर्व्वपक्षः

नकारस्य पुनर्लोप इह खलु प्रसज्यते ।

उत्तरपक्षः

लोपो यः स्यात् सकारस्य स चासिद्धो भवेदिह ॥ १५०४
विद्वांसौ स्यात् परं तत्र विद्वांसः स्यात् पदं तथा ।
विद्वांसम् स्यात् पदं तत्र विद्वांसौ च भवेत् पदम् ॥ १५०५
हे विद्वन् स्यात् पदं तत्र सम्बुद्धिश्चेत् परे भवेत् ।
विद्वस् यदा यदा शस् स्यात् सूत्रं परं भवेत् तदा ॥ १५०६

४३६ । वसोः सम्प्रसारणम् । ६।४।१३१

वस्वन्तश्च यदा भः स्यात् तदा तस्य प्रसारणम् ।
विदुषः स्यात् प्रसारे च पूर्व्वरूपं उकारता ॥ १५०७

विदुषा स्यात् पदं तत्र प्रत्ययष्टा यदा भवेत् ।
विद्वद्भ्याम् स्यात् पदं तत्र "वसु-स्रंसु"—दकारता ॥ १५०८

सेदिवस् (षद्लृ + क्वसु)

विशरणे गतौ षद्लृ षद्लृ स्याद् चावमादने ।
"धात्वादेः षः" सकारः स्यात् तथा च सद् भवेदिह ॥ १५०९
"भाषायां" च स्थितं सूत्रं लिटः क्वसु प्रयुज्यते ।
"लिटि धातो"र्भवेद् द्वित्वं हलादिः शिष्यते पुनः ॥ १५१०
तस्याभ्यासलोपौ तत्र "अत" श्चेति भवेद् यदा ।
"वस्वेकाजात्"— भवेद इट् च सेदिवस् च तथा भवेत् ॥ १५११

सेदिवस् स्याद् यदा शब्दः प्रत्ययः सु परे यदा ।
सेदिवस् सु तदा तत्र भवेद् रूपमिति स्थितिः ॥ १५१२
उगित् क्वसुर्भवेत्तावत् नुम् तस्माच्च प्रयुज्यते ।
नुम् यदा स्यात् तदा तत्र सेदिवन्स् च भवेदिह ॥ १५१३
सूत्रं "सान्तमहत"श्च पश्चात् तत्र प्रयुज्यते ।
तेन तत्र भवेद् दीर्घः सेदिवान्स् च भवेत् तदा ॥ १५१४
"हलङ्याब्भ्य"श्च स्थितं सूत्रं तत् तदा च प्रयुज्यते ।
प्रत्ययः सु विलुप्तः स्यात् सेदिवान्स् च भवेत्तदा ॥ १५१५
"संयोगान्तस्य लोप"श्च पुनस्तत्र प्रसज्यते ।
सकारस्य भवेल्लोपः सेदिवान् स्यात् पदं तदा ॥ १५१६

पूर्व्वपक्षः

लोप इह नकारस्य भवेत् प्राप्त इति स्थितिः ।

उत्तरपक्षः

लोपः यः स्यात् सकारस्य स चासिद्धो भवेदिह ॥ १५१७

सेदिवांसौ पदं च स्यात् सेदिवांसः पदं भवेत् ।
सेदिवांसम् सेदिवांसौ पदं तत्र भवेत् पुनः ॥ १५१८
सेदिवस् स्याद् यदा शब्दः प्रत्ययः शस् परे यदा ।
सेदुषः स्यात् पदं तत्र "वसोः" प्रसारणं भवेत् ॥ १५१९

पूर्व्वपक्षः

"वस्वेकाजात्" स्थितं सूत्रम् इडागमो भवेत् तथा ।
अन्तरङ्गं भवेत् कार्य्यम् इडागमो यदा भवेत् ॥ १५२०

उत्तरपक्षः

प्रसारणे च कर्त्तव्ये न तावत् स्याद् इड़ागमः ।
"अकृतव्यूहा"—चेति च परिभाषा प्रवर्त्तते ॥ १५२१

सेदुषा स्यात् पदं तत्र सेदिवद्भ्यां पदं भवेत् ।
सेदुषे स्यात् पदं तत्र पदमूह्यं परं बुधैः ॥ १५२२

सुहिन्स्

सुष्ठु हिनस्तीति तत्र विग्रहस्तु भवेद् यदा ।
प्रत्ययः क्विप् भवेद् योज्यः शब्दः सुहिन्स् तदा भवेत् ॥ १५२३

सुहिन्स् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ॥ १५२४
प्रत्ययः सु यदा लुप्तः सुहिन्स् रूपं तदा भवेत् ।
"संयोगान्तस्य" लोपे च पदं सुहिन् भवेत् पुनः ॥ १५२५

पूर्व्वपक्षः

नकारस्य पुनर्लोपः खलु प्राप्तो भवेदिह ।

उत्तरपक्षः

लोपो यः स्यात् सकारस्य स चासिद्धो हि मन्यते ॥ १५२६
सुहिन् भवेत् पदं तत्र प्रत्ययः सु परे यदा ।
यदा सुहिन्स् यदा सु स्यात् पदमिष्टं तदेव हि ॥ १५२७

पूर्व्वपक्षः

सूत्रं "सान्तमहत"श्च पुनस्तत्र प्रयुज्यते ।
उपधायास्ततश्चात्र दीर्घो भवेदिति स्थितिः ॥ १५२८

उत्तरपक्षः

संयोगः स भवेत् सान्तः स्यात् प्रातिपदिकस्य च ।
संयोग इह च धातोः सूत्रं तस्मात् न युज्यते ॥ १५२९
उपधायास्ततो दीर्घो नेह खलु प्रसज्यते ।
ह्रस्वे पदं भवेत् सुहिन् पदमिष्टं तदेव हि ॥ १५३०
सुहिंसौ स्यात् पदं तत्र सुहिंसः स्यात् पदं तथा ।
सुहिंभ्यः स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ १५३१

सुहिन्स्सु स्यात् पदं तत्र सुहिन्सु स्यात् पदं तथा ।
अन्यत् पदं बुधैरूह्यं विशेषो न स्थितः क्वचित् ॥ १५३२

ध्वन्स्

ध्वत् भवेच्च पदं तत्र ध्वद् भवेच्च पदं तथा ।
ध्वंसौ ध्वंसः पदं च स्यात् पदं ध्वद्भ्यां तथा भवेत् ॥ १५३३

स्रन्स्

स्रत् भवेच्च पदं तत्र स्रद् भवेच्च पदं तथा ।
स्रंसौ स्रंसः पदं च स्यात् स्रद्भ्याम् भवेत् पदं तथा ॥ १५३४

पुम्स्

पूञ् पवने स्थितो धातुः पूञो डुंसुन् उणादिके ।
पुम्स् भवेच्च तदा शब्दः सुबुत्पत्तिस्ततः परम् ॥ १५३५

पुम्स् यदा भवेत् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयोजनम् ॥ १५३६

४३७ । पुंसोऽसुङ् । ७।१।८९

सर्व्वनामस्थानं यदि विवक्षितं भवेदिह ।
पुंसस्तदा समादेशो भवेदसुङ् इति स्थितिः ॥ १५३७
प्रत्ययश्च भवेद्ध असुङ् उकारश्च भवेदिह ।
उच्चारणे सहायः स्यात् स उकार इति स्थितिः ॥ १५७८

पूर्व्वपक्षः

प्रत्ययश्च भवेदसुङ् उकार इद् भवेदिह ।
नुमर्थं स उकारः स्यात् प्राचीनैः कथितं तथा ॥ १५७९

उत्तरपक्षः

असुङ "उ" नुमर्थं स्यात् इति न रुचिरं भवेत् ।
डुंसुनि य उकारः स्यात् तेनैव नुम् प्रसिध्यति ॥ १५४०
बहुपुंसी पदं च स्यात् अनुङ "उ" न वर्त्तते ।
उकारेण हि डुंसुन "उगितश्च" भवेद् हि नुम् ॥ १५४१

पुंस् यदा च भवेच्च् शब्दः प्रत्ययः सु परे यदा ।
असुङ् तदा भवेद् योग्यः "पुमस् स" स्याच्च तदा पुनः ॥ १५४२

उगित्वेन च डुंसुनो नुमपि च प्रयुज्यते ।
"पुमन्स्स् तदा च भवेद् रूपं ततः कार्य्यं परं भवेत् ॥ १५४३
सूत्रं "सान्तमहत"श्च ततो योज्यं भवेदिह ।
तेन तत्र भवेद् दीर्घः पुमान्स्स् रूपं भवेत्तदा ॥ १५४४
"हल्ङ्याब्भ्य"श्च भवेद् योज्यं प्रत्ययः सु विलुप्यति ।
प्रत्ययः सु यदा लुप्तः पुमान्स् रूपं तदा भवेत् ॥ १५४५
"संयोगान्तस्य" लोपश्च पुनस्तत्र प्रयुज्यते ।
सकारस्य भवेल्लोपः "पुमान्" रूपं भवेत् तदा ॥ १५४६
लोपः यः स्यात् सकारस्य स चासिद्धो भवेदिह ।
नकारस्य पुनर्लोपस्तस्मान्न च प्रसज्यते ॥ १५४७
पुमांसौ स्यात् पुमांसः स्यात् पुंसः पुंसा पदं भवेत् ।
पुम्भ्यां पुम्भिः पदं तत्र पुंसि पुंसः भवेत् पदम् ॥ १५४८

उशनस्

"वश कान्तौ" स्थितो धातुः स्याद् "वशेः कनसिः" पुनः ।
"ग्रहिज्या"—च प्रसारः स्यात् उशनस् च भवेत् तथा ॥ १५४९
उशनस् स्याद् यदा शब्दः सम्बुद्धौ सु परे यदा ।
वार्त्तिकं च भवेद् योज्यं यथा परे प्रदर्शितम् ॥ १५५४

अस्य सम्बुद्धौ वा अनङ्
नलोपश्च वा वाच्यः (वा)

हे उशनस् पदं च स्यात् हे उशन पदं भवेत् ।
हे उशनः पदं च स्यात् पदत्रयं भवेदिह ॥ १५५५

उशनोभ्याम् पदं च स्यात् उशनोभिः पदं भवेत् ।
परत्र न विशेषः स्यात् पदमूह्यं यथायथम् ॥ १५५६

अनेहस्

अनेहा स्यात् पदं तत्र अनेहसौ पदं भवेत् ।
अनेहसः पदं च स्यात् हे अनेहः भवेत् पुनः ॥ १५५७
अनेहोभ्यां पदं च स्यात् अनेहोभिः पदं भवेत् ।
अन्यत्र न विशेषः स्यात् पदमूह्यं यथायथम् ॥ १५५८

वेधस्

वेधाः स्यात् वेधसौ स्याच्च वेधसः स्यात् पदं पुनः ।
हे वेधः स्यात् वेधोभ्याम् स्यात् पदमूह्यं परं बुधैः ॥ १५५९

सुवस्

वस आच्छादने धातुः "सु" पूर्व्वं च भवेदिह ।
प्रत्ययः क्विप् भवेद्‌ योज्यः शब्दः सुवस् तदा भवेत् ॥ १५६०
सुवस् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
"हलङ्याब्भ्य"श्च सुलोपः स्यात् रूपं सुवस् भवेत् तदा ॥ १५६१
रुत्वं भवेद्‌ विसर्गश्च सुवः स्याच्च पदं तदा ।
सुवस् सु स्याद् यदा तत्र तदेव हि पदं भवेत् ॥ १५६२

पूर्व्वपक्षः

"अत्वस्"—इति स्थितं सूत्रं तेन दीर्घो भवेदिह ।

उत्तरपक्षः

"अधातो"रिति तत्र च दीर्घता न भवेत्ततः ॥ १५६३

सुवसौ स्यात् पदं तत्र सुवसः स्यात् पदं तथा ।
परं पदं बुधैरूह्यं नेह मया प्रदीयते ॥ १५६४

पिण्डग्रस्—पिण्डग्लस्

पिण्डग्रः स्यात् पदं तत्र पिण्डग्लः स्यात् पदं तथा ।
सुवस्-वच्च भवेद् रूपम् ऊह्यं बुधैर्यथायथम् ॥ १५६५

अदस्

अदस् यदा भवेच् शब्दः प्रत्ययः सु परे यदा ।
पदं यदा भवेत् साध्यं सूत्रं परं प्रयोजनम् ॥ १५६६

४३८ । अदस औ सुलोपश्च । ७।२।१०७

प्रत्ययः सु परे स्याच्चेत् अदस औ प्रयुज्यते ।
अन्तादेशो भवेत्तत्र प्रत्ययः सु विलुप्यति ॥ १५६७

अदस् सु स्याद् यदा तत्र "अद औ" च तदा भवेत् ।
"तदोः सः सौ" सकारः स्यात् पदम् असौ भवेत् तदा ॥ १५६८

औत्वप्रतिषेधः साकच्कस्य वा वक्तव्यः

साद्रुत्वं च। (वा)

अवसश्चेद् भवेदकच् औत्वं न वा विधीयते।
औत्वं न चेत् सकारात्तु परम् उत्वं भवेदपि॥ १५६९

अदस् अकच् यदा तत्र अदकस् स्यात् तदा पुनः।
अदकस्सु तदा तत्र अद्कस्स् च तदा भवेत्॥ १५७०
औत्वं यदा न तत्र स्यात् तदोः सः सौ प्रयुज्यते।
दकारस्य सकारः स्यात् असकस्स् च तदा भवेत्॥ १५७१
सकारस्य परे तावद् अकारो यः प्रवर्त्तते।
तस्य तावद् भवेद् उत्वम् अनेन वार्त्तिकेन च॥ १५७२
यदा तत्र भवेद् उत्वम् अमुकस्स् स्यात् तदा पुनः।
"त्यदादीनां" भवेद् योज्यम् असुकस् च तदा भवेत्॥ १५७३
पररूपं भवेत्तत्र स्याद् असुकस् तदा पुनः।
रुत्वं भवेत् विसर्गश्च असुकः स्यात् तदा पदम्॥ १५७४

अदकस्स् च यदा तत्र भवेद् औत्वं यदा पुनः।
अदकौस् स्यात् तदा तत्र भवेद् रूपम् इति स्थितिः॥ १५७५
"तदोः दः सः" भवेद् योज्यं दकारस्य सकारता।
असकौ स्यात् पदं तत्र पदमिष्टं तदेव च॥ १५७६

अदस् + औ = अमू

अदस् औ स्याद् यदा तत्र रूपम् अदौ भवेत् तदा।
त्यदाद्यत्वं परं रूपं वृद्धिस्तत्र प्रवर्त्तते॥ १५७७

"अदसोऽसे"—भवेद् योज्यं दीर्घं ऊ च तथा भवेत्।
दकारस्य मकारः स्याद् पदम् अमू तथा भवेत्॥ १६७८

अदस् + जश् = अमी

अदस् जश् चेद् भवेत्तत्र त्यदादीनाम् अकारता।
अदजश् च तदा तत्र भवेद् रूपमिति स्थितिः॥ १५७९
"जशः शी" च भवेद् योज्यम् अद ई स्यात् तदा पुनः।
"अदे" भवेत् तथा तत्र ततः सूत्रं परं भवेत्॥ १५८०

४३९ । एत ईद् बहुवचने । ८।२।८१

अदस् यदि भवेच् शब्दः स्याद् बहुवचनं यदि ।
दात् परस्य स्याद् एत ईत् दकारस्य मकारता ॥ १५८१

एत इत् चेत् भवेत्तत्र भवेद्र रूपम् "अदी" तदा ।
दकारस्य मकारश्चेत् पदम् अमी तदा भवेत् ॥ १५८२

अदस् + अम् = अमुम्

अदस् अम् स्याद् यदा तत्र पदं साध्यं भवेद् यदा ।
"त्यदादीनां" भवेद्र योज्यम् अद अम् स्यात् तदा पुनः ॥ १५८३
"अदसोऽसेः" स्थितं सूत्रं परं च तत् प्रयुज्यते ।
उत्वं भवेत् भवेद् मत्वम् अमुम् भवेत् पदं तदा ॥ १५८४
आदौ विभक्तिकार्य्यं स्यात् "त्यदादीनां" प्रयुज्यते ।
"अदसोऽसेः" भवेत् पश्चात् उत्वं मत्वं भवेत् तथा ॥ १५८५

अदस् + टा = अमुना

अदस् यदा भवेद अमु घिसंज्ञा च प्रयुज्यते ।
ना तदा च भवेन् तत्र स्याद् अमुना तदा पदम् ॥ १५८६

पूर्व्वपक्षः

"अदसोऽसेः" परं शास्त्रं तदसिद्धं भवेदिह ।
"आङो ना" च भवेत् पूर्व्वं तत् कथं वा भवेद् गतिः ॥ १५८७
पूर्व्वत्रासिद्धमित्येतत् नेह खलु प्रवर्त्तते ।
मुनिना च कृतं सूत्रं तेन गतिर्भवेदिह ॥ १५८८

४४० । न मु ने । ८।२।३

नाभावश्चेद् भवेत् कार्य्यः कृतो यदि भवेत् पुनः ।
मुभावश्च तदा तत्र नासिद्धः स्यादिति स्थितिः ॥ १५८९

अमुना स्यात् पदं तत्र बाधा क्वचिद् न वर्त्तते ।
अदस् टा स्याद् यदा तत्र पदं पुंसि तथा भवेत् ॥ १५९०
अमुना स्यात् पदं तत्र यथा मया प्रदर्शितम् ।
अमूभ्यां स्यात् पदं पश्चाद्र अमीभिः स्यात् पदं पुनः ॥ १५९१
अमुष्मै स्याद् अमूभ्यां स्याद् अमीभ्यः स्यात् पदं तथा ।
अमुष्मात् स्याद्र अमूभ्याम् स्यात् अमीभ्यश्च पदं भवेत् ॥ १५९२

अमुष्मात् स्यात् अमुयोः स्यात् अमीषाम् च भवेत् पदम् ।
अमुष्मिन् स्यात् अमुयोः स्याद् अमीषु स्यात् पदं परम् ॥ १५९३

इति सान्ताः

इति हलन्तपुंलिङ्गप्रकरणम्

इह मया गते वर्षे (१९७४) पुंसीह कारिकाः कृताः ।
शतत्रयं द्विषष्टिश्च संख्यास्तासां स्थितास्तदा ॥ १
प्रदर्शितं तदा रूपं शब्दानाञ्च समासतः ।
स्पृष्टं मया तदा सूत्रं न विस्तरः कृतस्तदा ॥ २
गते वर्षे रुजा देहे महती चाभवत् मम ।
रक्ते मे शर्करा दृष्टा देहे क्लान्तिश्च सर्व्वदा ॥ ३
महती च रुजा देहे पीड़ा चासीद् वलीयसी ।
जीवामि वा न जीवामि संशयो मे स्थितस्तदा ॥ ४
न ग्रन्थे स्याद् यथा च्छेदस्तथा चेष्टा कृता मया ।
शब्दानान्तु समासेन रूपं तदा प्रदर्शितम् ॥ ५
अस्मिन् वर्षे (१९७५) कथञ्चिच्च देहे स्वस्ति प्रतिष्ठितम् ।
विषयानामुपन्यासे पुनर्यत्नः कृतो मया ॥ ६
गते वर्षे कृताः श्लोकाः सर्व्वथा च विसर्जिताः ।
श्लोकेभ्यश्च पुनस्तेभ्य एकोऽपि च न गृह्यते ॥ ७
अस्मिन् वर्षे कृताः श्लोकाः सर्व्वथा नूतनाश्च ते ।
विस्तरोऽपि मया दत्तः कालो दत्तो यथा परे ॥ ८

रचनाकालः

२.५।१९७५-१० ५।१९७५ ९ दिवसाः-२९० श्लोकाः (१-२९०)
११ ५।१९७५-२०।५।१९७५ १० दिवसाः-४५३ श्लोकाः (२९१-७४३)
२१।५।१९७५ — १ दिवसः-९२ श्लोकाः (७४४ ८३५)
२२।५।१९७५-१।६ १९७५ ११ दिवसाः-१७४ श्लोकाः (८३६-१००९)
२।६।१९७५-३।६।१९७५ २ दिवसौ-८४ श्लोकाः (१०१०-१०९३)
२४.८।१९७५-१३।६ १९७५ २१ दिवसाः-५०० श्लोकाः (१०९४-१५९३)

इति—
श्रीभुवनमोहन-मृणालिनी-सुत-श्रीहरिपददत्त-विरचितायां
व्याकरणकारिकायाम् हलन्तपुंलिङ्गशब्दप्रकरणम् ।

आरम्भः २६।४।१९७५

हलन्तस्त्रीलिङ्गे

हकारान्तप्रकरणम्

उपानह् च यदा शब्दः प्रत्ययः "सु" परे यदा ।
"वे"रिति च भवेद् योज्यं "हल्" इति च प्रयुज्यते ॥ १
सूत्रद्वयं यदा युक्तं प्रत्ययः "सु" विलुप्यति ।
उपानह् च तदा तत्र ततः सूत्रं परं भवेत् ॥ २

४४१ । नहो धः । ८।२।३४

झलि परे पदान्ते च नहो हस्य धकारता ।
हकारस्य धकार स्यात् उपानध् च तदा भवेत् ॥ ३

उपानध् च यदा तत्र सूत्रं परं प्रयोजनम् ।
"झलां जशः" स्थितं सूत्रं तदिह च प्रयुज्यते ॥ ४
तदिह च यदा युक्तं धकारस्य दकारता ।
उपानद् च पदं तत्र तथा खलु प्रजायते ॥ ५
दकारस्य यदा तत्र पुनर्भवेत् तकारता ।
उपानत् स्यात् तदा तत्र पदद्वयं तथा भवेत् ॥ ६
उपानहौ पदं तत्र उपानहः पदं भवेत् ।
उपानद्भ्यां भवेत्तत्र उपानत्सु तथा पुनः ॥ ७

उष्णिह्

स्निह प्रीतौ स्थितो धातुः "उत्" पूर्व्वे च भवेत् पुनः ।
प्रत्ययः क्विन् यदा पश्चात् शब्द उष्णिह् तदा भवेत् ॥ ८
तकारस्य भवेल्लोपः पुनरिह निपातनात् ।
षकारस्य नकारस्य षत्वं णत्वं भवेत् क्रमात् ॥ ९

उष्णिह् यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
"वे"रिति च भवेद् योज्यं "हलि"ति च प्रयुज्यते ॥ १०
सूत्रद्वयं यदा युक्तं प्रत्ययः "सु" विलुप्यति ।
उष्णिह् तदा भवेत्तत्र सूत्रं परं प्रयुज्यते ॥ ११
"क्विन्नि"ति च स्थितं सूत्रं तद् योज्यं च भवेदिह ।
कुत्वं तदा भवेत्तत्र शब्दः उष्णिघ् तदा भवेत् ॥ १२

"झलां जशः" स्थितं सूत्रं तत् पुनश्च प्रयुज्यते ।
घकारस्य गकारः स्यात् पदम् उष्णिग् तदा भवेत् ॥ १३
गकारस्य ककारश्च पुनर्यदा भवेदिह ।
पदम् उष्णिक् तदा तत्र पदद्वयं तथा भवेत् ॥ १४
उष्णिहौ स्यात् पदं तत्र उष्णिहः स्यात् पदं तथा ।
उष्णिग्भ्याम् स्यात् पदं तत्र स्याद् उष्णिक्षु तथा पदम् ॥ १५

दिव्

पदं द्यौश्च भवेत्तत्र पदं दिवौ भवेत्तथा ।
पदं दिवः भवेत्तत्र पदं द्युषु तथा भवेत् ॥ १६

गिर्

गीः गिरौ च गिरस्तत्र पदमूह्यं परं बुधैः ।

पुर्

पुः पुरौ च पुरस्तत्र पदमन्यद् भवेत् तथा ॥ १७

चतुर्

चतसृ स्यात् समादेशः चतस्रः स्यात् पदं जशि ।
शसि चापि चतस्रः स्यात् चतसृणां भवेत् परे ॥ १८

किम्

"किमः कः" च स्थितं सूत्रं तदिह च प्रयुज्यते ।
कादेशे च कृते तत्र पुनष्टाप् च भवेत् स्त्रियाम् ॥ १९
का भवेच्च पदं तत्र के भवेच्च पदं पुनः ।
काः स्यात् तत्र पुनः पश्चात् पदमूह्यं परं बुधैः ॥ २०

४४२ । यः सौ । ७।२।११०

इदम्

इदम् यदा भवेच् शब्दः स्त्रियां शब्दो यदा पुनः ।
दकारस्य यकारः स्यात् "सु" यदि स्यात् परे खलु ॥ २१
"इदम्" यदा यदा "सु" स्यात् "इदमो मः" प्रयुज्यते ।
मकारश्च स्थितस्तत्र यथा पूर्व्वं स्थितः पुनः ॥ २२
"इदम्" भवेत् तदा तत्र पदमिष्टं तदेव हि ।
"इदम्" यदा यदा स्याद् "औ" तदा भवेद् यथा परम् ॥ २३
"त्यदादीनाम्" स्थितं सूत्रं तदिह स्यात् प्रयोजनम् ।
"दश्च" पुनः स्थितं सूत्रं तदपि च प्रयुज्यते ॥ २४
सूत्रद्वयं यदा तत्र प्रयुक्तं स्याद् यथायथम् ।
इमे भवेत् पदं तत्र इमाः पदं तथा भवेत् ॥ २५

इमाम् भवेत् पदं तत्र पदम् इमे ततः परम् ।
इमाः पदं ततः पश्चात् द्वितीयायां पदानि च ॥ २६

इदम् यदा यदा टा स्यात् "अनाप्यकः" प्रयुज्यते ।
अन् आदेशस्तथा तत्र अनया च पदं भवेत् ॥ २७

इदम् यदा यदा भ्याम् च "हलि लोपः" प्रयुज्यते ।
इदो लोपो भवेत्तत्र पदम् आभ्याम् तथा भवेत् ॥ २८

तृतीयायां चतुर्थ्यां च द्वित्वे पदं तथैव च ।
न विशेषः स्थितस्तत्र विशेषस्तु न दृश्यते ॥ २९

इदम् यदा भवेत्तत्र भिस् यदा च परे भवेत् ।
आभिः भवेत् तदा तत्र विशेषो न स्थितः पुनः ॥ ३०

इदम् यदा यदा ङे स्यात् "सर्वनाम्नः" प्रयुज्यते ।
अस्यै भवेत् पदं तत्र पदमिष्टं तदेव हि ॥ ३१

इदम् यदा यदा ङसि यदा ङस् च भवेत् पुनः ।
अस्याः पदं भवेत्तत्र विशेषश्च न वर्त्तते ॥ ३२

इदम् यदा यदा ओस् स्यात् "ओसि चे"ति प्रयुज्यते ।
अनयोः स्यात् पदं तत्र पदमिष्टं तदेव हि ॥ ३३

इदम् यदा यदा स्याद् आम् सूत्रद्वयं प्रयोजनम् ।
"आमि" सूत्रं भवेद् योज्यं "हलि" योज्यं भवेत् पुनः ॥ ३४

पदम् आसाम् तथा तत्र पदमिष्टं तदेव हि ।
अस्याम् भवेत् पदं ङौ च आसु भवेत् पुनः सुपि ॥ ३५

अन्वादेशो यदा तत्र पदं भवेद् यथा परे ।
एनाम् एने एनाः तत्र एनया एनयोः पुनः ॥ ३६

अथ जकारान्तप्रकरणम्

स्रज्

"ऋत्विगि"ति स्थितं सूत्रं सृजेः क्विन् स्याद् अडागमः ।
तदा शब्दो भवेद् स्रज् च पदं भवेद् यथा परे ॥ ३७

स्रक् भवेच्च पदं तत्र स्रग् भवेच्च तथैव च ।
स्रजौ स्रजः भवेत् पश्चात् स्रक्षु भवेत् पुनः पदम् ॥ ३८

अथ दकारान्तप्रकरणम्

त्यद्

त्यद् इह च स्थितः शब्दः स्त्रियां टाप् च भवेद् यदा ।
"त्यदादीनां" भवेद् योज्यं "त्वा" भवेच्च तदा पुनः ॥ ३९

त्या भवेच्च भवेत् त्ये च त्याः भवेच्च तथैव च ।
परं पदं वुधैरूह्यं न च मया प्रदीयते ॥ ४०
एवं तद् स्यात् एवं यद् स्यात् एवम् एतद् भवेदिह ।
विस्तरो न मया दत्तः पदं साध्यं यथायथम् ॥ ४१

अथ चकारान्तप्रकरणम्

वाच्

वाच् यदा च भवेच् शब्दः पदं भवेत् यथा परे ।
भवेद् वाक् वाग् भवेद् वाचौ भवेद् वाचः पदं पुनः ॥ ४२
वाग्भ्यां भवेन पदं तत्र पदं वाक्षु तथा भवेत् ।
अन्यत् पदं भवेद् यद् यत् तत्तदूह्यं पुनर्वुधैः ॥ ४३

अथ पकारान्तप्रकरणम्

अप्

पकारान्ते भवेद् अप् च वहुत्वे स भवेत् सदा ।
यथा तस्य भवेद् रूपं तथा परे प्रदर्शितम् ॥ ४४

अप् यदा च भवेच् शब्दः प्रत्ययो जश् परे यदा ।
"अप्तृन्" इति स्थितं सूत्रं तत् तदा च प्रयुज्यते ॥ ४५
सूत्रं यदा भवेद् युक्तं दीर्घस्तदा प्रसज्यते ।
पदम् "आपः" भवेत्तत्र शसि पदं तदेव च ॥ ४६
अप् यदा च भवेच् शब्दः प्रत्ययो भिस् परे यदा ।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ४७

४४३ । अपो भि । ७।४।४८

अपस्तत्र तकारः स्याद् ङ्यादौ च प्रत्यये परे ।
अद्भिः पदं तथा तत्र अद्भ्यः अद्भ्यस्तथा भवेत् ॥ ४८
अपां भवेत् पदं तत्र पदम् अप्सु तथा पुनः ।
सर्व्वासु च विभक्तिषु पदं मया प्रदर्शितम् ॥ ४९

अथ शकारान्तप्रकरणम्

दिश्

दिक् दिग् भवेत् पदं तत्र दिशौ दिशः पदं भवेत् ।
दिग्भ्यां दिक्षु पदं च स्यात् ऊह्यं पदं परं बुधैः ॥ ५०
"त्यदादिषु" स्थितं सूत्रं दृशेः क्विन् च विधीयते ।
अन्यत्रापि भवेत् कुत्वं यथा परे प्रदर्शितम् ॥ ५१

दृक् दृग् भवेत् पदं तत्र दृशौ दृशः पदं भवेत् ।
परं पदं भवेद् यद् यत् तत्रदूह्यं पुनर्बुधैः ॥ ५२

अथ षकारान्तप्रकरणम्

त्विट् त्विड् भवेत् पदं तत्र त्विषौ त्विषः पदं भवेत् ।
त्विड्भ्याम त्विट्सु तथा त्विट्त्सु पदमिह भवेदपि ॥ ५३

सजूष्

यदा "सह जुषते" स्यात् तदा शब्दः भवेद् सजूष् ।
रूपं तस्य भवेदत्र यथा परे प्रदर्शितम् ॥ ५४
सजूः भवेत् पदं तत्र सजुषौ सजुषः पुनः ।
सजूर्भ्याम् स्यात् सजूष्षु स्यात् सजूर्षु स्यात् पुनः पदम् ॥ ५५
"ष्टुना ष्टु" च परं शास्त्रं तदसिद्धं भवेदिह ।
"ससजुषोः" स्थितं पूर्व्वं रुत्वं तेन सजूर्षु च ॥ ५६

आशीष्

आशीः स्यात् आशिषौ स्याच्च आशिषः स्यात् तथैव च ।
आशीर्भ्याम् स्याद् पदं तत्र पदमूह्यं परं बुधैः ॥ ५७

अथ सकारान्तप्रकरणम्

अदस्

अदस् यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
असौ भवेत् पदं तत्र "त्यदादीनाम्" प्रयुज्यते ॥ ५८
अदस् यदा भवेच् शब्दः प्रत्ययः औ परे यदा ।
अमू भवेत् पदं तत्र "अदस"श्च प्रयुज्यते ॥ ५९
अमूः भवेत् बहुत्वे च अमूम् अमू ततः परम् ।
अमूः भवेत् पदं तत्र बहुत्वे च परे शसि ॥ ६०
अमुया स्यात् अमूभ्यां स्यात् अमुभिः स्यात् ततः परम् ।
अमूष्यै स्यात् पदं तत्र "सर्व्वनाम्नः" प्रयुज्यते ॥ ६१
अमूभ्यां स्याद् यथापूर्व्वं अमूभ्यः स्यात् ततः पदम् ।
अमूष्याः स्यात् पदं तत्र अमूभ्यां च पदं भवेत् ॥ ६२
अमूभ्यः स्यात् पदं पश्चात् अमूष्याः च ततः परम् ।
अमूयोः स्यात् पदं तत्र अमूषां स्यात् पदं पुनः ॥ ६३
अमूष्यां स्यात् अमुयोः स्यात् अमूषु स्याद् पदं तथा ।
इह यत् यत् स्थितं तत्तत् सर्व्वं मया प्रदर्शितम् ॥ ६४

हलन्तस्त्रीलिङ्गप्रकरणम् समाप्तिः २६।४।१९७५

आरम्भ: २७।४।१९७५

हलन्तनपुंसकलिङ्गप्रकरणम्

हकारान्तप्रकरणम्

स्वनडुह्

स्वनडुह् स्याद् यदा शब्दः प्रत्ययः "सु" परे यदा ।
सूत्रं "स्वमो" भवेद् योज्यं प्रत्ययः "सु" विलुप्यते ॥ १
स्वनडुह् स्यात् तदा तत्र "होढः" पुनः प्रयुज्यते ।
स्वनडुत् स्यात् पदं तत्र स्वनडुद् च पदं भवेत् ॥ २

स्वनडुह् स्याद् यदा शब्दः प्रत्ययः औ परे यदा ।
"नपुंसकात्" भवेद् योज्यम् स्वनडुही तदा भवेत् ॥ ३
स्वनडुह स्याद् यदा शब्दः प्रत्ययो जश् परे यदा ।
सूत्रं "चतुर्—" भवेद् योज्यं स्वनड्वांहि तदा भवेत् ॥ ४
प्रथमायां यथा तत्र द्वितीयायां तथा भवेत् ।
परत्र च भवेत् पुंवद् ऊह्यं यथायथं बुधैः ॥ ५

वकारान्तप्रकरणम्

विमलदिव्

विमलदिव् यदा शब्दः प्रत्ययः "सु" परे यदा ।
"दिव उत्" च भवेद् योज्यं विमलद्यु पदं भवेत् ॥ ६

विमलदिव् यदा तत्र प्रत्ययः औ परे यदा ।
स्याद् विमलदिवी तत्र न विमलदिवौ पुनः ॥ ७

पूर्व्वपक्षः

प्रत्ययस्य विलोपेऽपि पूर्व्वं पदमिहोच्यते ।
प्रत्ययलक्षणं कार्य्यं विलोपेऽपि भवेदिह ॥ ८
यदा "राजपुरुषः" स्यात् प्रत्ययो लुप्यते तदा ।
प्रत्ययलक्षणं कार्य्यं लोपेऽपि च भवेदिह ॥ ९

प्रत्ययस्य यदा लोपस्तदा पूर्व्वं "पदं" यदि ।
प्रत्ययलक्षणं कार्य्यं पूर्व्वस्य चेद् भवेत्तदा ॥ १०
प्रत्ययस्य यदा लोपः परमपि "पदं" भवेत् ।
प्रत्ययलक्षणं कार्य्यं परस्यापि भवेत्तदा ॥ ११

पूर्व्वस्य स्याद् यथा तत्र परस्यापि तथा भवेत् ।
पूर्व्वस्य चेत् पदसंज्ञा पदसंज्ञा परस्य च ॥ १२
विमलदिव् यदा तत्र दिव्शब्दश्च परे तदा ।
परस्य स्यात् पदसंज्ञा पदसंज्ञं भवेन्न "दिव्" ॥ १३
विमलदिव् यदा तत्र प्रत्यय औ परे यदा ।
दिवः स्यात् पदकार्य्यं च स्याद् "विमलदिवौ" तदा ॥ १४
विमलदिव् यदा तत्र प्रत्यय औ परे यदा ।
स्याद् "विमलदिवौ" तत्र न "विमलद्यिवौ" पुनः ॥ १५

उत्तरपक्षः

परस्य चेद् "दिव"स्तत्र पदसंज्ञा प्रवर्त्तते ।
तदेव च पदं तत्र स्याद् "विमलद्यिवौ" खलु ॥ १६
परस्य च पदसंज्ञा नेह खलु प्रसज्यते ।
वार्त्तिकं च स्थितं तत्र तदिह स्याद् यथा परम् ॥ १७
उत्तरपदत्वे च अपदादिविधौ प्रतिषेधः (वा)
उत्तरं च पदं तत्र पदसंज्ञं भवेन्न च ।
प्रत्ययलक्षणं कार्य्यं न तस्य च प्रवर्त्तते ॥ १८
पदादिश्चेद् भवेत्तत्र निषेधो न प्रयुज्यते ।
पदसंज्ञा भवेत्तत्र पदकार्य्यं भवेदपि ॥ १६

विमलदिव् यदा शब्दः पदसंज्ञं न "दिव्" भवेत् ।
पदसंज्ञा न तस्य स्यात् भसंज्ञा च भवेद् वरम् ॥ २०
भसंज्ञा च यदा तत्र "नपुंसकात्" प्रवर्त्तते ।
समादेशो भवेत् "शी" च स्याद् "विमलदिवी" तथा ॥ २१

पदादौ स निषेधो न पुनरिह प्रवर्त्तते ।
पदसंज्ञा भवेत्तत्र दधिसेचौ निदर्शनम् ॥ २२
दधिसेचौ यदा तत्र सकार आदितो भवेत् ।
पदसंज्ञा भवेत्तत्र षत्वं तत्र निषिध्यते ॥ २३

आदितश्चेद् विधिर्योज्यस्तदेव न निषेधनम् ।
अन्ते यदि विधिर्योज्यो निषेधो वर्त्तते तदा ॥ २४
"सिच्" यदा च स्थितः शब्दः चकारः स्यात् तदान्तिमे ।
न तत्र पदसंज्ञा स्यात् कुत्वमपि न वर्त्तते ॥ २५

अथ रेफान्तप्रकरणम्

वार्

वार् भवेच्च पदं तत्र पदं वारी भवेत् तथा ।
जशि वारि भवेत्तत्र अझलन्तात् न नुम् भवेत् ॥ २६

चतुर्

चतुर् यदा भवेच् शब्दो जश् शस् यदा परे भवेत् ।
चत्वारि स्यात् पदं तत्र चत्वारि च भवेत् पदम् ॥ २७

अथ मकारान्तप्रकरणम्

किम्

किम् यदा च भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
सूत्रं "स्वमो" भवेद् योज्यं प्रत्ययः सु विलुप्यते ॥ २८
लुक्शब्देन पुनश्चात्र लोपः खलु विधीयते ।
कादेशो न भवेत्तस्मात् "किम्" तत्र च पदं भवेत् ॥ २९
किम् के कानि पदं तत्र भवेत् खलु यथाक्रमम् ।
परं पदं बुधेरुह्यं न च मया प्रदीयते ॥ ३०

इदम्

इदम् भवेद् भवेद् इमे इमानि च पदं भवेत् ।
परं पदं बुधैरुह्यं न च मया प्रदीयते ॥ ३१

अन्वादेशे नपुंसके एनद् वक्तव्यः (वा)

अन्वादेशो यदा तत्र एनद् भवेत् नपुंसके ।
एनत् एने एतानि च एतेन एतायास्तथा ॥ ३२

अथ नकारान्तप्रकरणम्

ब्रह्मन्

ब्रह्म ब्रह्मणी ब्रह्माणि भवेदिह यथाक्रमम् ।
हे ब्रह्मण् स्यात् च सम्बुद्धौ हे ब्रह्म स्यात् तथैव च ॥ ३३

अहन्

अहन् यदा यदा सु स्यात् सुप्रत्ययो विलुप्यति ।
"रोऽसुपि" च भवेद् योज्यं पदम् अहर् भवेत्तथा ॥ ३४
अहन् यदा भवेच् शब्दः प्रत्यय औ परे यदा ।
"विभाषे"ति भवेद् योज्यम् अह्नी स्याद् अहनी तथा ॥ ३५

प्रत्ययो जश् परे यत्र पदं भवेद् "अहानि" च।
शेषं पदं बुधैरूह्यं न च मया प्रदीयते॥ ३६

अहन् यदा यदा भ्याम् स्यात् पदसंज्ञा तदा भवेत्।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम्॥ ३७

४४४। अहन्। ८।२।६८

अहन् यदा भवेत्तत्र पदान्ते रुर्भवेत्तदा।
अहोभ्याम् स्यात् पदं तत्र स्याद् अहोभिस्तथैव॥ ३८

पूर्व्वपक्षः

"अहन् सु" स्याद् यदा तत्र पदं तदा भवेद् "अहर्"।
अहन् भ्याम् स्याद् यदा तत्र "अहोभ्याम्" स्यात् पदं तदा॥ ३९
पदद्वयं तथा तत्र भवद्भिश्च प्रदर्शितम्।
पदद्वयं तथा न स्यात् कारणं स्याद् यथा परे॥ ४०
"रोऽसुपि" स्यात् परं शास्त्रं "अहन्" शास्त्रं परं पुनः।
रेफादेशो भवेदाद्ये आदेशो रुर्भवेत् परे॥ ४१
"नलोप"श्च स्थितं शास्त्रं नकारश्च विलुप्यति।
एतत् शास्त्रं स्थितं पूर्व्वं प्रसक्तं स्यादिह त्रयम्॥ ४२
परं शास्त्रमसिद्धं स्यादिति विधिः स्थितः खलु।
पूर्व्वं शास्त्रं भवेद् योज्यमिति गतिर्भवेदिह॥ ४३
"रोऽसुपि" स्याद् असिद्धं च स्यादसिद्धम "अहन्" पुनः।
रत्वमिह न तावत् स्यात् रुत्वमपि भवेन्न च॥ ४४
"नलोप"श्च स्थितं पूर्व्वं तदिह च प्रयुज्यते।
नकारस्य भवेल्लोपो रत्वं रुत्वं न सिध्यति॥ ४५
पदम् "अहर्" न तत्र स्यात् अहोभ्यां न पदं भवेत्।
भवद्भिर्यत् पदं दत्तं पदं तत्तु न सिध्यति॥ ४६

उत्तरपक्षः

पदद्वयं यथा दत्तं तथैव च भवेदिह।
पदान्तरं न तत्र स्यात् पदान्तरं न सिध्यति॥ ४७
व्याख्यानमिह सूत्रस्य स्यादन्यथा सतां मते।
व्याख्यानं स्याद् यथा तस्य तथा परे प्रदर्शिता॥ ४८

"अहन्" इति स्थितं सूत्रम् एकपदं स्थितं च तत् ।
"अहन्" भवेद् द्विरावृत्तम् "अहन् अहन्" तथा भवेत् ॥ ४९
द्विरावृत्या यदा सूत्रम् "अहन् अहन्" भवेदिह ।
तदा तस्य भवेद् व्याख्या यथा परे प्रदर्शिता ॥ ५०
अहन् यत् प्रथमे तत्र तदेकवचनं भवेत् ।
नकारश्च स्थितस्तत्र न तस्य च विलोपनम् ॥ ५१
मुनिनेह नकारस्य लोपो न हि प्रदर्शितः ।
तदिदं ज्ञापकं भवेत् नकारो न विलुप्यति ॥ ५२
अहन्शब्दो यदा तत्र नकारो न विलुप्यति ।
प्रथमे यत् "अहन्" तत्र तस्य व्याख्या भवेदियम् ॥ ५३
"अहन्" यद् द्वितीयं तत्र तद्विदानीं च गृह्यते ।
तस्य व्याख्या भवेदत्र यथा परे प्रदर्शिता ॥ ५४
अहन्शब्दो यदा तत्र पदान्तश्च यदा पुनः ।
तदा तस्य भवेद् रुश्च व्याख्या चेष्टा भवेदिह ॥ ५५
अहन् यत् प्रथमे तत्र तस्य व्याख्या कृता खलु ।
अहन् यत् द्वितीये तत्र तस्य व्याख्या कृता तथा ॥ ५६
व्याख्याद्वयं यदा तत्र मिलितं च भवेत् पुनः ।
सूत्रस्य च भवेदर्थो यथा च दर्शितः परे ॥ ५७
अहन् यदा भवेच् शब्दः पदान्तश्च यदा पुनः ।
नकारस्य न लोपः स्यात् रुरपि च पुनर्भवेत् ॥ ५८
एवं व्याख्या यदा तत्र पदद्वयं प्रसिध्यति ।
"अहर्" भवेत् पदं तत्र "अहोभ्याम्" च पदं भवेत् ॥ ५९

दीर्घाहन्

दीर्घाण्यहानि यस्मिन् च विग्रहश्च भवेद् यदा ।
दीर्घाहन् स्यात् तदा शब्दो बहुव्रीहौ तथा भवेत् ॥ ६०
दीर्घाहश्च निदाघः स्यात् वाक्यतश्च निदर्शनम् ।
दीर्घाहश्च पुनः शब्द इह पुंसि प्रवर्त्तते ॥ ६१
दीर्घाहन् स्याद् यदा शब्दः पुंसि शब्दो यदा भवेत् ।
तदा रूपं कथं तत्र तदपि च प्रदीयते ॥ ६२

अहन् शब्दो यदा तत्र तदा तस्य यथा भवेत् ।
तदन्तश्च,यदा शब्दो भवेत्तस्य तथैव च ॥ ६३
भवेद् रत्वं भवेद् रुत्वं यथाप्राप्तं भवेद् द्वयम् ।
"रोऽसुपि" स्यात् "अहन्" स्याच्च यथायोग्यं द्वयं भवेत् ॥ ६४

"दीर्घाहन्" स्याद् यदा पुंसि-प्रत्ययः "सु" परे यदा ।
"दीर्घाहः" स्यात् पदं तत्र पदमिष्टं तदेव-हि ॥ ६५

"दीर्घाहन् सु" यदा तत्र "हल्ङ्याब्भ्य"श्च प्रयुज्यते !
सूत्रं यदा भवेद् युक्तं प्रत्ययः "सु" विलुप्यति ॥ ६६
प्रत्ययस्य विलोपश्च तथा खलु भवेद् यदा ।
प्रत्ययलक्षणं कार्य्यं तदा तत्र प्रसज्यते ॥ ६७
"अहन्" इति स्थितं सूत्रं तदिह च भवेत्तदा ।
नकारस्य तदा रुत्वं तथा लब्धं भवेदिह ॥ ६८

पूर्व्वपक्षः

"रोऽसुपि" च स्थितं सूत्रं तत् प्रयोज्यं भवेदिह ।
तेन रत्वं भवेदत्र रत्वं तथा च लभ्यते ॥ ६९

उत्तरपक्षः

"असुपि" च पदं सूत्रे मुनिनेह प्रयोजितम् ।
सुपि यदा परे तत्र तदा रत्वं भवेन्न च ॥ ७०
सुप्रत्ययः स्थितस्तत्र परश्चत्र स विलुप्यति ।
प्रत्ययस्य विलोपेऽपि कार्य्यं भवेत् तदाश्रितम् ॥ ७१
यद्यपि सुप् न तत्र स्यात् सुप्कार्य्यं तु स्थितं खलु ।
"असुपी"ति निषेधाच्च न तत् सूत्रं प्रयुज्यते ॥ ७२
"रोऽसुपि" यत् स्थितं सूत्रं तेन रत्वं भवेन्न च ।
"असुपि" च पदं सूत्रे सुप्कार्य्यमिह हि स्थितम् ॥ ७३

अहन् तत्र स्थितं सूत्रं तदेव च प्रयुज्यते ।
तत् सूत्रं तु यदा युक्तं रुत्वं तदा च लभ्यते ॥ ७४

हस्वमिह तथा लब्धं पुनरपि न युज्यते ।
असिद्धं च भवेद् रुत्वं न सिध्यति ततश्च तत् ॥ ७५
"अहन्" इति परं शास्त्रं रुत्वं तेन भवेदिह ।
"सर्व्वनाम"—स्थितं पूर्व्वं तेन दीर्घश्च लभ्यते ॥ ७६
परं शास्त्रमसिद्धं स्यात् पूर्व्वमिह प्रयुज्यते ।
तेन दीर्घो भवेदत्र "दीर्घाह्नाः" च पदं भवेत् ॥ ७७
हे दीर्घाहो निदाघेति सम्बुद्धौ तु पदं भवेत् ।
"हल्ङ्याब्भ्यः" स्याद् "अहन्" स्याच्च "हशि" स्याच्च पुनः ॥ ७८
दीर्घाहानौ पदं तत्र दीर्घाहानः पदं भवेत् ।
दीर्घाह्ना स्यात् पदं तत्र दीर्घाह्नाङ्यां भवेत् तथा ॥ ७९

दण्डिन्

दण्डि स्याद् दण्डिनौ स्याच्च दण्डीनि स्यात् पदं तथा ।
हे दण्डि स्यात् पदं तत्र पदमूह्यं परं बुधैः ॥ ८०

स्रग्विन्

स्रग्वि स्यात् स्रग्विनी स्याच्च स्रग्वीनि स्यात् तथा पदम् ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ८१

वाग्मिन्

वाग्मि स्यात् वाग्मिनी स्याच्च वाग्मीनि स्यात् पदं तथा ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ८२

वहुवृत्रहन्

पदं वहुवृत्रह स्यात् वहुवृत्रहनी भवेत् ।
पदं वहुवृत्रघ्नी स्यात् स्याद् वहुवृत्रहाणि च ॥ ८३

वहुपुषन्

वहुपुष वहुपुष्णी स्याद् वहुपूषणी तथा ।
पदं वहुपुषाणि स्यात् पदमूह्यं परं बुधैः ॥ ८४

वह्वर्यमन्

वह्वर्य्यन् पदं च स्यात् वह्वर्यम्णी पदं भवेत् ।
स्याद् वह्वर्यमनी तत्र भवेद् वह्वर्यमाणि च ॥ ८५

अथ जकारान्तप्रकरणम्

असृज्

असृज् यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
तदा तत्र भवेत् कुत्वं विधानाद् हि सृजेः क्विनः ॥ ८६
असृग् भवेत् पदं तत्र कुत्वं यदा प्रवर्त्तते ।
असृक् स्याच्च पदं तत्र शकारस्य षकारता ॥ ८७

पूर्व्वपक्षः

विश्वसृज् स्याद् यदा शब्दः प्रत्ययः "सु" परे यदा ।
विश्वसृग् विश्वसृक् स्याच्च कुत्वं भवेत् तदापि च ॥ ८८

उत्तरपक्षः

विश्वसृज् स्याद् यदा शब्दः प्रत्ययः "सु" परे यदा ।
न स्म भवेत् तदा कुत्वं न च तथा पदं भवेत् ॥ ८९
"सृजिदृशोः" स्थितं सूत्रं तत्र भाष्यं स्थितं खलु ।
"रज्जुसृड्भ्याम्" पदं भाष्ये तत् प्रमाणं भवेदिह ॥ ९०
"रज्जुसृड्भ्याम्" पदं तत्र कुत्वं तत्र न दृश्यते ।
विश्वसृज् स्याद् यदा शब्दः कुत्वं न स्यात् तदापि च ॥ ९१

"व्रश्चे"ति च स्थितं सूत्रं प्रमाणमथवेह तत् ।
सृजियज्योः पदान्ते हि षत्वं तत्र विधीयते ॥ ९२
न च कुत्वं भवेत्तत्र तत्र कुत्वमपोद्यते ।
अपवादात् च कुत्वस्य न हि कुत्वं भवेदिह ॥ ९३

पूर्व्वपक्षः

"ऋत्विगि"ति स्थितं सूत्रं स्रग् ऋत्विक् तत्र दृश्यते ।
तत्र तत्र भवेत् कुत्वं कुत्वं भवेदिहापि च ॥ ९४

उत्तरपक्षः

स्रक्शब्दो यः स्थितस्तत्र ऋत्विक् शब्दः स्थितश्च यः ।
स स निपातनात् तत्र कुत्वं तत्र निपात्यते ॥ ९५

अथवा च समाधानमन्यथापि भवेदिह ।
अस्यतेः प्रत्ययः ऋच् स्यात् पुनरौणादिके खलु ॥ ९६

असृज् शब्दस्तथा सिध्येत् समाधानं भवेत्तथा ।
न सृजिति तत्पुरुषो नैव खलु हि गृह्यते ॥ ९७
असृग्, असृक् तथा सिध्येत् यथापूर्व्वं प्रदर्शितम् ।
असृजी स्यात् ततः पश्चात् स्याद् असृजि ततः परम् ॥ ९८
"पद्दन्नि"ति स्थितं सूत्रं तदिह चेत् प्रयुज्यते ।
असन् भवेत् समादेशः पदम् असन् तथा भवेत् ॥ ९९
असानि स्यात् पदं तत्र अस्ना स्याद् असृजा तथा ।
असृग्भ्याम् स्याद् असभ्याम् स्यात् पदमूह्यं परं बुधैः ॥ १००

ऊर्ज्

पदम् ऊर्क् स्यात् पदम् ऊर्ग् स्यात् ऊर्जी भवेत् ततः परम् ।
ऊर्न्जि स्याच्च पदं तत्र नरजानां च मेलनम् ॥ १०१

वहूर्जि नुम्प्रतिषेधः (वा)

अन्त्यात् पूर्व्वो वा नुम् (वा)

"वहूर्जि" स्यात् पदं तत्र न नुमिह प्रयुज्यते ।
"वहूर्न्जि" स्यात् पदं तत्र अन्त्यात् पूर्व्वे यदा च नुम् ॥ १०२

अथ दकारान्तप्रकरणम्

त्यद्

"त्यद्" स्यात् खलु पदं तत्र "त्यत्" पदं च तथा भवेत् ।
त्ये भवेच्च पदं तत्र पदं त्यानि भवेत्तथा ॥ १०३

तद्

तद् स्यात् खलु पदं तत्र "तत्" पदं च तथा भवेत् ।
ते भवेच्च पदं तत्र पदं तानि भवेत्तथा ॥ १०४

यद्

यद् स्यात् खलु पदं तत्र "यत्" पदं च तथा भवेत् ।
ये भवेच्च पदं तत्र पदं यानि भवेत्तथा ॥ १०५

एतद्

एतद् स्याच्च पदं तत्र पदम् एतत् तथा भवेत् ।
एते स्याच्च पदं तत्र पदम् एतान् तथा भवेत् ॥ १०६

एतद् यदा भवेच्च् शब्दः अन्वादेशो भवेद् यदा ।
पदं भवेत् तदा तत्र एनं खलु सतां मते ॥ १०७

बेभिद्

बेभिद्यतेः यदा क्विप् स्यात् शब्दो बेभिद् भवेत्तदा ।
बेभिद् भवेत् पदं तत्र पदं बेभित् पुनर्भवेत् ॥ १०८
बेभिद् यदा भवेच्च् शब्द प्रत्ययः औ परे यदा ।
बेभिदी स्यात् पदं तत्र विशेषश्च न वर्त्तते ॥ १०९
बेभिद् यदा भवेच्च् शब्दः प्रत्ययो जश् परे यदा ।
आदेशः शि भवेदत्र बेभिदि च पदं भवेत् ॥ ११०

पूर्व्वपक्षः

आदेश "शि" यदा तत्र नुम् तदा च प्रवर्त्तते ।
बेभिन्दि स्यात् पद तत्र बेभिदि न पदं भवेत् ॥ १११

उत्तरपक्षः

आदेशः "शि" स्थितस्तत्र अल्लोपश्च स्थितः पुनः ।
अल्लोपः स्थानिवत् तत्र झलन्तता तथा च न ॥ ११२
झलन्तता यदा न स्यात् न नुमपि भवेत्तदा ।
बेभिन्दि न पदं हि स्यात् बेभिदि च पदं भवेत् ॥ ११३

पूर्व्वपक्षः

अजन्तलक्षणं नुम् च पुनस्तत्र प्रवर्त्तते ।
बेभिन्दि स्यात् पदं तत्र न बेभिदि पदं भवेत् ॥ ११४

उत्तरपक्षः

स्वविधौ स्थानिवत्त्वं न मतमिह भवेत् सताम् ।
न नुम् तत्र न बेभिन्दि बेभिदि च पदं भवेत् ॥ ११५
चेच्छिद् यदा भवेच्च् शब्दः प्रत्ययो जश् परे यदा ।
चेच्छिदः स्यात् पदं तत्र समं विधिः प्रवर्त्तते ॥ ११६

२६।४।१९७५—
२७।४।१९७५
द्वौ दिवसौ – ११६ श्लोकाः

आरम्भः २०।४।१९७५
रविवारः

अथ चकारान्तप्रकरणम्

गवाक् शब्दप्रक्रिया

गो + अञ्च् + क्विन् =

(१) गोअञ्च्, गवाञ्च्, गोऽञ्च् (नकारे पूजायाम्)

(२) गोअच्, गवाच्, गोऽच् (नलोपे गतौ)

रूपाणि कानि वा तत्र भवन्ति कुत्र कानि वा ।
विषये च पुनस्तस्मिन् वादः कश्चित् स्थितः पुरा ॥ ११७

नरपतिसभामध्ये आक्षेपः केनचित् कृतः ।
समाधानं पुनर्दत्तं तत्रैव तस्य केनचित् ॥ ११८

आक्षेपः

"जायन्ते नव सौ तथाऽमि च नव भ्याम्भिस्भ्यसां सङ्गमे
षट्संख्यानि नवैव सुप्यथ जशि त्रीण्येव तद्वच्छसि ।
चत्वार्य्यन्यवचःसु कस्य विबुधाः शब्दस्य रूपाणि तद्
जानन्तु प्रतिभाऽस्ति चेन्निगदितुं षाण्मासिकोऽत्रावधिः ॥"

समाधानम्

"गवाक्शब्दस्य रूपाणि क्लीबेऽर्चागतिभेदतः ।
असन्ध्यवङ्पूर्व्वरूपै र्नवाधिकं शतं मतम् ॥
स्वम्सुप्सु नव षड् भादौ षट्केस्यु स्त्रीणि जश्शसोः ।
चत्वारि शेष दशके रूपाणीति विभावय ॥"

समाधानं समाश्रित्य पदानि दर्शयामि ते ।
यथाक्रमं यथासंख्यमिह दत्तं पदं मया ॥ ११९

गामञ्चति यदा तत्र प्रत्ययः क्विन् यदा पुनः ।
पूजा यदा भवेदर्थो नकारश्च भवेत्तदा ॥ १२०

नकारः स्याद् यदा तत्र "गो अञ्च्" रूपं तदा भवेत् ।
सन्धेरिह प्रसङ्गः स्यात् सन्धौ शब्दो भवेद् यथा ॥ १२१

"सर्व्वत्रे"ति स्थितं सूत्रं तद् यदा च प्रयुज्यते ।
तदा प्रकृतिभावः स्यात् "गोअञ्च्" शब्दस्तदा भवेत् ॥ १२२

"अवङ्"—इति स्थितं सूत्रं तद् यदा च प्रयुज्यते ।
अवङ् तदा भवेत्तत्र "गवांच्" शब्दो भवेत्तदा ॥ १२३
पूर्व्वरूपं यदा तत्र पुनः सन्धौ प्रजायते ।
"गोऽञ्च्" भवेच्च तदा शब्दः शब्दत्रयं भवेत्तथा ॥ १२४

"गोअञ्च्" तत्र भवेच् शब्दः "गवांच्" शब्दो भवेत् पुनः ।
"गोऽञ्च्" शब्दश्च भवेत्तत्र प्रत्येकं प्रकृतिर्भवेत् ॥ १२५

(क) सु [१]

"गोअञ्च्" यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
नस्य कुत्वे पुनर्ङत्वे "गोअङ्" पदं तदा भवेत् ॥ १२६
"गवांच्" यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा ।
नस्य कुत्वे पुनर्ङत्वे "गवाङ्" पदं तदा भवेत् ॥ १२७
"गोऽञ्च्" भवेच्च यदा शब्दः प्रत्ययः "सु" परे यदा ।
नस्य कुत्वे पुनर्ङत्वे पदं च "गोऽङ्" भवेत्तदा ॥ १२८
"गोअङ्" पदं भवेत्तत्र "गवाङ्" पदं भवेत् पुनः ।
पदं "गोऽङ्" च भवेत्तत्र पदत्रयं तथा भवेत् ॥ १२९
गामञ्चति यदा तत्र प्रत्ययः क्विन् यदा पुनः ।
गतिर्यदा भवेदर्थो नकारश्च विलुप्यति ॥ १३०
नकारं च विना तत्र "गो अच्" रूपं तदा भवेत् ।
सन्धेरिह प्रसङ्गः स्यात् सन्धौ शब्दो भवेद् यथा ॥ १३१

"सर्व्वत्र"ति स्थितं सूत्रं तद् यदा च प्रयुज्यते ।
तदा प्रकृतिभावः स्यात् "गोअच्" शब्दस्तदा भवेत् ॥ १३२
"अवङ्"—इति स्थितं सूत्रं तद् यदा च प्रयुज्यते ।
अवङ् तदा भवेत्तत्र "गवाच्" शब्दस्तदा भवेत् ॥ १३३
पूर्व्वरूपं यदा तत्र पुनः सन्धौ प्रजायते ।
"गोऽच्" भवेच्च तदा शब्दः शब्दत्रयं तथा भवेत् ॥ १३४

"गोअच्" तत्र भवेच् शब्दः "गवाच्" शब्दो भवेत् पुनः ।
"गोऽच्" शब्दश्च भवेत्तत्र प्रत्येकं प्रकृतिर्भवेत् ॥ १३५

[क] सु [२]

"गो अच्" यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा।
"गो अक्" तत्र पदं च स्यात् "गोअग्" पदं भवेत्तथा ॥ १३६
"गवाच्" यदा भवेच् शब्दः प्रत्ययः "सु" परे यदा।
"गवाक्" भवेत् पदं तत्र "गवाग्" पदं भवेत्तथा ॥ १३७
"गोऽच्" तत्र च यदा शब्दः प्रत्ययः "सु" परे यदा।
तदा "गोऽक्" स्यात् पदं तत्र पदं "गोऽग्" स्यात् तथैव च ॥ १३८
गतिर्यदा भवेदर्थो नकारो न भवेद् यदा।
पदषट्कं तदा तत्र यथा मया प्रदर्शितम् ॥ १३९
पूजा यदा भवेदर्थो नकारश्च स्थितो यदा।
पदत्रयं भवेत्तत्र यथा मया प्रदर्शितम् ॥ १४०
गतिर्यदा भवेदर्थो नकारो न स्थितो यदा।
पदषट्कं तदा तत्र यथा मया प्रदर्शितम् ॥ १४१
पदत्रयं भवेदादौ पदषट्कं परे भवेत्।
मिलितं चेत् द्वयं तत्र स्यात् पदनवकं तदा ॥ १४२

[ख] अम्

"सु" प्रत्यये पदं यद् यत् तत्तत् पदं भवेदमि।
विशेषो न स्थितस्तत्र न किञ्चिदुच्यते ततः ॥ १४३

[ग] सुप्

पूजा यदा भवेदर्थो गवाञ्च् शब्दो भवेद् यदा।
प्रत्ययः सुप् परे स्याच्चेत् "ङ् गो" रिति स्यात् कुगागमः ॥ १४४
गवाङ्क्षु स्यात् पदं तत्र गोअङ्क्षु स्यात् तथा पदम्।
गोऽङ्क्षु पदं भवेत्तत्र सर्व्वत्रैव कुगागमः ॥ १४५
गवाङ्षु स्यात् पदं तत्र गोअङ्षु च पदं भवेत्।
गोऽङ्षु तत्र पदं च स्यात् कुगागमो यदा च न ॥ १४६
गतिर्यदा भवेदर्थो "गवाच्" शब्दो भवेद् यदा।
प्रत्ययः सुप् परे स्याच्चेत् पदं तदा भवेद् यथा ॥ १४७
गवाक्षु स्यात् पदं तत्र गोअक्षु स्यात् पदं पुनः।
गोऽक्षु पदं भवेत्तत्र पदत्रयं तथा भवेत् ॥ १४८
आदौ षट्कं स्थितं तत्र त्रयं परे भवेत् पुनः।
मिलितं चेद् द्वयं तत्र स्यात् पदनवकं तदा ॥ १४९

पूर्व्वपक्षः

गवाङ्क्षु च गोअङ्क्षु च गोङ्क्षु च पूजने त्रयम् ।
प्रातिष्विकं ककारस्तु पुनरिह प्रवर्त्तते ॥ १५०
गवाक्षु च गोअक्षु च गोक्षु चेति गतौ त्रयम् ।
प्रातिष्विकं ककारस्तु पुनरिह प्रवर्त्तते ॥ १५१
ककारवत् त्रयं पूर्व्वे ककारवत् त्रयं परे ।
ककारवत् भवेत् षट्कं संकलनं यदा भवेत् ॥ १५२

ककारवद् यदा षट्कं पुनरेकं भवेदिह ।
"चय"श्चेति स्थितं तत्र तत्प्रयोज्यं भवेत् पुनः ॥ १५३
"चय"श्चेति यदा तावत् प्रयुक्तं च भवेदिह ।
ककारस्य खकारः स्यात् प्रथमस्य द्वितीयता ॥ १५४
ककारवत् तदा तत्र पदषट्कं पुनर्भवेत् ।
पदषट्कं तथा तत्र समधिकं भवेत् पुनः ॥ १५५

उत्तरपक्षः

गवाक्षु च गोअक्षु च गोक्षु चेति गतौ त्रयम् ।
ककारस्तु भवेत्तत्र "खरि" यदा प्रयुज्यते ॥ १५६
"खरि" तावदसिद्धं स्यात् न तस्मात् "क" स्थितो भवेत् ।
"क" नास्ति च यदा तत्र "चय"श्चेति न युज्यते ॥ १५७
"चय"श्चेति न युक्तं चेत् खकारोऽपि भवेन्न च ।
खकारवत् पदं न स्यात् खकारवत् त्रयं च न ॥ १५८
गवाङ्क्षु च गोअङ्क्षु च गोङ्क्षु च पूजने त्रयम् ।
कुत्वं तत्र स्यादसिद्धं जश्त्वमपि भवेन्न च ॥ १५९

वरं पक्षे "चय"श्चेति पुनरिह प्रयुज्यते ।
प्रथमस्य द्वितीयः स्यात् तदा तत्र तथा खलु ॥ १६०
ककारस्य खकारश्च तदा तत्र प्रजायते ।
लभ्यते च खकारवत् पुनस्तत्र पदत्रयम् ॥ १६१

गतौ तत्र त्रयं धृत्वा पूजने च त्रयं पुनः ।
दर्शितं यत् षड़ाधिक्यं तन्न न्याय्यं भवेदिह ॥ १६२

आधिक्यं च त्रयाणां स्याद् वरमिह सतां मते ।
द्वादशैव पदानि स्युर्धृत्वा त्रयं परे सुपि ॥ १६३

पूर्व्वपक्षः

"स्वमि"ति कारिका तत्र सा च लोके वहुश्रुता ।
सुपि नव पदानि स्युरिति तत्र प्रदर्शितम् ॥ १६४
इह यदा भवेत् व्याख्या संख्या स्यादन्यथा तदा ।
द्वादश च भवेत् संख्या विरोधश्च ततो भवेत् ॥ १६५

उत्तरपक्षः

सूत्रकारमतेनैव नव तत्र पदानि ह ।
नवानां ग्रहणात् तत्र नवाधिकं शतं खलु ॥ १६६
व्याख्यातॄणां मते तत्र द्वादशैव पदानि च ।
ग्रहणाद् द्वादशानाञ्च स्यु द्वादशाधिकं शतम् ॥ १६७

द्वादशेति पुनः संख्या भवेदिह प्रदर्शिता ।
"ऊह्यमि"ति कारिकायां सा संख्या च प्रयोजनम् ॥ १६८
सुपि चतुरशीतिश्च संख्या तत्र प्रदर्शिता ।
इह यदा द्वादश स्युः तदा तत्र तथा भवेत् ॥ १६९

"स्वमि"ति च कारिका स्यात् सूत्रकारमतं यदि ।
"ऊह्यमि"ति कारिका स्यात् व्याख्यातॄणां मतं यदा ॥ १७०

[घ] भ्याम् भ्याम् भ्याम्

गतिर्यया भवेदर्थो गवाच् शब्दो भवेद् यदा ।
प्रत्ययो भ्याम् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १७१
गवाङ्भ्याम स्यात् पदं तत्र गोअङ्भ्याम च पदं भवेत् ।
गोङ्भ्याम् स्याच्च पदं तत्र पदत्रयं तथा मतम् ॥ १७२
गतिर्यया भवेदर्थो गवाच् शब्दो भवेद् यदा ।
प्रत्ययो भ्याम् परे स्याच्चेत् पदत्रयं तथा मतम् ॥ १७३
गवाग्भ्याम् स्यात् पदं तत्र गोअग्भ्याम् च पदं भवेत् ।
गोग्भ्याम् भवेत् पदं तत्र पदत्रयं तथा मतम् ॥ १७४
आदौ त्रयं त्रयं पश्चात् पदषट्कं तथा भवेत् ।
भ्यामि परे तृतीयाद्यां तथा तत्र पदानि षट् ॥ १७५

भ्यामि परे चतुर्थ्याञ्च पदानि षट् तथैव च।
भ्यामिं परे पञ्चम्याञ्च तथैव हि पदानि षट् ॥ १७६

[ङ] भिस्

पूजा यदा भवेदर्थो गवाञ्च् शब्दो भवेद् यदा।
प्रत्ययो भिस् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १७७
गवाङ्भिः स्यात् पदं तत्र गोअङ्भिः च पदं भवेत्।
गोङ्भिः भवेत् पदं तत्र पदत्रयं तथा मतम् ॥ १७८
गतिर्यदा भवेदर्थो "गवाच्" शब्दो भवेद् यदा।
प्रत्ययो भिस् पुनः स्याच्चेत् पदत्रयं तदा भवेत् ॥ १७९
गवाग्भिः स्यात् पदं तत्र गोअग्भिः स्तात् पदं पुनः।
पदं गोऽग्भिः भवेत् तत्र पदत्रयं तथा भवेत् ॥ १८०
आदौ त्रयं त्रयं पश्चात् पदषटकं भवेत्तथा।
भिस् यदा स्यात् परे तत्र पदट्कं प्रजायते ॥ १८१

(च) भ्यस् भ्यस्

पूजा यदा भवेदर्थो "गवाञ्च्" शब्दो भवेद् यदा।
प्रत्ययो भ्यास् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १८२
गवाङ्भ्यः स्यात् पदं तत्र गोअङ्भ्यः स्यात् पदं पुनः।
पदं गोऽङ्भ्यः भवेत्तत्र पदत्रयं भवेत्तथा ॥ १८३
गतिर्यदा भवेदर्थो "गवाच्" शब्दो भवेद् यदा।
प्रत्ययो भ्यस् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १८४
गवाग्भ्यः स्यात् पदं तत्र गोअग्भ्यः स्यात् पदं पुनः।
पदं गोऽग्भ्य तथा च स्यात् पदत्रयं तथा भवेत् ॥ १८५
आदौ त्रयं त्रयं पश्चात् पदषटकं तथा भवेत्।
भ्यस् यदा स्यात् परे तत्र पदट्कं प्रजायते ॥ १८६
पञ्चम्यां भ्यस् यदा तत्र पदं भवेत् तथैव च।
पदषटकं च तत्रापि यथापूर्वं प्रजायते ॥ १८७

(छ) जश् जश्

पूजा यदा भवेदर्थो "गवाञ्च्" शब्दो भवेद् यदा।
प्रत्ययो जश् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १८८

"जशशसोः शि" स्थितं सूत्रं तदिह च प्रयुज्यते ।
शिः सर्व्वनामस्थानं स्यात् नुमागमो भवेत्तथा ॥ १८९
गवाञ्चि स्यात् पदं तत्र गोअञ्चि च पदं भवेत् ।
पदं गोऽञ्चि भवेत्तत्र पदत्रयं तथा मतम् ॥ १९०
गतिर्यदा भवेदर्थो "गवाच्" शब्दो भवेद् यदा ।
प्रत्ययो जश् परे स्याच्चेत् पदत्रयं तदा भवेत् ॥ १९१
"जश्शसोः शिः" स्थितं सूत्रं तदिह च प्रयुज्यते ।
शिः सर्व्वनामस्थानं स्यात् नुमागमो भवेत्तथा ॥ १९२
गवाञ्चि स्यात् पदं तत्र गोअञ्चि स्यात् पदं पुनः ।
पदं गोऽञ्चि भवेत्तत्र पदत्रयं तथा मतम् ॥ १९३
गवाञ्च् यदा भवेच् शब्दस्तदा रूपं यथा भवेत् ।
गवाच् यदा भवेत् शब्दो रूपं तदा भवेत्तथा ॥ १९४
गतिपूजनयोस्तत्र रूपं भवेत् समं खलु ।
भेदोनास्ति तयो रूपे प्रपञ्चार्थं द्वयं धृतम् ॥ १९५
जशि परे यथा तत्र शसि परे तथैव च ।
यत् त्रयं स्यात् जशि तत्र त्रदेव हि त्रयं शसि ॥ १९६
सौ पदं च मया दत्तं दत्तम् अमि पदं मया ।
सुपि पदं मया दत्तं दत्तं दत्तेन सर्व्वशः ॥ १९७
भ्वादौ षट्के पदं दत्तं दत्तं जशि पुनः शसि ।
यत् स्थितं तत् मया दत्तं दत्तेह च सर्व्वथा ॥ १९८
सौ नव स्युर्नवामि स्युः सुपि स्युश्च पुनर्नव ।
स्युः सप्तविंशतिस्तस्मात् आनय योगतः सुधीः ॥ १९९
भ्वादौ षट्के पुनस्तत्र प्रत्येकं षट् पदानि च ।
प्रत्येकं षट् यदा षट्सु षट्त्रिंशत् स्युस्तदा पुनः ॥ २००
सप्तविंशतिरादौ च षट्त्रिंशच्च परे पुनः ।
मिलितं चेद् भवेद् द्वयं त्रिषष्टिः स्युः पदानि च ॥ २०१
जशि त्रयं स्थितं तत्र शसि त्रयं स्थितं पुनः ।
मिलितं चेद् द्वयं तत्र पदषट्कं तदा भवेत् ॥ २०२
आदौ तत्र द्विषष्टिश्च परे तत्र पुनश्च षट् ।
आनय योगतो धीमान् तदा स्युरूनसप्ततिः ॥ २०३

एकादशविभक्तिषु यद् यत् पदं भवेदिह ।
तत्तत् सर्व्वं मया दत्तम् इतः पूर्व्वं यथायथम् ॥ २०४
शिष्टासु पुनर्दशासु यद् यत् पदं भवेदिह ।
तत्तदत्र प्रवक्ष्‍यमि ते शृणु तावत् समाहितः ॥ २०५

दशसु प्रत्येकं तत्र चत्वारि स्युः पदानि च ।
प्रत्येकं तु पदं तत्र परे मया प्रदीयते ॥ २०६

(ज) औ औट्

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनः गोऽञ्च् च यदा शब्दो भवेदिह ॥ २०७
प्रत्यय औ परे स्याच्चेत् षदत्रयं तदा भवेत् ।
गवाञ्चौ स्यात् गोअञ्चौ स्यात् गोऽञ्चौ स्याच्च पदं तदा ॥ २०८
गतिर्यदा भवेदर्थो नकारश्च विलुप्यति ।
पदमेकं तदा तत्र पदं गोची भवेत्तदा ॥ २०९
शीभावश्च भवेदत्र भसंज्ञा च प्रवर्त्तते ।
अकारस्य भवेल्लोपः पदं गोची तथा भवेत् ॥ २१०
औ परे स्यात् यदा तत्र तदा पदं भवेत्तथा ।
चत्वारि च पदानि स्युः दर्शितानि यथा मया ॥ २११
औट् परे चेत् भवेत्तत्र तथैव च पदं भवेत् ।
तत्रापि तानि चत्वारि विशेषश्च न दृश्यते ॥ २१२

(झ) टा

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनः गोञ्च् च यदा शब्दो भवेदिह ॥ २१३
प्रत्ययः "टा" परे स्याच्चेत् पदत्रयं तदा भवेत् ।
गवाञ्चा स्यात् गोअञ्चा स्यात् पदं गोऽञ्चा भवेत्तदा ॥ २१४
गतिर्यदा भवेदर्थो नकारो लुप्यते यदा ।
गवाच् गोअच् पुन गोंऽच् च यदा शब्दो भवेदिह ॥ २१५
प्रत्ययः "टा" परे स्याच्चेत् पदमेकं तदा भवेत् ।
पदं गोचा भवेत्तत्र पदमेकं तदेव हि ॥ २१६
प्रत्ययः टा परे स्याच्चेत् पदचतुष्टयं भवेत् ।
गवाञ्चा स्यात् गोअञ्चा स्यात् गोञ्चा गोचा भवेत्तथा ॥ २१७

(झ) ङे

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनः गोऽञ्च् च यदा शब्दो भवेदिह ॥ २१८
प्रत्ययो ङे परे स्याच्चेत् पदत्रयं तदा भवेत् ।
गवाञ्चे स्यात् गोअञ्चे स्यात् पदं गोञ्चे भवेत्तथा ॥ २१९
गतिर्यदा भवेदर्थो नकारो न स्थितो यदा ।
गवाच् गोअच् पुनः गोऽच् च यदा शब्दो भवेदिह ॥ २२०
प्रत्ययो ङे परे स्याच्चेत् पदमेकं तदा भवेत् ।
पदं गोचे भवेत्तत्र पदमेकं तदेव हि ॥ २२१
प्रत्ययो ङे परे स्याच्चेत् पदचतुष्टयं भवेत् ।
गवाञ्चे स्यात् गोअञ्चे स्यात् गोञ्चे गोचे भवेत्तथा ॥ २२२

[ञ] ङसि

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनः गोञ्च् च यदा शब्दो भवेदिह ॥ २२३
प्रत्ययो ङसि चेत् परे पदत्रयं तदा भवेत् ।
गवाञ्चः स्यात् गोअञ्चः स्यात् पदं गोञ्चः भवेत्तदा ॥ २२४
गतिर्यदा भवेदर्थो नकारो न स्थितो यदा ।
गवाच् गोअच् पुनःगोच् च यदा शब्दो भवेदिह ॥ २२५
प्रत्ययो ङसि चेत् परे पदकेकं तदा भवेत् ।
पदं गोचः भवेत्तत्र पदमेकं तदेव हि ॥ २२६
प्रत्ययो ङसि चेत् परे पदचतुष्टयं भवेत् ।
गवाञ्चः स्यात् गोअञ्चः स्यात् गोञ्चः गोचः भवेत्तथा ॥ २२७

[ट) ङस्

ङसौ परे यथा तत्र ङसि परे तथैव च ।
न हि भेदः स्थितो रूपे यत् तत्र स्यात् तदत्र च ॥ १२८
गवाञ्चः स्यात् गोअञ्चः स्यात् गोञ्चः गोचः पदं भवेत् ।
पूर्व्वं चतुष्टयं यत् स्यात् परे चतुष्टयं हि तत् ॥ २२९

(ठ) ओस् ओस्

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनः गोऽञ्च् च यदा शब्दो भवेदिह ॥ २३०

प्रत्यय ओस् परे स्याच्चेत् पदत्रयं तदा भवेत् ।
गवाञ्चोः स्यात् गोअञ्चोः स्यात् पदं गोञ्चोः भवेत्तथा ॥ २३१
गतिर्यदा भवेदर्थो नकारो न स्थितो यदा ।
गवाच् गोअच् पुनर्गोच् च यदा शब्दो भवेत् पुनः ॥ २३२
प्रत्यय ओस् परे स्याच्चेत् पदमेकं तदा भवेत् ।
पदं गोचोः भवेत्तत्र पदमेकं तदेव हि ॥ २३३
प्रत्यय ओस् परे स्याच्चेत् पदचतुष्टयं भवेत् ।
गवाञ्चोः स्यात् गोअञ्चोः स्यात् गोञ्चोः गोचोः भवेत्तथा ॥ २३४
षष्ठ्यामोसि पदं यत् तत् पुनरिह प्रदर्शितम् ।
ओसि पुनश्च सप्तम्यां तदेव भवेत् पदम् ॥ २३५
गवाञ्चो स्यात् गो अञ्चोः स्यात् गोञ्चो गोचो भवेत्तथा ।
पदचतुष्टयं तावत् सप्तम्यामोसि वर्तते ॥ २३६

(ङ) आम्

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनगोञ्च् च यदा शब्दो भवेदिह ॥ २३७
प्रत्यय आम् परे स्याच्चेत् पदत्रयं तदा भवेत् ।
गवाञ्चां स्यात् गोअञ्चां स्यात् गोञ्चाम् स्याच्च पदं तदा ॥ २३८
गतिर्यदा भवेदर्थो नकारो न स्थितो यदा ।
गवाच् गोअच् पुनर्गोच् च यदा शब्दो भवेदिह ॥ २३९
प्रत्यय आम परे स्याच्चेत् पदमेकं तदा भवेत् ।
गोचाम् भवेत् पदं तत्र पदमेकं तदेव हि ॥ २४०
प्रत्यय आम् परे स्याच्चेत् पदचतुष्टयं भवेत् ।
गवाञ्चां स्यात् गोअञ्चां स्यात् गोञ्चाम् गोचां भवेत्तथा ॥ २४१

(छ) ङि

पूजा यदा भवेदर्थो नकारश्च स्थितो यदा ।
गवाञ्च् गोअञ्च् पुनगोञ्च् च यदा शब्दो भवेदिह ॥ २४२
प्रत्ययो ङि परे स्याच्चेत् पदत्रयं तदा भवेत् ।
गवाञ्चि स्यात् गोअञ्चि स्यात् गोञ्चि गोचि पदं तदा ॥ २४३
गोतिर्यदा भवेदर्थो नकारो न स्थितो यदा ।
गवाच् गोअच् पुन गोच् च यदा शब्दो भवेदिह ॥ २४४

प्रत्ययो ङि परे स्याच्चेत् पदमेकं तदा भवेत् ।
पदं गोचि भवेत्तत्र पदमेकं तदेव हि ॥ २४५
प्रत्ययो ङि परे स्याच्चेत् पदचतुष्टयं भवेत् ।
गवाग्नि स्यात् गोअग्नि स्यात् गोग्नि गोचि भवेत्तथा ॥ २४६
दशसु च विभक्तिषु रूपं मया प्रदर्शितम् ।
प्रत्येकं चत्वारि तत्र पदानि स्युरिति स्थितिः ॥ २४७
दशसु प्रत्येकं तत्र चत्वारि च यदा पुनः ।
चत्वारिंशत् तदा तत्र साकल्येन भवन्ति च ॥ २४८

दर्शितानि मया पूर्व्वं रूपाणि चोनसप्ततिः ।
चत्वारिंशत् पुनश्चात्र दर्शितानि भवन्ति च ॥ २४९
संकलनं यदा तत्र नवाधिकं शतं तदा ।
"स्वमि"ति च कारिकायां तथा संख्या प्रदर्शिता ॥ २५०

"ऊह्यमेषां द्विर्वचनानुनासिकविकल्पनात् ।
रूपाण्यश्वाक्षिभूतानि (५२७) भवन्तीति मनीषिभिः ॥ २५१

पञ्चशती यथा यत्र विंशतिश्च यथा पुनः ।
पुनः सप्त यथा तत्र दर्शयामि तथा परे ॥ २५२

प्रथमा

सु—(१) गवाङ् गोअङ् गोऽङ् (पूजायाम्)
(२) गवाक् गवाग्, गोअक् गोअग्,
गोऽक् गोऽग् (गतौ)

पदानि नव सौ तत्र दर्शितानि यथा मया ।
"अनचि" च स्थितं सूत्रं तदिह च प्रयुज्यते ॥ २५३
अन्त्यस्य च भवेद् द्वित्वं सूत्रं प्रवर्त्तते यदा ।
यदा द्वित्वं भवेत्तत्र लभ्यन्ते च तदा नव ॥ २५४
आदौ तावद् विना द्वित्वं नव तत्र स्थितानि च ।
परे यदा भवेद् द्वित्वं तदा तत्र पुनर्नव ॥ २५५
अष्टादश तथा तत्र संकलनं यदा भवेत् ।
अष्टादश पदानि स्युः "सु" परे च भवेद् यदा ॥ २५६

औ—(१) गवाञ्ची गोअञ्ची गोञ्ची (पूजायाम्)
(२) गोची (गतौ)

पूजार्थे तु त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिष्विकं अकारस्तु पुनस्तत्र प्रवर्त्तते ॥ २५७
"अनचि" च स्थितं सूत्रं तत्तत्र च प्रयुज्यते ।
अकारस्य भवेद् द्वित्वं पदत्रयं तथा भवेत् ॥ २५८
आदौ तत्र विना द्वित्वं स्थितमेव पदत्रयम् ।
परे भवेत् त्रयं तत्र द्वित्वं यदा विधीयते ॥ २५९
आदौ त्रयं स्थितं तत्र परे तत्र त्रयं पुनः ।
पदषट्कं तथा तत्र संकलनं यदा भवेत ॥ २६०
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संयोजनं यदा तत्र स्यात् पदसप्तकं तदा ॥ २६१

औ—७

जस्—(१) गवाञ्चि गोअञ्चि गोञ्चि
(पूजायां गतौ च)

पूजायाञ्च गतौ तत्र पदत्रयं स्थितं खलु ।
प्रातिष्विकं अकारस्तु पुनरिह प्रवर्त्तते ॥ २६२
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं स्थितमेव पदत्रयम् ॥ २६३
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनः स्थितम् ।
पश्चात् तत्र पुनः षट् च स्यादनुनासिको यदा ॥ २६७
संकलनं यदा तत्र द्वादश स्युस्तदा पुनः ।
जश् यदा स्यात् परे तत्र द्वादश स्युस्तदा खलु ॥ २६८

जश्—१२

अष्टादश तथा सप्त द्वादश च तथा पुनः ।
प्रथमायां सप्तत्रिंशत् पदानि स्युरिति स्थितिः ॥ २६९

द्वितीया

अम्—(१) गवाङ् गोअङ् गोङ् (पूजायाम्)
(२) गवाक् गवाग्, गोअक् गोअग्,
गोऽक् गोऽग् (गतौ)

पदानि नव तत्रापि दर्शितानि यथा मया ।
"अनचि च" स्थितं सूत्रं तदिहापि प्रयुज्यते ॥ २७०
अन्त्यस्य च भवेद् द्वित्वं सूत्रं प्रवर्त्तते यदा ।
यदा द्वित्वं भवेत्तत्र भवन्ति च तदा नव ॥ २७१
आदौ तत्र विना द्वित्वं नव तावत् स्थितानि हि ।
परे यदा भवेद् द्वित्वं तदा तत्र पुनर्नव ॥ २७२
अष्टादश तथा तत्र संकलनं यदा भवेत् ।
अष्टादश पदानि स्युरम् परे चेद् भवेदिह ॥ २७३

औट्—(१) गवाञ्चौ गोअञ्चौ गोञ्चौ (पूजायाम्)
(२) गोचौ (गतौ)

पूजार्थे तु त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिष्विकं अकारस्तु पुनस्तेषु प्रवर्त्तते ॥ २७४
"अनचिच" स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
अकारस्य भवेत् द्वित्वं पदत्रयं तथा भवेत् ॥ २७५
आदौ तत्र विना द्वित्वं स्थितमेव पदत्रयम् ।
परे भवेत् त्रयं तत्र द्वित्वं विधीयते यदा ॥ २७६
आदौ त्रयं स्थितं तत्र परे त्रयं स्थितं पुनः ।
पदषट्कं तथा तत्र संकलनं यदा भवेत् ॥ २७७
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संकलनं यदा तत्र स्यात् पदसप्तकं तदा ॥ २७८

औट्—७

शस्—(१) गवाञ्चि गोअञ्चि गोञ्चि
(पूजायां गतौ च)

पूजायाञ्च गतौ तत्र पदत्रयं स्थितं पुनः ।
प्रातिष्विकं अकारन्तु पुनस्तेषु प्रवर्त्तते ॥ २७९
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं स्थितं खलु पदत्रयम् ॥ २८०
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ २८१

षन्नामैषा पुनश्चान्ते इकारन्तु प्रवर्त्तते ।
"अम"श्चेति स्थितं सूत्रं पुनश्चैतत् प्रयुज्यते ॥ २८२
स्यादनुनासिकस्तत्र सूत्रं च युज्यते यदा ।
षट् सानुनासिकानि स्युः पदानि च तथा पुनः ॥ २८३
आदौ च षट् स्थितान्येव न यदा चानुनासिकः ।
पश्चात् तत्र पुनः षट् स्युः स्यादनुनासिको यदा ॥ २८४
संकलनं यदा तत्र द्वादश च तदा पुनः ।
शस् यदा स्यात् परे तत्र द्वादश स्युः पुनस्तदा । २८५

शस्—१२

अष्टादश तथा सप्त द्वादश च तथा पुनः ।
द्वितीयायां सप्तत्रिंशत् पदानि स्युरिति स्थितिः ॥ २८६
सु-परे स्याद् यथा तत्र स्याद् अम्-परे तथैव च ।
औपरे स्याद् यथा तत्र औट् परेऽपि भवेत्तथा ॥ २८७
जशि यथा भवेत्तत्र शसि भवेत् तथैव हि ।
प्रथमायां द्वितीयायां रूपाणामेकरूपता ॥ २८८

एकत्वेऽपि च रूपाणाम् उपन्यासः कृतः पृथक् ।
प्रथमायां द्वितीयायां विभक्तेर्नैकरूपता ॥ २८९
इह "सु" स्याद् इह स्याद् "अम" नैकरूपं भवेद् द्वयम् ।
इह स्याद् औ इह स्याद् औट् नैकरूपं द्वयं पुनः ॥ २९०
इह जश् स्यात् इह शस् स्यात् नैकरूपं पुनर्द्वयम् ।
प्रथमायां द्वितीयायां न तेसामेकरूपता ॥ २९१

सु-परे स्याद् यथा तत्र स्याद् अम्- परे तथा न वा ।
औ-परे स्याद् यथा तत्र औट्-परे स्यात् तथा न वा ॥ २९२
जश-परे स्याद् यथा तत्र शस् परे स्यात् तथा न वा ।
इति च संशयश्चित्ते जागर्ति पठतामिह ॥ २९३
स संशयो यथा न स्याद् तथा मया विचेष्टितम् ।
रूपाणि च द्वितीयायां दर्शितानि पृथक् मया ॥ २९४
संशयस्य निरासाय विस्पष्टार्थं तथैव च ।
रूपाणामेकरूपयेऽपि उपन्यासः कृतः पृथक् ॥ २९५

भ्यामि मया पदं देयं भ्यसि देयं पदं मया।
विभक्तेरेकरूपत्वात् न हि तत्र पृथक् घृतिः॥ २९६
एकत्रैव पदं भ्यामि परे मया प्रदर्शितम्।
एकत्रैव पदं भ्यसि प्रदर्शितं परे मया॥ २९७

तृतीया

टा—(१) गवाश्वा गोअश्वा गोश्वा (पूजायाम्)
(२) गोचा (गतौ)

पूजार्थे तु त्रयं तत्र यथा मया प्रदर्शितम्।
प्रातिस्विकं अकारस्तु पुनरिह प्रवर्त्तते॥ २९८
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत्।
आदौ तावत् विना द्वित्वं पदत्रयं स्थितं खलु॥ २९९
आदौ त्रयं त्रयं पश्चात् इति स्थितिर्भवेदिह।
मिलितं चेद् भवेद् द्वयं पदषट्कं तदा भवेत्॥ ३००
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत्।
संयोजनं यदा तत्र स्यात् पदसप्तकं तदा॥ ३०१
प्रातिस्विकं च सप्तानामाकारः स्यादिहान्ततः।
"अश्वा"श्चेति च सप्तानामनुनासिकता भवेत्॥ ३०२
अनुनासिकता स्याच्चेत् सप्त तदा भवन्ति च।
इहानुनासिकपक्षे लभ्यते सप्तकं तथा॥ ३०३
आदौ सप्त स्थितान्येव न चानुनासिको यदा।
परे सप्त भवन्तीह यदा स्यादनुनासिकः॥ ३०४
आदौ सप्त परे सप्त चतुर्द्दश तथा पुनः।
टा यदा स्यात् परे तत्र तदा तत्र चतुर्द्दश॥ ३०५

टा—१४

भ्याम्—(१) गवाङ्भ्याम् गोअङ्भ्याम् गोङ्भ्याम् (पूजायाम्)
(२) गवाग्भ्याम् गोअग्भ्याम् गोऽग्भ्याम् (गतौ)

पूजार्थे च त्रयं तत्र यथा मया प्रदर्शितम्।
प्रातिस्विकं ङकारस्तु पुनरिह प्रवर्त्तते॥ ३०६
ङकारस्य यदा द्वित्वं पदत्रयं तदा भवेत्।
आदौ तावद् विना द्वित्वं पदत्रयं स्थितं खल॥ ३०७

आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३०८
गतौ त्रयं स्थितं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं गकारस्तु पुनरिह प्रवर्त्तते ॥ ३०९
गकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तावद् विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३१०
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३११
आदौ षट्कं स्थितं तत्र पश्चात् षट्कं स्थितं पुनः ।
मिलितं चेद् द्वयं तत्र द्वादश स्युस्तदा खलु ॥ ३१२
द्वादशानां पुनश्चैवं प्रातिस्विकं यकारता ।
यकारस्य भवेद् द्वित्वं "यणो मयः" प्रयुज्यते ॥ ३१३
यकारस्य यदा द्वित्वं द्वादश च तदा पुनः ।
आदौ तत्र विना द्वित्वं द्वादश हि पदानि च ॥ ३१४
आदौ तत्र द्वादश च द्वादश च पुनः परे ।
संकलनं यदा तत्र स्युश्चतुर्विंशतिस्तदा ॥ ३१५

एषां चतुर्विंशतीनां प्रातिस्विकं मकारता ।
मकारस्य पुनर्द्वित्वमिह खलु विधीयते ॥ ३१६
मकारस्य यदा द्वित्वं स्युश्चतुर्विंशतिस्तदा ।
आदौ तत्र विना द्वित्वं चतुर्विंशतिरेव च ॥ ३१७
आदौ चतुर्विंशतिश्च च चतुर्विंशतिः परे ।
अष्टाचत्वारिंशत् तत्र संकलनं यदा भवेत् ॥ ३१८

भ्याम्—४८

भिस्—(१) गवाङ्भिः गोअङ्भिः गोऽङ्भिः (पूजायाम्)
(२) गवाग्भिः गोअग्भिः गोऽग्भिः (गतौ)

पूजायान्तु त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं ङकारस्तु पुनरिह प्रवर्त्तते ॥ ३१९
ङकारस्य यदा द्वित्वं पदत्रयं भवेत्तदा ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३२०

आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनर्भवेत् ।
संकलनं यदा तत्र पदषट्कं भवेत्तदा ॥ ३२१

गतौ त्रयं स्थितं तत्र यथा मया प्रदर्शितम् ।
प्रातिष्विकं गकारन्तु पुनरिह प्रवर्त्तते ॥ ३२२
गकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३२३
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनर्भवेत् ।
संकलनं यदा तत्र पदषट्कं भवेत् तदा ॥ ३२४

आदौ षट्कं स्थितं तत्र परे षट्कं पुनः स्थितम् ।
मिलितं चेद् द्वयं तत्र द्वादश स्युस्तदा पुनः ॥ ३२५

प्रातिष्विकं विसर्गश्च द्वादशसु प्रवर्त्तते ।
विसर्गस्य यदा द्वित्वं द्वादश स्युस्तदा पुनः ॥ ३२६
आदौ तत्र विना द्वित्वं द्वादश हि स्थितानि च ।
संकलनं यदा तत्र स्युश्चतुर्विंशतिस्तदा ॥ ३२७
टा यदा स्यात् तदा तत्र पदानि स्युश्चतुर्द्दश ।
अष्टाचत्वारिंशत् तत्र भ्याम् यदा च परे भवेत् ॥ ३२८
भिस् यदा स्यात् परे तत्र स्युश्चतुर्विंशतिस्तदा ।
षड़शीतिस्तथा तत्र तृतीयायां पदानि च ॥ ३२९

तृतीया—८६

चतुर्थी

ङे—(१) गवाञ्चे गोअञ्चे गोञ्चे (पूजायाम)
(२) गोचे (गतौ)

पूजार्थे च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिष्विकं अकारश्च पुनरिह प्रवर्त्तते ॥ ३३०
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३३१
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनर्भवेत् ।
पदषट्कं तथा तत्र संकलनं भवेद् यदा ॥ ३३२

स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
स्यात् पदसप्तकं तत्र संग्रहः सर्व्वथा यदा ॥ ३३३

ङे—७

भ्याम्—(१) गवाङ्भ्यां गोअङ्भ्यां गोङ्भ्यां (पूजायाम्)
(२) गोभ्यां (गतौ)

भ्यामि यथा पदानि स्युः दर्शितानि तथा मया ।
अष्टाचत्वारिंशत् तत्र दर्शितानि च पूर्व्वतः ॥ ३३४

भ्याम—४८

भ्यस्—(१) गवाङ्भ्यः गोअङ्भ्यः गोङ्भ्यः (पूजायाम्)
(२) गवागभ्यः गोअग्भ्यः गोग्भ्यः (गतौ)

पूजार्थे च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं ङकारस्तु पुनरिह प्रवर्त्तते ॥ ३३५

ङकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३३६

आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनः स्थितम् ।
पदषट्कं तथा तत्र संकलनं भवेद् यदा ॥ ३३७

गतौ त्रयं स्थितं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं गकारस्तु पुनरिह प्रवर्त्तते ॥ ३३८

गकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३३९

आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
पदषट्कं तथा तत्र संकलनं यदा भवेत् ॥ ३४०

आदौ षट्कं स्थितं तत्र परे षट्कं पुनः स्थितम् ।
द्वादश च तथा तत्र संकलनं भवेद् यदा ॥ ३४१

द्वादशानां पुनश्चैषां प्रातिस्विकं यकारता ।
यकारस्य भवेद् द्वित्वं "यणो मयः" प्रयुज्यते ॥ ३४२

यकारस्य यदा द्वित्वं द्वादश च तदा पुनः ।
आदौ तत्र विना द्वित्वं द्वादशैव स्थितानि च ॥ ३४३

द्वादश च तथा पूर्व्वे द्वादश च तथा परे ।
संकलनं यदा तत्र स्युश्चतुर्व्विंशतिस्तदा ॥ ३४४

प्रातिष्विकं विसर्गश्च पुनरेषु प्रवर्त्तते ।
विसर्गस्य यदा द्वित्वं स्युश्चतुर्व्विंशतिस्तदा ॥ ३४५
आदौ तत्र विना द्वित्वं चतुर्व्विंशतिरेव च ।
अष्टाचत्वारिंशत् तत्र संकलनं भवेद् यदा ॥ ३४६

पदानि च तदा सप्त ङे यदा च परे पुनः ।
अष्टाचत्वारिंशत् तत्र भ्याम् यदा च परे भवेत् ॥ ३४७
अष्टाचत्वारिंशत् तत्र भ्यस् यदा च परे पुनः ।
चतुर्थ्यान्तु पदानि स्युः त्र्यधिकं च शतं तथा ॥ ३४८

चतुर्थी—१०३

पञ्चमी

ङसि—(१) गवाञ्चः गोअञ्चः गोञ्चः (पूजायाम्)
(२) गोचः (गतौ)

पूजायाञ्च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिष्विकं अकारश्च पुनरिह प्रवर्त्तते ॥ ३४९
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३५०
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनर्भवेत् ।
संकलनं यदा तत्र पदषट्कं भवेत्तदा ॥ ३५१
पदमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संयोजनं यदा तत्र स्यात् पदसप्तकं तदा ॥ ३५२

प्रातिष्विकं विसर्गश्च पुनरिह स्थितः खलु ।
विसर्गस्य भवेद् द्वित्वं स्यात् पदसप्तकं तथा ॥ ३५३
आदौ तत्र विना द्वित्वं सप्तकं च स्थितं खलु ।
संकलनं यदा तत्र चतुर्द्दश तदा पुनः ॥ ३५४

ङसि—१४

भ्याम्—(१) गवाङ्भ्याम् गोअङ्भ्याम् गोङ्भ्याम्
(२) गवाग्भ्याम् गोअग्भ्याम् गोग्भ्याम् (गतौ)

भ्यामि यथा पदानि स्युर्दर्शितानि तथा मया ।
अष्टाचत्वारिंशत् तत्र भ्यामि परे भवन्ति च ॥ ३५५

भ्याम्—४८

भ्यस्—(१) गवाङ्भ्यः गोअङ्भ्य गोङ्भ्यः (पूजायाम्)
(२) गवाग्भ्यः गोअग्भ्य गोग्भ्यः (गतौ)

भ्यसि यथा रूपाणि स्युर्दर्शितानि तथा मया ।
अष्टाचत्वारिंशत् तत्र भ्यसि परे भवन्ति च ॥ ३५६
ङसि परे पदानि स्युश्चतुर्द्दश हि संख्यया ।
चत्वारिंशत् तथा चाष्ट भ्यामि परे भवन्ति च ॥ ३५७
चत्वारिंशत् तथा चाष्ट भवन्ति च परे भ्यसि ।
दशाधिकं शतं तत्र पञ्चम्यां स्युश्च सर्व्वथा ॥ ३५८

षष्ठी

ङस्—(१) गवाङ्ङोः गोअङ्ङोः गोङ्ङोः (पूजायाम्)
(२) गोचोः (गतौ)

पूजायाञ्च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं अकारश्च पुनरिह प्रवर्त्तते ॥ ३६०
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३६१
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३६२
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संयोजनं यदा तत्र स्यात् पदसप्तकं तदा ॥ ३६३
प्रातिस्विकं विसर्गश्च पुनरिह प्रवर्त्तते ।
विसर्गस्य भवेद् द्वित्वं स्यात् पदसप्तकं तदा ॥ ३६४
आदौ च सप्तकं तत्र सप्तकं च परे पुनः ।
संकलनं यदा तत्र पदानि स्युश्चतुर्दश ॥ ३६५

ओस्—१४

आम्—(१) गवाञ्जाम् गोअञ्जाम् गोञ्जाम् (पूजायाम्)
(२) गोचाम् (गतौ)

पूजायाञ्च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं अकारन्त पुनरिह प्रवर्त्तते ॥ ३६६
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३६७
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं स्थितं पुनः ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३६८
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संकलनं यदा तत्र स्यात् पदसप्तकं तथा ॥ ३६९

प्रातिस्विकं मकारश्च पुनरिह प्रवर्त्तते ।
मकारस्य भवेद् द्वित्वं स्यात् पदसप्तकं तदा ॥ ३७०
आदौ च सप्तकं तत्र सप्तकं च परे पुनः ।
संकलनं यदा तत्र पदानि स्युश्चतुर्द्दश ॥ ३७१
ङस् यदा स्यात् परे तत्र तदा तत्र चतुर्द्दश ।
ओस् यदा स्यात् परे तत्र तदा तत्र चतुर्द्दश ॥ ३७२
आम् यदा स्यात् परे तत्र तदापि च चतुर्द्दश ।
पदानि द्विचत्वारिंशत् षष्ठ्यामिह भवन्ति च ॥ ३७३

सप्तमी

ङि—(१) गवाञ्जि गोअञ्जि गोञ्जि (पूजायाम्)
(२) गोचि (गतौ)

पूजार्थे च त्रयं तत्र यथा मया प्रदर्शितम् ।
प्रातिस्विकं अकारस्तु पुनरिह प्रवर्त्तते ॥ ३७४
अकारस्य यदा द्वित्वं पदत्रयं तदा भवेत् ।
आदौ तत्र विना द्वित्वं पदत्रयं स्थितं खलु ॥ ३७५
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनः स्थितम् ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३७६
स्थितमेकं गतौ तत्र संयुज्यते पुनश्च तत् ।
संयोजनं यदा तत्र स्यात् पदसप्तकं तदा ॥ ३७७

प्रातिष्विकमिकारश्च तेषामन्ते प्रवर्त्तते ।
स्यादनुनासिकस्तत्र स्यात् पदसप्तकं तथा ॥ ३७८
सप्तकं च स्थितं पूर्व्वे न यदा चानुनासिकः ।
सप्तकं च स्थितं पश्चात् स्यादनुनासिको यदा ॥ ३७९
संकलनं यदा तत्र तदा तत्र चतुर्द्दश ।
ङौ परे च पदानि स्युश्चतुर्द्दश हि सर्व्वथा ॥ ३८०

औस्—(१) गवाञ्चोः गोअञ्चोः गोञ्चोः (पूजायाम्)
(२) गोचोः (गतौ)

ओभि यथा पदानि स्युर्दर्शितानि तथा मया ।
ओसि तत्र पदानि स्युश्चतुर्द्दश हि सर्व्वथा ॥ ३८१

सुप्—(१) पूजायाम्
(क) गवाङ्षु गोअङ्षु गोङ्षु (कुगभावे)
(ख) गवाङ्क्षु गोअङ्क्षु गोङ्क्षु (कुक्पक्षे)
गवाङ्ख्षु गोअङ्ख्षु गोअङ्ख्षु
(१) गतौ—
गवाक्षु गोअक्षु गोक्षु

पूजायाम्

कुगभावे

गवाङ्षु च गोअङ्षु च गोङ्षु चेति पदत्रयम् ।
पूजार्थे च कुग्भावे पदत्रयं प्रवर्त्तते ॥ ३८२
पदत्रयं ङकारवत् पुनरपि भवेच्च तत् ।
ङकारस्य भवेद् द्वित्वं पदत्रयं पुनर्भवेत् ॥ ३८३
आदौ तत्र विना द्वित्वं स्थितमेव पदत्रयम् ।
परे भवेत् त्रयं तत्र द्वित्वं यदा विधीयते ॥ ३८४
आदौ त्रयं स्थितं तत्र पश्चात् त्रयं पुनः स्थितम् ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३८५
पूजा यदा भवेदर्थः कुगभावो यदा पुनः ।
पदषट्कं तदा तत्र यथा मया प्रदर्शितम् ॥ ३८६

कुक्पक्षे

कुक्पक्षे च ककारवत् पदत्रयं प्रवर्त्तते ।
गवाङ्क्षु च गोअक्षु च गोक्षु च तत् पदत्रयम् ॥ ३८७

"चय"श्चेति स्थितं तत्र तद् यदा च प्रयुज्यते ।
ककारस्य खकारः स्यात् खकारवत् भवेत् त्रयम् ॥ ३८८
गवाक्‌ख्षु च गोअङ्‌ख्षु च गोङ्‌ख्षु पदं तदा भवेत् ।
खकारवत् त्रयं च तत् "चय"—यदा प्रयुज्यते ॥ ३८९
ककारवत् त्रयं तत्र खकारवत् पुनस्त्रयम् ।
संकलनं यदा तत्र पदषट्कं तदा भवेत् ॥ ३९०

षण्णामेषां च कुक्‌पक्षे प्रातिष्विकं ङकारता ।
ङकारस्य भवेद् द्वित्वं पदषट्कं तथा भवेत् ॥ ३९१
आदौ तत्र विना द्वित्वं पदषट्कं स्थितं खलु ।
परे तत्र भवेन् षट्कं द्वित्वं यदा विधीयते ॥ ३९२
आदौ षट्कं स्थितं तत्र परे षट्कं पुनर्भवेत् ।
संकलनं यदा तत्र द्वादश स्युस्तदा पुनः ॥ ३९३

द्वादशानां पुनश्चैषां प्रातिष्विकं षकारता ।
षकारस्य भवेद् द्वित्वं द्वादश च तदा पुनः ॥ ३९४
आदौ तत्र विना द्वित्वं द्वादश हि स्थितानि च ।
परे तत्र द्वादश स्युर्द्वित्वं यदा विधीयते ॥ ३९५
आदौ तत्र द्वादश च द्वादश च परे पुनः ।
संकलनं यदा तत्र स्युश्चतुर्विंशतिस्तदा ॥ ३९६
पूजा यदा भवेदर्थः कुक् यदा च भवेत् पुनः ।
तदा चतुर्व्विंशतिः स्यु दर्शितानि यथा मया ॥ ३९७

कुक्‌पक्षे च तथा कृत्वा स्युश्चतुर्व्विंशतिः खलु ।
कुगभावे पदानि षट् दर्शितानि च पूर्व्वतः ॥ ३९८
पूजार्थे च तदा त्रिंशत् सर्व्वथा स्युः पदानि च ।
संकलनं यदा तत्र तदा संख्या तथा भवेत् ॥ ३९९

गतौ

गतौ तत्र ककारवत् पदत्रयं प्रवर्त्तते ।
गवाक्षु च गोअक्षु च गोक्षु च तत् पदत्रयम् ॥ ४००
प्रत्येकन्तु ककारस्य द्वित्वमिह विधीयते ।
पदत्रयं भवेत्तत्र द्वित्वं विधीयते यदा ॥ ४०१

आदौ तत्र विना द्वित्वं स्थितमेव पदत्रयम्।
परे तत्र भवेद् त्रयं द्वित्वं विधीयते यदा ॥ ४०२
आदौ त्रयं स्थितं तत्र परे त्रयं पुनर्भवेत्।
संकलनं यदा तत्र पदषट्कं भवेत् तदा ॥ ४०३

षण्णामेषां पुनस्तत्र प्रातिस्विकं षकारता।
षकारस्य भवेद् द्वित्वं पदषट्कं पुनर्भवेत् ॥ ४०४
आदौ तत्र विना द्वित्वं पदषट्कं स्थितं खलु।
परे षट्कं भवेद् तत्र द्वित्वं विधीयते यदा ॥ ४०५
आदौ षट्कं स्थितं तत्र परे षट्कं पुनः स्थितम्।
संकलनं यदा तत्र द्वादश स्युस्तदा पुनः ॥ ४०६

पूजायाम् गतौ च

पूजायाञ्च तथा त्रिंशत दर्शितानि यथा मया।
द्वादश च गतौ तत्र दर्शितानि च पूर्व्वतः ॥ ४०७
द्विचत्वारिंशत् तत्र स्युः संकलनं यदा भवेत्।
द्विचत्वारिंशत् तत्र हि पूजायाञ्च गतौ पुनः ॥ ४०८

अन्तस्य च पुनस्तेषां यदा स्यादनुनासिकः।
द्विचत्वारिंशत् तत्र च पुनरपि भवन्ति हि ॥ ४०९
द्विचत्वारिंशत् तत्रादौ न यदा चानुनासिकः।
द्विचत्वारिंशत् परे स्युः स्यादनुनासिको यदा ॥ ४१०
द्विचत्वारिंशत् तत्र च द्विचत्वारिंशदत्र च।
स्युश्चतुरशीतिस्तत्र संकलनं यदा भवेत् ॥ ४११

ङि यदा स्यात् तदा तत्र पदानि स्युश्चतुर्द्दश।
ओस् यदा स्यात् पदानि स्युश्चतुर्द्दश तदापि च ॥ ४१२
स्युश्चतुरशीतिस्तत्र सुप् यदा च परे भवेत्।
आहत्येह च सप्तम्यां स्युर्द्वादशाधिकं शतम् ॥ ४१३

प्रथमा

सु यदा स्यात् परे तत्र पदानि च तदा नव।
अन्त्यस्य च भवेद् द्वित्वमष्टादश भवन्ति च ॥ ४१४

औ यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङकारस्य भवेद् द्वित्वं स्यात् पदसप्तकं तथा ॥ ४१५
जश् यदा स्यात् परे तत्र पदत्रयं तदा भवेत् ।
ङद्वित्वाच्चानुनासिकात् द्वादश स्युः पदानि च ॥ ४१६
अष्टादश तथा सप्त द्वादश च तथा पुनः ।
प्रथमायां सप्तत्रिंशत् पदानि स्युरिति स्थितिः ॥ ४१७

द्वितीया

प्रथमायां यथा स्याच्च द्वितीयायां तथा भवेत् ।
प्रथमायां सप्तत्रिंशन् द्वितीयायां तथैव च ॥ ४१८

तृतीया

टा यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङद्वित्वाच्चानुनासिकात् पदानि स्युश्चतुर्द्दश ॥ ४१९
भ्याम् यदा स्यात् परे तत्र पदषट्कं तदा भवेत् ।
चत्वारिंशत् तथा चाष्ट पदानीह भवन्ति च ॥ ४२०
ङद्वित्वं च गद्वित्वं च यद्वित्वं च भवेदिह ।
मद्वित्वं च भवेत् पश्चात् पदानि स्युः तथा पुनः ॥ ४२१
भिस् यदा स्यात् परे तत्र पदषट्कं तदा पुनः ।
सर्व्वथा चतुर्व्विंशतिः पदानीह परे भिसि ॥ ४२२
ङकारस्य सकारस्य द्वित्वमिह विधीयते ।
विसर्गस्य पुनर्द्वित्वं पश्चादिह भवेत् पुनः ॥ ४२३
टा यदा स्यात् तदा तत्र चतुर्द्दश पदानि च ।
चत्वारिंशत् तथा चाष्ट भ्याम् परे च भवेद् यदा ॥ ४२४
भिस् यदा स्यात् परे तत्र स्युश्चतुर्व्विंशतिस्तदा ।
षड़शीतिः पदानि स्युस्तृतीयायामिति स्थितिः ॥ ४२५

चतुर्थी

ङे यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङकारस्य भवेद् द्वित्वं सप्त तत्र भवन्ति च ॥ ४२६
भ्याम् यदा स्यात् परे तत्र पदषट्कं तदा पुनः ।
चत्वारिंशत् तथा चाष्ट पदानीह भवन्ति च ॥ ४२७
भ्यस् यदा स्यात् परे तत्र पदषट्कं तदा पुनः ।
चत्वारिंशत् तथा चाष्ट भ्यसि तत्र पदानि च ॥ ४२८

ङद्वित्वं च गद्वित्वं यद्वित्वं च भवेदिह ।
विसर्गस्य पुनर्द्वित्वं पदानि स्युस्तथैव च ॥ ४२९
संकलनं यदा तत्र त्र्यधिकं च शतं तदा ।
साकल्येन चतुर्थ्याश्च पदानि स्युस्तथा पुनः ॥ ४३०

पञ्चमी

ङसि यदा परे तत्र पदचतुष्टयं तदा ।
ङस्य द्वित्वाद् विसर्गस्य द्वित्वात् तत्र चतुर्द्दश ॥ ४३१
भ्याम् यदा स्यात् परे तत्र पदषट्कं तदा पुनः ।
चत्वारिंशत् तथा चाष्ट पदानीह भवन्ति च ॥ ४३२
भ्यस् यदा स्यात् परे तत्र पदषट्कं तदा पुनः ।
चत्वारिंशत् तथा चाष्ट पदानि स्युरिहापि च ॥ ४३३
संकलनं यदा तत्र दशाधिकं शतं तदा ।
साकल्येन च पञ्चम्यां पदानि स्युस्तथा पुनः ॥ ४३४

षष्ठी

ङस् यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङस्य द्वित्वाद् विसर्गस्य द्वित्वात् तत्र चतुर्द्दश ॥ ४३५
ङस् यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङस्य द्वित्वात् विसर्गस्य द्वित्वात् तत्र चतुर्द्दश ॥ ४३६
आम् यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङकारस्य मकारस्य द्वित्वे तत्र चतुर्द्दश ॥ ४३७
चतुर्द्दश चतुर्द्दश तथा तत्र चतुर्द्दश ।
पदानि द्विचत्वारिंशत् साकल्येन भवन्ति च ॥ ४३८

सप्तमी

ङि यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङद्वित्वाच्चानुनासिकात् पदानि च चतुर्द्दश ॥ ४३९
ओस् यदा स्यात् परे तत्र पदचतुष्टयं तदा ।
ङस्य द्वित्वाद् विसर्गस्य द्वित्वात् तत्र चतुर्द्दश ॥ ४४०
सुप् यदा स्यात् परे तत्र द्वादश च तदा पुनः ।
इह चतुरशीतिः स्युः साकल्येन पदानि च ॥ ४४१

ङस्य द्वित्वं कुगभावे पूजार्थानां भवेदिह ।
कवत् तत्र खवत् तत्र पश्चात् तत्र च गृह्यते ॥ ४४२
कवतां च खवताञ्च ङद्वित्वं स्यात् ततः परे ।
षद्वित्वं च ततः पश्चात् तेषां तेषां भवेदिह ॥ ४४३
आदौ षट् च परे तत्र स्युश्च विंशतिस्तथा ।
त्रिंशतां च गणास्तत्र पूजनार्थे तथा भवेत् ॥ ४४४
गत्यर्थानां पुनस्तत्र कद्वित्वं च विधीयते ।
ततः पश्चात् पुनस्तेषां षद्वित्वं च भवेदिह ॥ ४४५
द्वादशानां गणास्तत्र गत्यर्थानां तथा भवेत् ।
गणद्वयं ततः पश्चादेकत्र क्रियते पुनः ॥ ४४६
पदानि द्विचत्वारिंशत् लभ्यन्ते च तथा खलु ।
अनुनासिकता चैषां प्रत्येकन्तु भवेत् परे ॥ ४४७
सर्व्वथा चतुरशीतिः पदानीह भवन्ति च ।
सुपि चतुरशीतिः स्युः पदानि च तथा पुनः ॥ ४४८
सङ्कलनं यदा तत्र स्युः द्वादशाधिकं शतम् ।
साकल्येन च सप्तम्यां पदानि स्युस्तथा पुनः ॥ ४४९

प्रथमायां सप्तत्रिंशत् पदानीह भवन्ति च ।
द्वितीयायां सप्तत्रिंशत् पदानि स्युस्तथैव च ॥ ४५०
तृतीयायां षड़शीतिः विहितानि तथा पुनः ।
त्र्यधिकं च शतं तत्र चतुर्थ्यां स्युः पदानि च ॥ ४५१
दशाधिकं शतं तत्र पञ्चम्यां च मतां मते ।
षष्ठ्यां च द्विचत्वारिंशत् पदानि स्युरिति स्थितिः ॥ ४५२
सप्तम्यां च पुनस्तत्र स्युर्द्वादशाधिकं शतम् ।
पञ्चशती विंशतिश्च सप्त तत्र तथा खलु ॥ ४५३

पञ्चशती यथा तत्र विंशतिश्च यथा पुनः ।
पुनः सप्त यथा तत्र तथा मया प्रदर्शितम् ॥ ४५४

इति-गवाक्शब्दप्रक्रिया ।

समाप्तिः—२४।४।१९७५ रचनाकालः—
(बृहस्पतिवारः) २०।४।७५-२४।४।७५ (पञ्च दिवसाः)
गवाक्शब्दप्रक्रियायाम्—३३८ श्लोकाः (११७-४५४) ।
"ऊह्य"मिति कारिकां परित्यज्य—३३७ श्लोकाः ।

तिरच्

गतौ

तिर्य्यंक् भवेत् पदं तत्र तिरश्ची च पदं भवेत् ।
तिर्य्यञ्चि स्यात् पदं तत्र शेषमूह्यं पदं बुधैः ॥ ४५४

पूजायाम्

तिर्य्यङ् भवेत् पदं तत्र तिर्य्यञ्ची च पदं भवेत् ।
तिर्य्यञ्चि स्यात् पदं तत्र शेषमूह्यं पदं बुधैः ॥ ४५५

इति चकारान्तप्रकरणम्

यकृत्

यकृत् भवेत् पदं तत्र यकृती च पदं भवेत् ।
यकृन्ति स्यात् पदं तत्र शेषमूह्यं पदं बुधैः ॥ ४५६
यकृत् यदा यदा शस् च "पद्"न्निति प्रयुज्यते ।
यकृतः स्यात् यकन् तत्र यकानि च पदं भवेत् ॥ ४५७
यकृता स्यात् तथा तत्र यक्ना भवेत् तथैव च ।
यकृते स्यात् पदं तद्वत् यक्ने पदं तथा भवेत् ॥ ४५८

शकृत्

शकृत् भवेत् पदं तत्र शकृती च पदं भवेत् ।
शकृन्ति स्यात् पदं तत्र शेषमूह्यं पदं बुधैः ॥ ४५९
शकृत् यदा यदा शस् च "पद्न्नि"ति प्रयुज्यते ।
शकृतः स्यात् शकन् तत्र शकानि च पदं भवेत् ॥ ४६०
शकृता स्यात् पदं तत्र पदं शक्ना भवेत् पुनः ।
शकृते स्यात् पदं तत्र पदं शक्ने भवेत्तथा ॥ ४६१

ददत्

ददत् यदा यदा सु स्यात् पदं ददन् भवेत् तदा ।
ददत् यदा यदा स्याद् औ ददती च पदं भवेत् ॥ ४८२
यदा ददत् भवेच्च शब्दः प्रत्ययो जश् परे यदा ।
सूत्रं तदा भवेद् योज्यं यथा परे प्रदर्शितम् ॥ ४६३

४४५ । वा नपुंसकस्य । ७।१।७९

सर्व्वनामस्थानं स्याच्चेत् क्लीवे शब्दो भवेद् यदि ।
अभ्यस्तात् शता स्याच्चेत् तस्य नुम् स्याद् विभाषया ॥ ४६४

ददन्ति च पदं तत्र तथा खलु प्रजायते ।
ददति च पदं तत्र तथा भवेत् परं पुनः ॥ ४६५

तुदत्

यदा तुदत् यदा सु स्यात् तुदत् भवेत् पदं तदा ।
यदा तुदत् यदा स्याद् औ सूत्रं परं प्रयोजनम् ॥ ४६६

४४६ । आत् शीनद्योनुंम् । ७।१।८०

शि यदि स्यात् परे तत्र ई-नदी चेत् परे पुनः ।
अवर्णान्तात् शता स्याच्चेत् तस्य नुम स्याद्विभाषया ॥ ४६७

तुदन्ती स्यात् पदं तत्र तुदती च पदं भवेत् ।
तुदन्ति स्यात् पदं तत्र जश् परे चेद् भवेत् पुनः ॥ ४६८

भात्

भात् यदा च यदा सु च पदं च भात् भवेत्तदा ।
भात् यदा च यदा स्याद् ओट् भान्ती भाती पदद्वयम् ॥ ४६९
भात् यदा स्यात् यदा जश् स्यात् पदं भान्ति भवेत्तदा ।
अन्यत् पदं भवेद् यद् यत् तत्तदूह्यं पुनर्बुधैः ॥ ४७०

पचत्

पचत् यदा यदा सु स्यात् पदं पचत् तदा भवेत् ।
पचत् यदा यदा स्यात् औ सूत्रं परं प्रयोजनम् ॥ ४७१

४४७ । शप्श्यनोर्नित्यम् । ७।१।८१

शी यदा स्यात् परे तत्र नदी यदा परे पुनः ।
शप्श्यनोश्चेदवर्णान्तात् परे तत्र पुनः शता ॥ ४७२
शतुरवयवान्तस्य तदा नित्यं नुमागमः ।
पचन्ती स्यात् पदं तत्र पचन्ति च पदं भवेत् ॥ ४७३

दीव्यत्

यदा दीव्यत् यदा "सु" स्यात् पदं दीव्यत् तदा भवेत् ।
यदा दीव्यत् यदा स्याद् औ "शप्श्यनो"श्च प्रयोजनम् ॥ ४७४
दीव्यन्ती स्यात् पदं तत्र दीव्यन्ति च पदं भवेत् ।
परं पदं बुधैरूह्यं न च मया प्रदीयते ॥ ४७५

अथ पकारान्तप्रकरणम्

यदा स्वप् स्यात् यदा "सु" स्यात् पदं स्वा् स्वब् भवेत्तदा ।
यदा स्वप् स्यात् यदा स्याद् औ पदं स्वपौ तदा भवेत् ॥ ४७६
यदा स्वप् स्यात् यदा जश् स्यात् पदं स्वाम्पि भवेत्तदा ।
आदौ दीर्घः परे नुम् स्यात् प्रतिपदोक्तता यतः ॥ ४७७
सूत्रं निरवकाशं चेत् प्रतिपदोक्तता भवेत् ।
इति पक्षे नुमेव स्यात् पदं स्वम्पि भवेत्तदा ॥ ४७८
स्वप् यदा स्यात् यदा टा स्यात् पदं स्वपा भवेत्तदा ।
स्वप् यदा स्यात् यदा भ्याम् स्यात् पदं स्वद्भ्याम् तदा भवेत् ॥ ४७९
"अपो भि" च स्थितं सूत्रं तत्तदा च प्रयुज्यते ।
पदं स्वद्भ्याम् तथा तत्र स्वद्भिः भवेत् पदं परे ॥ ४८०

अथ सकारान्तप्रकरणम्

धनुस्

"अर्त्तिपृ वपि" सूत्रं स्यात् इह पुनरुणादिके ।
धनेरुस् प्रत्ययस्तत्र धनुस् शब्दो भवेत्तथा ॥ ४८१
धनुस् यदा यदा सु स्यात् रुत्वं भवेत् भवेद् धनुः ।
धनुस् यदा यदा स्याद् औ धनुषी च भवेत् पदम् ॥ ४८२
धनुस् यदा यदा स्यात् जश् धनूंषि च पदं तदा ।
"सान्त"—चेति भवेद् दीर्घो "नुम" चेति च षकारता ॥ ४८३
धनुस् यदा यदा टा स्यात् पदं स्याद् धनुषा तदा ।
धनुस् यदा यदा भ्याम् स्यात् धनुर्भ्याम् च भवेत् पदम् ॥ ४८४
एवं चक्षुर्भवेदत्र एवं हविर्भवेत् पुनः ।
पदं यद् यद् भवेत्तेषु तत्तदूह्यं पुनर्बुधैः ॥ ४८५

पिपठिस्

यदा क्विप् पिपठिषतेः पिपठिस् स्यात् तदा पुनः ।
पिपठिस् चेत् "सु" तत्र चेत् पिपठीः स्यात् तदा पदम् ॥ ४८६
"र्वो" रिति च स्थितं सूत्रं तेन दीर्घो भवेदिह ।
दीर्घं पदं पिपठीः स्यात् इति स्थितिर्भवेदिह ॥ ४८७
पिपठिस् स्याद् यदा शब्दः प्रत्यय औ परे यदा ।
पिपठिषी पदं तत्र तदा भवेदिति स्थितिः ॥ ४८८

पिपठिष् स्याद् यदा शब्दः प्रत्ययो जस् परे यदा ।
पिपठिषि पदं तत्र तदा भवेदिति स्थितिः ॥ ४८९

अल्लोपः स्थानिवत्तत्र झलन्तो न ततो नुम् ।
अजन्तलक्षणो नुम् न त्वविधौ स्थानिवत् न हि ॥ ४९०

पिपठिष् स्याद् यदा शब्दो भ्याम् यदा च परे भवेत् ।
पिपठीर्भ्याम् तदा तत्र पदं भवेदिति स्थितिः ॥ ४९१

पदमन्यद् भवेद् यत् यत् तत्तदूह्यं पुनर्बुधैः ।
पुंसि यथा पदं च स्यादिहापि स्यात् तथैव च ॥ ४९२

पयस्

पयः पयसी पयांसि पदानीह भवन्ति च ।
पयसी स्यात् पयोभ्याम् स्यात् शेषमूह्यं पदं बुधैः ॥ ४९३

सुपुम्स्

सुपुम् भवेत् पदं तत्र सुपुंसी स्यात् पदं पुनः ।
सुपुमांसि पदं च स्यात् शेषमूह्यं पदं बुधैः ॥ ४९४

अदस्

अदस् यदा भवेच्च शब्दः प्रत्ययः "सु" परे यदा ।
अदः भवेत् पदं तत्र विशेषश्च न दृश्यते ॥ ४९५

अदस् यदा भवेच्च शब्दः प्रत्यय औ परे यदा ।
आदौ स्याद् बिभक्तिकार्य्यम् उत्वम् मत्वं परे भवेत् ॥ ४९६

तथा तथा यदा कार्य्यं पदम् अमू तदा भवेत् ।
अदस् यदा यदा जश् च अमूनि स्यात् पदं तदा ॥ ४९७

शेषं पदं बुधैरूह्यं न च मया प्रदीयते ।
पुंसि यथा पदं तत्र तथैवेह भवेत् पदम् ॥ ४९८

इति हलन्तनपुंसकलिङ्गप्रकरणम्

इति शब्दधिकारः

अजन्तपुंलिङ्गे —	६५३ श्लोकाः	हलन्तपुंलिङ्गे —	१५९३ श्लोकाः
अजन्तस्त्रीलिङ्गे —	२१६ श्लोकाः	हलन्तस्त्रीलिङ्गे —	६४ श्लोकाः
अजन्तनपुंसकलिङ्गे -	१०० श्लोकाः	हलन्तनपुंसकलिङ्गे -	४९८ श्लोकाः
	९६९ श्लोकाः		२१५५ श्लोकाः

शब्दाधिकारे साकल्येन श्लोकाः—

९६९ + २१५५ = ३१२४ ।

अव्ययप्रकरणम्

आरम्भः १३।२।७४
वुधवारः प्रातः

४४७। स्वरादिनिपातमव्ययम्। १।१।३७

स्वरादयः स्थिता ये च निपाता ये स्थिताः पुनः।
अव्ययसंज्ञकास्ते च भवन्तीह सतां मते ॥ १
स्वरादयो भवन्ति ये ये निपाता भवन्ति च।
ते गणकारिकायाञ्च सर्व्वे मया प्रदर्शिताः ॥ २

४४८। तद्धितश्चासार्व्वविभक्तिः। १।१।३७

न च सर्व्वा विभक्तिः स्यात् यस्मात् शब्दात् प्रयोजिता।
स तद्धिते स्थितः शब्दः स्यादव्ययमिति स्थितिः ॥ ३
विस्तरेण वदामि ते के के तथा भवन्ति च।
तसिलाद्याः पाशवन्ता अव्ययसंज्ञका इह ॥ ४
शसाद्याश्च समासान्ताः तत्संज्ञका मताः पुनः।
कृत्वसुच् स्तात् यदा चार्थः स्यादमाम् च तथैव च ॥ ५
तसिवती नानाञौ च तत्संज्ञका मताः पुनः।
तथा तथा मता ये ये ते ते मया प्रदर्शिताः ॥ ६
न भवेच्च तथा कल्पप् न रूपप् च भवेत्तथा।
अव्ययं न भवेत्तस्मात् तत् तदिह सतां मते ॥ ७
यदा पचतिकल्पप् स्यात् अव्ययं न तदोच्यते।
यदा पचतिरूपं स्यात् न चाव्ययं तदा पुनः ॥ ८

४४९। कृन्मेजन्तः। १।१।३९

एदन्तः कृद् यदा तत्र मान्तः कृच्च यदा पुनः।
तदा पुनस्तदन्तं न स्यादव्ययमिति स्थितिः ॥ ९
स्मारं स्मारं णमुल् स्याच्चेत् तदव्ययं भवेदिह।
जीवसे च पिबध्यै च स्यादव्ययं तथा पुनः ॥ १०

४५०। क्त्वा-तोसुन-कसुनः। १।१।४०

अव्ययं च भवेत् क्त्वान्तं तोसुन्नन्तं तथाव्ययम्।
अव्ययं स्यात् कसुनन्तं निदर्शनं यथा परम् ॥ ११

क्त्वान्तः शब्दो भवेत् "कृत्वा" तदव्ययं भवेदिह ।
तोसुन्नन्तम् उदेतोः स्यात् तदव्ययं मतं पुनः ॥ १२
विसृपः स्यात् कसुन्नन्तं तदव्ययं मतं भवेत् ।
तदन्तं स्यात् तदन्तं स्यात् अव्ययं च सतां मते ॥ १३

४५१ । अव्ययीभावश्च । १।१।४१

समासश्चाव्ययीभावः स्यादव्ययमिति स्थितिः ।
अधिहरि तथा तत्र स्यादव्ययं तथा पुनः ॥ १४

४५२ । अव्ययादाप्सुपः । २।४।८२

अव्ययाद् विहितश्चेदाप् तस्य लोपो भवेदिह ।
अव्ययाद् विहितः सुप् चेत् लोपस्तस्य तथैव च ॥ १५
यदा तत्र शालायां स्यात् टापो लोपो भवेदिह ।
यदा "कृत्वा" भवेदत्र सुपो लुक् च तथा भवेत् ॥ १६

विशेषणं समासे चेत् न तदा लुग् भवेत् पुनः ।
"अत्युच्चैसौ" पदं तत्र प्रत्यय औ स्थितः खलु ॥ १७
तदन्तविधिरत्रापि यद्यपि च प्रवर्त्तते ।
तथापि न विधिर्गौणो पुनर्भवेत् समाश्रितः ॥ १८

आब्ग्रहणं व्यर्थमलिङ्गत्वात् (वा)

आब्ग्रहणं मतं व्यर्थमव्ययस्य न लिङ्गता ।
लिङ्गमिह यदा नास्ति स्त्रीलिङ्गं वा कुतो भवेत् ॥ १९

"सदृशं त्रिषु लिङ्गेषु सर्व्वासु च विभक्तिषु ।
वचनेषु च सर्व्वेषु यन्न व्येति तदव्ययम् ॥"

"वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः ।
आपं चैव हलन्तानां यथा वाचा निशा दिशा ॥"

अवगाह्य यदा तत्र वगाह्य स्यात् पदं तदा ।
अपिधानं पदं यत्र पिधानं च पदं भवेत् ॥ २०

अव्ययप्रकरणे २० श्लोकाः

१३।२।७४

बुधवारः (अपराह्णः) ।

स्त्रीप्रत्ययप्रकरणम्

आरम्भः—३।११।७३

४५३ । स्त्रियाम् । ४।१।३

इत ऊर्द्ध्वं भवेद् यत् यत् तत् तत् स्त्रियां भवेदिह ।
सामान्यं स्त्री विशेषः स्त्री बहुव्यक्तिश्च सा मता ॥ १

३।११।७३

४५५ । अजाद्यतष्टाप् । ४।१।४

अजादिभ्यः स्त्रियां टाप् स्यात् अकारान्तात् तथा च टाप् ।
अजा स्याद् देवदत्ता स्यात् स्त्रियां टापि निदर्शनम् ॥ २

अजादिः

(१) अजश्च कोकिलस्तद्वत् चटको मूषिकस्तथा ।
अश्वः स्यादेडकः स्याच्च षडेते जातिवाचिनः ॥ ३

(२) बालो होड़स्तथा वत्सो मन्दः पाको भवेत्तथा ।
विलातश्च भवेत्तद्वत् वयसि षट् भवन्ति ते ॥ ४

(३) पूर्व्वापहरणं स्याच्च स्यादपरापहारणम् ।
ल्युटि तौ च मतौ सिद्धौ टितौ खलु पुनश्च तौ ॥ ५

(४) सकलत्रिफलस्तद्वत् पिन्डफलस्तथैव च ।
भद्रफलो भवेत्तद्वत् शाणफलस्तथा पुनः ॥ ६
स्याद् जिनफलस्तत्र फलान्ताः षट् प्रकीर्त्तिता ।
भवन्ति सर्व्वशः सप्त फलान्ताः गणिताः पुनः ॥ ७

(५) सत्पुष्पः कान्तपुष्पः स्यात् शतपुष्पस्तथैव च ।
प्राक्पुष्पः प्रान्तपुष्पः स्यात् एकपुष्पस्तथा हि षट् ॥ ८

(६) पदमुष्णिह् पदं कुञ्च् स्यात् देवविश् च पदं पुनः ।
त्रयमिह हलन्तं स्यात् अजादिके गणे खलु ॥ ९

(७) कनिष्ठश्च तथा ज्येष्ठस्तथा च मध्यमः पुनः ।
पुंयोगे स्यान् त्रयं तावद् अजादौ च धृतं भवेत् ॥ १०

(८+९) शूद्रशब्दो भवेत्तावदजादिके गणे पुनः ।
मूलशब्दस्तथैव स्यादजादिके गणे धृतः ॥ ११

द्वात्रिंशत् सर्व्वसंख्याता गणे तावद् भवन्ति च ।
विभागः सप्तधा तेषां तावन्मया प्रदर्शितः ॥ १२

अस्ति तत्र विभागेन विशेषेण प्रयोजनम् ।
तदहं ते पुनः पश्चात् कथयामि सविस्तरम् ॥ १३
अजादौ ये स्थितास्तेषां टावेव प्रत्ययो भवेत् ।
अन्यथा प्रत्ययश्चान्यः प्राप्तोऽपि न भवेत् पुनः ॥ १४
अजादौ ये स्थिताः शब्दा. षड़िह जातिवाचिनः ।
प्राप्नोति ङीष् पुनस्तेभ्यः "जाते"रिति च सूत्रणात् ॥ १५
एतत् षट्कमजादौ स्यात् ततो ङीष् न प्रयुज्यते ।
सूत्रेण च प्रवृत्तेन टावेव हि भवेदिह ॥ १६
बालादिकं ततः षट्कमजादिके गणे भवेत् ।
"वयसी"ति स्थितं सूत्रं प्राप्नोति ङीष् ततः पुनः ॥ १७
एतत् षट्कमजादौ स्यात् ततो ङीष् न प्रयुज्यते ।
सूत्रेण च प्रवृत्तेन टावेव हि भवेदिह ॥ १८
त्रितौ तावत् ततश्च द्वौ त्रिदिनि च भवेद् हि ङीप् ।
अजादिके यतस्तौ द्वौ टावेव हि भवेत् ततः ॥ १९
सफलादि ततः षट्कं पाकादिति भवेन्न ङीष् ।
अजादिके स्थितं चेतत् टावेव हि ततो भवेत् ॥ २०
सपुष्पादि ततः षट्कं पाकादिति भवेन्न ङीष् ।
अजादिके स्थितं चेतत् टावेव हि ततो भवेत् ॥ २१
उष्णिहादि हलन्तं स्यात् न प्राप्नोति पुनश्च टाप् ।
अजादिके स्थितं तावत् टावेव हि ततो भवेत् ॥ २२
ज्येष्ठादि च ततः पश्चात् "पुंयोगाद्" ङीष् भवेदिह ।
अजादिके स्थितं तावत् ततश्च टाप् भवेत् पुनः ॥ २३

शूद्रा चामहत्पूर्व्वा जातिः (वा)

टापि शूद्रा भवेज्जातौ पूर्व्वे न चेत् पदं "महत्" ।
महद् यदा भवेत् पूर्व्वं महाशूद्री पदं भवेत् ॥ २४
शूद्रस्य चेत् भवेद् भार्य्या तदा शूद्री पदं खलु ।
मूलात् नञो भवेत् टाप् च स्यादमूला पदं तथा ॥ २५

४।११७३

४५६। उगितश्च। ४।१।६

उगितश्च स्त्रियां ङीप् स्यात् उगित् भवेत् यथा तथा।
रुदती ददती तद्वत् शृण्वती जानती पुनः॥ २६
जग्मुषी विदुषी तद्वत् यावती तावती तथा।
श्रेयसी प्रेयसी तद्वत् गतवती तथा भवेत्। २७
श्रीमती ह्रीमती तद्वत् भवती न तथा भवेत्।
ऋकारेत् स्यात् उकारेत् स्यात् निदर्शनं द्विधा धृतम्॥ २८

शतरि च मया दत्तं क्वसौ दत्तं पुनर्मया।
वतुपि च तथा दत्तं ईयसुने तथा पुनः॥ २९
क्तवतौ च मया दत्तं मतुपि च पुनस्तथा।
डवतौ च मया दत्तं दत्तेन सर्व्वशः॥ ३०

धातोरुगितः प्रतिषेधो वक्तव्यः (वा)

धातोरिह निषेधः स्यात् यदि धातुर्भवेदुगित्।
उखास्रद् ब्राह्मणी तत्र पर्णध्वत् ब्राह्मणी पुनः॥ ३१

अञ्चतेरुपसंख्यानम् (वा)

उदीची स्यात् प्रतीची स्यात् प्राची स्याच्च पदं पुनः।
अवाची स्यात् तथैवात्र धातुरञ्चुः प्रवर्त्तते॥ ३२

४५७। वनोर च। ४।१।७

वरवन्ताच्च पुनर्ङीप् स्याद् अन्तो रेफः प्रवर्त्तते।
धीवरी पीवरी तत्र शर्व्वरी पारदृश्वरी॥ ३३
ऋन्नेभ्य इति सिद्धं स्यात् तत् कथं सूत्रितं पुनः।
अन्तादेशो यथा रेफस्तथा सूत्रं भवेदिह॥ ३४

वनो न हशः (वा)

हशन्तस्य वनो न स्यात् द्वयमिह निषिध्यते।
ब्राह्मणी सा सहयुध्वा भवेदिह निदर्शनम्॥ ३५

४५८। पादोऽन्यतरस्याम्। ४।१।८

समासान्तो यदा पादस्तदा ङीप् स्यात् विभाषया।
द्विपदी त्रिपदी तत्र द्विपात् त्रिपात् तथा भवेत्॥ ३६

४५९। टाबृचि। ४।१।९

ऋचि यदि स्थितः पादः स्त्रियां टाप् स्यात् न ङीप् पुनः।
द्विपदा ऋग् भवेदत्र त्रिपदा ऋक् तथा भवेत्॥ ३७

४६० । मनः । ४।१।११

मन्नन्ताच्च न ङीप् तत्र ङीपि प्राप्ते निषिध्यते ।
दामा दामानौ दामानौ भवेदिह निदर्शनम् ॥ ३८

४६१ । अनो बहुव्रीहेः । ४।१।१२

अन्नन्ताच्च बहुव्रीहेः स्त्रियां ङीप् न भवेत् पुनः ।
उपधा न यदा लुप्ता तदा सूत्रं प्रयुज्यते ॥ ३९
सुपर्व्वा च सुपर्व्वाणौ सुपर्व्वाणौ निदर्शनम् ।
सुधर्म्मा च सुधर्म्मानौ सुधर्म्माणस्तथा भवेत् ॥ ४०

न यदा स्याद् बहुव्रीहि ङीवेव स्यात् तदा पुनः ।
अतिक्रान्ता राजानं चेत् अतिराजी पदं भवेत् ॥ ४१
उपधाया यदा लोपस्तदा भवेद् विभाषया ।
बहुराज्ञी पदं तत्र स्त्रियां ङीपि प्रवर्त्तते ॥ ४२

४६२ । डाबुभाभ्यामन्यतरस्याम् । ४।१।१३

उभाभ्याञ्च पुनर्ङीप् स्यात् डाविह स्यात् विभाषया ।
अन्नन्ताच्च बहुव्रीहे र्मन्नन्ताच्च पदात् पुनः ॥ ४३
बहुराजा बहुराजे बहुराजा यदा च डाप् ।
पदं स्याद् बहुराजानौ यदा डाप् न प्रवर्त्तते ॥ ४४
पामा पामे पामा भवेत् मन्नन्ताद् स्याद् यदा च डाप् ।
पामने स्यात् पदं तत्र यथा डाप् न प्रवर्त्तते ॥ ४५
"वनो र च" स्थितं सूत्रं तेन पदं प्रसिध्यति ।
पुनरन्यतरस्याम स्यात् विकल्पः स्याद् यथा पुनः ॥ ४६
स्याद् बहुधीवरी तेन स्याद् बहुधीवरा तथा ।
स्याद् बहुपीवरी तेन स्याद् बहुपीवरा पुनः ॥ ४७

४६३ । अन उपधालोपिनोऽन्यतरस्याम् । ४।१।२८

अन्नन्तश्चेद् बहुव्रीहिरुपधा लुप्यते यदि ।
ङीप्प्रत्ययस्तदा तत्र स्त्रियां भवेद् विभाषया ॥ ४८
बहुराजा बहुराज्ञी बहुराजे भवेदिह ।
बहुतक्षा बहुतक्षी बहुतक्षे तथा भवेत् ॥ ४९

अन्नन्ताश्च भवेत्तद्वत् अन्यत्र न तथा भवेत् ।
बहुमत्स्का पदं तावत् अन्नन्तो न न ङीप् तत: ॥ ५०
उपधाया यदा लोपस्तदा ङीप् स्यात् न चान्यदा ।
सुपर्व्वा च सुपर्व्वे स्यात् न च लोपो न ङीप तत: ॥ ५१

४६४ । प्रत्ययस्थात् कात् पूर्व्वस्मात् इदाप्यसुप: । ७।३।४४

प्रत्ययस्थात् ककारात् स्यादकार: पूर्व्वतो यदि ।
इकार: स भवेदापि न चेत् स आप् सुप: पर: ॥ ५२
जटिलिका पदं स्याच्च मुण्डिका स्यात् पदं पुन: ।
कारिका स्यात् पदं तद्वत् हारिका स्यात् तथैव च ॥ ५३

(१ प्रत्ययस्य यदा क: स्यात् तदा विधि: प्रयुज्यते ।
अन्यस्य तु यदा क: स्यात् न विधिर्युज्यते तदा ॥ ५४
शक्नोतीति शका तावत् धातोरवयवो हि क: ।
प्रत्ययश्च न ककार इकारो न भवेत्तत: ॥ ५५

(२) "स्थ"ग्रहणं कृतं सूत्रे विष्पष्टार्थं भवेच्च तत् ।
एक: क: प्रत्ययो नास्ति "प्रत्ययस्थ:" पदं तत: ॥ ५६

(३) ककारश्चेद् इकार: स्यात् न को न स्यादिकारता ।
नन्दना स्याद् रमणा स्यात् न को न स्यादिकारता ॥ ५७

(४) पूर्व्वस्य स्यादिकारो हि परस्य न तथा भवेत् ।
पटुकेति परे स्यादत् इकारो न तत: पुन: ॥ ५८

(५) इकार: स्यादकारस्य नान्यस्य तु तथा भवेत् ।
नौकेति पुनरौकारो न चाकारस्ततश्च न ॥ ५९

(६) ह्रस्वस्यैव विधिस्तावत् दीर्घस्य न विधिर्भवेत् ।
राका यदा तदा दीर्घो ह्रस्वो नेति न तावद् इ: ॥ ६०

(७) आपि परे इकार: स्यादन्ये परे तथा न च ।
धारक: स्यात् पदं तावत् आप् परे न न तावद् इ: ॥ ६१

पूर्व्वपक्ष:

कीदृश: क: परे यस्माद् आप् इति च विशिष्यते ।
कारिकेति पदं तावदिकारेण न सिध्यति ॥ ६२
कारक: स्याद् यदा शब्द एकश: को न वर्त्तते ।
ककारात् तु परं तावदकारोऽपि न विद्यते ॥ ६३

ककारो व्यञ्जनस्तावत् अकारस्तु स्वरः पुनः ।
मिलित्वा तु द्वयं तत्र "क" इति स्यात् प्रयोगतः ॥ ६४
ककारात् स्यादकारश्च तत आप् च प्रयुज्यते ।
व्यवधानमकारेण दुस्तरं भवेततः ॥ ६५
ककारात् पर आप् तावत् इति वक्तुं न शक्यते ।
व्यवधानं स्थितं तत्र न च सूत्रं प्रयुज्यते ॥ ६६

उत्तरपक्षः

अकारः स्यात् ततः पश्चात् आकारः स्यादिति स्थितिः ।
एकादेशो भवेत् पश्चात् आकारः स्यात् तथा पुनः ॥ ६७
एकादेशे तथा सिद्धे व्यवधानं न विद्यते ।
आपि परे ततः सूत्रं यथायथं प्रयुज्यते ॥ ६८

पूर्व्वपक्षः

एकादेशः पूर्व्वविधौ स्थानिवत् स्यादिति स्थितिः ।
व्यवधानं स्थितं तेन न च सूत्रं प्रयुज्यते ॥ ६९

उत्तरपक्षः

वर्णानां व्यवधानं वा न दोषाय भवेद् हि तत् ।
जातमेकेन वर्णेन व्यवधानं न दूष्यति ॥ ७०
रथकट्या पदं तत्र बहुवर्णे विभज्यते ।
श्रुतिकृतमनेकेन वर्णेन तत् न सिध्यति ॥ ७१
(८) असुपश्चेत् परे स्याद् आप् इकारः स्यात् तदा पुनः ।
सुपः परे यदा स्यादाप् इकारो न भवेत् तदा ॥ ७२
बहुपरिव्राजकाः स्याद् आप् इह स्यात् सुपः परः ।
इकारो न ततः सिध्येत् विधिरिह न युज्यते ॥ ७३
बहवः परिव्राजका अस्यामिति च विग्रहः ।
परिव्राजकशब्दात्तु सुबिह विद्यते खलु ॥ ७४

असुपः इति किं प्रोक्तं किमिदं वा भवेदिह ।
प्रसज्यप्रतिषेधः स्यात् यत् प्राप्तं तत् निषिध्यते ॥ ७५
सुपः पश्चात् यदा स्यादाप् इकारस्तु प्रसज्यते ।
प्रतिषेधो भवेत्तत्र स इकारो भवेन्न च ॥ ७६

पर्युदासः पुनर्नायम् इकारः स्याद् तथा मति ।
समुदायः सुबन्तो न स्यादिकारस्ततः पुनः ॥ ७७
सुब् यस्मिन् विद्यते नैव स चासुबिति नापि च ।
तथा सति न तावत् स्यात् पदं च बहुचर्मिका ॥ ७८
मामक-नरकयोरुपसंख्यानं कर्त्तव्यमप्रत्ययस्थात् (वा)
मामिका स्यात् पदं तत्र प्रत्ययस्य यदा न कः ।
अन्तर्भावस्ततस्तस्य भवेदिह प्रयोजनम् ॥ ७९
नरिका स्यात् पदं तत्र प्रत्ययस्य न को यदा ।
अन्तर्भावस्ततस्तस्य भवेत् पुनः प्रयोजनम् ॥ ८०
ममकः स्यात् समादेशः ततटापि च मामिका ।
प्रत्ययस्य ककारो न पुनरित्वं तथापि च ॥ ८१
नरकः स्यात् पदं तत्र टापि च नारिका भवेत् ।
प्रत्ययस्य ककारो न पुनरित्वं तथापि च ॥ ८२

प्रत्ययनिषेधे त्यक्-त्यपोश्चोपसंख्यानम् (वा)

त्यगन्तस्य त्यबन्तस्य स्यादिकार इति स्थितिः ।
त्य तु दाक्षिणात्यिका तत्र तथा च स्यादिहत्यिका ॥ ८३
"उदीचा"मिति सूत्रेण विकल्पो न प्रवर्त्तते ।
इह नित्यमिकारः स्यादिति च वार्त्तिकं धृतम् ॥ ८४
१३।११।७३

४६५ । न यासयोः । ७।३।४५

१४।११।७३

यत्तदो हि पदे या सा नास्ति तयोरिकारता ।
पदं भवेत् यका तत्र पदं भवेत् सका तथा ॥ ८५
न केवलं प्रथमायां निदर्शनं भवेदिह ।
अन्येष्वपि विभक्तिषु निदर्शनं च लभ्यते ॥ ८६
दर्शितं च भवेत्तत्र "यकां सकामधीमहे" ।
दर्शितं च पुनस्तावत् "यकां सकां पचामहे" ॥ ८७

(१) यत्तदोः प्रतिषेधे त्यकन उपसंख्यानम् (वा)

अधित्यका भवेदत्र भवेदुपत्यका पुनः ।
इकारो न भवेत्तयोः प्रतिषेधो द्वयोरिह ॥ ८८

(२) पावकादीनां छन्दसि उपसंख्यानम् (वा)

पावका लोमका वेदे वेदे च ऋक्षका भवेत् ।
छन्दस्येव पुनस्तेषामिकारता निषिध्यते ॥ ८९
भाषायान्तु भवेदेवं पाविका स्यात् पदं तदा ।
अलोमिका पदं तद्वत् भाषायां दृश्यते पुनः ॥ ९०

(३) आशिषि चोपसंख्यानम् (वा)

वुन् प्रत्ययो भवेद् यत्र न तत्र स्यादिकारता ।
जीवतात् जीवका तत्र भवतात् भवका पुनः ॥ ९१

(४) उत्तरपदलोपे चोपसंख्यानम् (वा)

परं पदं यदा लुप्तमिकारो न तदापि च ।
देवका यज्ञका तत्र दत्तं लुप्तं परं पदम् ॥ ९२
इहासीत् देवदत्तका पूर्णं रूपं स्थितं यदा ।
इहासीत् यज्ञदत्तका पूर्णं रूपं यदा पुनः ॥ ९३
क्षिपका ध्रुवका तत्र कन्यका चटका पुनः ।
इकारो न भवेदेषु प्रतिषेधश्च वर्त्तते ॥ ९४

(६) तारका ज्योतिषामुपसंख्यानम् (वा)

ज्योतिषि तारका तावदिकारो न भवेत्तदा ।
अन्यत्र तारिकापि स्याद् दासी यदि प्रतीयते ॥ ९५

(७) वर्णका तान्तवे उपसंख्यानम् (वा)

तान्तवे वर्णका तावत् इकारो न भवेत्तदा ।
अन्यत्र वर्णिका ग्राह्या भाण्डारी वर्णिका यथा ॥ ९६

(८) वर्त्तका शकुनौ प्राचामुपसंख्यानम् (वा)

उदीचां वर्त्तिका तावत् शकुनिरेव गृह्यते ॥ ९७

(९) अष्टका पितृदैवत्ये (वा)

अष्टका पितृदैवत्ये इकारो न भवेदिह ।
अष्टिका स्याद् यदा खारी स्यादिकारस्तदा खलु ॥ ९८
धातुरष्ट च भवेदादौ ततस्त्यकन् प्रयुज्यते ।
अष्ट परे च संख्यायाम् कन्प्रत्ययस्ततः परम् ॥ ९९

(१०) वा सुतका-पुत्रका-वृन्दारकानामुपसंख्यानम् (वा)
सुतिका पुत्रिका तावत् वृन्दारका तथैव च।
सुतिका पुत्रिका चापि वृन्दारिका विभाषया ॥ १००
"वा अ" इति विभज्येह केचिद् व्याख्यानयन्ति च।
कात् पूर्व्वस्य स्थितस्य स्याद् अकारो वा विभाषया ॥ १०१

४६६। उदीचामातः स्थाने यक पूर्व्वायाः। ७।३।४६

आतो यकारपूर्व्वस्य अकारो यो भवेदिह।
आतः ककारपूर्व्वस्य अकारो यः पुनर्भवेत् ॥ १०२
स स पुनरकारः स्यात् इकारश्च स्त्रियामिह।
उदीचां तु मतं तत् स्यात् विकल्पार्थं समुद्धृतम् ॥ १०३
इभ्यका च पदं सिद्धम् इभ्यिका च विभाषया।
क्षत्रियका पदं तद्वत् क्षत्रियिका तथा पुनः।
चटकका पदं तद्वत् चटकिका पदं पुनः ॥ १०४
मूषिकका तदं स्याच्च मूषिकिका तथा भवेत् ॥ १०५

"आतः" इति कथं सूत्रे किमर्थं च धृतं भवेत्।
न भवति यदा ह्रस्वस्तदा विधिर्नयुज्यते ॥ १०६
स्यात् "सांकाश्ये भवा" यत्र तदा ह्रस्वो न लभ्यते।
पदं "सांकाश्यिका" तत्र विकल्पो न भवेत् पुनः ॥ १०७

"षष्ठी स्थानेयोगा" तत्र परिभाषा प्रवर्त्तते।
षष्ठ्यन्तं तु पदं सूत्रे "स्थाने" तस्मात् प्रतीयते ॥ १०८
"स्थाने" इति कथं प्रोक्तं पुनरपि च सूत्रणे।
"स्थाने" पदं किमुद्दिश्य मुनिनेह निवेशितम् ॥ १०९
सम्वन्धप्रतिपत्त्यर्थं "स्थाने" शब्दः प्रयुज्यते।
दीर्घस्य यो भवेत् ह्रस्वः तत्सम्वन्धे विधिर्भवेत् ॥ ११०
विधिः स्यात् ह्रस्वसम्वन्धी पूर्व्वं दीर्घः स्थितो यदा।
दीर्घस्य तु कृते ह्रस्वे विधिस्तावत् प्रयुज्यते ॥ १११
"स्थाने" शब्दो न चेत् सूत्रे दीर्घस्य स्यादिकारता।
"स्थाने" शब्दो स्थितः सूत्रे ह्रस्वे भवेदिकारता ॥ ११२

कथं "यकपूर्व्वाया"श्च पुनः सूत्रे निवेशितः ।
यकारश्चेत् ककारश्चेत् न पूर्व्वं स्यात् भवेन्न च ॥ ११३
"अश्वा" यदा पदं तत्र वकारः पूर्व्वतो भवेत् ।
"अश्वका" च पदं तत्र विकल्पेन न सिध्यति ॥ ११४
भवेन्न "यकपूर्व्वाया" निर्द्देशो हि स्त्रियां पुनः ।
स्त्रीप्रत्यये यदा स्यादात् तदा सूत्रं प्रयुज्यते ॥ ११५
पदं यत्र शुभंया स्यात् शुभंयिका भवेत् तदा ।
स्त्रीप्रत्यये न तावदात् धातोरात् हि भवेदिह ॥ ११६

यकपूर्व्वात् धात्वन्तप्रतिषेधः (वा)

यकारश्च ककारश्च धात्वन्तश्चेद् भवेदिह ।
प्रतिषेधः कृतः सूत्रे न लभते पदं तदा ॥ ११७
सुनयिका पदं तत्र यकारे स्यान्निदर्शनम् ।
सुपाक्विका पदं तत्र ककारे स्यात् तथा पुनः ॥ ११८
१४।११।७३

४६७ । भस्त्रा-एषा-अजा-ज्ञा-द्वा-स्वा-नञ्-पूर्व्वाणामपि । ७।३।४७

अजा भस्त्रा तथा चैषा ज्ञा द्वा स्वा च यदा भवेत् ।
ह्रस्वे भवेदकारो यः स इकारो विभाषया ॥ ११९
नञपि च यदा पूर्व्वे विभाषा स्यादिकारता ।
निदर्शनं यथायोग्यमितः परं प्रदीयते ॥ १२०

भस्त्रिका भस्त्रका तत्र भस्त्राशब्दात् भवेदिह ।
अभस्त्रका तथैव स्यात् तथैव स्यादभस्त्रिका ॥ १२१
एषका स्यात् पदं तत्र स्यादेषिका पदं तथा ।
अजका स्यात् पदं तत्र स्यादजिका पदं पुनः ॥ १२२
अनजिका नञा च स्यात् अनजका पुनस्तथा ।
ज्ञका ज्ञिका तथैव स्यात् द्वके द्विके तथा भवेत् ॥ १२३
अज्ञका स्यात् पदं तत्र स्यादज्ञिका पदं तथा ।
स्वकी तावत् स्विका तावद् अस्वका स्यात् तथास्विका ॥ १२४

न प्रयोजयतस्तावद् एषा द्वे च नञा पुनः ।
समासे तु विभक्तिः स्यात् इकारो न यदा च सुप् ॥ १२५

अनेषको भवेन्नित्यं नित्यं भवेत् तथाम्बके ।
न प्राप्नोति विकल्पश्च पदमेकं भवेत्ततः ॥ १२६
धने ज्ञातौ नञा तावद् पदद्वयं भवेत् खलु ।
निदर्शनमितःपूर्व्वं स्व-शब्देन प्रदर्शितम् ॥ १२७
स्यादभाषितपुंस्कं च सूत्रं तावदितः परम् ।
"भस्त्रा" शब्दस्ततः सिध्येत् तत् कथमिह गृह्यते ॥ १२८
स्यादुपसर्ज्जनं शब्दस्तदर्थः गृह्यते पुनः ।
अभस्त्रा स्याद् बहुव्रीहौ साल्पेति स्यादभस्त्रिका ॥ १२९
अभस्त्रिका पदं तद्वत् पुनरिह भवेदपि ।
पदद्वयं भवेदेव खलु चात्र विभाषया ॥ १३०

स्यादुपसर्ज्जनं भस्त्रा ह्रस्व आदौ भवेदिह ।
पश्चाद् भवेद् बहुव्रीहिः पश्चाच्च टाप प्रयुज्यते ॥ १३१
"केऽशा" इति तनो ह्रस्वस्तावदिह प्रजायते ।
स्यादभाषितपुंस्काद आ तस्या ह्रस्वो न सः पुनः ॥ १३२

नञ् पूर्व्वाणामपीत्युक्तं अपिशब्दः प्रयुज्यते ।
तेन स्यादन्यपूर्व्वाणां केवलानां भवेदपि ॥ १३३
निर्भस्त्रका भवेत्तावत् निर्भस्त्रिका तथा भवेत् ।
स्याद् बहुभस्त्रिका तद्वत् स्याद् बहुभस्त्रका पुनः ॥ १३४

४६८ । अभाषितपुंस्काच्च । ७।३।४८

स्यादभाषितपुंस्काच्चेत् ह्रस्वः क्वचित् कथञ्चन ।
ह्रस्वे भवेदकारो य स इकारो विभाषया ॥ १३५
खट्वका स्यात् पदं तत्र खट्विका स्यात् तथा पुनः ।
अखट्विका तथैव स्यात् अखट्वका तथा भवेत् ॥ १३६
बहुव्रीहौ यदा ह्रस्वः "कपि" परे प्रजायते ।
तदापि च विधिर्योज्यः स्यादकारः यतस्तदा ॥ १३७

४६९ । आदाचार्य्याणाम् । ७।३।४८

यदाऽभाषितपुंस्कं स्यात् आकारश्चेत् पुनः क्वचित् ।
ह्रस्वे भवेदकारो यस्तस्याकारो भवेत् पुनः ॥ १३८

खट्वाकी च पदं भवेद् खट्वका स्यात् तथा पदम् ।
पदं परमखट्वाका तथैव च भवेदिह ॥ १३९

१५।११।७३

४७० । अनुपसर्जनात् । ४।१।१४
अनुपसर्जनादेव प्रत्ययः स्यादतः परम् ।
सूत्रेषु च परेषु स्यान्निषेध उपसर्जने ॥ १४०

४७१ । टिड्-ढाणञ्-द्वयसज्-दघ्नञ्-मात्रच्-तयप्-ठक्-ठञ्-कञ्-करपः । ४।१।१५
टिडादिभ्यः स्त्रियां ङीप् स्यात् टाबिह च निषिध्यते ।
कुरुचरी टितस्तावत् मद्रीचरी तथा पुनः ॥ १४१
वैनतेयी टितस्तावत् सौरभेयी तथा भवेत् ।
कुम्भकारी भवेदणि पदमौपगवी तथा ॥ १४२
तापसी च तथा चौरी णोऽपि पदं भवेदिह ।
औदपानी तथा चौत्सी भवेदञि निदर्शनम् ॥ १४३
स्यादुरुद्वयसी तत्र स्याद् जानुद्वयसी तथा ।
द्वयसजि द्वयं तावत् भवेदिह निदर्शनम् ॥ १४४
उरुदघ्नी पदं तद्वत् जानुदघ्नी तथा भवेत् ।
प्रत्ययश्च यदा दघ्नच् इदं द्वयं तदा पुनः ॥ १४५
उरुमात्री पदं तद्वत् जानुमात्री पदं तथा ।
प्रत्ययः स्याद् यदा मात्रच् तदा भवेन्निदर्शनम् ॥ १४६
पञ्चतयी पदं तत्र दशतयी पदं भवेत् ।
प्रत्ययः स्यात् तयप् यत्र तत्र भवेन्निदर्शनम् ॥ १४७
आक्षिकी च पदं तद्वत् शालाकिकी तथा पदम् ।
प्रत्ययस्तु यदा ढक् स्यात् तदा भवेन्निदर्शनम् ॥ १४८
लावणिकी पदं ठञ् चेत् यादृशी कञ् यदा भवेत् ।
इत्वरी नश्वरी तत्र प्रत्ययः स्याद् यदा करप् ॥ १४९

नञ्-स्नञ्-ईकक्-ख्युन्-तरुण-तलुनानामुपसंख्यानम् (वा)
स्त्रैणी पौंस्नी पदं ङीपि तरुणी तलुनी पुनः ।
शाक्तीकी याष्टीकी ङीपि भवेदिह निदर्शनम् ॥ १५०

४७२। यञश्च। ४।१।१६

यञन्ताच्च पुनः शब्दात् ङीप् प्रत्ययः स्त्रियां भवेत्।
गार्गी वात्सी पदं तत्र ङीपि भवेन्निदर्शनम्॥ १५१

४७३। हलस्तद्धितस्य। ६।४।१५०

तद्धितस्य यकारश्चेत् हलः परं भवेदिह।
उपधायास्तदा तस्य लोप ईति प्रसज्यते॥ १५२
गार्गी भवेत् पदं तत्र लोपे पुनर्निदर्शनम्।
वात्सी भवेत् पदं तत्र लोपे निदर्शनं पुनः॥ १५३

४७४। प्राचां ष्फः तद्धितः। ४।१।१७

प्राचां मते यञन्ताच्च स्त्रियां ष्फः स्यात् च तद्धिते।
गार्ग्यायणी पदं तेषां वात्सायनी तथा पुनः॥ १५४
गार्गी भवेत् तथा लोपे वात्सी भवेत् पदं तथा।
तद्धितग्रहणं सूत्रे स्यात् प्रातिपादिकं यथा॥ १५५

४७५। षः प्रत्ययस्य। १।३।६

षकारः प्रत्ययस्यादिरित्संज्ञको भवेदिह।
शिल्पिनि ष्वुन् भवेत्तस्मात् नर्त्तकी रजकी स्त्रियाम्॥ १५६

४७६। आयनेयीनीयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम्। ७।१।२

फादीनामायनादयः क्रमादिह भवन्ति च।
प्राचां ष्फः स्यात् ततश्चायन् "षिद्" च गार्ग्यायणी तथा॥ १५७

४७७। सर्व्वत्र लोहितादिकतन्तेभ्यः। ४।१।१८

सर्व्वत्र लोहितादिभ्यः कतन्तेभ्यो विधिर्भवेत्।
विधिर्भवेत् कतन्तेभ्यः यञन्तेभ्यस्तथा भवेत्॥ १५८
उभयत्र स्त्रियां ष्फः स्यात् नित्यो विधिर्भवेदिह।
स्याल् लौहित्यायनी तत्र स्याच्च कात्यायनी पुनः॥ १५९

४७८। कौरव्य-माण्डूकाभ्याञ्च। ४।१।१९

कौरव्याच्च स्त्रियां ष्फः स्यात् माण्डूकात् ष्फस्तथैव च।
स्यात् कौरव्यायणी तत्र स्यात् माण्डूकायनी तथा॥ १६०
न टाप् तावत् न ङीप् तावत् अपवादे विधिर्मतः।
स्यादिह कौरवी सेना यदाण् च प्रत्ययो भवेत्॥ १६१

कौरव्य-माण्डूकेयोरासुरेरुपसंख्यानम् (वा)

आसुरिरपि च ग्राह्यः स्फ इह स्यात् स्त्रियां पुनः।
स्यादासुरायणी तत्र स्त्रियां स्फे च निदर्शनम्॥ १६२

४७९। वयसि प्रथमे। ४।१।२०

वयसि प्रथमे तत्र यदा शब्दः प्रयुज्यते।
अदन्ताच्च स्त्रियां ङीप् स्यात् इति विधिर्भवेदिह॥ १६३
कुमारी किशोरी तत्र वर्करी च निदर्शनम्।
वयो न प्रथमं यत्र न ङीप् स्यात् स्थविरा यथा॥ १६४
अदन्ताच्च विधिर्योज्यः न चान्यत्र तथा भवेत्।
शिशुरिति न चादन्तो न ङीप् तस्मात् भवेदिह॥ १६५

वयसि अचरमे इति वाच्यम् (वा)

न वयश्चरमं यत्र तत्र तु ङीप् भवेत् खलु।
वधूटी स्याच् चिरण्टी स्यात् द्वितीयन्तु वयो भवेत्॥ १६६

"कन्यायाः" इति सूत्रं च कन्या च ज्ञापकाद् भवेत्।
स्यादुत्तानशया चापि नेह वयःश्रुतिः खलु॥ १६७

४८०। द्विगोः। ४।२।२१

पदं द्विगौ यदा दृष्टं तदा ङीप् स्यात् स्त्रियां खलु।
पञ्चपूली पदं तत्र दशमूली निदर्शनम्॥ १६८
कथं स्यात् त्रिफला तत्र द्विगौ पदं स्थितं खलु।
अजादिषु पदं दृष्टं टाप् प्रत्ययो भवेत्ततः॥ १६९

४८१। अपरिमाण-बिस्ता-चित कम्बल्याभ्यो न तद्धितलुकि। ४।१।२२

द्विगोरपरिमाणान्तात् तद्धितलुकि ङीप् न च।
बिस्ता-चित-कम्बल्यान्तात् द्विगोर्न ङीप् तथा सति॥ १७०
द्विगोरपरिमाणान्तात् पञ्चाश्वा स्यात् निदर्शनम्।
दशाश्वा स्यात् तथैवात्र निदर्शनं ततः पुनः॥ १७१
न कालः स्यात् न संख्या स्यात् परिमाणं सतां मते।
द्विवर्षा स्यात् त्रिवर्षा स्यात् द्विशता त्रिशता तथा॥ १७२
द्विबिस्ता च त्रिबिस्ता च द्व्याचिता त्र्याचिता पुनः।
द्विकम्बल्या त्रिकम्बल्या पुनस्तत्र निदर्शनम्॥ १७३

परिमाणं न चेत् तत्र ङीप्प्रत्ययो भवेत् खलु ।
द्व्याढकी त्र्याढकी ज्ञेया ङीपि तत्र कृते पुनः ॥ १७४
तद्धितलुकि तद्वत् स्यात् नान्यत्र च तथा भवेत् ।
पञ्चाश्वी स्यात् दशाश्वी स्यात् समाहारे भवेत् ङीप् ॥ १७५

४८२ । काण्डान्तात् क्षेत्रे । ४।१।२३

तद्धितलुक् यदा तत्र क्षेत्रं वाच्यं पुनः स्थितम् ।
काण्डशब्दात् द्विगोस्तत्र न ङीप् भवेदिति स्थितिः ॥ १७६
द्विकाण्डा क्षेत्रभक्तिः स्याद् यथाश्रुतं निदर्शनम् ।
त्रिकाण्डा क्षेत्रभक्तिः स्याद् निदर्शनं तथा पुनः ॥ १७७
द्वे काण्डे प्रमाणमस्या प्रमाणे द्वयसज् भवेत् ।
"प्रमाणे लो" "द्विगो र्नित्यम्" इति तच्च विलुप्यते ॥ १७८
न काण्ड परिमाणे स्यात् प्रतिषेधः ततः स्थितः ।
वचनं नियमार्थं स्यात् क्षेत्रे चापि निषिध्यते ॥ १७९
द्विकाण्डी रज्जुरित्यत्र ङीप् प्रत्ययो भवेत् खलु ।
प्रमाणविशेषे काण्डं न दूष्यति पदं ततः ॥ १८०

४८३ । पुरुषात् प्रमाण अन्यतरस्याम् । ४।१।२४

प्रमाणे पुरुषो यत्र तत्र न ङीप् विभाषया ।
द्वौ पुरुषौ प्रमाणं चेत् द्विपुरुषा पदं भवेत् ॥ १८१
पदं द्विपुरुषी चापि ङीपि भवेत् तथा पुनः ।
त्रिपुरुषा पदं तद्वत् त्रिपुरुषी तथा भवेत् ॥ १८२
नैतच्च परिमाणे स्यात् नित्यं तस्मात् निषिध्यते ।
नित्ये प्राप्ते निषेधे तु विकल्पार्थमिदं भवेत् ॥ १८३
प्रमाणे च भवेदेवमन्यत्र न तथा पुनः ।
क्रीता द्वाभ्यां पुरुषाभ्यां द्विपुरुषा पदं तदा ॥ १८४
तद्धितलुक् स्थितं तावत् अन्यत्र न तथा भवेत् ।
द्विपुरुषी समाहारे द्विपुरुषा तथा पुनः ॥ १८५

४८४ । ऊधसोऽनङ् । ५।४।१३१

ऊधसश्च बहुव्रीहौ समासान्तो भवेदनङ् ।
कुण्डोध्नी स्यात् घटोध्नी स्यात् पदं तथा स्त्रियामिह ॥ १८६

४८५। बहुव्रीहेरूधसो ङीष्। ४।१।२५

ऊधसो ङीष् बहुव्रीहेर्घटोध्नी स्यात् पदं तदा।
निषेधे तु द्विधाप्राप्ते सूत्रमिदं प्रवर्त्तते॥ १८७
३।११७३

४८६। संख्याव्ययादे ङीप्। ४।१।२६

संख्यादेरव्ययादेश्च बहुव्रीहौ तु ङीप् भवेत्।
द्व्यूध्नी त्र्यूध्नी बहुव्रीहौ संख्यात्ययात् निदर्शनम्॥ १८८
अत्यूध्नी च बहुव्रीहौ निदर्शनं तथाव्ययात्।
निरूध्नी च बहुव्रीहौ निदर्शनं तथैव च॥ १८९
"आदि" पदं धृतं सूत्रे द्विविधोध्नी तथा भवेत्।
त्रिविधोध्नी तथैव स्यात् "आदिः" आसीत् पुनः स्त्रियाम्॥ १९०

४८७। दामहायनान्ताच्च। ४।१।२७

इहानुवर्त्तते संख्या नाव्ययं चानुवर्त्तते।
संख्यादेश्च बहुव्रीहौ दाम्नो ङीप् हायनात् तथा॥ १९१
द्विदाम्नी स्यात् त्रिदाम्नी स्यात् द्विहायनी त्रिहायनी।
स्याच्च चतुर्हायनी तद्वत् दाम्नश्च हायनात् परम्॥ १९२
हायनो वयसि स्मृतः (वा)
वयसि हायनो ज्ञेयो न वयश्चेत् तथा न च।
द्विहायनी भवेच्च शाला त्रिहायनी तथैव च॥ १९३
स्याच्च चतुर्हायनी शाला तद्वदिह निदर्शनम्।
त्रिचतुर्भ्यां हायनस्य (वा)
हायनस्य त्रिचतुर्भ्यां भवेन् णत्वमिति स्थितिः॥ १९४

४८८। नित्यं संज्ञाछन्दसोः। ४।१।२९

अन्नन्तश्चेद् बहुव्रीहिरुपधा लुप्यते यदि।
संज्ञायां ङीप् भवेन्नित्यं पुनर्नित्यं च छन्दसि॥ १९५
सुराज्ञी स्यादतिराज्ञी संज्ञायां च निदर्शनम्।
एकदाम्नी द्विदाम्नी स्यात् निदर्शनं च छन्दसि॥ १९६

४८९। केवल-मामक-भागधेय-पाप-अपर-समान-आर्य्यकृत-सुमङ्गल-भेषजाच्च। ४।१।३०

संज्ञायां ङीष् भवेदेभ्य एभ्यो ङीप् स्यात् च छन्दसि।
अतःपरं मया दत्तं प्रत्येकन्तु निदर्शनम्॥ १९७

केवली मामकी पापी भागधेयी सुमङ्गली ।
अपरी च समानी स्यादार्य्यकृती च भेषजी ॥ १९८
छन्दसि च ताः सर्व्वाः स्युः सर्व्वत्र ङीप् युतो भवेत् ।
भाषायान्तु तथा न स्यात् आकारान्ता यदा च टाप् ॥ १९९
केवला मामका पापा भागधेया सुमङ्गला ।
अपरा च समाना स्यादार्य्यकृता च भेषजा ॥ २००

४९० । अन्तर्वत् पतिवतोनुक् । ४।१।३२

एतयोश्च स्त्रियां नुक् स्यात् ततश्च ङीष् भवेत् स्त्रियाम् ।
अन्तर्व्वत्नी पदं तत्र पतिवत्नी तथा भवेत् ॥ २०१
मतुब् निपातनादादौ वत्वं निपातनात् परे ।
आदौ स्यात् गर्भसंयोगे पतियोगे परे पुनः ॥ २०२

४९१ । पत्युर्नो यज्ञसंयोगे । ४।१।३३

पत्युः स्त्रियां नकारः स्यात् ङीष् भवेच्च ततः परम् ।
यदा यज्ञेन संयोगस्तदा सूत्रं प्रयुज्यते ॥ २०३
सा पत्नी यजमानस्य भवेदिह निदर्शनम् ।
वाचं मे यज्ञ पति त्वं भवेन्निदर्शनं परम् ॥ २०४
न यदा यज्ञसंयोगो नकारो न तदा भवेत् ।
ग्रामस्य ब्राह्मणी पतिः प्रत्युदाहरणं स्मृतम् ॥ २०५

४९२ । विभाषा सपूर्व्वस्य । ४।१।३४

पत्यन्तस्य सपूर्व्वस्य स्त्रियां नः स्याद्विभाषया ।
अनुपसर्ज्जनस्येह पत्यन्तस्य भवेद्विधिः ॥ २०६
वृद्धपतिः पदं तत्र वृद्धपत्नी तथा भवेत् ।
स्थूलपतिर्भवेत्तद्वत् स्थूलपत्नी तथा पुनः ॥ २०७

४९३ । नित्यं सपत्न्यादिषु । ४।१।३५

सपत्न्यादौ नकारः स्यान् पत्युर्नित्यमिति स्थितिः ।
विभाषार्थं भवेन्नित्यं विकल्पे वचनं पुनः ॥ २०८
एकपत्नी सपत्नी स्यात् पुनरिह निदर्शनम् ।
समानस्य सभावार्थं वचनं क्रियते पुनः ॥ २०९

सपत्न्यादिः

एको वीरः समानः स्यात् पिण्डो भ्राता तथैव च ।
पुत्रश्च स्यात् सपत्न्या दौ गणो मया प्रदर्शितः ॥ २१०

४९४ । पूतक्रतोरै च । ४।१।३६

पूतक्रतु यदा शब्द ऐकारः स्यात् तथा च ङीप् ।
पदं पूतक्रतायी स्यात् पूतक्रतोः स्त्रियामिह ॥ २११

४९५ । वृषाकपि-अग्नि-कुसित-कुसीदानाम-नुदात्तः । ४।१।३७

वृषाकपिस्तथा चाग्नि कुसीदः कुसितस्तथा ।
उदात्त ऐ भवेदेषां ङीषपि च तथा पुनः ॥ २१२
पदं वृषाकपायी स्यात् अग्नायी स्यात् तथैव च ।
कुसितायी कुसीदायी निदर्शनं तथा पुनः ॥ २१३

४९६ । मनोरौ वा । ४।१।३८

मनुशब्दाद् भवेद् औ च उदात्त ऐ तथा च वा ।
ताभ्यां च योगतस्तत्र ङीबपि च भवेत् स्त्रियाम् ॥ २१४
"वा" ग्रहणं कृतं सूत्रे विकल्पोऽपि ततो द्वयोः ।
मनोः स्त्री चेत् मनायी स्यात् मनावी स्यात् मनुः पुनः ॥ २१५

४९७ । वर्णादनुदात्तात् तोपधात् तः नः । ४।१।३९

पदं चेदनुदात्तान्तं वर्णवाची पुनश्च चेत् ।
तोपधं चेत् पुनश्चापि विभाषा ङीष् प्रवर्त्तते ॥ २१६
तकारस्य नकारः स्यात् समादेशस्तथैव च ।
निदर्शनं च सर्व्वत्र परं मया प्रदीयते ॥ २१७
एताशब्दःस्थितस्तावत् एणीशब्दो भवेत्तथा ।
श्येताशब्दः स्थितस्तावत् श्येनीशब्दः स्थितः पुनः ॥ २१८
हरिता तु यदा शब्दो हरिणी स्यात् तदापि च ।
रोहिनी तु यदा शब्दः रोहिता तु तदा पुनः ॥ २१९
४।११।७३

४९८ । अन्यतो ङीष् । ४।१।४०

आरम्भः ११।११।७३

पदं चेदनुदात्तान्तं वर्णवाची पुनश्च चेत् ।
तोपधं च न पदं चेत् स्त्रियां ङीष् प्रत्ययो भवेत् ॥ २२०

स्वरे चात्र विशेषः स्यात् विशेषो नान्यथा पुनः ।
अनुदात्तं भवेन् ङीपि स्यादुदात्तं यदा च ङीष् ॥ २२१
सारङ्गी च पदं तत्र कल्माषी च पदं पुनः ।
शबली च पदं तत्र सर्व्वत्र ङीष् प्रयुज्यते ॥ २२२

४९९ । षिद् गौरादिभ्यश्च । ४।१।४६

षित् प्रातिपदिकं स्याच्चेत् गौरादिकं पुनर्यदि ।
प्रत्ययस्तु स्त्रियां ङीष् स्यात् यथा परं निदर्शनम् ॥ २२३
नर्त्तकी खनकी तत्र रजकी स्यात् तथैव च ।
शिल्पिनि ष्वुन् ततः ष्वित् स्यात् ङीष् प्रत्ययो भवेत्ततः ॥ २२४
गौरी मत्सी पदं तावद् गौरादिके निदर्शनम् ।
शृङ्गी हयी भवेत्तद्वत् गवयी मुकयी तथा ॥ २२५

५०० । सूर्य्य-तिष्या-अगस्त्यानां य उपधायाः । ६।४।१४९

उपधाया यकारस्य भस्य भवेद् विलोपनम् ।
गौरी तैषी तथागस्ती मत्सी पदं तथा भवेत् ॥ २२६

५०१ ।

(१) जानपद	(१) वृत्ति
(२) कुण्ड	(२) अमत्र
(३) गोण	(३) आवपन
(४) स्थल	(४) अकृत्रिमा
(५) भाज	(५) श्राणा
(६) नाग	(६) स्थौल्य
(७) काल	(७) वर्ण
(८) नील	(८) अनाच्छादन
(९) कुश	(९) अयोविकार
(१०) कामुक	(१०) मैथुनेच्छा
(११) कबरा	(११) केशवेशेषु । ४।१।४२ (स्त्रियां ङीष्)

(१) वृत्तौ जनपदात् ङीष् स्यात् जानपदी पदं भवेत् ।
अन्या जानपदी ज्ञेया विशेषः केवलं स्वरे ॥ २२७
उत्सादौ तु स्थितः शब्दो भवेद् अञ् च भवेच्च ङीप् ।
आद्युदात्तः ततः पश्चाद् विशेषस्तु प्रदर्शितः ॥ २२८

(२) अमत्त्रे तु भवेत् कुण्डी पात्रे शब्दः प्रकीर्तितः ।
अन्यत्र तु भवेत् कुण्डा देवी दुर्गा भवेत् तदा ॥ २२९

(३) आवपने भवेद् गोणी धान्यादि नीयते तया ।
अन्यत्र तु भवेद् गोणी संज्ञायान्तु पदं भवेत् ॥ २३०

(४) अकृत्रिमा भवेत् स्थला न तु परिष्कृता यदा ।
कृत्रिमा तु भवेत् स्थली पुरुषेन परिष्कृता ॥ २३१

(५) पक्वा यदि भवेद् भाजी खाद्ये शब्दः प्रकीर्तितः ।
अन्यथा तु भवेद् भाजा न चेत् पक्वा मता भवेत् ॥ २३२

(६) स्थूली यदि भवेत् नागी स्त्रियां पदं प्रयुज्यते ।
अन्यत्र तु भवेन्नागा दैर्घ्ये शब्दः प्रकीर्तितः ॥ २३३
ङीष् प्रत्ययो विशेषेण स्थौल्ये तावद् भवेदिह ।
सामान्यतो गुणे तत्र नागा खलु पदं भवेत् ॥ २३४
जातौ तु सर्व्वदा ङीष् स्यात् नागी खलु पदं भवेत् ।
अर्थे यो विशेषः स्थितः स च मया प्रदर्शितः ॥ २३५

(७) वर्णो यदि भवेत् काली कृष्णवर्णास्तदोच्यते ।
अन्यत्र तु भवेत् काला निष्ठुरायां वचो भवेत् ॥ २३६

(८) औषधिश्चेद् भवेन्नीली प्राणी यदि तथा भवेत् ।
नीली गौरोषधिः नीली नीली च वड़वा पुनः ॥ २३७
आच्छादने भवेन्नीला नीला शाटी निदर्शनम् ।
नीली नीला द्वयं चात्र संज्ञायान्तु विभाषया ॥ २३८

(९) भवत्ययोविकारश्चेत् पदं कुशी तदा भवेत् ।
अन्यत्र तु कुशा ज्ञेया रज्जौ तृणे विशेषतः ॥ २३९

(१०) मैथुनेच्छा यदा तस्याः कामुकी सा तदोच्यते ।
कामुका स्याद् धनेच्छायां विशेषस्तु भवेदयम् ॥ २४०

(११) कवरी केशवेशे स्यात् ङीषि पदं तथा भवेत् ।
कवरा स्यात् तु वैचित्र्ये टापि पुनः पदं स्त्रियाम् ॥ २४१

५०२ । शोणात् प्राचाम् । ४।१।४३

शोणशब्दात् स्त्रियां ङीष् स्यात् प्राचां मते इति स्थितिः ।
शोणी भवेत् पदं तत्र शोणा वापि भवेत् तथा ॥ २४२

५०३। वोतो गुणवचनात्। ४।१।४४

उकारान्ताद् भवेद् वा ङीष् गुणस्य वचनं यदि।
पटुः पट्वी मृदुः मृद्वी भवेदिह निदर्शनम्॥ २४३
उकारान्ताद् विभाषा ङीष् न चान्यत्र तथा भवेत्।
शुचिरियं भवेत्तावत् उकारान्तः शुचिर्न च॥ २४४
गुणस्य वचनात् तद्वत् अन्यत्र न तथा पुनः।
मूषिके तु भवेदाखुः न च गुणो मतो भवेत्॥ २४५

वसुशब्दात् गुणवचनात् ङीष् आद्युदात्तार्थम् (वा)

"वसु" शब्दात् स्त्रियां ङीप् स्यादाद्युदात्तं यथा भवेत्।
"वस्वी" पदं भवेदत्र ङीपि तावत् सतां मते॥ २४६

खरुसंयोगोपधात् प्रतिषेधो वक्तव्यः (वा)

खरुशब्दात् न ङीष् तत्र न संयोगोपधात् पुनः।
खरुः पतिंवरा कन्या पाण्डुरियं च ब्राह्मणी ३४७
"सत्त्वे निविशतेऽपैति पृथक् जातिषु दृश्यते।
आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः॥"

५०४। बह्वादिभ्यश्च। ४।१।४५

बह्वादीनां स्त्रियां वा ङीष् प्रत्ययश्च भवेदिह।
बहुः बह्वी पदं ज्ञेयमपि बहु पदं पुनः॥ २४८

कृतः प्राण्यङ्गात् (वा)

ङीप्प्रत्ययो विभाषा स्यात् प्राण्यङ्गं चेत् प्रतीयते।
धमनिर्धमनी तत्र पदद्वयं विभाषया॥ २४९

कृदिकारात् अक्तिनः (वा)

कृदिकारात् पुनर्वा ङीष् रात्रिः रात्री भवेत् तथा।
इकारान्तात् क्तिनो ङीष् न कृतिरेव कृती तु न॥ २५०

५०५। पुंयोगादाख्यायाम्। ४।१।४८

पुंयोगात्तु पुमाख्या या स्त्रियामपि च वर्त्तते।
प्रत्ययः स्यात् ततो ङीष् च गणकी स्यात् पदं तथा॥ २५१
सम्बन्धश्चेत् विवाहेन सूत्रमिदं प्रयुज्यते।
अन्यत्र न स्थितं सूत्रम् अन्यत्र गणका भवेत्॥ २५२

गोपालिकादिभ्यः प्रतिषेधः (वा)

गोपालिकादिके तावत् प्रतिषेधश्च वर्त्तते।
विवाहेनापि सम्बन्धे गोपालिका पदं भवेत्॥ २५३

सूर्य्याद्देवतायां चाब् वक्तव्यः (वा)

सूर्य्यस्य देवता स्त्री चेत् पदं सूर्य्या भवेदिह।
सूरी स्यात् देवता चेन्न कुन्ती सा स्त्री च मानवी॥ २५४

५०६। इन्द्र-वरुण-भव-शर्व्व-रुद्र-मृड-हिमारण्य—
यव-यवण-मातुल-आचार्य्याणाम् आनुक्। ४।१।४९

पुंयोगात्तु भवेदानुक् पूर्व्वसूत्राच्च ङीष् भवेत्।
ङीषपि च तथा चानुक् द्वयमिह पुनर्मतम्॥ २५५
इन्द्रस्य तु यदा स्त्री स्यात् इन्द्राणी स्यात् पदं तदा।
वरुणस्य यदा स्त्री स्यात् वरुणानी पदं भवेत्॥ २५६

हिमारण्ययो र्महत्त्वे (वा)

महद् हिमं हिमानी स्यात् आनुगिह च युज्यते।
अरण्यानी पदं ज्ञेयमरण्यं चेद् भवेन्महत्॥ २५७

यवाद्दोषे (वा)

दुष्टो यवो यवानी स्यात् आनुगिह च युज्यते।

यवनात् लिप्याम् (वा)

यवनानां लिपिर्यत्रः यवनानी पदं भवेत्॥ २५८

उपाध्याय-मातुलाभ्यां वा (वा)

पदमुपाध्यायानी स्यात् मातुलानी पदं तथा।
उपाध्यायी विभाषा स्यात् विभाषा स्याच्च मातुली॥ २५९

या तु स्वयमध्यापिका तत्र वा ङीष् वाच्यः (वा)

उपाध्याया पदं च स्याद् उपाध्याया भवेत्तथा।

आचार्य्यादणत्वं च (वा)

आचार्य्यानी पदं तत्र आचार्य्या स्यात् पदं पुनः॥ २६०

अर्य्यक्षत्रियाभ्यां वा (वा)

अर्य्यानि तु पदं ज्ञेयं क्षत्रियाणी पदं तथा।
पुंयोगं तु विना तत्र स्वार्थे विधिः प्रयुज्यते॥ २६१
पुंयोगे तु ङीषेव स्यात् अर्य्यी स्यात् क्षत्रियी तथा।

५०७। क्रीतात् करणपूर्व्वात्। ४।१।५०

क्रीतशब्दाददन्तात्तु करणादेः स्त्रियां च ङीष्॥ २६२
पदं स्याद् वसनक्रीती वस्त्रक्रीती पदं तथा।
भवेत् करणपूर्व्वाच्च नान्यत्र स्यात् तथा पुनः॥ २६३
सुक्रीती च पदं तत्र न पूर्व्वं करणं स्थितम्।
"सा हि तस्य धनक्रीती प्राणेभ्योऽपि गरीयसी।"
टाबन्तेन समासः स्यात् ङीपिह न प्रवर्त्तते॥ २६४

५०८। क्तादल्पाख्यायाम्। ४।१।५१

क्तान्तात् करणपूर्व्वात् स्यादल्पाख्यायां पुनश्च ङीष्।
उपाधिः समुदायस्य स्यादल्पाख्या सतां मते॥ २६५
भवेदभ्रविलिप्ती द्यौः यथाश्रुतं निदर्शनम्।
भवेत् सूपविलिप्ती च पात्रीति च पुनस्तथा॥ २६६
स्वल्पैर्मेघैरवलिप्तं नभ इति प्रतीयते।
स्वल्पैः सूपैर्विलिप्तं स्यात् तथा पात्रमिति स्थितिः। २६७
अल्पाख्या तु न चेत् तत्र न ङीष् भवेत् तदा पुनः।
सा चन्दनानुलिप्तेति बहुलं लेपनं मतम्॥ २६८

५०९। बहुव्रीहेश्चान्तोदात्तात्। ४।१।५२

अन्तोदात्तो बहुव्रीहिस्तस्माद् ङीष् प्रत्ययो भवेत्।
स्वाङ्गं पूर्व्वं पदं यस्मिन् बहुव्रीहिः स गृह्यते॥ २६९
शङ्खभिन्नी पदं तत्र केशलूनी पदं तथा।
उरुभिन्नी पदं तद्वत् भवेदिह निदर्शनम्॥ २७०
न चेत् तत्र बहुव्रीहिर्न ङीष् भवेदिति स्थितिः।
स्यात् पादपतिता तत्र बहुव्रीहिर्भवेन्न च॥ २७१

अन्तोदात्तात् जातिप्रतिषेधः (वा)

दन्तजाता पदं तत्र स्तनजाता पदं भवेत्।
आन्तोदात्तं पदं "जातं" तस्मात्तु ङीष् निषिध्यते॥ २७२

पाणिगृहीत्यादीनामर्थविशेषे (वा)

भवेत्तु पाणिगृहीती भार्य्यार्थे ङीष् प्रवर्त्तते।
भवेत्तु पाणिगृहीता कथञ्चित् करधारणे॥ २७३

अवहुनञ्सुकालसुखादिपूर्व्वादिति वक्तव्यम् (वा)

"वहु" यदा पदं पूर्व्वं "नञ्" यदि वा "सु" वा "कु" वा ।
"कालो" यदि पदं पूर्व्वं यदा पूर्व्वं सुखादिकम् ॥ २७४
ङीप्प्रत्ययस्तदा न स्यात् यथा परं निदर्शनम् ।
वहुकृता पदं च स्यात् अकृती स्यात् पदं पुनः ॥ २७५
सुकृता मूपजाता स्यात् मासजाता पदं तथा ।
दुःखजाता पदं तावत् भवेदिह निदर्शनम् ॥ २७६
१।११।७३

५१० । अस्वाङ्गपूर्व्वपदाद् वा । ४।१।५३

अन्तोदात्तो वहुव्रीहिः क्तान्तो भवेत् पुनर्यदि ।
ङीष् प्रत्ययो विभाषा स्यात् इति विधिर्भवेदिह ॥ २७७
शार्ङ्गजग्धी पदं तत्र शार्ङ्गजग्धा पदं पुनः ।
पलाण्डुभक्षिती तत्र पलाण्डुभक्षिता तथा ॥ २७८
स्वाङ्गं पूर्व्वं पदं यत्र विभाषा तु न वर्त्तते ।
तत्र नित्यं भवेत् ङीष् च शङ्खभिन्ना यथा भवेत् ॥ २७९
अन्तोदात्तं न चेत् तत्र न ङीष् तदा भवेदिह ।
वस्त्रछन्ना पदं तत्र नान्तोदात्तं न ङीष् ततः ॥ २८०

वहुलं संज्ञाछन्दसोरिति वक्तव्यम् (वा)

स्यात् प्रवृद्धविलूनी च यदा ङीष् तु प्रवर्त्तते ।
स्यात् प्रवृद्धविलूना च यदा ङीष् न भवेदिह ॥ २८१

५११ । स्वाङ्गात् चोपसर्ज्जनात् असंयोगोपधात् । ४।१।५४

यदुपसर्ज्जनं स्वाङ्गम् असंयोगोपधं भवेत् ।
स्यात् प्रातिपदिकात्तत्र तदन्ताद् ङीष् विभाषया ॥ २८२
चन्द्रमुखी पदं तत्र चन्द्रमुखा तथा भवेत् ।
अतिकेशी पदं तद्वत् अतिकेशा पदं तथा ॥ २८३
स्वाङ्गं यदा पदं पूर्व्वं तदा भवेत् न चान्यथा ।
वहुयवा न तु स्वाङ्गं न ङीषिह भवेत्ततः ॥ २८४
स्यादुपसर्ज्जनं यत्र तत्र विधिः प्रयुज्यते ।
अन्यत्र न भवेत् ङीष् च स्याद् अशिखा पदं तदा ॥ २८५
असंयोगोपधात् ङीष् स्यात् संयोगश्चेत् न ङीष् भवेत् ।
सुगुल्फा स्यात् सुपार्श्वा स्यात् संयोगश्च तथा न ङीष् ॥ २८६

अङ्गगात्रकण्ठेभ्य इति वक्तव्यम् (वा)

मृदङ्गी तु पदं तत्र मृदङ्गा तु पदं भवेत् ।
सुगात्री स्यात् सुगात्रा स्यात् विभाषया द्वयं भवेत् ॥ २८७

"अद्रवं मूर्त्तिमत् स्वाङ्गं प्राणिस्थमविकारजम् ।
अतस्थं तत्र दृष्टं चेत् तेन चेत् तत् तथायुतम् ॥"

५१२ । नासिका-उदर-ओष्ठ-जङ्घा-दन्त-कर्ण-शृङ्गाच्च । ४।१।५१

ङीषुपसर्ज्जनात् स्वाङ्गात् नासिकादेर्व्विभाषया ।
स्यात् तुङ्गनासिकी चात्र स्यात् तुङ्गनासिका पुनः ॥ २८८
तिलोदरी भवेत्तद्वत् तिलोदरा तथा भवेत् ।
विम्वोष्ठी स्यात् पदं तत्र विम्वोष्ठा स्यात् पदं पुनः ॥ २८९
दीर्घजङ्घी पदं ज्ञेयं दीर्घजङ्घा तथैव च ।
समदण्डी पदं तद्वत् समदण्डा तथा भवेत् ॥ २९०
चारुकर्णी पदं स्याच्च चारुकर्णा तथा पुनः ।
तीक्ष्नशृङ्गा पदं तद्वत् तीक्ष्नशृङ्गा भवेत्तथा ॥ २९१
संयोगे ङीष् न चाप्नोति वह्वचि ङीष् भवेन्न च ।
द्विधा तत्र प्रतिषेधे सूत्रमिदं प्रवर्त्तते ॥ २९२

पुच्छाच्चेति वक्तव्यम् (वा)

भवेत् कल्याणपुच्छी च पदमिह निदर्शनम् ।
भवेत् कल्याणपुच्छा च निदर्शनं तथा पुनः ॥ २९३

कवर-मणि-विष-शरेभ्यो नित्यम् (वा)

भवेत् कवरपुच्छी च मणिपुच्छी तथा भवेत् ।
विषपुच्छी भवेत्तद्वत् शरपुच्छी तथा पुनः ॥ २९४

उपमानात् पक्षाच्च पुच्छाच्च (वा)

उलुकपक्षी सेना स्यात् पुनरिह निदर्शनम् ।
उलुकपुच्छी शाला च भवेन्नदर्शनं पुनः ॥ २९५

५१३ । न क्रोड़ादिवह्वचः । ४।१।५६

"स्वाङ्गादि"ति स्थितं सूत्रं तेन ङीष् च विधिर्भवेत् ।
इह ङीष् प्रतिषिद्धः स्यात् सूत्रस्य च तदाशयः ॥ २९६
क्रीड़ाद्यन्तात् ङीष् स्याच्च वह्वजन्तात् तथा न ङीष् ।
भवेत् कल्याणक्रीड़ा च स्यात् कल्याणयुवा पुनः ॥ २९७

भवेत् कल्याणवाला च कल्याणोखा तथा भवेत् ।
स्यात् कल्याणशाला तद्वत् स्यात् कल्याणगुदा पुनः ॥ २९८
स्यात् कल्याणघोणा तत्र स्यात् कल्याणमुखा तथा ।
स्यादाकृतिगणश्चायं क्रोड़ादिः कथितो मया ॥ २९९

बह्वचोऽपि भवेत् टाप् च स्यात् पृथुजघना तथा ।
भवेत् महाललाटा च पुनस्तत्र पदं स्त्रियाम् ॥ ३००

५१४ । सह-नञ्-विद्यमानपूर्व्वाच्च । ४।१।५७

"स्वाङ्गादि"ति स्थितं सूत्रं "नासिके"ति स्थितं पुनः ।
ताभ्यान्तु ङीष् भवेत् प्राप्तः स इह च निषिध्यते ॥ ३०१
"सहे"ति चेत् स्थितं पूर्व्वं विद्यमानेति चेत् तथा ।
नञिति चेत् स्थितं पूर्व्वं स्त्रियां ङीष न भवेत्तथा ॥ ३०२
सकेशा स्यात् पदं तत्र स्यादकेशा पदं पुनः ।
स्याद् विद्यमानकेशा च सनासिका तथा भवेत् ॥ ५०३
विद्यमाननासिका स्यात् अनासिका तथैव च ।
सर्व्वत्र तु स्त्रियां टाप् स्यात् न पुनर्ङीष् प्रवर्त्तते ॥ ३०४

५१५ । नखमुखात् संज्ञायाम् । ४।१।५८

नखात् मुखात् न ङीष् तावत् यदा संज्ञा प्रतीयते ।
शूर्पणखा पदं तत्र गौरमुखा पदं तथा ॥ ३०५
ङीषेव स्यात् न चेत् संज्ञा चन्द्रमुखी यथा भवेत् ।
भवेत् ताम्रणखी कन्या पुनर्ङीषि निदर्शनम् ॥ ३०६

५१६ । दिक्पूर्व्वपदात् ङीप् । ४।१।६०

यदा दिक् स्यात् पदं पूर्व्वं ङीप्प्रत्ययः प्रयुज्यते ।
अपवादो भवेत् ङीषः विशेषस्तु स्वरे मतः ॥ ३०७
प्राङ्मुखी स्यात् पदं तत्र प्राङ्मुखा स्यात् पदं तथा ।
प्राङ्नासिकी पदं ज्ञेया प्राङ्नासिका तथैव च ॥ ३०८

५१७ । वाहः । ४।१।६१

वहेः क्विन्-प्रत्ययान्तस्य निर्द्देशस्तु भवेदिह ।
वाहन्तात् तु पदात् तत्र ङीष्प्रत्ययो भवेत् स्त्रियाम् ॥ ३०९
दित्यौही च पदं तत्र प्रष्ठौही च पदं भवेत् ।
पदद्वयं धृतं तत्र काशिकायां निदर्शनम् ॥ ३१०

५१८। सख्यशिश्वीति भाषायाम्। ४।१।६२

सखीशब्दश्च ङीषन्तो भाषायां स्यान्निपातनात्।
अशिश्वी तु भवेत् शब्दः भाषायां ङीष् निपात्यते ॥ ३११
सखीयं ब्राह्मणी मे सा भवेदिह निदर्शनम्।
अशिश्वी तु भवेत् सैव नास्ति यस्याः शिशुः पुनः॥ ३१२
भाषायां ङीष् भवेत्तावत् अन्यत्र ङीष् न वर्त्तते।
"सखा सप्तपदी भव" न ङीषिह च छन्दसि ॥ ३१३

५१९। जातेरस्त्रीविषयादयोपधात्। ४।१।६३

जातिवाची भवेच् शब्दो न नियतः स्त्रियां खलु।
अयकारोपधः शब्दः स्यादस्त्रीविषयो यदा ॥ ३१४
तथाविधात् तदा शब्दान् ङीष् प्रत्ययः स्त्रियां भवेत्।
कुक्कुटी सूकरी तत्र ब्राह्मणी वृषली पुनः ॥ ३१५
जातिवाची न चेत् शब्दो न तदा ङीष् भवेदिह।
मुण्डा भवेत् पदं तत्र न जातिर्न स्त्रियां च ङीष्॥ ३१६
यत्र स्त्री विषयस्तत्र न तावत् ङीष् प्रवर्त्तते।
मक्षिका स्यात् पदं तत्र विषयः स्त्री ततो न ङीष्॥ ३१७
उपधा चेद् यकारः स्यात् न तदा ङीष् भवेदिह।
क्षत्रिया स्यात् पदं तत्र "य" उपधा ततो न ङीष्॥ ३१८

योपधप्रतिषेधे हय-गवय-मुकय-मत्स्य-मनुष्याणाम् अप्रतिषेधः (वा)

हये च मुकये मत्स्ये मनुष्ये गवये पुनः।
सर्व्वत्रैव भवेन् ङीष् च तथा पदं भवेत् स्त्रियाम् ॥ ३२०
"आकृतिग्रहणा जाति र्लिङ्गानां च न सर्व्वभाक्।
सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह ॥"

५२०। पाक-कर्ण-पर्ण-पुष्प-फल-मूल-वालोत्तरपदाच्च। ४।१।६४

पाकात् कर्णात् तथा पर्णात् तथा पुष्पात् फलात् तथा।
मूलात् वालात् स्त्रियां ङीष् स्यात् उत्तराच्च पदादिह ॥ ३२१
पदम् ओदनपाकी स्यात् शङ्कुकर्णी भवेत्तथा।
शालपर्णी भवेत्तद्वत् शङ्खपुष्पी तथा भवेत् ॥ ३२२
दासीफली भवेत्तद्वत् दर्भमूली तथा पुनः।
गोवाली च पदं तद्वत् पुनरिह निदर्शनम् ॥ ३२३

पुष्पात् फलात् तथा मूलात् नेष्यते ङीष् यतः पुनः ।
अजादिषु हि दृष्टं तत् गणे पाठात् निराकृतम् ॥ ३२४

५२१ । इतो मनुष्यजातेः । ४।१।६५

इकारान्तात् पुनः शब्दात् ङीषिह स्यात् नरे पुनः ।
अवन्ती च तथा कुन्ती दाक्षी प्लाक्षी निदर्शनम् ॥ ३२५
इकारान्ताद् भवेत् तद्वत् अन्यत्र न तथा भवेत् ।
विट्शब्दः न चेकारान्त इकारान्तो दरत् न च ॥ ३२६
नरजातौ भवेत्तद्वत् अन्यत्र न तथा भवेत् ।
तित्तिरिश्च भवेदत्र पक्षीजातिर्नरस्तु न ॥ ३२७
"जाते"रिति स्थितं पूर्व्वं कथं "जातिः" पुनर्धृता ।
योपधात् च यथा हि स्यात् औदमेयी पदं भवेत् ॥ ३२८

इञ उपसंख्यानमजात्यर्थम् (वा)

इञश्च तद्धितान्तस्य क्षेत्रे विधिः प्रयुज्यते ।
न भवेच्च यदा जातिस्तदापि ङीष् भवेदिह ॥ ३२९
सौतङ्गमी पदं तत्र मौनचित्ती पदं पुनः ।
इञ् चातुरर्थिके ज्ञेयो न तु जातिर्भवेदिह ॥ ३३०

५२२ । ऊङुतः । ४।१।६६

स्त्रियामूङ् स्यात् उकारान्तात् मनुष्यजातिवाचिनः ।
कुरूश्च ब्रह्मबन्धूश्च भवेदिह निदर्शनम् ॥ ३३१

अप्राणिजातेश्चारज्ज्वादीनामिति वक्तव्यम् (वा)

भवेदप्राणिजातेश्च रज्ज्वादीनां तथा च न ।
कर्कन्धूः स्यादलाबूः स्यात् पदमिह निदर्शनम् ॥ ३३२
प्राणिजातेस्तथा न स्यात् न तावदूङ् भवेदिह ।
कृकवाकुः पदं तत्र प्राणीति न न तावदूङ् ॥ ३३३
रज्ज्वादीनां तथा न स्याद् न तावदूङ् भवेदिह ।
रज्जुः हनुः पदं तत्र रज्ज्वादिः स्यात् न तावदूङ् ॥ ३३४

५२३ । बाह्वन्तात् संज्ञायाम् । ४।१।६७

परे बाहु पदं यत्र तत्र स्यादूङ् च नामनि ।
भद्रबाहूः पदं स्याच्च जालबाहूस्तथा भवेत् ॥ ३३५

न यदा तु भवेत् संज्ञा न तावदूङ् भवेत् तदा ।
वृत्तबाहुः पदं तत्र संज्ञा नेति न तावदूङ् ॥ ३३६

५२४। पङ्गोश्च। ४।१।६८

पङ्गु शब्दात् स्त्रियां तत्र पुनरूङ् स्यादिति स्थितिः ।
पङ्गूरिति पदं तत्र स्त्रियामूङि निदर्शनम ॥ ३३७

श्वशुरस्योकारलोपश्च वक्तव्यः (वा)

श्वश्रूरिति पदं तत्र स्त्रियामूङि निदर्शनम् ।
उकारो लुप्यते तावदकारोऽपि च लुप्यते ॥ ३३८

५२५। ऊरूत्तरपदादौपम्ये। ४।१।६९

औपम्ये गम्यमाने स्यादूरूत्तरपदात् पुनः ।
पदं स्यान्नागनासोरूः करभोरूः पदं तथा ॥ ३३९
औपम्ये हि भवेदूङ् च न चान्यत्र तथा भवेत् ।
वृत्तोरुः स्त्री भवेत्तत्र न चौपम्यं न तावदूङ् ॥ ३४०

५२६। संहित-शफ-लक्ष्मण-वामादेश्च। ४।१।७०

ऊरूत्तरपदात्तत्र पुनरूङ् स्यात् स्त्रियामिह ।
संहितोरूः पदं तत्र शफोरूश्च पदं भवेत् ॥ ३४१
लक्ष्मणोरूर्भवेत्तद्वत् वामोरूः स्यात् तथैव च ।

सहितसहाभ्यां चेति वक्तव्यम् (वा)

सहितोरूः पदं ज्ञेयं सहोरूश्च पदं तथा ॥ ३४२

५२७। संज्ञायाम्। ४।१।७२

कद्रुकाद्य स्त्रियामूङ् स्यात् स्त्रियामूङ् स्यात् कमण्डलोः ।
प्रतीयते यदा संज्ञा यथा कद्रूः कमण्डलूः ॥ ३४३

५२८। शार्ङ्गरवात् यञो ङीन्। ४।१।७३

भवेत् शार्ङ्गरवादेर्ङीन् अञन्तेभ्यः स एव च ।
शार्ङ्गरवी पदं तत्र बैदी पदं तथा भवेत् ॥ ३४४

नृनरयोर्वृद्धिश्च (वा)

नृनरयोः भवेद् वृद्धिः स्त्रियां नारी तथा भवेत् ।

भोगवद्-गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वार्थम् (वा)

शार्ङ्गरवादिके तौ द्वौ नित्यं ह्रस्वो यथा भवेत् ॥ ३४५

५२९। यङश्चाप्। ४।१।७४

यङन्तान्तु स्त्रियां चाप् स्यात् अ्यङ् ष्यङ् यङा धृतं भवेत्।
आम्बष्ठ्या स्याच्च कौशल्या सौवीर्य्या स्यात् तथा पुनः॥ ३४६
ष्यङि कारीषगन्ध्या च वाराह्या च भवेदिह।

षाच्च यञः (वा)

षात् परे यञ् तदन्ताच्च पौतिमाष्या निदर्शनम्॥ ३४७

५३०। आवट्याच्च। ४।१।७५

गर्गादिरवटस्तावत् यञि ङीप् स्यादिति स्थितिः।
तथाप्राप्ते पुनः सूत्रं यथा चाप् च भवेदिह॥ ३४८
आवट्या च पदं तत्र स्त्रियां चापि भवेत् पुनः।
प्राचां ष्फः स्यात् तथा सति स्यादावट्यायनी पदम्॥ ३४६

५३१। तद्धिताः। ४।१।७६

अधिकारे भवेत् सूत्रम् आरभ्यते च तद्धितः।
अध्यायः पञ्चमो यावत् न समाप्तः स्थितो हि सः॥ ३५०

५३२। यूनस्तिः। ४।१।७७

युवन्शब्दात् स्त्रियां तावत् तिः प्रत्ययो भवेदिह।
तद्धितः स भवेत्तावत् युवतिः स्यात् पदं तथा॥ ३५१

१२।११।७३ इति स्त्रीप्रत्ययप्रकरणम्। तत्र श्लोकाः—३५१।

संशोधनम्—श्लोकः ६७ द्रष्टव्यः।
तत्र पूर्णः श्लोकः—

बर्त्तका शकुनौ तावत् प्राचां मते भवेदिह।
उदीचां वर्त्तिका तावत् शकुनिरेव गृह्यते॥

अथ कारकप्रकरणम्

[कारककारिका चेति पूर्व्वं ग्रन्थः प्रकाशितः।
तत्र ये ये स्थिताः श्लोका इह ते ते धृताः पुनः॥ १
कारककारिका चेति यदा ग्रन्थः प्रकाशितः।
मुखबन्धे तदा पद्यं "प्रसङ्गतः" इति स्थितम्॥ २
इहापि च पुनर्दत्तं पद्यं च तद् यथायथम्।
भग्नी खुकी गता लोकात् तस्यास्तत् स्मृतिचारणम्॥ ३
ग्रन्थस्य चेत् प्रकाशः स्यात् काले क्वचिद् भविष्यति।
"प्रसङ्गतः" सदा योज्यं न हि त्याज्यं कथञ्चन॥ ४
१६।१२।१६७५ श्रीहरिपददत्तः]

प्रथमा विभक्तिः

५३३। प्रातिपदिकार्थलिङ्गपरिमाण-
वचनमात्रे प्रथमा। २।३।४६

स्यात् प्रातिपदिकं सत्ता तदर्थे प्रथमा भवेत्।
कृष्णः श्रीश्च तथा ज्ञानमुच्चैर्नीचैरुदाहृतिः॥ १
लिङ्गे च नियते ज्ञेयमाद्यं त्रिकं निदर्शनम्।
अन्त्यं द्विकमलिङ्गे स्यान्निदर्शनं ततः पुनः॥ २
कृष्णः पुंसि स्त्रियां श्रीश्च ज्ञानं नित्यं नपुंसके।
लिङ्गश्च नियतं तेषां व्यतिक्रमो न दृश्यते॥ ३
उच्चैर्नीचै निपाते स्तो न लिङ्गं दृश्यते तयोः।
अलिङ्गं नियतलिङ्गं द्वयं मया प्रदर्शितम्॥ ४
तटस्तटी तटं स्याच्च लिङ्गमात्रे निदर्शनम्।
अधिकं गम्यते लिङ्ग तटे वृत्तिं विहाय च॥ ५
'द्रोणो व्रीहि'रित्यत्र स्यात् परिमाणं विवक्षितम्।
'द्रोणा'त् परं 'सु'ना बोध्यं परिमाणं निदर्शने॥ ६
इह तु प्रकृतौ द्रोणे प्रत्ययार्थौ विशेषणम्।
अभेदस्तत्र संसर्गस्तेन व्रीहिर्विशिष्यते॥ ७
'अनभिहित' इत्येवमधिकारः प्रवर्त्तते।
अभिहिते ततः कार्य्यं न प्राप्नोति कथञ्चन॥ ८
एको द्वौ वहवश्चात्र सर्व्वमभिहितं भवेत्।
तत् कथं प्रथमा तत्र पृच्छेयं स्यात् सुदुस्तरा॥ ९
'वचनं' च घृतं सूत्रे ततश्च मुनिना खलु।
प्रथमा वचने ज्ञेया समाधानं तथा भवेत्॥ १०

प्रसङ्गतः

ज्येष्ठे मया कृतो ग्रन्थो भग्नी खुकी तदावदत्।
किमिदं लिखसि भ्रातः पुस्तकं किं भविष्यति॥
अद्य भाद्रे स मे ग्रन्थो याति लोके प्रकाशताम्।
भग्नी खुकी गता लोकाद् * दूराद् भग्नी प्रसीदतु॥

---

* खुकी—नामान्तरं प्रतिभा—मृत्युः आषाढ़ः २८, १८९५ (शकाब्दः)

५३४। सम्बोधने च। २।३।४७

'प्रातिपदिक'—सूत्रे तु सम्बोधनं न लक्षितम्।
तत् कथं प्रथमा सिध्येत् सम्बोधन इति स्थितिः॥ ११
अधिको विद्यते चार्थः सम्बोधने सतां मते।
तदर्थं च पुनः सूत्रमिह प्रकुरुते मुनिः॥ १२

हृदयं मे स्थितं शून्यं न कर्मणि मनो मम।
जीवामि मृतवल् लोके स्थातव्यं स्थीयते ततः॥
इहायाति कथं जीवः कथं जीवश्च गच्छति।
केयं लीला कथं लीला कस्य वैतत् प्रयोजनम्॥

कैशोरे मे मृता माता न जानामि हि मातरम्।
गतः पिता ततः पश्चात् न मे तदा वयो बहु॥
अद्य तु वयसि प्राप्ते पश्यामि मरणं गृहे।
कथं जन्म कथं मृत्युः किमिदं जीवनं भुवि॥

तथापि क्रियते कर्म न जानामि कथं पुनः।
नश्येत् सर्व्वं पुनः काले गच्छेत् सर्व्वं गतौ मम॥
कारिका या कृता सापि काले गच्छेदसंशयम्।
अकाले तथापि तस्या नाशमहं न कामये॥

ततः प्रकाशितो ग्रन्थश्चरतु स महीतले।
रुचिर्यस्य स गृह्णातु न यस्य स जहातु च॥
गृहीता वाक् मया लोकात् पुनर्लोकं प्रयातु सा।
गृहीता तु मया दत्ता मुक्तो दायादपैमि च॥

इतस्ततः स्फुटं पुष्पं कवेः काव्यं च मालिका।
चिनोति स रुचिर्यस्य तनोति स क्षमो हि यः॥
शुष्यति च दिनान् माला सूत्रं श्लथं भवेत् क्रमात्।
अन्ते शून्यं स्थितं तस्याः कविर्मूढः पलायते॥

शनिवारः, सन्ध्या (दं ३१)
भाद्रः २२,
१८९५ (शकाब्दः)

श्रीहरिपददत्तः
रामपुरहाटः
वीरभूमः

द्वितीया बिभक्तिः

५३५। कारके। १।३।२३

अधिकारे भवेत् सूत्रं 'कारके' च विशेषतः।
इतः परं यदुक्तं स्यात् तत् कारके भवेदिह ॥ १३

५३६। कर्त्तुरीप्सिततमं कर्म। १।४।४९

यत् कर्त्तुः क्रियया प्राप्तुमिष्टतमं पुनर्मतम्।
तत् कारकं भवेत् कर्म करोति स कटं यथा ॥ १४
माषेष्वश्वं स बध्नाति माषस्य स्यान्न कर्मता।
कर्मणा इप्सिता माषा न तु कर्त्तुरिति स्थितिः ॥ १५
स पयसौदनं भुङ्क्ते पयसोऽपि न कर्मता।
ईप्सितं स्यात् पयो नूनं न तदिष्टतमं खलु ॥ १६
'आधार'श्च तथा 'कर्म' द्वयमेवानुवर्त्तते।
आधारः स्यात्तदा कर्म यदेप्सिततमं भवेत् ॥ १७
गेहं प्रविशतीत्यादौ कर्म भवेत् तथा सति।
ओदनं पचतीत्यादौ न स्यात् कर्म यथोचितम् ॥ १८
इयं दशा यथा न स्यात् तथा मुनिर्विचेष्टते।
स्मृत्वा 'कर्म' पुनः सूत्रे वारयत्यनुवर्त्तनम् ॥ १९
अतीनेन न सम्बन्धो भिन्नं वस्तु प्रवर्त्तते।
इष्टतमं भवेत् कर्म क्रियया क्षिप्यते यदि ॥ २०

५३७। अनभिहिते। २।३।१

स्या'दनभिहिते' सूत्रमधिकारे विवक्षितम्।
इतः परं सर्व्वत्र स्यादधिकारः प्रतिष्ठितः ॥ २१
उक्तं न चेत् समासेन तद्धितेन तिङा कृता।
तदा तत्र बिभक्तिः स्यादधिकारो भवेदयम् ॥ २२

५३८। कर्मणि द्वितीया। २।३।२

स्यात् कर्मणि द्वितीयेति मुनिना सूत्रितं पुनः।
करोति स कटं तत्र द्वितीयायां निदर्शनम् ॥ २३

वार्त्तिकम्

"उभसर्व्वतसोः कार्य्या धिगुपर्य्यादिषु त्रिषु ।
द्वितीयाऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते ॥" २४
निदर्शनं भवेदत्र ग्राममुभयतो यथा ।
ग्रामं च सर्व्वतः स्याच्च निदर्शनं तथा पुनः ॥ २५
धिक् पापिनं भवेदत्र निदर्शनं तथापरम् ।
सर्वत्रैवं द्वितीया स्यादूहनीयं यथायथम् ॥ २६
अभितः परितः समया निकषा हाप्रतियोगेषु च दृश्यते (वा) ।
स्याद्ग्रामं परितस्तत्र निकषा समया तथा ।
अभितश्च द्वितीयायां सर्व्वत्रैवं स्थितं खलु ॥ २७

५३९ । तथायुक्तं चानीप्सितम् । १।४।५०

यथेप्सिततमं वस्तु क्रियया चावगाह्यते ।
तथैव क्रियया यत्र युज्यते सदनीप्सितम् ॥ २८
अनीप्सिते च तत्रापि भवेत् कर्म हि कारकम् ।
अन्नं खादन् विषं भुङ्क्ते भवेदिह निदर्शनम् ॥ २९

५४० । अकथितञ्च । १।४।५१

अपादानादिभिर्यत् स्यादकथितं विशेषतः ।
तदपि च भवेत् कर्म गौणं कर्म तदुच्यते ॥ ३०
द्वादशानां दुहादीनां कर्मणा यत् प्रयुज्यते ।
तत् स्यादकथितं कर्म गौणं कर्म भवेच्च तत् ॥ ३१
दोग्धिश्च याचतेस्तद्वद् दण्डयतिस्तथैव च ।
पचतिश्च रुणद्धिश्च चिनोतिः पृच्छतिस्तथा ॥ ३२
मथ्नातिमुष्णातिब्रूतेः शास्तिश्च जयतिस्तथा ।
द्वादशानां दुहादीनां समुद्देशः कृतो मया ॥ ३३
यस्यचित् कस्यचिदेषां कर्मणा यद् युतं भवेत् ।
अकथितं भवेच्च तत् तच्च कर्म्म प्रकीर्त्तितम् ॥ ३४
दण्डयति शतं गर्गान् व्रजमवरुणद्धि गाम् ।
बालं पृच्छति पन्थानं दोग्धि गाश्च पयो नरः ॥ ३५
वृक्षं चिनोति पुष्पाणि याचते वसुधां बलिम् ।
ब्रूते धर्मं गुरुः शिष्यं शास्ति धर्मं तथा भवेत् ॥ ३६

मुष्णाति च शतं चैत्रं मथ्नाति सागरं सुधाम् ।
पचति तण्डुलानन्नं जयति च शतं हरिम् ॥ ३७
नयतिर्हरतिस्तद्वत् कर्षतिर्वहतिः पुनः ।
चत्वारस्ते समाख्याताः कथयामि निदर्शनम् ॥ ३८
नयति गां गृहं गोपो भारं वहति वाहकः ।
ग्राममजां हरत्येषा कर्षति युवतिं गृहम् ॥ ३९

अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम् (वा) ।

अकर्मकेभवेत् कर्म देशः कालः पथः क्रिया ।
क्रियया लक्षितः कालः परिमाणं पथेन च ॥ ४०
कुरून् स्वपिति सा बाला क्रोशमास्ते मुनिर्वने ।
प्रार्थी गोदोहमास्ते स क्रोशमास्ते स आतुरः ॥ ४१

५४१ । गति बुद्धि-प्रत्यवसानार्थ-शब्दकर्माकर्मकानाम-णिकर्त्ता स णौ । १।४।५२

गतौ बुद्धौ स्थितो धातुर्भोजने शब्दने स्थितः ।
स्थितश्चाकर्मको धातुर्व्वाच्यान्तरं पुनः स्थितम् ॥ ४२
अणिजन्तदशायां य आसीत् कर्त्ता प्रयोगतः ।
स णिजन्तदशायां स्यात् कर्मेति कारकं पुनः ॥ ४३
"शत्रूनगमयत् स्वर्गं वेदार्थं स्वानवेदयत् ।
आशयच्चामृतं देवान् वेदमध्यापयद्विधिम् ॥
आसयत् सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः ।"
प्रदर्शितमिदं पूर्व्वं मया पुनः प्रदर्श्यते ॥

नीवह्योर्न (वा)

नीवह्योः कर्मता न स्यादिति तु वार्त्तिकं पुनः ।
नाययति स भृत्येन भारमिति भवेदिह ॥ ४४

नियन्तृकर्त्तृकस्य वहेरनिषेधः (वा)

नियन्तृकर्त्तृकं यत्र वहनं सम्मतं भवेत् ।
निषेधस्तत्र न ग्राह्यस्तस्य निदर्शनं शृणु ॥ ४५
वाहा रथं वहन्तीति णिचः पूर्व्वं प्रदर्शितम् ।
वाहयति सुतो वाहान् रथमिति च कर्मता ॥ ४६

भक्षेरहिंसार्थस्य न (वा)।

न हिंसा चेत् न कर्म स्यान् निदर्शनं ततो भवेत् ।
भक्षयति भिषग् भक्तं वटुनेति न कर्मता ॥ ४७
न निषिद्धं पुनः कर्म यदि हिंसा प्रतीयते ।
भक्षयति बलीवर्द्दान् शस्यं क्षेत्र इति स्थितिः ॥ ४८

जल्पतिप्रभृतीनामुपसंख्यानम् (वा)।

जल्पतिप्रभृतीनाञ्च वक्तव्या चात्र कर्मता ।
जल्पयति पिता पुत्रं धर्ममिति निदर्शनम् ॥ ४९

दृशेर्व्वा (वा)।

पुनर्दृशेः प्रयोगे स्यात् कर्त्तुरिह च कर्मता ।
दर्शयति हरिर्भक्तान् भवेदिह निदर्शनम् ॥ ५०
वुद्धिस्तु ज्ञानसामान्यं तथा सूत्रात् प्रतीयते ।
विशेषे कर्मता नास्ति स्मारयति तया यथा ॥ ५१

शब्दायनेन (वा)

शब्दायतेः प्रयोगे न कर्मता सम्मता पुनः ।
शब्दाययति रामेन करणं स्याद् यथोचितम् ॥ ५२
धातौ हि निहितं कर्म ततो धातुरकर्मकः ।
अकर्मक इति प्राप्ता सूत्रेणेह च कर्मता ॥ ५३
वार्त्तिकं क्रियते तत्र कर्मता न भवेदिति ।
अन्यथा तु यथासूत्रं कर्मैव सुलभं भवेत् ॥ ५४

५४२ । हृक्रोरन्यतरस्याम् । १।४।५३

हृक्रोरणौ स्थितः कर्त्ता णौ वा कर्म पुनर्मतम् ।
भृत्येन वा तथा भृत्यं हारयति कटं हरिः ॥ ५५

अभिवादि-दृशोरात्मनेपदाद् वा (वा)

अभिवादि-दृशोः कर्म यदि स्यादात्मनेपदम् ।
भक्तेन वा तथा भक्तं दर्शयते देवं गुरुः ॥ ५६

५४३ । अधि-शीङ्-स्थासां कर्म । १।४।४६

शीङ्-स्थासामधिपूर्व्वात् स्यात् प्रयोगो वाक्यतो यदि ।
आधारः स्यात्तदा कर्म निदर्शनं यथाग्रतः ॥ ५७

अधिशेते हरिः शय्यां भवेदिह निदर्शनम् ।
अधितिष्ठति तद्वत् स्यादध्यास्ते च तथा पुनः ॥ ५८

५४४ । अभिनिविशश्च । १।४।४७

"अभि"-"नी" ति द्वयं यत्र विशतेः पूर्व्वतो भवेत् ।
आधारे विशतेस्तत्र कर्म भवति कारकम् ॥ ५९
अभिनिविशते ग्रामं दर्शितं काशिकाकृता ।
आधारः स्यादिह ग्राम आधारे कर्मता मता ॥ ६०
कल्पाखोऽभिनिवेश इति कथं प्रयुज्यते ।
मण्डूकप्लुतिरित्यत्र न्यायः कश्चित् प्रवर्त्तते ॥ ६१
तेन "वान्यतरस्यां" स्यादिहापि विधृतं खलु ।
व्यवस्थितविभाषा च तत आश्रीयते पुनः ॥ ६२

५४५ । उपान्वध्याङ्वसः । १।४।४८

उपान्वध्याङ्वसस्तद्वदाधारस्य च कर्मता ।
स उपवसति ग्रामं भवेदिह निदर्शनम् ॥ ६३

अभुक्त्यर्थस्य न (वा)

अनशनं यदार्थः स्यान् न तदा स्यात्तथा पुनः ।
स उपवसति ग्रामे विनाहारं स तिष्ठति ॥ ६४

५४६ । अन्तरान्तरेण युक्ते । २।३।४

अन्तरेन तथान्तरा यदा तत्र प्रयुज्यते ।
तदा मता द्वितीया च निदर्शनं प्रदीयते ॥ ६५
अन्तरा त्वां च मां च स्यात् कमण्डलुरिति स्थितिः ।
ऊहनीयं पुनः शास्त्रान्निदर्शनं तथा परम् ॥ ६६

५४७ । कर्मप्रवचनीयः । १।४।८३

स्थिते वदति तदर्थं वदति न स्थितेऽपि यः ।
कर्मप्रवचनीयः स यथानुः स्याद् यथा परिः ॥ ६७
जपमनु निशम्येति शमिक्रिया स्थिता खलु ।
निशमनं तदर्थः स्यात्तमनुद्योतते पुनः ॥ ६८
"जपमनु" केवलं चेन् न "निशम्य" स्थितं यदा ।
तथापि च तमेवार्थमनुः प्राह यथायथम् ॥ ६९

क्रिया प्राप्ता क्रिया लुप्ता स्थितस्त्वर्थो यथा स्थितः ।
न म्रियते मृते चान्ये स्थाणुरनुर्व्विराजते ॥ ७०
स कर्म प्रोक्तवानादौ स कर्म प्रोक्तवान् परम् ।
कर्मप्रवचनीयः सः स्वार्थे संज्ञा प्रतिष्ठिता ॥ ७१
कर्मप्रवचनीयोऽयं तत् स्वरूपं प्रदर्शितम् ।
अन्यद् यत् स्वरूपं तस्य हरिणा तद् विशेषितम् ॥ ७२
"क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः ।
नापि क्रियान्तराक्षेपी सम्बन्धस्य तु भेदकः ॥"
"क्रियाया द्योतको नायं" यथानुभूयते सुखम् ।
"सम्बन्धस्य न वाचकः" कथितं तद् द्वितीयया ॥ ७३
"नापि क्रियान्तराक्षेपी" विपरिलिखतीति वत् ।
"सम्बन्धस्य तु भेदकः" हेतुभावः स्थितो यतः ॥ ७४

५४८ । अनुर्लक्षणे । १।८।८४

अनुश्च लक्षणे द्योत्ये तत्संज्ञको भवेदिह ।
अगस्त्यमन्वसिञ्चन् स्याद् हेतुभावे निदर्शनम् ॥ ७५
"लक्षणे"ति परे सूत्रं तेनानुश्च तथा भवेत् ।
तत् कथं सूत्रितं पूर्व्वं किमुद्दिश्य च सूत्रितम् ॥ ७६
"हेतौ" इति भवेत् सूत्रं तच्च परं प्रवर्त्तते ।
पूर्व्वात् परं बलीयः स्यात् "हेता"विति तदा लगेत् ॥ ७७
तृतीया न यथा हेतौ तथा सूत्रं विधीयते ।
कर्मप्रवचनीयः स्यात् सूत्रेणानुर्व्विशेषतः ॥ ७८

५४९ । कर्मप्रवचनीययुक्ते द्वितीया । २।३।८

कर्मप्रवचनीयैः स्याद् द्वितीयेति मतं पुनः ।
अगस्त्यमन्वसिञ्चन् स्यात् पुनरत्र निदर्शनम् ॥ ७९

५५० । तृतीयार्थे । १।४।८५

तृतीयार्थे तथा चानुस्तत्संज्ञको भवेत् पुनः ।
स्यादन्ववसिता सेना नदीमिति निदर्शनम् ॥ ८०

५५१ । हीने । १।४।८६

हीने द्योत्ये तथा चानुः पूर्व्ववत् लभते गतिम् ।
अनु हरिं सुरास्तत्र प्रदर्शितं निदर्शनम् ॥ ८१

५५२। उपोऽधिके च। १।४।८७

अधिके च तथा हीने भवेदुपश्चथैव च।
दर्शितमुपखार्य्यां च द्रोण इति निदर्शनम् ॥ ८२

५५३। लक्षणमित्थंभूताख्यानभागवीप्सासु प्रतिपर्य्यनवः। १।४।९०

लक्षणो विषयो यत्र प्रतिपर्य्यनवस्तथा।
विद्योतते नरं प्रति विद्युदिति निदर्शनम् ॥ ८३
इत्थम्भूतप्रकारश्चेत् प्रतिपर्य्यनवस्तथा।
भक्तो विष्णुं प्रतीति स्यात् पुनरिह निदर्शनम् ॥ ८४
भागेऽपि च तथैव स्यात् प्रतिपर्य्यनवो यदि।
लक्ष्मीर्हरिं प्रतीति स्याद् हरेर्भागो भवेद् यदा ॥ ८५
वीप्सायामपि तद्वत् स्याद् वृक्षं वृक्षं प्रतीति च।
निदर्शनं यथायोग्यं शेषाणां कल्पयेत् सुधीः ॥ ८६

५५४। अभिरभागे। १।४।९१

भागवर्ज्जं पुनः शेषे भवेदभिस्तथैव च।
भक्तो हरिमभीति स्यात् पुनरिह निदर्शनम् ॥ ८७
यदि भागो न तथा स्यान् न हि संज्ञा तथा भवेत्।
मामभि स्याद् यथा किञ्चित् तद्दीयतां यथा भवेत् ॥ ८८

५५५। अधिपरी अनर्थकौ। १।४।९३

अधिपरी तथाभूतौ न चेदर्थान्तरं पुनः।
अध्यागच्छति कस्मात् स्यादधिरनर्थको मतः ॥ ८९
गतिसंज्ञा न यथा स्यात् तथा सूत्रं प्रयोजनम्।
गतिर्नति निघातो न स्वरे भेदो निराकृतः ॥ ९०

५५६। सुः पूजायाम्। १।४।९५

सुः पूजायां तथैव स्यात् सु सिक्तं स्यात् पुनर्यथा।
क्षेपे न स्यात्तथाभावः सुषिक्तं किं तवात्र च ॥ ९१
उपसर्गं भवेत् षत्वं न चेत्तथा न चेत्तथा।
न षत्वमुपसर्गो न परे षत्वं तथा परे ॥ ९२

५५७। अतिरतिक्रमणे च। १।५।९५

तथैवातिश्च पूजायां तथातिक्रमणे पुनः।
अतिदेवानयं कृष्णः स्यादतिक्रमणे तथा ॥ ९३

५५८। अपिः पदार्थसम्भावनान्ववसर्गगर्हा—
समुच्चयेषु। १।४।९६

अर्थे पदस्य गम्यस्य तथा सम्भावने पुनः।
तथैवान्ववसर्गे च गर्हायाञ्च समुच्चये॥ ९४
कर्मप्रवचनीयः स्यादपिरिति मतं मुनेः।
निदर्शनं यथायोग्यं तत्र मया प्रदीयते॥ ९५
पदार्थे सर्पिषोऽपि स्यात् स्मृतमिह निदर्शनम्।
अपिश्च द्योतते विन्दुंस्ततस्तत्संज्ञको भवेत्॥ ९६
वचनं "सर्पिषोऽपि स्यात्" संलापे वर्त्तते पुनः।
"अस्ति सर्पि"रिति प्रोक्ते "नास्ति सर्पि"र्वचो भवेत्॥ ९७
तत्रैव "सर्पिषोऽपि स्यात्" वचनं क्रियते पुनः।
तत्र संप्रत्ययो वक्तुर्विन्दुरपि स्थितो भवेत्॥ ९८
इह सम्भावनायां लिङ् दर्शिता कौमुदीकृता।
तस्याः सम्भावनायाश्च भवनं विषयो भवेत्॥ ९९
प्रथमं कर्त्तृदौर्लभ्यं दौर्लभ्यं भवने ततः।
द्योतयति यथापिः सस्तथाहं कथयामि ते॥ १००
अपिना द्योतितो विन्दुर्विन्दुना स्वल्पता भवेत्।
स्वल्पतया च दौर्लभ्यं दौर्लभ्यमपिना ततः॥ १०१
कर्त्ता "विन्दुः" क्रिया च "स्यात्" स्यादिति भवनं पुनः।
कर्त्ता चेद् दुर्लभस्तत्र भवनं स्यात् सुदुर्लभम्॥ १०२
तस्याः सम्भावनायाश्च विषये भवने ततः।
कर्त्तृदौर्लभ्यमादाय दौर्लभ्यं स ददात्यपिः॥ १०३

५५९। कालाध्वनोरत्यन्तसंयोगे। २।३।५

द्वितीयात्यन्तसंयोगे कालाध्वनोरिति स्थितिः।
संवत्सरमधीते स्यात् क्रोशं गिरिस्तथा पुनः॥ १०४

तृतीया विभक्तिः

५६०। स्वतन्त्रः कर्त्ता। १।४।५४

क्रियासिद्धौ प्रधानो यो यो वा तथा प्रदर्शितः।
स कर्त्ता कीर्त्तितः शास्त्रे मुख्यो गौणो भवेच्च सः॥ १०५

मुख्ये पचति चैत्रः स्याच् चैत्रो मुख्यो विनिश्चितः ।
स्थाली पचति गौणो स्यात् प्राधान्यं वक्तुरिच्छया ॥ १०६

५६१ । साधकतमं करणम् । १।४।४२

क्रियासिद्धौ प्रकृष्टं यत् कथितमुपकारकम् ।
तदिह करणं ज्ञेयं पश्यति चक्षुषा यथा ॥ १०७

साधकतममित्यत्र मुनिना पठितं तमप् ।
प्रवृत्तिः स्याद् यथा मुख्ये तथा मुनि र्विचेष्टते ॥ १०८
न पठितं तमब् यत्र न यत्र नियमः क्वचित् ।
स्यान् मुख्ये स्यात् तथा गौणे युज्यते यत्र यद् यदा ॥ १०९

अस्ति शास्त्रे पुनर्न्यायो गौणमुख्यः स कीर्तितः ।
एतत् सूत्रं विना न्यायो न कुत्रापि प्रवर्त्तते ॥ ११०
ज्ञापकं स्यादिदं सूत्रं ज्ञापयति तथा मुनिः ।
गृहाण तमपा मुख्यं गौणं मुख्यं विना तमप् ॥ १११
साधकतममित्यत्र मुनिना विधृतं तमप् ।
मुख्यं ततो भवेद् ग्राह्यं मुख्ये हि "चक्षुषा" मतम् ॥ ११२
"आधार" इति सूत्रे तु न तमब् मुनिना धृतम् ।
मुख्यं गौणं द्वयं ग्राह्यमेकतरे न हि स्थितिः ॥ ११३
"गङ्गायां घोष" इत्यत्र गौणाधारः समर्थितः ।
न पठितं तमप् तत्र गौणोऽपि कारकं भवेत् ॥ ११४
यद्यपि स्यान् मितं वाच्यं तथापि भाषितं बहु ।
कस्यचिद् विस्तरे वाञ्छा स्वल्पे मिते च कस्यचित् ॥ ११५

५६२ । कर्त्तृकरणयोस्तृतीया । २।३।१८

कर्त्तृकरणयोस्तत्र तृतीया स्यात् सतां मते ।
देवदत्तेन भुक्तं स्यात् कुठारेण लुनाति च ॥ ११६

तृतीयाविधाने प्रकृत्यादीनामुपसंख्यानम् (वा)

तृतीया स्यान् प्रकृत्यादौ प्रकृत्या शीतलं पयः ।
प्रकृत्या चारु ज्ञेयश्च प्रायेण याज्ञिकस्तथा ॥ ११७
गार्ग्यो गोत्रेण तद्वत् स्याद् विषमेन च धावति ।
पञ्चकेन पशुः क्रीतः स्यादत्र च निदर्शनम् ॥ ११८

५६३ । दिवः कर्म च । १।४।४३

यत् साधकतमं ज्ञातं करणं तत् प्रकीर्त्तितम् ।
दिवश्चेत् तद् भवेत् कर्म करणं च "च"कारतः ॥ ११९
अक्षान् दीव्यति विज्ञेयं काशिकायां निदर्शनम् ।
अक्षैर्दीव्यति चापि स्यात् कारकं करणं तदा ॥ १२०

५६४ । अपवर्गे तृतीया । २।३।६

अपवर्गे तृतीया स्यात् कालाध्वनोरिति स्थितिः ।
अपवर्गः क्रियाशेषे फलप्राप्तिरुदीरितः ॥ १२१
व्याकरणमधीतं हि मासेन स्यान्निदर्शनम् ।
व्याकरणमधीतं हि क्रोशेन स्यात् तथा पुनः ॥ १२२

५६५ । सहयुक्तेऽप्रधाने । २।३।१९

सहयुक्तेऽप्रधाने च तृतीया स्यात् सतां मते ।
निदर्शनं च पुत्रेन सहागतः पिता यथा ॥ १२३

५६६ । येनाङ्गविकारः । २।३।२०

स्याद् येनाङ्गविकारो हि तृतीया सम्मता ततः ।
अक्ष्णा काणो भवेदत्र तृतीयायां निदर्शनम् ॥ १२४
"अङ्ग"श्च समुदाये स्यादंशे "येन" मतो भवेत् ।
येनांशेन विकारः स्यात् तृतीया च ततो मता ॥ १२५

५६७ । इत्थंभूतलक्षणे । २।३।२१

प्राप्तः कञ्चित्प्रकारं स्यादित्थंभूतमिति स्थितिः ।
तस्य तु लक्षणं यत् स्यात्तदित्थंभूतलक्षणम् ॥ १२६
तृतीया च ततो ज्ञेया जटाभिस्तापसो यथा ।
उपाध्यायस्तथा छात्रैः काकंगृहं निदर्शनम् ॥ १२७

५६८ । संज्ञोऽन्यतरस्यां कर्मणि । २।३।२२

संज्ञश्चान्यतरस्यां स्यात्तृतीया तु सतां मते ।
यथाप्राप्ता द्वितीया स्यादुभयत्र च कर्मणि ॥ १२८
पित्रा वा पितरं बालः संजानीते निदर्शनम् ।
मात्रा वा मातरं बालं संजानीते तथापरम् ॥ १२९

५६९। हेतौ। २।३।२३

फलस्य साधने हेतौ तृतीया कीर्त्तिता बुधैः।
दर्शितं कन्यया शोको विद्यया च यशस्तथा॥ १३०
हेतुरयं भवेद् वा कः करणं किं पुनर्भवेत्।
कः पुनरनयोर्भेदः कथयामि सविस्तरम्॥ १३१
भवति विषयो हेतो द्रव्यं गुणस्तथा क्रिया।
विषयः स्यात् त्रिधा हेतौ यौवा को वा भवेदिह॥ १३२
कदाचिद् विषयो द्रव्यं दण्डेनेह यथा घटः।
विषयः स्याद् गुणो वापि धनेन हि कुलं भुवि॥ १३
विषयः स्यात् क्रिया चापि पुण्येन दर्शनं हरेः।
द्रव्यं गुणः क्रिया चेति दर्शितो विषयस्त्रिधा॥ १३३
व्यापारो नियतो नास्ति कुचिदस्ति क्वचिन्न च।
व्यापारः स स्थितश्चाद्ये न स्थितः परयोर्द्वयोः॥ १३४
करणे विषयस्तत्र क्रिया चैका हि केवलम्।
व्यापारो नियतश्चापि न भवेदन्यथा क्वचित्॥ १३५
कुठारेण छिनत्तीति छिदिक्रिया फलं भवेत्।
उत्पतनादिकं तत्र व्यापारश्च स्थितः पुनः॥ १३६
यथा तथा भवेद्वापि न च सूक्ष्मे रुचिर्मम।
जानामि यदहं स्थूलं शृणु भ्रातर्ब्रवीमि तत्॥ १३७
व्यापारवद् यदा प्रोक्तं कारकं करणं कुरु।
व्यापारेण यदा हीनं तदा हेतुं गृहाण तम्॥ १३८
अन्वयः क्रियया यत्र तत्रैव कारकं भवेत्।
अन्वयः क्रियया चेन्न हेतोरवसरस्तदा॥ १४०

चतुर्थी विभक्तिः

५७०। कर्मणा यमभिप्रैति स सम्प्रदानम्। १।४।३२

कर्मणा यमभिप्रैति सम्प्रदानं भवेद्धि तत्।
विप्राय गां ददातीति भवेदिह निदर्शनम्॥ १४१
संज्ञायां "दा"-प्रवेशाच्च केचित् दानं प्रचक्षते।
यत्र स्याद् ददातेः कर्म तत्रैव कारकं भवेत्॥ १४२
केचिदाहुर्न तन् न्याय्यं न दानं केवलं मतम्।
क्रियामात्रमिह ग्राह्यं तेन लक्ष्यं हि सिध्यति॥ १४३

ईशयति सुतं माता चन्द्रामिति यदा भवेत् ।
तदापि कारकं सिध्येत् सम्प्रदानं च कारकम् ॥ १४४
इहोपलक्षणं दानं क्रियामात्रं हि लक्षितम् ।
"कर्मणे"ति मुनिः प्राह न प्राह "दान"कर्मणा ॥ १४५

५७१ । चतुर्थी सम्प्रदाने । २।३।१३

चतुर्थी सम्प्रदाने स्याद् गुरवे गां ददाति सः ।
स्पृहयते च पुष्पेभ्यो देवदत्ताय रोचते ॥ १४६

वार्त्तिकम्

१) चतुर्थीविधाने तादर्थ्ये उपसंख्यानम् ।
२) कॢपि सम्पद्यमाने चतुर्थी वक्तव्या ।
३) उत्पातेन ज्ञाप्यमाने चतुर्थी वक्तव्या ।
४) हितयोगे चतुर्थी वक्तव्या ।

कॢपि सम्पद्यमाने च तादर्थ्ये च तथा हिते ।
उत्पातज्ञापिते चैव चतुर्थी वार्त्तिकाद्भवेत् ॥ १४७
यूपाय दारु तादर्थ्ये गोभ्यो हितं हिते युते ।
"वाताय कपिला विद्यु"दुत्पातज्ञापिते तथा ॥ १४८
स्वर्गाय कल्पते धर्मो विद्या सुखाय कल्पते ।
कॢपि सम्पद्यमाने च निदर्शनद्वयं भवेत् ॥ १४९

५७२ । रुच्यर्थानां प्रीयमाणः । १।४।३३

रुच्यर्थानां प्रयोगे स्यात् प्रीयमाणस्तथा पुनः ।
हरये रोचते भक्तिर्भवेदिह निदर्शनम् ॥ १५०
प्रीयमाणो न चेत् न स्यात् सम्प्रदानमिति स्थितिः ।
मोदको रोचते तस्मै पथीति न तथा पुनः ॥ १५१

५७३ । श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः । १।४।३४

एभिर्व्वोधयितुमिष्टं सम्प्रदानं प्रकीर्त्तितम् ।
कृष्णाय श्लाघते गोपी स्मरादिति निदर्शनम् ॥ १५२
ह्नुते च तिष्ठते तद्वत् शपते च तथा भवेत् ।
ज्ञीप्स्यमानो न चेन्न स्यात् कृष्णस्य श्लाघते पथि ॥ १५३

५७४ । धारेरुत्तमर्णः । १।४।३५

धारयतेः प्रयोगे स्यादुत्तमर्णस्तथा पुनः ।
धारयति हरिर्मोक्षं भक्तायेति निदर्शनम् ॥ १५४

उत्तमर्णो न चेत् लक्ष्यः सम्प्रदानं भवेन्नहि ।
धारयति शतं ग्रामे न स्याद् ग्रामे तथा पुनः ॥ १५५

५७५ । स्पृहेरीप्सितः । १।४।३६

स्पृहयतेः प्रयोगे स्यादीप्सितोऽपि तथा पुनः ।
स्पृहयति फलेभ्यः स्यान्निदर्शनं स्पृहेरिह ॥ १५६
उत्कमीप्सितमात्रं चेदियं संज्ञा प्रवर्त्तते ।
प्रकर्षश्चेद् भवेद् युक्तः कर्मैव कारकं भवेत् ॥ १५७
स्पृहयति फलं रामः प्रकर्षे दर्शितं पुनः ।
तदीप्सिततमं कर्त्तुः "कर्म"सूत्रं ततो लगेत् ॥ १५८

५७६ । क्रुध-द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः । १।४।३७

क्रोधे द्रोहे तथेर्ष्यायामसूयने तथा पुनः ।
धातुश्चेत् वर्त्तते कश्चित् कोपपात्रं भवेत्तथा ॥ १५९
क्रुध्यते हरये रामो भवेदिह निदर्शनम् ।
द्रुह्यति हरये राम ईर्ष्यति चाप्यसूयति ॥ १६०
सम्प्रदानं न पुनः स्यान्न चेत् कोपः प्रतीयते ।
भार्य्यामीर्ष्यति रामः स्यान्न कोपो गम्यते तथा ॥ १६१
पर एनां न पश्येत् स्यादेवं हि मनसो गतिः ।
न कोपविषयो भार्य्या कोपस्य विषयः परः ॥ १६२
क्रोधोऽमर्षः क्षतिर्द्रोह ईर्ष्या स्यादसहिष्णुता ।
गुणे दोषसमारोपः स्यादसूया सतां मते ॥ १६३
सर्व्वे कोपभवा ज्ञेया सर्व्वे कोपसमुत्थिताः ।
कोपस्य ग्रहणात् सूत्रे सर्व्वेषां ग्रहणं भवेत् ॥ १६४

५७७ । क्रुधद्रुहोरुपसृष्टयोः कर्म । १।४।३८

सम्प्रदाने स्थिते तत्र विशेषः कथ्यते पुनः ।
उपसर्गयुतस्यास्ति क्रुधद्रुहोर्व्विशेषता ॥ १६५
सम्प्रदानं न तदा स्यात् स्याच्च कर्म तथा सति ।
अभिक्रुध्यति भृत्याय कर्मणि स्यान्निदर्शनम् ॥ १६६

५७८ । राधीक्ष्योर्यस्य विप्रश्नः । १।४।३९

सम्प्रदानं च राधीक्ष्यो विप्रश्नो गम्यते यदि ।
कृष्णाय राध्यतीत्यत्र शुभाशुभं निरीक्षते ॥ १६७

५७९। प्रत्याङ्भ्यां श्रुवः पूर्व्वस्य कर्त्ता। १।४।४०

पूर्व्वादिव स्थिता याच्ञा प्रतिज्ञा च परं स्थिता।
शृणोति प्रतिपूर्व्वः स्यादाङ्पूर्व्वश्च तथा पुनः॥ १६८
याच्ञाकर्त्ता भवेदत्र सम्प्रदानमिति स्थितिः।
प्रतिशृणोति विप्राय वस्त्रमिति निदर्शनम्॥ १६९

५८०। अनुप्रतिगृणश्च। १।४।४१

"पूर्व्वस्ये"ति स्थितं पूर्व्वात् "कर्त्त"ति च तथा स्थितम्।
पूर्व्वाद्धि स्थिते व्यापारे पूर्व्वकर्त्ता च पूर्व्ववत्॥ १७०
अनुगृणाति होत्रे स आदौ होता हि शंशति।
प्रोत्साहयति पश्चात्तमध्वर्य्युरिति गम्यते॥ १७१

५८१। परिक्रयणे सम्प्रदानमन्यतरस्याम्। १।४।४४

यत् साधकतमं तत्र तत् करणं भवेदिह।
सम्प्रदानं विभाषा तद् यदि क्रयः पुनर्मतः॥ १७२
भृत्या नियतकालं यत् स्वीकरणं भवेदिह।
तत् परिक्रयणं ज्ञेयं नहि चात्यन्तिकः क्रयः॥ १७३
परिक्रीतः शतेनेति शताय वा निदर्शनम्।
वेतनेन कियत् कालं नियोजित इति स्थितम्॥ १७४

५८२। क्रियार्थोपपदस्य च कर्मणि स्थानिनः। २।३।१४

प्रयुज्यते न धातुश्चेत्तदर्थश्चेत् प्रतीयते।
स स्थानी कथितः शास्त्रे तमाश्रित्य विधीयते॥ १७५
उपपदं क्रिया यत्र क्रियार्था स्यात् प्रयोगतः।
कर्मणि स्थानिनस्तत्र चतुर्थी स्यादिति स्थितिः॥ १७६
फलेभ्यो व्रजति स्याच्च पुनरिह निदर्शनम।
"आहर्त्तुं"मिति युक्तं न तथापि तत् प्रतीयते॥ १७७
आहृङ्धातुर्भवेत् स्थानी भवेत् कर्म फलानि च।
"आहर्त्तुं"तु क्रिया तत्र तदर्था व्रजतिक्रिया॥ १७८
क्रिया स्थिता क्रियार्था च स्थानी धातुस्तथा स्थितः।
कर्मण्यतश्चतुर्थी स्यात् फलेभ्यः स्यात् तथा पदम्॥ १७९

५८३। तुमर्थाच्च भाववचनात्। २।३।१५

स्याद्भाववचनात्तत्र तुमर्थाच्च तथा पुनः।
पाकाय व्रजति स्याच्च व्रजति भूतये तथा॥ १८०

५८४। नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च। २।३।१६

नमःस्वस्ती तथा स्वाहा स्वधा चालं वषट् पुनः।
एभिर्योगे चतुर्थी स्यात् पाणिनये नमो यथा॥ १८१
तथा स्वस्ति प्रजाभ्यः स्यात् स्वाहाग्नये तथा भवेत्।
स्यात् पितृभ्यः स्वधा तद्वत् स्यादिन्द्राय वषट् तथा॥ १८२
स्वस्ति गोभ्यस्तथा भूयात् आशीरत्र विवक्षिता।
अलं मल्लो हि मल्लाय स्यादलमि निदर्शनम्॥ १८३

५८५। मन्यकर्मण्यनादरे विभाषाऽप्राणिषु। २।३।१७

अनादरो मतो यत्र कर्मणि मन्यतेस्तदा।
चतुर्थी विभाषा ज्ञेया प्राणिषु न तथा भवेत्॥ १८४
न त्वा बुसाय मन्ये स्यात् तृणं मन्ये विभाषया।
न त्वा बुसाय मन्ये स्यात् बुसं मन्ये तथैव च॥ १८५
मन्धातोः स्याद् दिवादीये न तथा स्याद् गणान्तरे।
अनादरे चतुर्थी स्यान् नार्थभेदे तथा पुनः॥ १८६
प्राणिषु न चतुर्थी स्यात् शृगालं मन्यते यथा।
यदेतत्प्राणिष्विति तदनावादिष्विति वक्तव्यम् (वा)
नावादिषु चतुर्थी न नावं मन्ये निदर्शनम्॥ १८७

५८६। गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि। २।३।१२

गत्यर्थानां प्रचेष्टायामनध्वनि च कर्मणि।
द्वितीया सम्मता ज्ञेया चतुर्थी च तथा पुनः॥ १८८
स ग्रामं गच्छति स्याच्च ग्रामाय च निदर्शनम्।
अध्वन्नर्थो भवेद् ग्राह्यो यथा मार्गं स गच्छति॥ १८९
चतुर्थी तु तदा वाच्या यदोत्पथात् गतिः पथि।
पथे स गच्छतीत्यत्र निदर्शनं प्रदर्शितम्॥ १९०

न चतुर्थी न चेष्टा चेद् द्वितीया स्याच्च कर्मणि।
जातिस्मरो गृहं पूर्वं गच्छति मनसा मुदम्॥ १९१
न तु देहे परिस्पन्दः संयोगो मनसा सह।
एवन्तु प्रायशो दृष्टं जातिस्मरे सदा भुवि॥ १९२

पञ्चमी विभक्तिः

५८७। ध्रुवमपाये अपादानम्। १।४।२४

अपाये यद् ध्रुवं स्यात्तदपादानं प्रकीर्त्तितम्।
ध्रुवमवधिभूतं स्यात् स्थिरं तदस्थिरं पुनः॥ १९३
"ध्रु" गतौ स्यात् तथा स्थैर्य्ये ततो ध्रुवं पदं भवेत्।
धातुना यद् द्वयं प्रोक्तं पदेऽपि तद् द्वयं स्थितम्॥ १९४
आगच्छति हरिर्ग्रामात् स्थिरे भवेन्निदर्शनम्।
धावतोऽश्वाद् हरिर्भ्रष्टः स्यादस्थिरे तथा पुनः॥ १९५

निर्द्दिष्टविषयं तत् स्यादुपात्तविषयं पुनः।
अपेक्षितक्रियं तत् स्यादपादानं त्रिधा स्थितम्॥ १९६
क्रिया स्थिता भवेदादौ भवेदूह्या क्रिया परे।
क्रिया शून्या भवेच्च् शेषे त्रिषु त्रिलक्षणं स्थितम्॥ १९७
पतति पर्व्वतात् तत्र पततीति क्रिया स्थिता।
कुसूलात् पचतीत्यादौ "समादाये"ति गम्यते॥ १९८
"कुतो भवान्" "मठात्" स्याच्चेदिह क्रिया न विद्यते।
कथितं तु मया स्थूलं सूक्ष्मं मया न दर्शितम्॥ १९९
स्थितो ग्रन्थः स्थिता बुद्धिः स्थाने स्थितं समाहर।
हरिणा कथितं पूर्व्वं परो हरिर्विजृम्भते॥ २००

५८८। अपादाने पञ्चमी। २।३।२८

पञ्चमी स्यादपादाने पर्व्वतादवरोहति।
स्याद्बिभेति वृकेभ्यश्च स्याच्च पतितस्तथा॥ २०१

वार्त्तिकम्

१) पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसंख्यानम्।
२) अधिकरणे चोपसंख्यानम्।
३) प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या।
४) यतश्चाध्वकालनिर्माणं ततः पञ्चमी वक्तव्या।
५) तद्युक्तात् काले सप्तमी च वक्तव्या।
६) अध्वनः प्रथमा सप्तमी च वक्तव्या।

१) ल्यबलोपे कर्मणि स्यात् पञ्चमीति तु वार्त्तिकम् ।
प्रासादात् प्रेक्षते ज्ञेयं निदर्शनं पुनस्ततः ॥ २०२
२) स्यादधिकरणे चापि ल्यब्लोपे पञ्चमी तथा ।
आसनात् प्रेक्षते ज्ञेयं शयनात् प्रेक्षते पुन ॥ २०३
३) यत्र प्रश्नस्तथाख्यानं मता तत्र हि पञ्चमी ।
कुतो भवानिति प्रश्ने हरिणाया भवेदिति ॥ २०४
४) यतोऽध्वा च यतः कालो मीयते पञ्चमी ततः ।
हरिणाया बटाखोला योजनैकं भवेद् यथा ॥ २०५
५) आषाढात् श्रावणे मासे काले भवेन्निदर्शनन् ।
अध्वनि च तथा काले निदर्शनं प्रदर्शितम् ॥ २०६
६) भवेत् परिमिते काले सप्तमीति मतं सताम् ।
आषाढात् श्रावणे मासे यथापूर्ब्वं निदर्शनम् ॥ २०७

५८९। भीत्रार्थानां भयहेतुः। १।४।२५

भये त्राणे यदा हेतुः क्रियया स्यात् प्रदर्शितः ।
तदा हेतुरपादानं भवेदिह सतां मते ॥ २०८
व्याघ्राद् जना बिभेति स्याद् व्याघ्रादुद्विजते जनः ।
चौरात्र त्रायते तद्वत् चौरात् पुनश्च रक्षति ॥ २०९

इह कथमपायः स्यादपादानं कथं स्थितम् ।
इति पृच्छा वरीवर्त्ति तदुत्तरं गृहाण मे ॥ २१०
प्राप्य बुद्ध्या निवृत्तश्चेदपायः सुस्थितः खलु ।
अपाये सुस्थिते स्थेयमपादानं तदाश्रयम् ॥ २११
व्याघ्राद् जनो विभेतीति भवेत् पुन र्निदर्शनम् ।
व्याघ्रो वा मां निहन्तीति प्राप्य बुद्ध्या निवर्त्तते ॥ २१२

५९०। पराजेरसोढः। १।४।२६

जयतेः स्यात् परापूर्ब्वात् प्रयोगो वाक्यतो यदि ।
सोढुं शक्यं न स्याद् यत् तदपादानं प्रकीर्त्तितम् ॥ २१३
स पराजयते पाठाद् भवेदिह निदर्शनम् ।
पराजयते शत्रून् स्यान् न चेदसहनं मतम् ॥ २१४

५९१ । वारणार्थानामीप्सितः । १।४।२७

योगे च वारणार्थानामीप्सितः स्यात्तथा पुनः ।
वारयति यवेभ्यो गां भवतीह निदर्शनम् ॥ २१५
ईप्सितं स्यादपादानमनीप्सिते तथा न च ।
वारयति यवेभ्यो गाः क्षेत्रे इति न पञ्चमी ॥ २१६

५९२ । अन्तर्द्धौ येनादर्शनमिच्छति । १।४।२८

अन्तर्द्धानं स्फुटं यत्र नेच्छति दर्शनं पुनः ।
येन न दर्शनं काम्यमपादानं मतं हि तत् ॥ २१७
मातुर्निलीयते कृष्णो भवेदिह निदर्शनम् ।
न मात्रा दर्शनं कृष्णः काम्यतीति पलायते ॥ २१८
अन्तर्द्धानं न चेत्तत्र न कारकं प्रयुज्यते ।
दिदृक्षते न चौराण् स नान्तर्द्धानं न पञ्चमी ॥ २१९
नेच्छति दर्शनं यत्र दर्शनं स्यात् तथापि चेत् ।
तत्रापि स्यादपादानं वृद्धान् नारी निलीयते ॥ २२०

५९३ । आख्यातोपयोगे च । १।४।२९

स्यादाख्यातोपयोगेऽपि कारकं च तथाविधम् ।
यदि स्यान्नियमः कश्चिदुपाध्यायादधीतवान् ॥ २२१
नियमो यदि कश्चिन्न नापादानं तदा भवेत् ।
शृणोति स नटस्येति न नियमो न पञ्चमी ॥ २२२

५९४ । जनिकर्त्तुः प्रकृतिः । १।४।३०

जायमानस्य हेतुः स्यादपादानमिति स्थितिः ।
असतो जनने सूत्रभूतस्य समुद्भवे ॥ २२३
प्रजायते पितुः पुत्रो भवेदिह निदर्शनम् ।
जायन्ते ब्रह्मणो जीवा दर्शितं च तथा पुनः ॥ २२४

५९५ । भुवः प्रभवः । १।४।३१

भुवस्तु प्रभवस्तद्वदपादानं भवेदिह ।
सिद्धस्य प्रथमे ज्ञाने सूत्रमिदं प्रवर्त्तते ॥ २२५
अत्र हिमवतो गङ्गा प्रभवति निदर्शनम् ।
स्थिता गङ्गा परं ज्ञाता हिमालये प्रकाशने ॥ २२६

५९६। अन्यारादितरर्त्ते दिक्‌शब्दाञ्चूत्तरपदाजाहियुक्ते। २।३।२९

अन्यारादितरर्त्ते दिगाजाहितश्च पञ्चमी।
अञ्चूत्तरपदात् तद्वत् पञ्चमीति मतं सताम्॥ २२७
एतदर्थात् पदाच्चापि पञ्चमी स्यादिति स्थितिः।
अन्यो भिन्नो हरेः शंयं पुनरिह निदर्शनम्॥ २२८
स्यादारादितरो रामादृते रामात्तथा भवेत्।
पूर्व्वो ग्रामाच्च दिक्‌शब्दादाहि ग्रामाच्च दक्षिणा॥ २२९
स्याद्दक्षिणा पुनर्ग्रामादाहिना च निदर्शनम्।
अञ्चूत्तरपदाज् ज्ञेयं प्राग् ग्रामाद् हि तथा पुनः॥ २३०

५९७। अपपरी वर्जने। १।४।८८

अपपरी तथा स्यातां वर्ज्जनं चेत् प्रतीयते।
अपहरेश्च संसारः परिहरेस्तथा भवेत्॥ २३१

५९८। आङ् मर्य्यादावचने। १।४।८९

मर्य्यादा चेद् भवेदाङ् च तत्संज्ञक इति स्थितिः।
आकुमारं यशोलोके पाणिनेः स्यान्निदर्शनम्॥ २३२
मर्य्यादाग्रहणाच्चात्र पुनरभिविधिर्मतः।
भवेद् आ सकलाद् ब्रह्म पुनरिह निदर्शनम्॥ २३३

५९९। पञ्चम्यपाङ्परिभिः। २।३।१०

कर्मप्रवचनीयाश्चेदपाङ्परि तथा पुनः।
पञ्चमी स्यात् सतां तत्र परि च वर्ज्जने धृतम्॥ २३४
वृष्टोऽपहरिणायाः स्यादपयोगे निदर्शनम्।
वृष्ट आ हरिणायाः स्यादाङ्योगे च तथा पुनः॥ २३५

६००। प्रतिः प्रतिनिधिप्रतिदानयोः। १।४।९२

प्रतिः प्रतिनिधौ तद्वत् प्रतिदाने तथा प्रतिः।
प्रद्युम्नं प्रति कृष्णः स्यात् पुनरिह निदर्शनम्॥ २३६

६०१। प्रतिनिधिप्रतिदाने च यस्मात्। २।३।११

प्रतिनिधिर्यतो यस्मात् प्रतिदानं च सम्मतम्।
कर्मप्रवचनीये स्यात् तत्र च पञ्चमी सदा॥ २३७
कृष्णं प्रति हि प्रद्युम्नो भवेदिह निदर्शनम्।
तिलेभ्यः प्रति माषान् स पञ्चति स्यात् तथा परम्॥ २३८

६०२ । अकर्त्तर्य्यणे पञ्चमी । २।३।२४

पञ्चमी स्यादृणे हेतौ कर्त्तरि न तथा भवेत् ।

शताद्व बद्धः सहस्राद्व वा निदर्शनं भवेदिह ॥ २३९

शतेन बन्धितो यत्र तत्र कर्त्ता प्रयोजकः ।

ततस्तत्र तृतीयैव न पञ्चमी विधीयते ॥ २४०

६०३ । विभाषा गुणेऽस्त्रियाम् । २।३।२५

गुणेऽस्त्रियां विभाषा स्यात् पञ्चमीति मतं सताम् ।

जाड्याद्बद्धो भवेदत्र जाड्येन वा निदर्शनम् ॥ २४१

न पञ्चमी भवेत् स्त्रियां बुद्ध्या मुक्तो यथा भवेत् ।

सर्व्वत्रैव मता हेतौ न विधिः स्यादहेतुके ॥ २४२

६०४ । पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् । २।३।३२

पृथग् विना तथा नाना भवेदेषां विभाषया ।

तृतीयेति मनीषीनां पञ्चमी च तथा भवेत् ॥ २४३

पृथग् विना तथा नाना रामेन स्यान्निदर्शनम् ।

रामाद्रामं तथा स्याच्च योगविभाषया पुनः ॥ २४४

६०५ । करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य । २।३।३३

स्तोकमल्पं तथा कृच्छ्रं कतिपयं तथा पुनः ।

एभ्यः पुनर्व्विभाषातः तृतीया करणे मता ॥ २४५

पक्षे स्यात् पञ्चमी तेश्च निदर्शनं च दीयते ।

स्तोकेन वा तथा स्तोकान् मुक्त इति निदर्शनम् ॥ २४६

अल्पान् मुक्तस्तथाल्पेन निदर्शनं तथा परम् ।

कृच्छ्रेन वा तथा कृच्छ्रान् मुक्तः स्याच्च परं पुनः ॥ २४७

मुक्तः कतिपयाज् ज्ञेयं मुक्तः कतिपयेन च ।

असत्त्ववचने चैतन् न सत्त्वे तु तथा भवेत् ॥ २४८

अल्पेन मधुना मत्त इति सत्त्वे निदर्शनम् ।

नित्या सत्त्वे तृतीयेति न पञ्चमी विभाषया ॥ २४९

क्रियाविशेषणं यत्र न तत्र स्यात्तु कर्मणि ।

स्तोकं मुञ्चति तत्र स्यात् स्तोकं क्रियाविशेषणम् ॥ २५०

६०६ । दूरान्तिकार्थेभ्यो द्वितीया च । २।३।३५

भवेद्दूरान्तिकार्थाच्च द्वितीयाऽपि तथा पुनः ।

दूरं दूरेन दूराद्वा ग्रामाद् भवेन्निदर्शनम् ॥ २५१

स्यात् प्रातिपदिकार्थश्च वचनं सम्मतं पुनः ।
सत्त्वशब्दाद् विभक्तिस्तु यथायथं भविष्यति ॥ २५२
दूरः पन्थाः प्रयोगः स्याद् दूराय च पथे तथा ।
स्याद् दूरस्य पथः स्वश्च स्वत्वे पुनर्निदर्शनम् ॥ २५३

षष्ठी विभक्तिः

६०७ । षष्ठी शेषे । २।३।५०

यः प्रातिपदिकार्थः स्यात् कारकार्थो भवेच्च यः ।
तयोर्भिन्नः स्व-स्वाम्यादिभावः शेषः प्रकीर्त्तितः ॥ २५४
शेषे षष्ठी विभक्तिः स्यात् पितुः पुत्रो निदर्शनम् ।
सम्बन्धे स्याद् विवक्षातः सतां गतं तथा भवेत् ॥ २५५

६०८ । षष्ठी हेतुप्रयोगे । २।३।२६

षष्ठी हेतुप्रयोगे स्याद् निदर्शनं यथा परम् ।
वसत्यन्नस्य हेतोः स हेतुशब्दः प्रयुज्यते ॥ २५६

६०९ । सर्व्वनाम्नस्तृतीया च । २।३।२७

सर्व्वनाम्नस्तृतीया च यदि हेतुः प्रयुज्यते ।
हेत्वर्थे चापि तृतीया स्यात् षष्ठी वापि भवेत् खलु ॥ २५७
वसति केन वा कस्य हेतोरिति निदर्शनम् ।
वसति कस्य हेतुः स्याद् येन च हेतुना तथा ॥ २५८

वार्त्तिकम्

१) निमित्तकारणहेतुषु सर्व्वासां प्रायोदर्शनम् ।

निमित्तकारणे हेतौ सर्व्वासां प्रायदर्शनम् ।
किं केन कस्य कस्मै वा कस्मात् कस्मिन् भवेत् खलु ॥ २५९
वसति किं निमित्तं स्याद्द्वितीयायां निदर्शनम् ।
तृतीयायां भवेत् केन निमित्तेन तथा पुनः ॥ २६०
तथा कस्मै निमित्ताय चतुर्थ्यां स्यान्निदर्शनम् ।
भवेत् कस्मान्निमित्ताच्च पञ्चम्यान्तु तथा पुनः ॥ २६१
स्यान्निमित्तस्य कस्य वा षष्ठ्यां तत्र निदर्शनम् ।
स्यात् कस्मिन् निमित्ते पुनर्यत्र तु सप्तमी मता ॥ २६२
वसतीति पदं योज्यं सर्व्वत्रैव यथायथम् ।
प्रथमावर्जिताः सर्व्वाः षड़ेव स्युर्विभक्तयः ॥ २६३

६१० । षष्ठ्यतसर्थप्रत्ययेन । २।३।३०

षष्ठी स्यादतसर्थाच्च निदर्शनं भवेदिह ।
ग्रामयोत्तरतः पन्था सरस्तस्य च पूर्व्वतः ॥ २६४

६११ । एनपा द्वितीया । २।३।३१

एनपा स्याद्द्वितीया च षष्ठ्यपि च ततो भवेत् ।
ग्रामस्य दक्षिणेन स्यात् ग्रामं वेति निदर्शनम् ॥ २६५

६१२ । दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् । २।३।३४

षष्ठी दूरान्तिकार्थैः स्यात् पञ्चमी च विभाषया ।
ग्रामाद् ग्रामस्य वा दूरं स्यादन्तिकं निदर्शनम् ॥ २६६

६१३ । ज्ञोऽविदर्थस्य करणे । २।३।५१

जानाति स्यान् न चेदर्थः करणं स्याच्च कारकम् ।
करणे तत्र षष्ठी स्याद् जानीते मधुनो यथा ॥ २६७
मधुना करणेनेह प्रवर्त्तते इति स्मृतम् ।
जानातिना प्रवृत्तिः स्यात् पुनरिह विवक्षिता ॥ २६८
मिथ्याज्ञानं तदर्थो वा तथाज्ञानं पुनर्मतम् ।
मिथ्याज्ञानात् तथाज्ञानात् जन इह प्रवर्त्तते ॥ २६९

६१४ । अधीगर्थदयेशां कर्मणि । २।३।५२

अधीगर्थदयेशात् स्यात् पुनः षष्ठी च कर्मणि ।
यदि तत्र विवक्षा स्याद् यदि शेषः प्रकीर्त्तितः ॥ २७०
मातुरध्येति बालः स्यादधीगर्थे निदर्शनम् ।
सर्पिषो दयते स्याच्च स्यादीष्टे च तथा पुनः ॥ २७१
न कर्म चेन् न षष्ठी स्यान् मातुर्गुणैः स्मरेद् यथा ।
न शेषश्चेन्न षष्ठी च स्मरति मातरं यथा ॥ २७२

६१५ । कृञः प्रतियत्ने । २।३।५३

प्रतियत्नो गुणाधानं शेषे षष्ठी च कर्मणि ।
स्यादुपकुरुते शास्त्रं पत्रस्येति निदर्शनम् ॥ २७३

६१६ । रुजार्थानां भाववचनानामज्वरेः । २।३।५४

यदि रुजा भवेदर्थो "ज्वरि"-धातु र्न युज्यते ।
स्याद्भावकर्त्तृकानाञ्च रुजार्थानां तथा पुनः ॥ २७४

कर्मणि कारके शेषे षष्ठीह स्याद् विवक्षातः।
चौरस्य रुजति रोगो भवेदिह निदर्शनम् ॥ २७५

अज्वरि-सन्ताप् योरिति वक्तव्यम् (वा)

सन्तापेरपि योगाच्च षष्ठीह वाधिता भवेत्।
अज्वरिणा तथा चेह सन्तापिश्च स्मृतो भवेत् ॥ २७६

६१७। आशिषि नाथः। २।३।५५

कर्मणि स्यात्तथा शेषे आशीरर्थे च नाथतेः।
सर्पिषो नाथनं स्याच्च पुनरिह निदर्शनम् ॥ २७७
आशीरर्थो न चेत्तत्र न स्यात् षष्ठी तदा पुनः।
नाथति स नृपं भूमिं याचते इति गम्यते ॥ २७८

६१८। जासि-निप्रहन-नाट-क्राथ-पिषां हिंसायाम्। २।३।५६

जासेर्निप्रहनश्चापि नाटः क्राथस्तथा पिषः।
कर्मणि हिंसया षष्ठी यदि शेषो विवक्षितः ॥ २७९
निप्रौ तत्र विपर्य्यस्तौ व्यस्तौ वा संहतौ मतौ।
प्रणिहन् निप्रहन् स्याच्च प्रहन् निहन् तथा भवेत् ॥ २८०
उज्जासयति चौरस्य चौरस्य प्रणिहन्ति च।
निप्रहन्ति प्रहन्त्यपि निहन्त्यपि तथा पुनः ॥ २८१
उन्नाटयति चौरस्य क्राथयति तथैव च।
वृषलस्य पिनष्टि स्याद्द यथास्मृतं निदर्शनम् ॥ २८२
न चेद्धिंसा न षष्ठी स्याद्द भवेत् कर्म यथाश्रुतम्।
पिनष्टि पुरुषो धाना अहिंसायां हि कर्मता ॥ २८३

६१९। व्यवहृपणोः समर्थयोः। २।३।५७

व्यवहृ वर्त्तते द्यूते क्रयविक्रययोः पुनः।
तत्र कर्मणि षष्ठी स्याद् यदि शेषो विवक्षितः ॥ २८४
व्यवहारः शतस्येति द्यूतक्रीड़ा प्रतीयते।
प्रतीयते विकल्पेन वाणिज्यकरणं पुनः ॥ २८५
वर्त्तते च पुनर्द्यूते वाणिज्यकरणे पनः।
तत्र कर्मणि षष्ठी स्याद्द यदि शेषो विवक्षितः ॥ २८६

शतस्य पणते स्यात्र पुनस्तत्र निदर्शनम् ।
द्यूतक्रीड़ा भवेदर्थो वाणिज्यमथवा पुनः ॥ २८७
समार्थता न चेत्तत्र न षष्ठी स्यात् तदा मता ।
यथाप्राप्ता द्वितीया स्यात् ब्राह्मणं पनते हृदि ॥ २८८
इह स्तुतिः पनस्यार्थः पनः स्तुतौ प्रवर्त्तते ।
स्तवीति ब्राह्मणं हृदि भवेदर्थः समग्रतः ॥ २८९
न व्यवहृ स्तुतौ दृष्टो दृष्टः स्तुतौ पुनः पनः ।
अर्थतो न समौ तौ द्वौ नास्ति तत्र समार्थता ॥ २९०

६२० । विभस्तदर्थस्य । २।३।५८

कर्मणि स्याद् दिवः षष्ठी द्यूत-वाणिज्ययोः पुनः ।
शतस्य दीव्यति ज्ञेयं तत्र पुनर्निदर्शनम् ॥ २९१
न वाणिज्यं न चेद् द्यूतं न षष्ठी स्याद् दिवः पुनः ।
ब्राह्मणं दीव्यतीत्यत्र स्तुतेरर्थो हि गम्यते ॥ २९२

६२१ । विभाषोपसर्गे । २।३।५९

उपसर्गाद् विभाषा स्यादपवादो भवेदयम् ।
शतस्य प्रतिदीव्यति शतं वा स्यात् निदर्शनम् ॥ २९३
उपसर्गो न चेत्तत्र न विभाषा प्रवर्त्तते ।
नित्यं तत्र भवेत् षष्ठी शतस्येति यथाश्रुतम् ॥ २९४

६२२ । प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने । २।३।६१

देवता सम्प्रदानं चेद् हविश्च कर्मकारकम् ।
तदा प्रेष्यब्रुवोर्योगे षष्ठी स्यादिह कर्मणि ॥ २९५
निदर्शनं "मिह्याग्नये छागस्येति" भवेत् पुनः ।
न देवता न हव्यं वा न स्यात् षष्ठी तदा पुनः ॥ २९६

६२३ । कृत्वोऽर्थप्रयोगे कालेऽधिकरणे । २।३।६४

कालेऽधिकरणे षष्ठी कृत्वोऽर्थानां प्रयोगतः ।
द्विरह्नो भोजनं तत्र निदर्शनं प्रदर्शितम् ॥ २९७
इहापि वर्त्तते शेषे न शेषश्चेद् भवेन्न हि ।
द्विरहनि हरिर्भुङ्क्ते काले स्यात् सप्तमी पुनः ॥ २९८

६२४। कर्त्तृकर्मणोः कृति। २।३।६५

कृत्प्रयोगे भवेत् षष्ठी कर्त्तरीह च कर्मणि।
कर्त्तरि कृतिः कृष्णस्य गवां दोहश्च कर्मणि॥ २९९
कृति खलु भवेत् षष्ठी तद्धिते न तथा भवेत्।
कृतपूर्व्वी कटं चेति न षष्ठी तद्धिते मता॥ ३००

६२५। उभयप्राप्तौ कर्मणि। २।३।६६

कृति चेदुभयं प्राप्तं षष्ठी कर्मणि केवलम्।
आश्चर्य्यो हि गवां दोहोऽगोपेनेति निदर्शनम्॥ ३०१

स्त्रीप्रत्यययोरकाराकारयोर्नायं नियमः (वा)

अकश्चेत्स्यादकारो वा स्त्रीप्रत्ययस्ततः परम्।
न तत्र नियमश्चायं षष्ठी भवेदुभयथा॥ ३०२
भेदिका वा बिभित्सा वा रुद्रस्य जगतो यथा।
रुद्रस्य जगतश्चेति षष्ठी कर्त्तरि कर्मणि॥ ३०३

शेषे विभाषा (वा)

अकवर्ज्जमवर्ज्जं वा स्यादन्यः प्रत्ययो यदि।
नित्यं कर्मणि षष्ठी स्यात् कर्त्तरि तु विभाषया॥ ३०४
अकवर्ज्जमवर्ज्जं वा प्रत्ययः स्याद् यथा तथा।
तत्रापि गमकं लिङ्गमिति केचिच्च मन्वते॥ ३०५
विचित्रा जगतः सृष्टिः हरेर्व्वा हरिणा तथा।
अकवर्ज्जमवर्ज्जं च स्त्रियां क्तिनि निदर्शनम्॥ ३०६
न लिङ्गं गमकं ज्ञेयमिति केचिच्च मन्वते।
अकवर्ज्जमवर्ज्जं वा प्रत्ययो गमको भवेत्॥ ३०७
शिशुना पयसः पानं शिशोर्व्वेति निदर्शनम्।
अकवर्ज्जमवर्ज्जं च ल्युड़िह गमकं मतम्॥ ३०८

६२६। क्तस्य च वर्त्तमाने। २।३।६७

क्तस्य च वर्त्तमाने स्मात् षष्ठीति सूत्रितं पुनः।
राज्ञां मतस्तथा बुद्धः पूजितो वा निदर्शनम्॥ ३०९

६२७। अधिकरणवाचिनश्च। २।३।६८

यत्राधिकरणे क्तः स्यात् तत्र षष्ठी विधीयते।
इदमेषां गतं तत्र भवेत् पुनर्निदर्शनम्॥ ३१०

१२८। न लोकाव्ययनिष्ठाखलर्थतृणाम्। २।३।६९

लकारः स्यादुकारः स्यादुकश्च स्यात् तथाव्ययम्।
इदं सर्व्वं मिलित्वा स्याल् लोकाव्यय इति स्थितिः॥ ३११
शतृ शानच् क्वसु कानच् कि किन् ज्ञेयो लकारतः।
एतत् षट्कं लकारेण भवेद् ग्राह्यं समासतः॥ ३१२
क्तः क्तवतुर्भवेत् निष्ठा खलर्थो युच् प्रकीर्त्तितः।
शानन् चानश् तथा तत्र शतृश्च तृण् तृणा मतः॥ ३१३
एषां योगे भवेत् षष्ठी निदर्शनं गृहाण मे।
शतरि स्याद् गृहं गच्छन् लिहानो मधु शानचि॥ ३१४
क्वसौ स्याज् जग्मिवान् ग्रामं दधान वर्म्म कानचि।
पपिः सोमं भवेत् कौ च ददिर्गाः स्यात् पुनः किनि॥ ३१५
उप्रत्यये यशो लिप्सुरुकि जलं च वर्षुकः।
अव्यये स्यात् कटं कृत्वा पुनरिह निदर्शनम्॥ ३१६
क्ते प्रत्यये दिवं प्राप्तःक्तवतौ गतवात् गृहम्।
खलर्थं स्यात् पुनस्तत्र सुदुष्करं मया कृतम्॥ ३१७
शानन्ि स्यात् पुनः सोमं पवमानो निदर्शनम्।
पुत्रं मण्डयमानः स चानशि कीर्त्तितं पुनः॥ ३१८
व्याकरणमधीयन् स्यात् शतरि च निदर्शनम्।
तृणि भवेत् कटं कर्त्ता दर्शितं सर्व्वशो मया॥ ३१९

कमेरनिषेधः (वा)

कमेरुकि निषेधो न षष्ठी तत्र प्रवर्त्तते।
लम्पटः कामुको दास्यास्तत्र ज्ञेयं निदर्शनम्॥ ३२०

द्विषः शतुर्वा (वा)

द्विषः शतुर्भवेत् षष्ठी पुनरिह विभाषया।
द्विषन् मुरस्य वा मुरं भवेदिह निदर्शनम्॥ ३२१
एभिर्निषिद्ध्यते षष्ठी षष्ठी स्यात् कारके यदि।
यत्र शेषे विवक्षा स्यात् तत्र षष्ठी भवेत् खलु॥ ३२२
नरकस्य स जिष्णुः स्यात् शेषे षष्ठी यदा भवेत्।
कुर्व्वन् विप्रस्य तत्रैव पुनर्निदर्शनं धृतम्॥ ३२३

६२९। अकेनोर्भविष्यदाधमर्ण्ययोः। २।३।७०

अगन्तस्य न षष्ठी स्यात् काले पुनर्भविष्यति।
ओदनं भोजको याति भवेदकि निदर्शनम्॥ ३२४
इनश्चापि न षष्ठी स्याद् काले तत्र भविष्यति।
ग्रामं गमी भवेत्तत्र ग्रामं गामी तथा पुनः॥ ३२५
इन्नन्तस्य न षष्ठी स्याद् भविष्यदाधमर्ण्ययोः।
निदर्शनं शतं दायी दर्शितं काशिकाकृता॥ ३२६
आधमर्ण्यं न चेत्तत्र न भविष्यत् पुनर्यदि।
षष्ठी तत्र भवत्येव यवानां लावको यथा॥ ३२७

६३०। कृत्यानां कर्त्तरि वा। २।३।७१

नित्यं प्राप्ता स्थिता षष्ठी कृद्योगे कर्त्तृकर्मणोः।
कर्त्तरि कारके तस्य विकल्पं कल्पते मुनिः॥ ३२८
कृत्यानां योगतः षष्ठी कर्त्तरि स्याद् विभाषया।
कर्त्तव्यं भवतः कर्म भवता वा निदर्शनम्॥ ३२९
विकल्पः कर्त्तरि ज्ञेयः कर्मणि न तथा भवेत्।
गेयो मानवकः साम्नां नित्यं षष्ठी तु कर्मणि॥ ३३०
उभयप्राप्तौ कृत्या षष्ठ्याः प्रतिषेधो वक्तव्यः (वा)
उभयं चेद् भवेत् प्राप्तमुभयत्र निषिद्ध्यते।
ग्राममजा हि नेतव्या रामेणेति यथा भवेत्॥ ३३१
सिद्धान्तकौमुदीग्रन्थे वार्त्तिकं नेह दृश्यते।
अत्र योगविभागेन समाधानं प्रदर्शितम्॥ ३३२
"कृत्यानामि"ति भागः स्यात् पश्चात् स्यादनुवर्त्तनम्।
वर्त्तत "उभयप्राप्तौ" "न" पुनरनुवर्त्तते॥ ३३३

६३१। तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्। २।३।७२

पक्षे षष्ठी तृतीया वा तुल्यार्थैर्योगतः पुनः।
तुल्यः कृष्णस्य नेह स्यात् कृष्णेन वा निदर्शनम्॥ ३३४
तुला चेदुपमा चेद् वा न तृतीया विकल्प्यते।
तत्र तु केवलं षष्ठी न तुला नोपमा हरेः॥ ३३५

६३२। चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। २।३।७३

आयुष्यञ्च तथा मद्रं भद्रञ्च कुशलं तथा।
सुखमर्थौ हितमेभिश्चतुर्थी स्यात् सदाशिषि॥ ३३६
पक्षे षष्ठी भवत्येव चकारादनुकृष्यते।
निदर्शनमहं वच्मि यथादृष्टं यथाश्रुतम्॥ ३३७
आयुष्यं हरये भूयात् हरेश्चैव तथा पुनः।
मद्रं तस्मै पुनस्तस्य भद्रं तस्मै पुनस्तथा॥ ३३८
कुशलं च पुनस्तस्मै तस्येति वा भवेत् पुनः।
सुखं तस्मै हितं तस्मै अर्थस्तस्मै तथैव च॥ ३३९
सुखं तस्य हितं तस्य अर्थस्तस्य तथा पुनः।
एवं चान्यत्र विज्ञेयं यत्र यत्र प्रयोजनम्॥ ३४०
आयुष्यादीनां पर्य्यायग्रहणं कर्त्तव्यम् (वा)
चिरजीवितमायुष्यं हितं पथ्यं सुखं च शम्।
प्रयोजनं तथार्थश्च प्रयोगे दिक् प्रदर्शिता॥ ३४१
एवं सर्व्वत्र पर्य्याया ऊहनीयाः स्वबुद्धिभिः।
तथा तथा प्रयोक्तव्या यथा यथा रुचिर्भवेत्॥ ३४२

सप्तमी विभक्तिः

६३३। आधारोऽधिकरणम्। १।४।४५

कर्त्तृनिष्ठा क्रिया ज्ञेया कर्मनिष्ठा तथा पुनः।
तद्विधायाः क्रियायाः स्यादाधार इह कीर्त्तितः॥ ३४३
स औपश्लेषिको ज्ञेयो ज्ञेयो वैषयिकोऽपि सः।
स अभिव्यापको ज्ञेयस्त्रिधाधारो व्यवस्थितः॥ ३४४
वने सिंहस्तिले तैलं मोक्षे वाञ्छा निदर्शनम्।
त्रिविधं दर्शितं क्षेत्रं यथायथं समाहर॥ ३४५

६३४। सप्तम्यधिकरणे। २।३।३६

स्यादधिकरणे तत्र सप्तमीति सतां मतम्।
अन्तिकाञ्च तथा दूरात् तथैव सप्तमी पुनः॥ ३४६
आस्ते कटे भवेदादौ पुनरिह निदर्शनम्।
दूरे ग्रामस्य विज्ञेयमन्तिके च तथा भवेत्॥ ३४७

वार्त्तिकम्

१) सप्तमीविधाने क्तस्येन्विषयस्य कर्मण्युपसंख्यानम् ।
२) साध्वसाधुप्रयोगे च सप्तमी वक्तव्या ।
३) कारकार्हाणाञ्च कारकत्वे सप्तमी वक्तव्या ।
४) अकारकार्हाणाञ्च अकारकत्वे सप्तमी वक्तव्या ।
५) तद्विपर्य्यासे च सप्तमी वक्तव्या ।
६) निमित्तात् कर्मसंयोगे सप्तमी वक्तव्या ।

१) स्यात् क्तस्येन्विषयस्येह सप्तमी वार्त्तिकात् पुनः ।
अधीती छन्दसि छात्रो भवेदिह निदर्शनम् ॥ ३४८
२) साध्वसाधुप्रयोगे स्यात् सप्तमी च तथा पुनः ।
साधुर्मातरि स कृष्णः स्यादसाधुश्च मातुले ॥ ३४९
३) यदा तु कारकार्हाणां कारकत्वं प्रतीयते ।
सप्तमी स्यात् तदा तेषामर्हाणामिति वार्त्तिकात् ॥ ३५०
सत्सु तरत्सु सर्व्वेषु त्वसन्त आसते यथा ।
सतां हि तरणं न्याय्यं तरणात्ते च कारकाः ॥ ३५१
४) भवेदकारकार्हाणामकारकतया तथा ।
आसीनेषु दरिद्रेषु धनिनो भुञ्जते यथा ॥ ३५२
कारकार्हा न दरिद्रा आसीना स्युरकारकाः ।
सप्तमी स्यात् ततश्चात्र प्राचीनानां निदर्शने ॥ ३५३
५) यत्रार्हाणामनर्हत्वमनर्हाणा तथार्हता ।
विपर्य्यासे तदा ज्ञेया सप्तमीति च वार्त्तिकम् ॥ ३५४

क) अर्हाणामनर्हत्वे

सत्सु तिष्ठत्स्वसन्तस्ते तरन्तीति निदर्शनम् ।
सतां च तरणं न्याय्यं न तरन्ति न कारकम् ॥ ३५५

ख) अनर्हाणामर्हत्वे

तरत्स्वसत्सु सर्व्वेषु सन्तस्तिष्ठन्ति चापरम् ।
असन्तस्तरणार्हा न तरन्ति च तथार्हता ॥ ३५६
६) निमित्तात् कर्मसंयोगे सप्तमीति च वार्त्तिकम् ।
चर्मणि द्वीपिनं हन्ति भाष्ये धृतं निदर्शनम् ॥ ३५७

६३५। यस्य च भावेन भावलक्षणम्। २।३।३७

सप्तमी स्यात् क्रिया यत्र लक्षयति क्रियान्तरम्।
गवास्तं गते रामो जगामेति निदर्शनम्॥ ३५८

६३६। षष्ठी चानादरे। २।३।३८

षष्ठी चानादरे ज्ञेया सप्तमी "च"कारात् मता।
स्याद्रुदतः शिशोर्माता जगामेति निदर्शनम्॥ ३५९
स्याद्रुदति शिशौ माता जगामेति च सप्तमी।
अनादरे भवेद् भावे षष्ठी च सप्तमी तथा॥ ३६०

६३७। स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च। २।३।३९

परे स्वामी भवेद् यस्मादीश्वरश्च पुनः परे।
अधिपतिः परे यस्मात् साक्षी यस्मात् परे भवेत्॥ ३६१
प्रतिभूश्च परे यस्मात् प्रसूतश्च भवेत् परे।
तस्मादिह भवेत् षष्ठी सप्तमी च तथा भवेत्॥ ३६२
गवां स्वामी भवेत् षष्ठी गोषु स्वामी च सप्तमी।
ऊहनीयं सर्व्वत्रैव तद्वदिह निदर्शनम्॥ ३६३
प्राप्ता षष्ठी स्थिता तत्र पुनः षष्ठी विधीयते।
सप्तमी स्याद् यथा पक्षे तथा मुनि र्व्यचेष्टत॥ ३६४

६३८। आयुक्तकुशलाभ्याञ्चासेवायाम्। २।३।४०

आयुक्तो व्यापृतो ज्ञेयः कुशलो निपुणो मतः।
षष्ठी च सप्तमी ताभ्यामासेवा गम्यते यदि॥ ३६५
आसेवया च तात्पर्य्यं प्रकथितं बुधैरिह।
आयुक्तो हरिपूजायाः कुशलो वा निदर्शनम्॥ ३६६
आयुक्तो हरिपूजायाः कुशलो वा तथा भवेत्।
षष्ठी च सप्तमी तत्र द्वयमेव प्रदर्शितम्॥ ३६७
आसेवा स्यान्न चेद् गम्या न षष्ठी सप्तमी भवेत्।
आयुक्तः शकटे गौश्चेदीषद्युक्तः प्रतीयते॥ ३६८
आयुक्तकुशलाभ्याञ्च नेह पुनः प्रवर्त्तते।
इहाधिकरणे ज्ञेया सप्तमीति निबोध मे॥ ३६९

६३९। यतश्च निर्द्धारणम्। २।३।४१

पार्थक्यं विद्यते यत्र जाति-गुण-क्रियादिभिः।
तत्र निर्द्धारणे ज्ञेया षष्ठी च सप्तमी तथा॥ ३७०

अभेदे विभागो यत्र तत्र सूत्रं प्रवर्त्तते ।
विभागे च पुनर्हेतुर्जातिगुणास्तथा क्रिया ॥ ३७१
नृणां हि ब्राह्मणः श्रेष्ठो जातौ भवेन्निदर्शनम् ।
गवां कृष्णा बहुक्षीरा गुणे तत्र प्रदर्शितम् ॥ ३७२
धावंश्च गच्छतां शीघ्रः क्रियायां दर्शितं पुनः ।
नृषु गोषु च गच्छत्सु तत्र तत्र च सप्तमी ॥ ३७३

६४० । पञ्चमी विभक्ते । २।३।४२

सति निर्द्धारणे यत्र विभागः पुनः कल्प्यते ।
तत्र निर्द्धारणाश्रयात् पञ्चमी स्यादिति स्थितिः ॥ ३७४
भेदे यत्र विभागः स्यात् तत्र सूत्रं प्रवर्त्तते ।
बाधने च पुनः सूत्रं षष्ठीमिह च सप्तमीम् ॥ ३७५
पाटलिपुत्रकेभ्यः स्युराढ्यतरा हि माथुराः ।
भेदे चात्र विभागे स्यान्निदर्शनं सतां मते ॥ ३७६

६४१ । साधुनिपुणाभ्यामर्च्चायामप्रतेः । २।३।४३

न प्रतिर्युज्यते यत्र पुनरर्च्चा च गम्यते ।
साधुना निपुणेन स्यात् विभक्तिस्तत्र सप्तमी ॥ ३७७
रामो मातरि साधुर्व्वा निपुणो वा निदर्शनम् ।
रामो पितरि साधुर्व्वा निपुणो वा तथा पुनः ॥ ३७८
न सप्तमी न चेदर्च्चा साधुर्भृत्यो महीपतेः ।
इह तत्त्वकथा ज्ञेया नार्च्चा पुनः प्रतीयते ॥ ३७९
यत्र प्रतिः प्रयुक्तः स्याद् द्वितीया स्याद् यथाप्रति ।
मातरं प्रति साधुः स द्वितीयायां निदर्शनत् ॥ ३८०

अप्रत्यादिभिरिति वक्तव्यम् (वा)

"अप्रतेः" स्यान्न केवलं स्यादप्रत्यादिभिस्तथा ।
आदियोगात् परस्यापि ग्रहणं स्याद् यथोचितम् ॥ ३८१
दृश्यते च परेर्योगादनुयोगान्न सप्तमी ।
कर्मप्रवचनीयत्वाद् द्वितीया स्याद् यथाऽमृतम् ॥ ३८२
मातरि परि साधुः सः परियोगे निदर्शनम् ।
मातरमनु साधुः सः स्यादनौ च तथा पुनः ॥ ३८३

६४२ । प्रसितोत्सुकाभ्यां तृतीया च । २।३।४४

प्रसितेन तृतीया स्यादुत्सुकेन तथैव च ।
पक्षे च सप्तमी प्राप्ता चकारेण धृता भवेत् ॥ ३८४
प्रसितो हरिणा चैत्रो हरौ वा स्यान्निदर्शनम् ।
उत्सुको हरिणा चैत्रो हरौ वा स्यात्तथा पुनः ॥ ३८५

६४३ । नक्षत्रे च लुपि । २।३।४५

लुप्यति प्रत्ययो यत्र प्रत्ययार्थो न लुप्यति ।
तृतीया सप्तमी तत्र नक्षत्रात् स्यात्तदर्थकात् ॥ ३८६
"मूलेनावाहयेद्देवीं श्रवणेन विसर्जयेत् ।"
"मूलेन" च स्थितः शब्दः "श्रवणेन" स्थितः पुनः ।
इह स्यात् लक्षितः कालो शब्दो यदा तथा तथा ॥ ३८७

६४४ । सप्तमीपञ्चम्यौ कारकमध्ये । २।३।७

द्वयोः कारकयोर्मध्ये कालोऽध्वनौ च यौ मतौ ।
सप्तमी च भवेत्तयोः पञ्चमी च तथा पुनः ॥ ३८८
अद्य भुक्त्वा द्व्यहे भोक्ता द्व्यहाद् भोक्ता निदर्शनम् ।
क्रोशे लक्ष्यमिहस्थोऽयं क्रोशाल्लक्ष्यं च विध्यति ॥ ३८९

६४५ । अधिरीश्वरे । १।४।९७

स्व-स्वामिभावसम्बन्धे भवेदधिस्तथैव च ।
अधिभुवि स्थितो रामः अधिरामे तथा च भूः ॥ ३९०

६४६ । यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी । २।३।९

अधिकन्तु मतं यस्माद् यस्यैश्वर्य्यं मतं भवेत् ।
कर्मप्रवचनीयत्वे सप्तमी स्यात् ततः पुनः ॥ ३९१
भवेदुपपरार्धे च हरेर्गुणा निदर्शनम् ।
स्यादधिभुवि रामश्च निदर्शनं तथा पुनः ॥ ३९२

६४७ । विभाषा कृञि । १।४।९८

भवेदधिः करोतौ वा यदीश्वरो मतो भवेत् ।
निदर्शनं यदत्र त्वामधिकरिष्यतीति च ॥ ३९३
ईश्वरो विनियोगेन तदर्थं इह गम्यते ।
न गति र्न "तिङि" प्राप्तं न निघातस्तथा भवेत् ॥ ३९४

कारककारिका समाप्ता ।

ग्रन्थकृत्-परिचयः

भुवनो जनको यस्य माता यस्य मृणालिनी ।
प्रतिभा भगिनी यस्य भगिनी च मनोरमा ॥
हरिणायां जनिर्यस्य ढाकायामिति मण्डले ।
रामपुरहाटे यस्य स्थितिरिह च कर्मणा ॥
सोऽहं हरिपदो दत्तः करोमि कारिकामिह ।
अष्टादशशतात् परं पञ्चनवतिवर्षके ॥
वैशाखे तु धृतो ग्रन्थो ज्येष्ठे ग्रन्थः समापितः ।
विंशतिर्दिवसास्तावद् रचनायां गता मम ॥
सप्तदशं दिनं ज्येष्ठे गुरुवारः स्थितस्तदा ।
कृष्णपक्षे चतुर्द्दश्यां कृतिः समापिता मया ॥
"ऊर्म्मिः" कृता कृताः "कूहा" "लिपिः" "खुकी" कृता मया ।
"सम्पुट" च तथा "वर्षाशतकं" च मया कृतम् ॥
पाणिनीये तिङ् विषये "तिङ्कारिका" कृता मया ।
अस्मिन् ग्रन्थे स्थिताः श्लोकाः शतान्यष्टौ च सप्ततिः ॥

कारकप्रकरणे श्लोकाः — ३९४ ।

इति—

श्रीहरिपददत्तविरचितायां व्याकरणकारिकायां
प्रथमः खण्डः समाप्तः ।

तत्र प्रथमे खण्डे श्लोकाः—

संज्ञायाम्—	२३६
परिभाषायाम्—	१२२
सन्धौ—	५६०
शब्दाधिकारे—	३१२४
अव्यये—	२०
स्त्रीप्रत्यये—	३५१
कारके—	३९४
	४८०७

साकल्येन प्रथमे खण्डे श्लोकाः ४८०७ ।

———

व्याकरणकारिका

(प्रथमः खण्डः)

विषयसूची

व्याकरणकारिका

(भूमिका)

व्याकरणकारिका